Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ नाव्या नदी ]** नावा तार्या = नाव्या नदी । अनेन यप्र० । 'य्यक्ये' (१।२।२५) आव् । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ विष्य: ]** विषेण वध्यो वधार्ह: = विष्य: । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रु:' (२।१।७२) स० → र० ।।छा।

### न्यायार्थादनपेते ॥ ७।१।१३ ॥

**[ न्यायार्थात् ]** नि 'इंण्क् गतौ' (१०७५) इ । नियतमयनं = न्याय: । 'इणोऽभ्रेषे' (५।३।७५) घञ्प्र० → अ । 'नामिनोऽकलि-हले:' (४।३।५१) वृद्धि: ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् । अथवा 'णींग् प्रापणे' (८८४) णी । 'पाठे धात्वादेर्णो न:' (२।३।९७) नी । नीयत इति । 'न्याया-ऽवाया-ऽध्यायोद्याव-संहारा-ऽवहारा-ऽऽधार-दार-जारम्' (५।३।१३४) इत्यादिना न्यायनिपात्यते । न्यायश्च अर्थश्च = न्यायार्थम्, तस्मात् ।

**[ अनपेते ]** न अपेतम् = अनपेतम्, तस्मिन् ।

**[ न्याय्यम् ]** न्यायादनपेतं = न्याय्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ अर्थ्यम् ]** अर्थादनपेतम् = अर्थ्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।।छा।

### मत-मदस्य करणे ॥ ७।१।१४ ॥

**[ मतमदस्य ]** मतमदस्य पञ्चमी ङसि । सूत्रत्वाल्लुप् ।

**[ करणे ]** करण सप्तमी ङि ।

इष्टं अभिप्रेतं साम्यं समग्रज्ञानं प्रतीतं मतिर्मेधा वा मतशब्देनोच्यते । करणं साधकतमं कृतिर्वा ।

**[ मत्यम् ]** मतस्य करणं = मत्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ मद्यम् ]** मद । मदस्य करणं = मद्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।।छा।

### तत्र साधौ ॥ ७।१।१५ ॥

**[ तत्र ]** तत्र पञ्चमी ङसि । सूत्रत्वाल्लुप् ।

**[ साधौ ]** साधु सप्तमी ङि ।

**साधु: प्रवीणो योग्य उपकारको वा ।**

**[ सामन्य: ]** सामन् । सामनि साधु: = सामन्य: । अनेन यप्र० । 'अनोऽट्ये ये' (७।४।५१) इत्यन्त्यस्वरादिलोपाभाव: ।

**[ वेमन्य: ]** वेमन् । वेमनि साधु: = वेमन्य: । अनेन यप्र० । 'अनोऽट्ये ये' (७।४।५१) इत्यन्त्यस्वरादिलोपाभाव: ।

**[ कर्मण्य: ]** कर्मन् । कर्मणि साधु: = कर्मण्य: । अनेन यप्र० । 'अनोऽट्ये ये' (७।४।५१) इत्यन्त्यस्वरादिलोपाभाव: । 'र-षृवर्णान्नो ण०' (२।३।६३) णत्वम् ।

**[ सभ्य: ]** सह-भा । सह भया वर्त्तत इति सभा । 'सहस्य सोऽन्यार्थे' (३।२।१४३) सभाव: । सभायां साधु: = सभ्य: । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । प्रथमा सि । 'सो रु:' (२।१।७२) स० → र० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ शरण्यः ]** शरणे साधुः = शरण्यः । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।।छा।

## पथ्यतिथि-वसति-स्वपतेरेयण् ॥ ७।१।१६ ॥

**[ पथ्यतिथिवसतिस्वपतेः ]** पन्थाश्च अतिथिश्च वसतिश्च स्वपतिश्च = पथ्यतिथिवसतिस्वपति, तस्मात् ।

**[ एयण् ]** एयण् प्रथमा सि ।

**[ पाथेयम् ]** पथिन् । पथि साधुः = पाथेयम् । अनेन एयण्प्र० → एय । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'नोऽपदस्य तद्धिते' (७।४।६१) इन्लुक् ।

**[ आतिथेयम् ]** अतिथि । अतिथौ साधुः = आतिथेयम् । अनेन एयण्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ वासतेयम् ]** 'वसं निवासे' (९९९) वस् । उष्यतेऽस्यां = वसतिः । 'खल्यमि-रमि-वहि-वस्यर्तेरतिः' (उणा० ६५३) अतिप्र० । वसतौ साधुः = वासतेयम् । अनेन एयण्प्र० → एय । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ स्वापतेयम् ]** स्वस्य पतिः स्वामी भर्त्ता वा = स्वपतिः । स्वपतौ साधुः = स्वापतेयम् । अनेन एयण्प्र० → एय । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।।छा।

## भक्ताण्णः ॥ ७।१।१७ ॥

**[ भक्तात् ]** भक्त पञ्चमी ङसि ।

**[ णः ]** ण प्रथमा सि ।

**[ भाक्तः शालिः ]** भक्ते साधुर्भाक्तः शालिः । अनेन णप्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि ।

**[ भाक्तास्तण्डुलाः ]** भक्ते साधवोऽमी = भाक्तास्तण्डुलाः । अनेन णप्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । जस् ।।छा।

## पर्षदो ण्य-णौ ॥ ७।१।१८ ॥

**[ पर्षदः ]** पर्षद् पञ्चमी ङसि ।

**[ ण्यणौ ]** ण्यश्च णश्च = ण्यणौ । औ ।

**[ पार्षद्यः ]** पर्षद् । पर्षदि साधुः = पार्षद्यः । अनेन ण्यप्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ ।

**[ पार्षदः ]** पर्षद् । पर्षदि साधुः = पार्षदः । अनेन णप्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ ।

परिषदोऽपीच्छन्त्यन्यः —

**[ पारिषद्यः ]** परिषद् । परिषदि साधुः = पारिषद्यः । अनेन ण्यप्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ पारिषदः ]** परिषद् । परिषदि साधुः = पारिषदः । अनेन णप्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।।छ।।

## सर्वजनाण्ण्येनञौ ॥ ७।१।१९ ॥

**[ सर्वजनात् ]** सर्वजन पञ्चमी ङसि ।

**[ ण्येनञौ ]** ण्यश्च ईनञ् च = ण्येनञौ ।

**[ सार्वजन्यः, सार्वजनीनः ]** सर्वे च ते जनाश्च = सर्वजनाः । 'पूर्वकालैक-सर्व-जरत्-पुराण-नव-केवलम्' (३।१।९७) इत्यादिना समासः । सर्वजनेषु साधुः = सार्वजन्यः । अनेन ण्यप्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम् - सार्वजनीनः । अनेन ईनञ्प्र० → ईन । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।।छ।।

## प्रतिजनादेरीनञ् ॥ ७।१।२० ॥

**[ प्रतिजनादेः ]** प्रतिजन आदिर्यस्य सः = प्रतिजनादिः, तस्मात् ।

**[ ईनञ् ]** ईनञ् प्रथमा सि ।

**[ प्रातिजनीनः ]** प्रतिजन । प्रत्यर्था(यः) प्रतीतो वा जनः = प्रतिजनः । प्रतिजने साधुः = प्रातिजनीनः । अनेन ईनञ्प्र० → ईन । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ आनुजनीनः ]** अनुकूलोऽनुरूपो वा जनः = अनुजनः । अनुजने साधुः = आनुजनीनः । अनेन ईनञ्प्र० → ईन । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ ऐदंयुगीनः ]** इदंयुगे साधुः = ऐदंयुगीनः । अनेन ईनञ्प्र० → इन । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ प्रतिजन ]** जनं २ प्रति । 'योग्यता-वीप्साऽर्थानतिवृत्ति-सादृश्ये' (३।१।४०) इत्यादिना समासः ।

**[ पञ्चजन ]** चातुर्वर्णस्य पञ्चजन इति संज्ञा ।

**[ परस्यकुल ]** परस्य कुल २ ।

**[ अमुष्यकुल ]** अमुष्य कुल २ । अनयोर्गणपाठात् 'षष्ठ्याः क्षेपे' (३।२।३०) इत्यनेन अलुप्समासः । यदा परकुलसम्बन्धित्वेन आक्षिप्यते ।

एवं "मनुष्यकुलेति" ।।छ।।

## कथादेरिकण् ॥ ७।१।२१ ॥

**[ कथादेः ]** कथा आदिर्यस्य सः = कथादिः, तस्मात् ।

**[ इकण् ]** इकण् प्रथमा सि ।

**[ काथिकः ]** कथायां साधुः = काथिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ वैकथिकः ]** विरुद्धा कथा = विकथा, तस्यां साधुः = वैकथिकः । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ जनवाद ]** 'वद व्यक्तायां वाचि' (९९८) वद् । उद्यते = वादः । जनो वादः = जनवादः ।

**[ गुल्मास ]** गुल्ममासयति = गुल्मास । अच् ॥छा॥

## देवतान्तात् तदर्थे ॥ ७।१।२२ ॥

**[ देवतान्तात् ]** देवता अन्ते यस्य सः = देवतान्तः, तस्मात् ।

**[ तदर्थे ]** तस्मै इदं = तदर्थम्, तस्मिन् ।

**[ अग्निदेवत्यम् ]** अग्निदेवता । अग्निदेवतायै इदम् = अग्निदेवत्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ पितृदेवत्यम् ]** पितृदेवतायै इदं = पितृदेवत्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ देवदेवत्यम् ]** देवदेवतायै इदं = देवदेवत्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

देवताशब्देन देयस्य हविरादेः प्रतिगृहीता स्वामी सम्प्रदानमुच्यते ॥छा॥

## पाद्या-ऽर्घ्ये ॥ ७।१।२३ ॥

**[ पाद्याऽर्घ्ये ]** पाद्यं च अर्घ्यं च = पाद्याऽर्घ्ये । औ ।

**[ पाद्यम् ]** पाद । पादार्थं पादाय वा उदकं = पाद्यम् । अनेन यप्र० निपातः । निपातनादेव ये पदादेशो न भवति ।

**[ अर्घ्यम् ]** अर्घं मूल्यं पूजनं वा, अर्घार्थं रत्नमर्घ्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ॥छा॥

## ण्योऽतिथेः ॥ ७।१।२४ ॥

**[ ण्योऽतिथेः ]** ण्य प्रथमा सि । अतिथि पञ्चमी ङसि ।

**[ आतिथ्यम् ]** अतिथि । अतिथ्यर्थमातिथ्यम् । अनेन ण्यप्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । सि-अम् ॥छा॥

## सादेश्चा तदः ॥ ७।१।२५ ॥

**[ सादेः ]** सह आदिना वर्त्तत इति सादिस्तस्य तस्माद्वा ।

**[ च ]** च प्रथमा सि ।

**[ आ ]** आ प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[ तदः ]** तद् पञ्चमी ङसि ।

**अधिकारोऽयम्** ॥छा॥

## हलस्य कर्षे ॥ ७।१।२६ ॥

**[ हलस्य ]** हल षष्ठी ङस्-अथवा पञ्चमी ङसि । सूत्रत्वात् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ कर्षे ]** कर्ष सप्तमी ङि ।

**[ हल्या, हल्यो वा ]** 'कृषं विलेखने' (५०६) कृष् । कर्षन्त्यस्मिन्निति कर्षः । 'व्यञ्जनाद् घञ्' (५।३।१३२) घञ्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । हलस्य कर्षः = हल्या । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ । बाहुलकात् पुं-स्त्रीत्वम् । एवम्-हल्यो वा ।

**[ द्विहल्या ]** द्वि-हल । द्वयोर्हलयोः कर्षः = द्विहल्या । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ त्रिहल्या ]** त्रयाणां हलानां कर्षः = त्रिहल्या । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ परमहल्या ]** परमं च तद्धलं च = परमहलम् । परमहलस्य कर्षः = परमहल्या । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ उत्तमहल्या ]** उत्तमं च तद्धलं च = उत्तमहलम् । उत्तमहलेन कर्षः = उत्तमहल्या । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ बहुहल्यः ]** ईषदसमाप्तं हलं = बहुहलम् । बहुहलस्य कर्षः = बहुहल्यः । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

यत्र हलं कृष्टं (गतमित्यर्थः) स मार्गः कर्षः, न तु कर्षे इति पलस्य चतुर्थो भागः परिमाणमिह गृह्यते अनभिधानात् ।।छ।।

## सीतया सङ्गते ।। ७।१।२७ ।।

**[ सीतया ]** सीता तृतीया टा । अथवा सीता(त)या पञ्चमी ङसि । सूत्रत्वात् ।

**[ सङ्गते ]** सम् अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम् । सङ्गच्छते स्म = सङ्गतः । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० → त । 'यमि-रमि-नमि-गमि-हनि-मनि-वनति-तनादेर्धुटि क्ङिति' (४।२।५५) मलुक्, तस्मिन् ।

**[ सीत्यम् ]** सीता । सीतया सङ्गतं = सीत्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । सि-अम् ।

**[ द्विसीत्यम् ]** द्वाभ्यां सीताभ्यां सङ्गतं = द्विसीत्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । सि-अम् ।

**[ त्रिसीत्यम् ]** तिसृभिः सीताभिः सङ्गतं = त्रिसीत्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । सि-अम् ।

**[ परमसीत्यम् ]** परमा चासौ सीता च = परमसीता । परमसीतया सङ्गतं = परमसीत्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । सि-अम् ।

**यस्येति 'यः' ( ७।१।१ ) इत्यधिकारस्य पूर्णोऽवधिः** ।।छ।।

## ईयः ।। ७।१।२८ ।।

**[ ईयः ]** ईय प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

आ तद इत्यनुवर्त्तते ।।छ।।

Jain Education International   For Personal & Private Use Only   www.jainelibrary.org

## हविरन्नभेदा-ऽपूपादेर्यो वा ॥ ७।१।२९ ॥

**[ हविरन्नभेदाऽपूपादेः ]** हविश्च अन्नं च = हविरन्ने, तयोर्भेदः = हविरन्नभेदः । अपूप आदिर्यस्य सः = अपूपादिः । हविरन्नभेदश्च अपूपादिश्च = हविरन्नभेदाऽपूपादि, तस्मात् ।

**[ यः ]** य प्रथमा सि ।

**[ वा ]** वा प्रथमा सि ।

**[ आमिक्ष्यम्, आमिक्षीयम् ]** हविर्भेदः-श्रि(शृ)ते क्षीरे तक्रं निक्षेपः आमिक्षा । आमिक्षायै इदं दधि = आमिक्ष्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । शृते क्षीरे तक्रं निक्षेप इत्यर्थो वा । एवम्-आमिक्षीयम् । 'परिणामिनि तदर्थे' (७।१।४४) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ पुरोडाश्याः, पुरोडाशीयास्तण्डुलाः ]** पुरोडाशाय इमे = पुरोडाश्याः । अनेन यप्र० । एवम्-पुरोडाशीयाः । 'परिणामिनि तदर्थे' (७।१।४४) ईयप्र० । तण्डुलाः ।

**[ ओदन्याः, ओदनीयास्तण्डुलाः ]** ओदनाय इमे = ओदन्याः । अनेन यप्र० । एवम्-ओदनीयाः । 'परिणामिनि तदर्थे (७।१।४४) ईयप्र० । तण्डुलाः ।

**[ कृसर्याः, कृसरीयास्तण्डुलाः ]** कृसरा । कृसरायै इमे = कृसर्याः । अनेन यप्र० । एवम्-कृसरीयाः । 'परिणामिनि तदर्थे' (७।१।४४) ईयप्र० । तण्डुलाः ।

**[ सुर्याः, सुरीयास्तण्डुलाः ]** सुरा । 卐सुरायै इमे = सुर्याः । अनेन यप्र० । एवम्-सुरीयाः । 'परिणामिनि तदर्थे' (७।१।४४) ईयप्र० । तण्डुलाः ।

**[ अपूप्यम्, अपूपीयम् ]** अपूपायेदम् = अपूप्यम् । अनेन यप्र० । एवम्-अपूपीयम् । 'परिणामिनि तदर्थे' (७।१।४४) ईयप्र० । सि-अम् ।

**[ तण्डुल्यम्, तण्डुलीयम् ]** तण्डुलायेदं = तण्डुल्यम् । अनेन यप्र० । एवम्-तण्डुलीयम् । 'परिणामिनि तदर्थे' (७।१।४४) ईयप्र० । सि-अम् ।

**[ यवापूप्यम्, यवापूपीयम् ]** यवानामपूपाः, यवाश्च अपूपाश्चेति वा । यवापूपेभ्य इदं = यवापूप्यम् । अनेन यप्र० । एवम्-यवापूपीयम् । 'परिणामिनि तदर्थे' (७।१।४४) ईयप्र० । सि-अम् ।

**[ व्रीहितण्डुल्यम्, व्रीहितण्डुलीयम् ]** व्रीहितण्डुलेभ्य इदं = व्रीहितण्डुल्यम् । अनेन यप्र० । एवम्-व्रीहितण्डुलीयम् । 'परिणामिनि तदर्थे' (७।१।४४) ईयप्र० । सि-अम् ।

**[ चरव्यास्तण्डुलाः ]** चरु । चरवे इमे = चरव्यास्तण्डुलाः । 'उवर्ण-युगादेर्यः' (७।१।३०) यप्र० । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । जस् ।

**[ सक्तव्या धानाः ]** सक्तु । सक्तवे इमे = सक्तव्या धानाः । 'उवर्ण-युगादेर्यः' (७।१।३०) यप्र० । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । जस् ।

केनचिदाकारसादृश्येनेति कोऽर्थः ? चर्मादौ अपूपाद्याकारा चर्माप्यपूय(प) इत्येवम् । अन्नभेदादन्यस्मिन्नप्यर्थे प्रत्ययो भवति । कोऽयमर्थः ? येऽपूपादिषु पठिता अन्नभेदास्तेषां तदन्तानां विधिर्भवति, अन्नभेदवाचिनां तु अपूपादिष्वपठितानां तदन्तविधिर्न भवति इति शेषः ।

---

卐 म० वृत्तौ - सूरायै इमे = सूर्याः, सूरीयास्तण्डुलाः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ यवसुरीयम् ]** यवानां सुरा = यवसुरा । यवसुरायै इदं = यवसुरीयम् । 'परिणामिनि तदर्थे' (७।१।४४) ईयप्र० । सि-अम् ।

**[ पिष्टसुरीयम् ]** पिष्टस्य सुरा = पिष्टसुरा । पिष्टसुरायै इदं = पिष्टसुरीयम् । 'परिणामिनि तदर्थे' (७।१।४४) ईयप्र० । सि-अम् ।।छा।

## उवर्ण-युगादेर्यः ॥ ७।१।३० ॥

**[ उवर्णयुगादेः ]** उवर्णश्च युगादिश्च = उवर्णयुगादि, तस्मात् ।

**[ यः ]** य प्रथमा सि ।

**[ शङ्कव्यं दारु ]** शङ्कु । शङ्कवे इदं = शङ्कव्यं दारु । अनेन यप्र० । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । दारु ।

**[ पिचव्यः कर्पासः ]** पचतीति पिचुः । 'पचेरिच्चातः' (उणा० ७३५) उप्र०-अ० → इ० क्रियते । पिचवे इदं = पिचव्यम् । अनेन यप्र० । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । कर्पासः ।

**[ परशव्यमयः ]** परशु । परशवे इदं = परशव्यम् । अयो लोहः । अनेन यप्र० । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

**[ कमण्डलव्या मृत्तिका ]** कमण्डलवे इयं = कमण्डलव्या मृत्तिका । अनेन यप्र० । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

**[ चरव्यास्तण्डुलाः ]** चरु । चरवे इमे = चरव्यास्तण्डुलाः । अनेन यप्र० । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । जस् ।

**[ सक्तव्या धानाः ]** सक्तु । सक्तवे इमे = सक्तव्याः । अनेन यप्र० । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । जस् ।

युग - **[ युग्यम् ]** युगाय हितं-युगार्थं-युगोऽस्य स्यादिति वा = युग्यम् । अनेन यप्र० । सि-अम् ।

**[ हविष्यम् ]** हविस् । हविसे(षे) हितं-हविरर्थं-हविरस्य स्यादिति वा = हविष्यम् । अनेन यप्र० । 'नाम्यन्तस्था-कवर्गात् पदान्तः कृतस्य सः शिड्-नान्तरेऽपि' (२।३।१५) षत्वम् । सि-अम् ।

**[ सुयुग्यम् ]** सुष्ठु युगाय हितं = सुयुग्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ अतियुग्यम् ]** अतिशयेन युगाय हितम् = अतियुग्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**'गोः स्वरे यः' ( ६।१।२७ ) इत्यनेनैव सिद्धे गोग्रहणं तदन्तार्थम्-**

**[ सुगव्यम् ]** सुष्ठु गवे हितं = सुगव्यम् । अनेन यप्र० । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

**[ अतिगव्यम् ]** अतिशयेन गवे हितम् = अतिगव्यम् । अनेन यप्र० । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

'हविरन्न०' (७।१।२९) इत्यतो यप्रत्ययस्यानुवृत्तौ इह यग्रहणं बाधकबाधनार्थमिति कोऽर्थः ? उवर्णान्तादनेन यः प्राप्तः तं बाधित्वा 'चर्मण्यञ्' (७।१।४५) प्राप्त इति तद्बाधनार्थः ।

**[ सनङ्गव्यं चर्म ]** सनङ्गुश्चर्मविकारस्तस्मै इदं = सनङ्गव्यम् । अत्र 'चर्मण्यञ्' (७।१।४५) प्राप्तेऽनेन यप्र० । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । चर्म ।।छा।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## नाभेर्नभ् चाऽदेहांशात् ॥ ७।१।३१ ॥

**[ नाभेः ]** नाभि पञ्चमी ङसि ।

**[ नभ् ]** नभ् प्रथमा सि । 'दीर्घङ्याब्-व्यञ्जनात् सेः' (१।४।४५) सिलुक् ।

**[ च ]** च प्रथमा सि ।

**[ अदेहांशात् ]** न देहांशः = अदेहांशस्तस्मात् = अदेहांशात् । 'नञत्' (३।२।१२५) न० → अ० ।

**[ नभ्यमञ्जनम् ]** नाभ्यै नाभये वा हितं = नभ्यमञ्जनम् । अनेन यप्र०-नाभे"र्नभ्" चादेशः । यत उक्तं लिङ्गानुशासने-"नाभिनाल्यालिपालि" इति स्त्रीत्वं त्वत्र वाक्ये ज्ञेयम् । (स्त्रीलिङ्गप्रकरणे श्लोकाङ्कः ।।२५।।)

**[ नभ्योऽक्षः ]** नाभ्यै नाभये वा हितः = नभ्योऽक्षः । अनेन यप्र०-नाभे"र्नभ्" चादेशः ।

**[ नभ्यं दारु ]** नाभये इदं = नभ्यं दारु । अनेन यप्र०-नाभे"र्नभ्" चादेशः । सि-अम् ।

अरकमध्यवर्ती अक्षधारणश्चक्रावयवो नाभिस्तदर्थं = नभ्यम् । यत्तु अरकगण्डरहितं पाषाणनयनशकटस्य रहडू इति प्रसिद्धस्य चक्रमेककाष्ठं तत्र न नाभिरिति तदर्थे नभ्यमित्युपचारात् ।

**[ नभ्यो वृक्षः, नभ्या शिंशपा ]** नाभये हितः = नभ्यो वृक्षः । एवम्-नभ्या शिंशपा । नभ्यार्थे वृक्षादौ ताच्छब्द्यान्नभ्यत्वम्, इन्द्रार्थायां स्थूणायामिन्द्रवत् ।

**[ नाभ्यं तैलम् ]** नाभि । नाभये हितं = नाभ्यम् । अत्र न नभादेशः-यप्र० 'प्राण्यङ्ग-रथ-खल-तिल-यव-वृष-ब्रह्म-माषाद् यः' (७।१।३७) इत्यादिना ।।छ।।

## न् चोधसः ॥ ७।१।३२ ॥

**[ न् ]** न् प्रथमा सि । 'दीर्घङ्याब्-व्यञ्जनात् सेः' (१।४।४५) सिलुक् ।

**[ च ]** च प्रथमा सि ।

**[ ऊधसः ]** ऊधस् पञ्चमी ङसि ।

**[ ऊधन्यम् ]** ऊधस् । 卐ऊधसे हितम् । अनेन यप्र०-स० → नदेशश्च । सि-अम् ।।छ।।

## शुनो वश्चोदूत् ॥ ७।१।३३ ॥

**[ शुनः ]** श्वन् पञ्चमी ङसि । 'श्वन्-युवन्-मघोनो ङी-स्याद्यघुट्स्वरे व उः' (२।१।१०६) व० → उ० ।

**[ वश्च ]** व प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । च प्रथमा सि ।

**[ उदूत् ]** उच्च ऊच्च = उदूत् । प्रथमा सि ।

**अभेदनिर्देशः सर्वादेशार्थः** ।

**[ शुन्यम्, शून्यम् ]** श्वन् । शुने हितं = शुन्यम्, शून्यम् । अनेन यप्र०-वकारस्य "उ-ऊ"देशाश्च । सि-अम् ।।छ।।

## कम्बलान्नाम्नि ॥ ७।१।३४ ॥

**[ कम्बलात् ]** कम्बल पञ्चमी ङसि ।

---

卐 है० प्र० - ऊधसे इदम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ नाम्नि ]** नामन् सप्तमी ङि ।

**[ कम्बल्यं परिमाणमूर्णापलशतमुच्यते ]** कम्बल । कम्बलोऽस्य स्यात् = कम्बल्यं परिमाणम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् । ऊर्णापलशतमुच्यते ।

**[ कम्बलीया ऊर्णा ]** कम्बलाय हितः(ता) = कम्बलीया । 'तस्मै हिते' (७।१।३५) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ । ऊर्णा ॥छा॥

## तस्मै हिते ॥ ७।१।३५ ॥

**[ तस्मै ]** तस्मै पञ्चमी ङसि । सूत्रत्वात् (लोपः) ।

**[ हिते ]** हित सप्तमी ङि ।

**हित उपकारकः ।**

**[ वत्सीयः ]** वत्सेभ्यो हितः = वत्सीयः । अनेन ईयप्र० ।

**[ करभीयः ]** करभेभ्यो हितः = करभीयः । अनेन ईयप्र० ।

**[ पित्रीयः ]** पित्रे हितः = पित्रीयः । अनेन ईयप्र० । 'ऋतो रस्तद्धिते' (१।२।२६) रत्वम् ।

**[ मात्रीयः ]** मात्रे हितः = मात्रीयः । अनेन ईयप्र० । 'ऋतो रस्तद्धिते' (१।२।२६) रत्वम् ।

**[ आमिक्ष्यः, आमिक्षीयः ]** आमिक्षायै हितः = आमिक्ष्यः । 'हविरन्नभेदाऽपूपादेर्यो वा' (७।१।२९) यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । एवम्-आमिक्षीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ ओदन्यः, ओदनीयः ]** ओदनाय हितः = ओदन्यः । 'हविरन्नभेदाऽपूपादेर्यो वा' (७।१।२९) यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम्-ओदनीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ अपूप्यः, अपूपीयः ]** अपूपाय हितः = अपूप्यः । 'हविरन्नभेदा०' (७।१।२९) यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम्-अपूपीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ हविष्यः ]** हविषे हितः = हविष्यः । 'हविरन्नभेदा०' (७।१।२९) यप्र० ।

**[ शुन्यः, शून्यः ]** श्वन् । शुने हितः = शुन्यः, शून्यः । 'शुनो वश्चोदूत्' (७।१।३३) यप्र०-वकारस्य "उ-ऊ"कारश्च क्रियते ।

**[ युग्यः ]** युगाय हितः = युग्यः । 'उवर्ण-युगादेर्यः' (७।१।३०) यप्र० ।

**[ ऊधन्यः ]** ऊधस् । ऊधसे हितः = ऊधन्यः । 'न् चोधसः' (७।१।३२) यप्र०-स्० → न० ।

**[ अवत्सीयः ]** न-वत्स । वत्सेभ्यो न हितः = अवत्सीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'नञत्' (३।२।१२५) न० → अ० ।

**[ अकरभीयः ]** न-करभ । करभेभ्यो न हितः = अकरभीयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'नञत्' (३।२।१२५) न० → अ० ॥छा॥

## न राजा-ऽऽचार्य-ब्राह्मण-वृष्णः ॥ ७।१।३६ ॥

**[ न ]** न प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ राजाऽऽचार्यब्राह्मणवृष्णः ]** राजा च आचार्यश्च ब्राह्मणश्च वृषा च = राजाऽऽचार्यब्राह्मणवृष, तस्मात् । 'अनोऽस्य' (२।१।१०८) वृषन्शब्दसम्बन्धि अलुक् ॥छ॥

**प्राण्यङ्ग-रथ-खल-तिल-यव-वृष-ब्रह्म-माषाद् यः ॥ ७।१।३७ ॥**

**[ प्राण्यङ्गरथखलतिलयववृषब्रह्ममाषात् ]** प्राण्यङ्गं च रथश्च खलश्च तिलश्च यवश्च वृषश्च ब्रह्मा च माषश्च = प्राण्यङ्गरथखलतिलयववृषब्रह्ममाषम्, तस्मात् ।

**[ यः ]** य प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ दन्त्यम् ]** दन्त । दन्तेभ्यो हितं = दन्त्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ कर्ण्यम् ]** कर्णाभ्यां हितं = कर्ण्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ चक्षुष्यम् ]** चक्षुर्भ्यां हितं = चक्षुष्यम् । अनेन यप्र० ।

**[ कण्ठ्यम् ]** कण्ठाय हितं = कण्ठ्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ ओष्ठ्यम् ]** ओष्ठाय हितम् = ओष्ठ्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ नाभ्यम् ]** नाभये नाभ्यै वा हितं = नाभ्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) इवर्णस्य लुक् ।

**[ रथ्या भूमिः ]** रथाय हिता = रथ्या भूमिः । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ खल्यमग्निरक्षणम् ]** खलाय हितं = खल्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । अग्निरक्षणम् ।

**[ तिल्यो वायुः ]** तिलेभ्यो हितः = तिल्यो वायुः । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ यव्यस्तुषारः ]** यवाय हितः = यव्यस्तुषारः । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ वृष्यं क्षीरपाणम् ]** वृषाय हितं = वृष्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । क्षीरस्य पानं = क्षीरपाणम् । 'पानस्य भावकरणे' (२।३।६९) णत्वम् ।

**[ ब्रह्मण्यो देशः ]** ब्रह्मणे हितः = ब्रह्मण्यो देशः । अनेन यप्र० ।

**[ माष्यो वातः ]** माषेभ्यो हितः = माष्यो वातः । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

सादेश्चेत्यधिकारात्-

**[ राजदन्त्यम् ]** दन्तानां राजानौ = राजदन्तौ । राजदन्तेभ्यो हितं = राजदन्त्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ शङ्खनाभ्यम् ]** शङ्खो नाभिश्च देहांशौ । ततः शङ्खश्च नाभिश्च = शङ्खनाभिम् । 'प्राणि-तूर्याङ्गाणाम्' (३।१।१३७) इति समाहारे, शङ्खनाभये हितं = शङ्खनाभ्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ अश्वरथ्या भूमिः ]** अश्वानां रथः = अश्वरथः । अश्वरथाय हिता = अश्वरथ्या भूमिः । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ कृष्णतिल्यः ]** कृष्णाश्च ते तिलाश्च = कृष्णतिलाः, तेभ्यो हितः = कृष्णतिल्यः । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ राजमाष्यः ]** राज्ञो माषः = राजमाषः । राजमाषाय हितः = राजमाष्यः । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

## अव्यजात् थ्यप् ॥ ७।१।३८ ॥

**[ अव्यजात् ]** अविश्च अजा च = अव्यजम् । 'क्लीबे' (२।४।९७) ह्रस्वः, तस्मात् ।

**[ थ्यप् ]** थ्यप् प्रथमा सि ।

**[ अविथ्यम् ]** अविभ्यो हितम् = अविथ्यम् । अनेन थ्यपप्र० → थ्य । सि-अम् ।

**[ अजथ्यम् ]** अजा । अजाभ्यो हितम् = अजथ्यम् । अनेन थ्यपप्र० → थ्य । सि-अम् ।

**[ अजथ्या यूतिः ]** अजाभ्यो हिता = अजथ्या यूतिः । समुदाय उच्यते । अनेन थ्यपप्र० → थ्य । पित्करणसामर्थ्यात् 'स्वाङ्गान्ङीर्जातिश्चाऽमानिनि' (३।२।५६) इत्यनेन निषिद्धोऽपि 'क्यङ्-मानि-पित्तद्धिते' (३।२।५०) इत्यनेन पुंवद्भावः । गत इत्यर्थः ॥छ॥

## चरक-माणवादीनञ् ॥ ७।१।३९ ॥

**[ चरकमाणवात् ]** चरकश्च माणवश्च = चरकमाणवम्, तस्मात् ।

**[ ईनञ् ]** ईनञ् प्रथमा सि ।

**[ चारकीणः ]** चरकेभ्यो हितः = चारकीणः । अनेन ईनञ्प्र० → ईन । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'र-षृवर्णान्नो ण०' (२।३।६३) णत्वम् ।

**[ माणवीनः ]** माणवेभ्यो हितः = माणवीनः । अनेन ईनञ्प्र० → ईन । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छ॥

## भोगोत्तरपदा-ऽऽत्मभ्यामीनः ॥ ७।१।४० ॥

**[ भोगोत्तरपदाऽऽत्मभ्याम् ]** भोग उत्तरपदं यस्य सः = भोगोत्तरपदः । भोगोत्तरपदश्च आत्मा च = भोगोत्तरपदाऽऽत्मानौ, ताभ्याम् ।

**[ ईनः ]** ईन प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ मातृभोगीणः ]** मातृभोगाय हितः = मातृभोगीणः । अनेन ईनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'कवर्गैकस्वरवति' (२।३।७६) णत्वम् ।

**[ पितृभोगीणः ]** पितृभोगाय हितः = पितृभोगीणः । अनेन ईनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'कवर्गैकस्वरवति' (२।३।७६) णत्वम् ।

**[ ग्रामणिभोगीनः ]** ग्राम 'णींग् प्रापणे' (८८४) णी । 'पाठे धात्वादेर्णो नः' (२।३।९७) नी । ग्रामं नयतीति ग्रामणीः । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लुक । 'ग्रामाऽग्रान्नियः' (२।३।७१) णत्वम् । ग्रामण्यो भोगः = ग्रामणिभोगः । 'वेदूतोऽनव्यय-य्वृदीच्-ङीयुवः पदे' (२।४।९८) इत्यादिना ह्रस्वः । ग्रामणिभोगाय हितः = ग्रामणिभोगीनः । अनेन ईनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । अत्र क्षुभ्नादित्वान्न णत्वम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ सेनानिभोगीनः ]** सेना 'णींग् प्रापणे' (८८४) णी । 'पाठे धात्वादेर्णो नः' (२।३।९७) नी । सेनां नयतीति सेनानी(ः) । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लुक् । सेनान्यो भोगः = सेनानिभोगः । 'वेदूतोऽनव्यय०' (२।४।९८) इत्यादिना ह्रस्वः । सेनानिभोगाय हितः = सेनानिभोगीनः । अनेन ईनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । अत्र क्षुभ्नादित्वान्न णत्वम् ।

**[ आचार्यभोगीनः ]** आचार्यस्य भोगः = आचार्यभोगः । आचार्यभोगाय हितः = आचार्यभोगीनः । अनेन ईनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । अत्र क्षुभ्नादित्वान्न णत्वम् ।

**[ आत्मनीनः ]** आत्मन् । आत्मने हितः = आत्मनीनः । अनेन ईनप्र० । 'ईनेऽध्वा-ऽऽत्मनोः' (७।४।४८) इत्यन्त्यस्वरादिलोपाभावः ।

**[ अनात्मनीनः ]** आत्मने न हितः = अनात्मनीनः । अनेन ईनप्र० । 'अन् स्वरे' (३।२।१२९) अन् । 'ईनेऽध्वा-ऽऽत्मनोः' (७।४।४८) इत्यन्त्यस्वरादिलोपाभावः ॥छ॥

### पञ्च-सर्व-विश्वाज्जनात् कर्मधारये ॥ ७।१।४१ ॥

**[ पञ्चसर्वविश्वात् ]** पञ्च च सर्वश्च विश्वश्च = पञ्चसर्वविश्वम्, तस्मात् ।

**[ जनात् ]** जन पञ्चमी ङसि ।

**[ कर्मधारये ]** कर्मधारय सप्तमी ङि ।

**[ पञ्चजनीनः ]** पञ्चन्-जन । पञ्च च ते जनाश्च = पञ्चजनाः । पञ्चजनेभ्यः पञ्चजनाय वा हितः = पञ्चजनीनः । अनेन ईनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । रथकारपञ्चमस्य चातुर्वर्णस्य पञ्चजन इति संज्ञा ।

**[ सर्वजनीनः ]** सर्वे च ते जनाश्च = सर्वजनाः । सर्वजनेभ्यो हितः = सर्वजनीनः । अनेन ईनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ विश्वजनीनः ]** विश्वे च ते जनाश्च = विश्वजनाः । विश्वजनेभ्यो हितः = विश्वजनीनः । अनेन ईनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ पञ्चजनीयः ]** पञ्चानां जनः = पञ्चजनः, तस्मै हितः = पञ्चजनीयः । 'तस्मै हिते' (७।१।३५) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ सर्वजनीयः ]** सर्वो जनोऽस्य-सर्वेषां वा जनः = सर्वजनस्तस्मै हितः = सर्वजनीयः । 'तस्मै हिते' (७।१।३५) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ विश्वजनीयः ]** विश्वं जनोऽस्य-विश्वेषां वा जनः = विश्वजनस्तस्मै हितः = विश्वजनीयः । 'तस्मै हिते' (७।१।३५) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छ॥

### महत्-सर्वादिकण् ॥ ७।१।४२ ॥

**[ महत्सर्वात् ]** महांश्च सर्वश्च = महत्सर्वम्, तस्मात् ।

**[ इकण् ]** इकण् प्रथमा सि ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ माहाजनिकः ]** महत्-जन । महते जनाय हितः = माहाजनिकः । अनेन इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'जातीयैकार्थेऽच्वेः' (३।२।७०) डाप्र० → आ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अत्लुक् ।

**[ सार्वजनिकः ]** सवस्मै जनाय हितः = सार्वजनिकः ।

एवं सर्वजनात्पूर्वेण ईनः अनेनेकणिति द्वैरूप्यम्-

**[ महाजनीयः ]** महान् जनोऽस्य = महाजनस्तस्मै हितः = महाजनीयः । 'तस्मै हिते' (७।१।३५) ईयप्र० । 'जातीयैकार्थेऽच्वेः' (३।२।७०) डाप्र० → आ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अत्लुक् ।

**[ सर्वजनीयम् ]** सर्वेषां जनाय हितं = सर्वजनीयम् । 'तस्मै हिते' (७।१।३५) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छा॥

## सर्वाण्णो वा ॥ ७।१।४३ ॥

**[ सर्वात् ]** सर्व पञ्चमी ङसि ।

**[ णः ]** ण प्रथमा सि ।

**[ वा ]** वा प्रथमा सि ।

**जनात्कर्मधारय इति च निवृत्तम् ।**

**[ सार्वः, सर्वीयः ]** सर्वस्मै हितः = सार्वः । अनेन णप्र० → अ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम्-सर्वीयः । 'तस्मै हिते' (७।१।३५) ईयप्र० ॥छा॥

## परिणामिनि तदर्थे ॥ ७।१।४४ ॥

**[ परिणामिनि ]** परिणामोऽस्यास्तीति परिणामी । 'अतोऽनेकस्वरात्' (७।२।६) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक्, तस्मिन् ।

**[ तदर्थे ]** तस्मै इदं = तदर्थम्, तस्मिन् ।

**हिते इति निवृत्तम् ।**

अङ्गारादीनां भवनं तद्भावः-परिणामः, सोऽस्यास्ति । परिणामिद्रव्यमुच्यते ।

**[ अङ्गारीयाणि काष्ठानि ]** अङ्गारेभ्य इमानि = अङ्गारीयाणि काष्ठानि । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । जस् । 'नपुंसकस्य शिः' (१।४।५५) जस्० → शि० → इ० । 'स्वराच्छौ' (१।४।६५) नोऽन्तः । 'नि दीर्घः' (१।४।८५) दीर्घः । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० । अङ्गारार्थानीत्यर्थः ।

**[ प्राकारीया इष्टकाः ]** प्र(प्रा)काराय इमे = प्राकारीया इष्टकाः । अनेन ईयप्र० । जस् ।

**[ शङ्कव्यं दारु ]** शङ्कु । शङ्कवे इदं = शङ्कव्यम् । 'उवर्ण-युगादेर्यः' (७।१।३०) यप्र० । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । सि-अम् । दारु ।

**[ पिचव्यः कर्पासः ]** पिचु । पिचु(च)वेऽयं = पिचव्यः कर्पासः । 'उवर्ण-युगादेर्यः' (७।१।३०) यप्र० । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[आमिक्ष्यम्, आमिक्षीयं दधि]** आमिक्षायै इदम् = आमिक्षीयम् । अनेन ईयप्र० । एवम्-आमिक्ष्यम् । 'हविरन्नभेदा-ऽपूपादेर्यो वा' (७।१।२९) यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । दधि ।

**[ओदन्याः, ओदनीयास्तण्डुलाः]** ओदनाय इमे = ओदन्याः । 'हविरन्नभेदा-ऽपूपादेर्यो वा' (७।१।२९) यप्र० । एवम्-ओदनीयास्तण्डुलाः । अनेन ईयप्र० । जस् ।

**[अपूप्यम्, अपूपीयं पिष्टम्]** अपूपेभ्य इदम् = अपूप्यम् । 'हविरन्नभेदा-ऽपूपादेर्यो वा' (७।१।२९) यप्र० । एवम् - अपूपीयं पिष्टम् । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[असये कोशी]** कोशशब्दः खङ्गप्रत्याकारवाचकस्त्रिलिङ्गः । 'जातेरयान्त-नित्यस्त्री-शूद्रात्' (२।४।५४) ङी ॥छ॥

**चर्मण्यञ् ॥ ७।१।४५ ॥**

**[चर्मणि]** चर्मन् सप्तमी ङि ।

**[अञ्]** अञ् प्रथमा सि ।

**[वार्ध्रं चर्म]** वध्र्याय इदं = वार्ध्रम् । अनेन अञ्प्र० → अ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[वारत्रं चर्म]** वरत्रायै इदं = वारत्रम् । अनेन अञ्प्र० → अ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[राथोपस्थं चर्म]** रथोपस्थायेदं = राथोपस्थम् । अनेन अञ्प्र० → अ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[हालबन्धं चर्म]** हलबन्धाय इदं = हालबन्धम् । अनेन अञ्प्र० → अ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[सनङ्गव्यं चर्म]** सनङ्गवे इदं = सनङ्गव्यं चर्म-कोथलिकः । 'उवर्ण - युगादेर्यः' (७।१।३०) यप्र० । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

**[सनङ्गुश्चर्मविकारः]** अङ्ग-सन् मण्ड्यते । अङ्गेषु सन् = सनङ्गु । 'राजदन्तादिषु' (३।१।१४९) इति सप्तम्यन्तस्य परनिपातः । पृषोदरादित्वात् सनङ्गुशब्द आदेशः । सनङ्गुश्चर्मविकारः ॥छ॥

**ऋषभोपानहाञ्ञ्यः ॥ ७।१।४६ ॥**

**[ऋषभोपानहात्]** ऋषभश्च उपानच्च = ऋषभोपानहम्, तस्मात् । 'चवर्ग-द-ष-हः समाहारे' (७।३।९८) अत्समासान्तः → अ ।

**[ञ्यः]** ञ्य प्रथमा सि ।

**[आर्षभ्यो वत्सः]** 'ऋषैत् गतौ' (१४१८) ऋष् । ऋषति-गच्छति । 'ऋषि-वृषि-लुसिभ्यः कित्' (उणा० ३३१) किद् अभप्र० । ऋषभ । ऋषभाय अयम् = आर्षभ्यो वत्सः । अनेन ञ्यप्र० → य । वृद्धिः आर् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[औपानह्यो मुञ्जः, औपानह्यं काष्ठम्, औपानह्यं चर्म]** उप'णहींच् बन्धने' (१२८५) णह् । 'पाठे धात्वादे०' (२।३।९७) नह् । उपनह्यते । क्विपि । 'गति-कारकस्य०' (३।२।८५) दीर्घः । उपानहे अयम् = औपानह्यः । अनेन ञ्यप्र० → य । वृद्धिः औ । मुञ्जः । एवम् - औपानह्यं काष्ठम्, चर्मेति ॥छ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## छदिर्बलेरेयण् ॥ ७।१।४७ ॥

**[ छदिर्बले: ]** छदिश्च बलिश्च = छदिर्बलि, तस्मात् ।

**[ एयण् ]** एयण् प्रथमा सि ।

**[ छादिषेयाणि तृणानि ]** छदिस् । छदिषे इमानि = छादिषेयाणि तृणानि । अनेन एयणप्र० → एय । वृद्धिः ।

**[ बालेयास्तण्डुला: ]** बलि । बलये इमे = बालेयास्तण्डुलाः । अनेन एयणप्र० → एय । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ औपधेय: ]** उप'डुधांग्क् धारणे च' (११३९) धा । उपधा(धी)यते = उपधेयः । 'य एच्चातः' (५।१।२८) यप्र०-आ० → ए० । उपधेय एव = औपधेयः । 'प्रज्ञादिभ्योऽण्' (७।२।१६५) अणप्र० → अ । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छा।

## परिखाऽस्य स्यात् ॥ ७।१।४८ ॥

**[ परिखा ]** परिखा पञ्चमी ङसि । सूत्रत्वात् (लोपः) ।

**[ अस्य ]** अस्य सप्तमी ङि । सूत्रत्वात् (लोपः) ।

**[ स्यात् ]** स्यात् प्रथमा सि ।

**[ पारिखेय्य इष्टका: ]** परिखा आसामिष्टकानां स्यादिति । 'सम्भावनेऽलमर्थे तदर्थानुक्तौ' (५।४।२२) इत्यादिना सप्तमी । पारिखेय्य इष्टकाः । अनेन एयणप्र० → एय । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । जस् ॥छा।

## अत्र च ॥ ७।१।४९ ॥

**[ अत्र ]** अत्र सप्तमी ङि । 'अव्ययस्य' (३।२।७) लुप् ।

**[ च ]** च प्रथमा सि ।

**[ पारिखेयी भूमि: ]** परिखाऽस्यां स्यात् = पारिखेयी भूमिः । अनेन एयणप्र० → एय । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । 'अणञेयेकण्०' (२।४।२०) ङी ॥छा।

## तद् ॥ ७।१।५० ॥

**[ तद् ]** तद् प्रथमा सि । सूत्रत्वात् (लोपः) ।

**[ प्राकारीया इष्टका: ]** प्राकार आसामिष्टकानां स्यात् = प्राकारीया इष्टकाः । अनेन ईयप्र० । जस् ।

**[ प्रासादीयं दारु ]** प्र(प्रा)सादोऽस्य स्यात् = प्रासादीयं दारु । अनेन ईयप्र० ।

**[ परशव्यमय: ]** परशु । परशो(शु)रस्य स्यात् = परशव्यमयः । अनेन विहितः 'उवर्ण-युगादेर्यः' (७।१।३०) यप्र० । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । सि-अम् । अयस् । सि । 'अनतो लुप्' (१।४।५९) सिलुप् ।

**[ प्रासादीयो देश:, प्रासादीया भूमि: ]** प्रासादोऽस्मिन् देशे स्यात् = प्रासादीयो देशः । अनेन विहित ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम्-प्रासादीया भूमिः । अनेन विहित ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ ॥छा।

Jain Education International	For Personal & Private Use Only	www.jainelibrary.org

## तस्याऽर्हे क्रियायां वत् ॥ ७।१।५१ ॥

**[ तस्य ]** तस्य पञ्चमी ङसि । सूत्रत्वात् (लोपः) ।

**[ अर्हे ]** अर्ह सप्तमी ङि ।

**[ क्रियायाम् ]** क्रिया सप्तमी ङि ।

**[ वत् ]** वत् प्रथमा सि ।

**ईयस्य पूर्णोऽवधिः ।**

**[ राजवत् वृत्तमस्य राज्ञः ]** राजन् मण्ड्यते । राज्ञोऽर्हं = राजवत् । अनेन वत्प्र० । सि । 'अनतो लुप्' (३।२।६) लुप् । वृत्त सि-अम् । राजत्वस्य युक्तमस्य राज्ञो वृत्तमित्यर्थः ।

**[ राजवदवर्तते भरतः ]** राज्ञोऽर्हं = राजवत् क्रियाविशेषः । राजार्हं वर्त्तते स्मेत्यर्थः । अत्राद्यत्वात् न भरतस्योपमानमन्यो राजाऽस्ति, स एव सर्वेषां राज्ञामुपमानभूतस्तत्र राजवदिति, राज्ञ आत्मन एवार्हं वृत्तमवर्त्तत इत्यर्थः । भरतः ।

**[ कुलीवनत् ]** कुलीनस्यार्हं = कुलीनवत् । अनेन वत्प्र० ।

**[ साधुवत् ]** साधोरर्हं = साधुवत् । अनेन वत्प्र० ।

**[ स शिरांसि द्विषामाजौ चिच्छेद कृतहस्तवत् ]** कृतहस्तस्य शिक्षिता युधस्यार्हं = कृतहस्तवत् । अनेन वत्प्र० । यत उक्तं नाममालायाम् "कृतहस्तः कृतपुङ्खः" (श्लोकाङ्कः ७७२) ।

## स्यादेरिवे ॥ ७।१।५२ ॥

**[ स्यादेः ]** स्यादि पञ्चमी ङसि ।

**[ इवे ]** इव सप्तमी ङि ।

**[ क्षत्रियवद्युध्यन्ते ब्राह्मणाः ]** क्षत्रिया इव = क्षत्रियवत् । अनेन वत्प्र० । युध्यन्ते ब्राह्मणाः ।

**[ अश्ववद्धावति चैत्रः ]** अश्व इव = अश्ववत् । अनेन वत्प्र० । धावति चैत्रः ।

**[ देववत्पश्यन्ति मुनिम् ]** देवमिव = देववत् । पश्यन्ति मुनिम् ।

**[ साधुवदाचरितं मैत्रेण ]** साधुनेव = साधुवत् । आचरितं मैत्रेण ।

**[ ब्राह्मणवद्दत्तं क्षत्रियाय ]** ब्राह्मणायेव = ब्राह्मणवद्दत्तं क्षत्रियाय ।

**[ पर्वतवदवरोहति आसनात् ]** पर्वतादिव = पर्वतवदवरोहति आसनात् ।।छ।।

## तत्र ॥ ७।१।५३ ॥

**[ तत्र ]** तत्र प्रथमा सि । सूत्रत्वात् (लोपः) ।

**[ मथुरावत् पाटलिपुत्रे प्रासादाः ]** मथुरायामिव = मथुरावत् । पाटलिपुत्रे प्रासादाः । अनेन वत्प्र० ।

**[ स्रुघ्नवत् साकेते परिखा ]** सह आकेतैर्गृहैर्वर्त्तते । अथवा सा-लक्ष्मीः, कं-सुखं, ताभ्यामितं = साकेतम् । स्रुघ्न इव = स्रुघ्नवत् साकेते परिखा । अनेन वत्प्र० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ गुरुवद् गुरुपुत्रे वर्तितव्यम् ]** गुरुष्विव = गुरुवत् । पूर्वेण वत्प्र० । गुरुपुत्रे वर्तितव्यम् ॥छ॥

**तस्य ॥ ७।१।५४ ॥**

**[ तस्य ]** तस्य पञ्चमी ङसि । सूत्रत्वात् (लोपः) ।

**[ मैत्रस्य गावश्चैत्रवत् ]** चैत्रस्येव । मैत्र । स्य(?)(तस्य) गावः चैत्रवत् । अनेन वत्प्र० । सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[ क्षत्रियस्य दन्ताः ब्राह्मणवत् ]** ब्राह्मणस्येव क्षत्रियस्य दन्ताः = ब्राह्मणवत् । अनेन वत्प्र० । सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**अक्रियाविषयसादृश्यार्थ आरम्भः** ॥छ॥

**भावे त्व-तल् ॥ ७।१।५५ ॥**

**[ भावे ]** भाव सप्तमी ङि ।

**[ त्वतल् ]** त्वश्च तल् च = त्वतल् ।

भवतोऽस्मादभिधानप्रत्ययाविति भावः, शा(श)ब्दस्या(य) प्रवृत्तिनिमित्तं द्रव्यविशेष्यसंसर्गी भेदको गुणः । यदाहुः - यस्य गुणस्य भावस्य हि भावात्-सद्भावात् द्रव्ये-विशेष्ये शब्दनिवेशप्रवृत्तिः तदभिधाने त्व-तलाविति । तत्र जातिगुणाज्जातिगुणे, समासकृत्तद्धितात् सम्बन्धे । डित्थादेः स्वे रूपे, त्व-तलादीनां विधिर्भवति ॥१॥

तत्र जातिवचनेभ्यो जातौ -

**[ गोत्वम्, गोता ]** गोशब्दस्य भावः = गोत्वम्, गोता । अनेन त्व-तल्प्र० → त । 'आत्' (२।४।१८) आप्प्र० → आ । अत्र गोशब्दजातिर्भावः । गोरर्थस्य भावो गोत्वम्, गोता । अनेन त्व-तल्प्र० । अत्र गता(वा)र्थजातिर्भावः ।

**[ अश्वत्वम्, अश्वता ]** अश्वस्य शब्दस्य भावः, अश्वस्यार्थस्य भावो वा = अश्वत्वम्, अश्वता । अनेन त्व-तल्प्र० ।

**[ शुक्लत्वम्, शुक्लता ]** शुक्लस्य भावः = शुक्लत्वम्, शुक्लता । अनेन त्व-तल्प्र० । अत्र शुक्लगुणजातिः ।

**[ रूपत्वम्, रूपता ]** रूपस्य भावः = रूपत्वम्, रूपता । अनेन त्व-तल्प्र० ।

**[ रसत्वम्, रसता ]** रसस्य भावः = रसत्वम्, रसता । अनेन त्व-तल्प्र० । अत्र रूपादिगुणजातिः ।

कत्वं-खत्वमिति भिन्नवर्णव्यक्तिसमवेता जातिः । कवर्गत्वं चवर्गत्वमिति ककारादिवर्गव्यक्तिसमवेता जातिः संहतिः ।

ये गुणे वर्तित्वा तद्योगात् गुणे निवर्त्तन्ते ते गुणशब्दाः । गुणशब्देभ्यो गुणे-

**[ शुक्लत्वम्, शुक्लता ]** शुक्लस्य पटस्य भावः = शुक्लत्वम्, शुक्लता । अनेन त्व-तल्प्र० । अत्र शुक्लो गुणो भावः ।

**[ शुक्लतरत्वम् ]** अतिशयेन शुक्लः = शुक्लतरः । 'द्वयोर्विभज्ये च तरप्' (७।३।६) तरप्प्र० → तर । शुक्लतरस्य भावः = शुक्लतरत्वम् । अनेन त्वप्र० ।

**[ शुक्लतमत्वम् ]** प्रकृष्टः शुक्लः = शुक्लतमः । 'प्रकृष्टे तमप्' (७।३।५) तमप्प्र० → तम । शुक्लतमस्य भावः = शुक्लतमत्वम् । अनेन त्वप्र० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ अणुत्वम् ]** अणु । अणोः - अणुनो वा द्रव्यस्य भावः = अणुत्वम् । अनेन त्वप्र० । सि-अम् ।

**[ महत्त्वम् ]** महतो द्रव्यस्य भावः = महत्त्वम् । अनेन त्वप्र० । सि-अम् । अत्र परिमाणलक्षणो गुणः ।

**[ एकत्वम् ]** एकस्य द्रव्यस्य भावः = एकत्वम् । अनेन त्वप्र० ।

**[ द्वित्वम् ]** द्वयोर्द्रव्ययोर्भावः = द्वित्वम् । अनेन त्वप्र० । अत्र सङ्ख्यालक्षणः ।

**[ पृथक्त्वम् ]** पृथक्भूतस्य भावः = पृथक्त्वम् । अनेन त्वप्र० ।

**[ नानात्वम् ]** नानाभूतस्य भावः = नानात्वम् । अनेन त्वप्र० । अत्र भेदलक्षणः ।

**[ उच्चैस्त्वम् ]** उच्चैर्भूतस्य भावः = उच्चैस्त्वम् । अनेन त्वप्र० ।

**[ नीचैस्त्वम् ]** नीचैर्भूतस्य भावः = नीचैस्त्वम् । अनेन त्वप्र० । अत्र उच्छ्रयादिलक्षणः । वृत्तौ पृथगादिशब्दाः पृथग्भूताद्यर्थे सत्त्वे द्रव्ये वर्त्तन्ते इति प्रत्ययः ।

**[ पटुत्वम् ]** पटोर्भावः = पटुत्वम् । अनेन त्वप्र० ।

**[ मृदुत्वम् ]** मृदोर्भावः = मृदुत्वम् । अनेन त्वप्र० ।

**[ तीक्ष्णत्वम् ]** तीक्ष्णस्य भावः = तीक्ष्णत्वम् । अनेन त्वप्र० । इत्यादिष्वपि गुणो भावः ।

समासात्सम्बन्धे -

**[ राजपुरुषत्वम् ]** राज्ञः पुरुषः = राजपुरुषः । राजपुरुषस्य भावः = राजपुरुषत्वम् । अनेन त्वप्र० ।

**[ चित्रगुत्वम् ]** चित्रा गौर्यस्य सः = चित्रगुः । 'गोश्चान्ते ह्रस्वोऽनंशिसमासेयोबहुव्रीहौ' (२।४।९६) ह्रस्वः । चित्रगोर्भावः = चित्रगुत्वम् । अनेन त्वप्र० । अत्र स्वस्वामिसम्बन्धः ।

कृतः सम्बन्धे - **[ पाचकत्वम् ]** 'डुपचींष् पाके' (८९२) पच् । पचतीति पाचकः । 'णक-तृचौ' (५।१।४८) णकप्र० → अक । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । 'च-जः क-गम्' (२।१।८६) च० → क० । पाचकस्य भावः = पाचकत्वम् । अनेन त्वप्र० ।

**[ पक्तृत्वम् ]** 'डुपचींष् पाके' (८९२) पच् । पचतीति पक्ता । 'णक-तृचौ' (५।१।४८) तृच्प्र० → तृ । 'च-जः क-गम्' (२।१।८६) च० → क० । पक्तुर्भावः = पक्तृत्वम् । अनेन त्वप्र० ।

**[ कार्यत्वम् ]** 'डुकृंग् करणे' (८८८) कृ । क्रियत इति कार्यम् । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् । कार्यस्य भावः = कार्यत्वम् । अनेन त्वप्र० ।

**[ साधनत्वम् ]** राधं (१३०४) - 'साधंट् संसिद्धौ' (१३०५) साध् । साध्यते = साधनम् । अनट्प्र० → अन । साधनस्य भावः = साधनत्वम् । अनेन त्वप्र० । अत्र क्रियाकारकसम्बन्धः । पचनक्रिया तत् कर्त्रोः सम्बन्धः समवायः ।

तद्धितात्सम्बन्धे - **[ औपगवत्वम् ]** गोः समीपम् = उपगु । उपगोरपत्यम् = औपगवः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः औ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । औपगवस्य भावः = औपगवत्वम् । अनेन त्वप्र० । सि-अम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ दण्डित्वम् ]** दण्डो विद्यते यस्य सः = दण्डी । 'अतोऽनेकस्वरात्' (७।२।६) इन्प्र० । दण्डिनो भावः = दण्डित्वम् । अनेन त्वप्र० । सि-अम् ।

**[ विषाणित्वम् ]** विषाणमस्यास्ति = विषाणी । 'अतोऽनेकस्वरात्' (७।२।६) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । विषाणिनो भावः = विषाणित्वम् । अनेन त्वप्र० । सि-अम् । अत्रोपगुदण्डादिसम्बन्धः ।

**[ डित्थत्वम् ]** डित्थस्य भावः स्वरूपं = डित्थत्वम् । अनेन त्वप्र० । सि-अम् ।

**[ डवित्थत्वम् ]** डवित्थस्य भावः स्वरूपं = डवित्थत्वम् । द(ड)वित्थ इत्यपि । अनेन त्वप्र० । सि-अम् ।

**[ गोत्वम्, गोता ]** गोजातेर्भावः = गोत्वम्, गोता । गोजातिरित्यर्थः । ननु गोशब्देन कथं गोजातिरुच्यते ? सत्यम्, उपचारात् या गोजातिः स एव गोशब्द इति गोशब्दस्य स्वरूपम् ।

**[ शुक्लत्वम्, शुक्लता ]** शुक्लजातेर्भावः = शुक्लत्वम्, शुक्लता । अनेन त्व-तल्प्र० । शुक्लशब्दस्य स्वरूपं शुक्लजातेरित्यर्थः ।

**[ देवदत्तत्वम् ]** देवदत्तस्य भावः = देवदत्तत्वम् । अनेन त्वप्र० ।

**[ चन्द्रत्वम् ]** चन्द्रस्य भावः = चन्द्रत्वम् । अनेन त्वप्र० ।

**[ सूर्यत्वम् ]** सूर्यस्य भावः = सूर्यत्वम् । अनेन त्वप्र० ।

**[ दिक्त्वम् ]** दिश् । दिशो भावः = दिक्त्वम् । अनेन त्वप्र० । 'ऋत्विज्-दिश्-दृश्-स्पृश्-स्रज्-दधृषुष्णिहो गः' (२।१।६९) श० → ग० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) ग० → क० ।

**[ आकाशत्वम् ]** आकाशस्य भावः = आकाशत्वम् । अनेन त्वप्र० ।

**[ अभावत्वम् ]** अभावस्य भावः = अभावत्वम् । अनेन त्वप्र० । निषेधात्मकं भावस्वरूपं भावो ज्ञेयः ।

अन्ये तु डित्थत्वम्, देवदत्तत्वमिति वयोऽवस्थाभेदभिन्नव्यक्तिसमवेतं सामान्यम् । चन्द्रत्वं सूर्यत्वमिति कालावस्थाभेदभिन्नव्यक्तिसमवेतं सामान्यम् ।

**[ गौरखरत्वम् ]** गौरश्चासौ खरश्च = गौरखरः, तस्य भावः = गौरखरत्वम् ।

**[ लोहितशालित्वम् ]** लोहितश्चासौ गो(शा)लिश्च । लोहितस्य घटिका प्रहरः । एककल-द्विककल-द्विकलराहुग्रस्ताभ्रछन्नत्वादयो विशेषाः ।

**[ सप्तपर्णत्वम् ]** सप्त पर्णान्यस्य = सप्तपर्णः, तस्य भावः ।

**[ कुम्भकारत्वम् ]** कुम्भं करोतीति कुम्भकारः । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् । कुम्भकारस्य भावः = कुम्भकारत्वम् ।

**[ तन्तुवायत्वम् ]** तन्तुवायस्य भावः = तन्तुवायत्वम् ।

**[ स्तम्बेरमत्वम् ]** स्तम्बे रमते = स्तम्बेरमः । 'शोकापनुद-तुन्दपरिमृज-स्तम्बेरम-कर्णेजपं प्रिया-ऽलस-हस्ति-सूचके' (५।१।१४३) कप्र० → अ, तस्य भावः = स्तम्बेरमत्वम् ।

**[ पङ्कजत्वम् ]** पङ्कजस्य भावः = पङ्कजत्वम् ।

**[ हस्तित्वम् ]** हस्तः - करो विद्यते यस्य सः = हस्ती । 'अतोऽनेकस्वरात्' (७।२।६) (हस्त-दन्त-कराज्जातौ' (७।२।६८) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । हस्तिनो भावः = हस्तित्वम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ मानुषत्वम् ]** मनु । मनोरपत्यं = मानुषः । 'मनोर्याऽणौ षश्चान्तः' (६।१।९४) अण्प्र० → अ - षश्च । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः । मानुषस्यापत्यं (भावः) = मानुषत्वम् ।

**[ क्षत्रियत्वम् ]** क्षत्रस्यापत्यं = क्षत्रियः । 'क्षत्रादियः' (६।१।९३) इयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । क्षत्रियस्य भावः = क्षत्रियत्वम् ।

**[ राजन्यत्वम् ]** राजन् । राज्ञोऽपत्यं = राजन्यः । 'जातौ राज्ञः' (६।१।९२) यप्र० । 'अनोऽट्ये-ये' (७।४।५१) न अनो लुप् । राजन्यस्य भावः = राजन्यत्वम् । अनेन त्वप्र० । सि-अम् ।

**[ गर्गत्वम् ]** गर्गस्यापत्यानि वृद्धानि = गर्गाः । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० । 'यञञोऽश्यापर्णान्त-गोपवनादेः' (६।१।१२६) यञ्लुप् । गर्गाणां भावः = गर्गत्वम् । अनेन त्वप्र० । सि-अम् ।

**[ पञ्चालत्वम् ]** पञ्चालानां जनपदानां राजानः - पञ्चालस्य राज्ञोऽपत्यानि = पञ्चालाः । 'राष्ट्र-क्षत्रियात् सरूपाद् राजाऽपत्ये द्रिरञ्' (६।१।११४) अञ्प्र० । 'द्रेरञणोऽप्राच्य-भर्गादेः' (६।१।१२३) अञ्लुप् । पञ्चालानां भावः = पञ्चालत्वम् । अनेन त्वप्र० । सि-अम् ।

अन्यस्तु प्रत्ययरहितः पञ्चालश्च पञ्चालश्चेति कृते 'स्यादावसंख्येयः' (३।१।११९) एकशेषः । तेषां भावः = पञ्चालत्वम् । अनेन त्वप्र० ।

**[ अक्षत्वम् ]** अक्षशब्देन इन्द्रियपाशबिभीतकादीन्युच्यन्ते । अक्षश्च ३ = अक्षाः । अक्षाणां भावः = अक्षत्वम् । अनेन त्वप्र० ।

**[ पादत्वम् ]** पादशब्देन चरणकिरणश्लोकचतुर्थांशप्रत्यन्तपर्वताः उच्यन्ते । पादश्च ३ = पादाः । पादानां भावः = पादत्वम् । अनेन त्वप्र० ।

**[ माषत्वम् ]** माषशब्देन उडददशार्द्धगुञ्जवृक्षविशेषा उच्यन्ते । माषश्च ३ = माषाः । माषाणां भावः = माषत्वम् । अनेन त्वप्र० ।

**[ सत्त्वम्, सत्ता ]** सत् । सतो भावः = सत्त्वम्, सत्ता । अनेन त्व-तल्प्र० → त ।

**[ विद्यमानत्वम्, विद्यमानता ]** विद्यमानस्य भावः = विद्यमानत्वम्, विद्यमानता । अनेन त्व-तल्प्र० → त ।

**[ स्त्रीत्वम्, स्त्रीता ]** स्त्रीणां भावः = स्त्रीत्वम्, स्त्रीता । अनेन त्व-तल्प्र० → त० । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ स्त्रैणम् ]** स्त्रिया भावः = स्त्रैणम् । 'त्वे वा' (६।१।२६) नञ्प्र० → न । वृद्धिः ऐ ।

**[ पुंस्त्वम्, पुंस्ता ]** पुंसो भावः = पुंस्त्वम्, पुंस्ता । अनेन त्व-तल्प्र० → त । 'आत्' (२।४।१८) आप्प्र० → आ । 'शिड्-हेऽनुस्वारः' (१।३।४०) अनुस्वारः ।

**[ पौंस्नम् ]** पुंसो भावः = पौंस्नम् । 'त्वे वा' (६।१।२६) स्नञ्प्र० → स्न । वृद्धिः औ । 'शिड्-हेऽनुस्वारः' (१।३।४०) अनुस्वारः ।

यत उक्तं लिङ्गानुशासने त्वान्तं च "आ त्वात् त्वादिरि"ति नपुंसकत्वम् । (श्लोकाङ्कः ॥९॥) ॥छा॥

## प्राक् त्वादगडुलादेः ॥ ७।१।५६ ॥

**[ प्राक् ]** प्राक् प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ त्वात् ]** त्व पञ्चमी ङसि ।

**[ अगडुलादेः ]** गडुल आदिर्यस्य सः = गडुलादिः । न गडुलादिः = अगडुलादिः, तस्मात् = अगडुलादेः । 'नञत्' (३।२।१२५) न० → अ० ।

**[ गाडुल्यम् ]** गडुलस्य भावः कर्म वा = गाडुल्यम् । 'पतिराजान्तगुणाङ्ग-राजादिभ्यः कर्मणि च' (७।१।६०) ट्यणप्र० → य । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ कामण्डलवम् ]** कमण्डलोर्भावः कर्म वा = कामण्डलवम् । 'य्वृवर्णाल्लघ्वादेः' (७।१।६९) अणप्र० → अ । वृद्धिः । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । सि-अम् ।

**[ गडुलत्वम्, गडुलता ]** गडुरस्यास्ति = गडुलः । 'सिध्मादि-क्षुद्रजन्तु-रुग्भ्यः' (७।२।२१) लप्र० । गडुलस्य भावः । मतान्तरे अनेन त्व-तल्प्र० → त । 'आत्' (२।४।१८) आप्प्र० → आ ॥छ॥

**नञ्तत्पुरुषादबुधादेः ॥ ७।१।५७ ॥**

**[ नञ्तत्पुरुषात् ]** 卐नञ् चासौ तत्पुरुषश्च = नञ्तत्पुरुषस्तस्मात् ।

**[ अबुधादेः ]** बुध आदिर्यस्य सः = बुधादिः । न बुधादिः = अबुधादिस्तस्मात् ।

**[ अशुक्लत्वम्, अशुक्लता ]** न शुक्लोऽशुक्लः, तस्य भावः = अशुक्लत्वम्, अशुक्लता । अनेन त्व-तल्प्र० → त । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ अशौक्ल्यम् ]** शुक्लस्य भावः = शौक्ल्यम् । 'वर्णदृढादिभ्यष्ट्यण् च वा' (७।१।५९) ट्यण्प्र० → य । वृद्धिः औ । न शौक्ल्यम् = अशौक्ल्यम् । सि-अम् ।

**[ अकार्ष्ण्यम् ]** कृष्णस्य भावः कर्म वा = कार्ष्ण्यम् । 'वर्णदृढादिभ्यष्ट्यण् च वा' (७।१।५९) ट्यण्प्र० → य । वृद्धिः आर् । न कार्ष्ण्यम् = अकार्ष्ण्यम् । सि-अम् ।

**[ अपतित्वम्, अपतिता ]** न पतिः = अपतिः । अपतेर्भावः कर्म वा = अपतित्वम्, अपतिता । 'पतिराजान्त-गुणाङ्ग०' (७।१।६०) इत्यस्य बाधया अनेन विहितः भावे त्व-तल्प्र० → त । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ अनाधिपत्यम् ]** स्वामीभूतः पतिः अधिकः पतिरिति वा अस्यासौ अधिपतिः । अधिपतेर्भावः = आधिपत्यम् । 'पतिराजान्तगुणाङ्ग-राजादिभ्यः कर्मणि च' (७।१।६०) ट्यण्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । न आधिपत्यम् = अनाधिपत्यम् । अम् ।

**[ अगाणपत्यम् ]** गणपतेर्भावः = गाणपत्यम् । 'पतिराजान्त०' (७।१।६०) ट्यण्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । न गाणपत्यम् = अगाणपत्यम् । अम् ।

**[ अराजत्वम्, अराजता ]** न राजा = अराजा । 'नञत्' (३।२।१२५) न० → अ० । 'नञ्तत्पुरुषात्' (७।३।७१) समासान्ताभावः । अराज्ञो भावः = अराजत्वम्, अराजता । अनेन त्व-तल्प्र० → त । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् । 'आत्' (२।४।१८) आप्प्र० → आ । 'पतिराजान्त०' (७।१।६०) इत्यादिना ट्यण्बाधया प्रत्ययोऽत्र ।

**[ अनाधिराज्यम् ]** अधिको राजा = अधिराजः । 'राजन्-सखेः' (७।३।१०६) अट्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् । अधिराजस्य भावः = आधिराज्यम् । 'पतिराजान्त०' (७।१।६०) ट्यण्प्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । न आधिराज्यम् = अनाधिराज्यम् । 'अन् स्वरे' (३।२।१२९) अन् ।

---

卐 म० वृत्तौ-नञ्पूर्वस्तत्पुरुषः = नञ्तत्पुरुषः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ अयौवराज्यम् ]** युवन् । राजन् । युवा चासौ राजा च = युवराजः । 'राजन्-सखेः' (७।३।१०६) अट्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् । युवराजस्य भावः = यौवराज्यम् । 'पतिराजान्त०' (७।१।६०) ट्यणप्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । न यौवराज्यम् = अयौवराज्यम् । 'नञत्' (३।२।१२५) न० → अ ।

**[ अमूर्खत्वम्, अमूर्खता ]** न मूर्खः = अमूर्खः । अमूर्खस्य भावः = अमूर्खत्वम्, अमूर्खता । अनेन त्व-तल्प्र० ।

अत्र गुणाङ्गलक्षणट्यणबाधया ।

**[ अमौर्ख्यम् ]** मूर्खस्य भावः = मौर्ख्यम् । 'पतिराजान्त०' (७।१।६०) ट्यणप्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । न मौर्ख्यम् = अमौर्ख्यम् ।

**[ अजाड्यम् ]** जडस्य भावः = जाड्यम् । 'पतिराजान्त०' (७।१।६०) ट्यणप्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । न जाड्यम् = अजाड्यम् ।

**[ अस्थविरत्वम्, अस्थविरता ]** न स्थविरः = अस्थविरः । अस्थविरस्य भावः = अस्थविरत्वम्, अस्थविरता । अनेन त्व-तल्प्र० → त ।

अत्र वयोवचनलक्षणः 'प्राणिजाति-वयोऽर्थादञ्' (७।१।६६) अञ्बाधया-

**[ अस्थाविरम् ]** स्थविरस्य भावः कर्म वा = स्थाविरम् । 'युवादेरण्' (७।१।६७) अणप्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । न स्थाविरम् = अस्थाविरम् । 'नञत्' (३।२।१२५) न० → अ० । सि-अम् ।

**[ अकैशोरम् ]** किशोरस्य भावः कर्म वा = कैशोरम् । 'प्राणिजाति-वयोऽर्थादञ्' (७।१।६६) अञ्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । न कैशोरम् = अकैशोरम् । 'नञत्' (३।२।१२५) न० → अ० । सि-अम् ।

**[ अहायनत्वम्, अहायनता ]** न हायनः = अहायनः । अहायनस्य भावः = अहायनत्वम्, अहायनता । अनेन त्व-तल्प्र० → त । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ अद्वैहायनम् ]** द्वे हायने यस्य सः = द्विहायनः, तस्य भावः = द्वैहायनम् । 'हायनान्तात्' (७।१।६८) अणप्र० → अ । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । न द्वैहायनम् = अद्वैहायनम् ।

**[ अत्रैहायनम् ]** त्रीणि हायनानि यस्य गृहस्य = त्रिहायनः, तस्य भावः कर्म वा = त्रैहायनम् । 'हायनान्तात्' (७।१।६८) अणप्र० → अ । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । न त्रैहायनम् = अत्रैहायनम् । अत्रावयोऽर्थत्वात् 'चतुस्त्रेर्हायनस्य वयसि' (२।३।७४) न णत्वम् ।

**[ अपटुत्वम्, अपटुता ]** न पटुरपटुः । 'नञत्' (३।२।१२५) न० → अ० । अपटोर्भावः = अपटुत्वम्, अपटुता । अनेन त्व-तल्प्र० → त ।

**[ अपाटवम् ]** पटोर्भावः कर्म वा = पाटवम् । 'य्वृवर्णाल्लघ्वादेः' (७।१।६९) अणप्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । न पाटवम् = अपाटवम् ।

**[ अलाघवम् ]** लघोर्भावः कर्म वा = लाघवम् । 'य्वृवर्णाल्लघ्वादेः' (७।१।६९) अणप्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । न लाघवम् = अलाघवम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ अरमणीयत्वम्, अरमणीयता ]** न रमणीयः = अरमणीयः । अरमणीयस्य भावः कर्म वा = अरमणीयत्वम्, अरमणीयता । अनेन त्व-तल्प्र० → त ।

**[ अरामणीयकम् ]** रमणीयस्य भावः कर्म वा = रामणीयकम् । 'योपान्त्याद् गुरूपोत्तमादसुप्रख्यादकञ्' (७।१।७२) अकञ्प्र० → अक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । न रामणीयकम् = अरामणीयकम् ।

**[ प्राजापत्यम् ]** प्रजापतेर्भावः कर्म वा = प्राजापत्यम् । 'पतिराजान्त०' (७।१।६०) ट्यण्प्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ सैनापत्यम् ]** सेनापतेर्भावः कर्म वा = सैनापत्यम् । 'पतिराजान्त-गुणाङ्ग०' (७।१।६०) ट्यण्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ आपत्यम् ]** न विद्यते पतिरस्य = अपतिर्ग्रामः, तस्य भावः कर्म वा = आपत्यम् । 'पतिराजान्त०' (७।१।६०) ट्यण्प्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ आराज्यम् ]** न विद्यते राजा यत्र देशे सः = अराजा । अराज्ञो भावः कर्म वा = आराज्यम् । 'पतिराजान्तगुणाङ्ग०' (७।१।६०) ट्यण्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् ।

**[ आहायनम् ]** न हायनः = अहायनः । अहायनस्य भावः = आहायनम् । 'हायनान्तात्' (७।१।६८) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

卐**[ आपटवम् ]** न पटुरपटुः । अपटोर्भावः । 'य्वृवर्णाल्लघ्वादेः' (७।१।६९) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

**[ आरमणीयकम् ]** न रमणीयः = अरमणीयः । अरमणीयस्य भावः = आरमणीयकम् । 'योपान्त्याद् गुरूपोत्तमादसुप्रख्यादकञ्' (७।१।७२) अकञ्प्र० → अक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ आबुध्यम् ]** न बुधः = अबुधः, तस्य भावः कर्म वा = आबुध्यम् । 'पतिराजान्तगुणाङ्ग०' (७।१।६०) ट्यण्प्र० → य । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ आचतुर्यम् ]** न चतुरः = अचतुरः, तस्य भावः कर्म वा = आचतुर्यम् । 'पतिराजान्त०' (७।१।६०) ट्यण्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । सि-अम् ॥छा॥

## पृथ्वादेरिमन् वा ॥ ७।१।५८ ॥

**[ पृथ्वादेः ]** पृथुरादिर्यस्य सः = पृथ्वादिः, तस्मात् ।

**[ इमन् ]** इमन् प्रथमा सि ।

**[ वा ]** वा प्रथमा सि ।

**[ प्रथिमा, पृथुत्वम्, पृथुता, पार्थवम् ]** पृथु । पृथोर्भावः = प्रथिमा । 'पृथु-मृदु-भृश-कृश-दृढ-परिवृढस्य ऋतो रः' (७।४।३९) रत्वम् । 'त्र्यन्त्यस्वरादेः' (७।४।४३) उलोपः । एवम्-पृथुत्वम्, पृथुता । 'प्राक्त्वादगडुलादेः' (७।१।५६) त्व-तल्प्र० । एवम्-पार्थवम् । 'य्वृवर्णाल्लघ्वादेः' (७।१।६९) अण्प्र० → अ । 'वृद्धिः आर् । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

---

卐 इदमुदाहरणं बृहद्वृत्तौ नास्ति ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ म्रदिमा, मृदुत्वम्, मृदुता, मार्दवम् ]** मृदु । मृदोर्भावः = म्रदिमा । अनेन इमन्प्र० । 'पृथु-मृदु-भृश-कृश-दृढ-परिवृढस्य ऋतो रः' (७।४।३९) रत्वम् । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् । एवम्-मृदुत्वम्, मृदुता । 'प्राक्त्वादगडुलादेः' (७।१।५६) त्व-तल्प्र० । एवम्-मार्दवम् । 'य्वृवर्णाल्लघ्वादेः' (७।१।६९) अण्प्र० → अ । 'वृद्धिः स्वरेष्वा०' (७।४।१) वृद्धिः आर् । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

**[ बंहिमा, बहुलत्वम्, बहुलता, बाहुल्यम् ]** बहुल । बहुलस्य भावः = बंहिमा । अनेन इमन्प्र० । 'प्रिय-स्थिर-स्फिरोरु-गुरु-बहुल-तृप्र-दीर्घ-वृद्ध-वृन्दारकस्येमनि च प्रा-स्था-रफा-वर-गर-बंह-त्रप-द्राघ-वर्ष-वृन्दम्' (७।४।३८) बहुलस्य बंहभावः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम्-बहुलत्वम्, बहुलता । 'प्राक्त्वादगडुलादेः' (७।१।५६) त्व-तल्प्० । एवम्-बाहुल्यम् । 'पतिराजान्तगुणाङ्ग०' (७।१।६०) ट्यण्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ वत्सिमा, वत्सत्वम्, वत्सता, वात्सम् ]** वत्सस्य भावः = वत्सिमा । अनेन इमन्प्र० । एवम्-वत्सत्वम्, वत्सता । 'प्राक्त्वादगडुलादेः' (७।१।५६) त्व-तल्प्र० । एवम्-वात्सम् । 'प्राणिजाति-वयोऽर्थादञ्' (७।१।६६) अञ्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

गणोऽत्र ॥छ॥

## वर्ण-दृढादिभ्यष्ट्यण् च वा ॥ ७।१।५९ ॥

**[ वर्णदृढादिभ्यः ]** वर्णश्च दृढादयश्च = वर्णदृढादयस्तेभ्यः ।

**[ ट्यण् ]** ट्यण् प्रथमा सि ।

**[ च ]** च प्रथमा सि ।

**[ वा ]** वा प्रथमा सि ।

**[ शौक्ल्यम्, शुक्लिमा, शुक्लत्वम्, शुक्लता ]** शुक्लस्य भावः = शौक्ल्यम्, शुक्लिमा । अनेन ट्यण्प्र० → य - इमन्प्र० । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम्-शुक्लत्वम्, शुक्लता । 'प्राक्त्वादगडुलादेः' (७।१।५६) त्व-तल्प्र० → त ।

**[ कार्ष्ण्यम्, कृष्णिमा, कृष्णत्वम्, कृष्णता ]** कृष्णस्य भावः = कार्ष्ण्यम् कृष्णिमा । अनेन ट्यण्प्र० → य - इमन्प्र० । वृद्धिः आर् । शेषं पूर्ववत् । अग्रेऽपि पूर्ववत् ।

**[ काद्रव्यम्, कद्रिमा, कद्रुत्वम्, कद्रुता ]** कद्रु । कद्रोर्भावः = काद्रव्यम्, कद्रिमा । अनेन ट्यणप्र० → य - इमन्प्र० । 'त्रन्त्यस्वरादेः' (७।४।४३) उलुक् । शेषं पूर्ववत् ।

**[ शैत्यम्, शितिमा, शितित्वम्, शितिता, शैतम् ]** शिति । शितेर्भावः = शैत्यम्, शितिमा । अनेन ट्यणप्र० → य - इमन्प्र० । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । शेषं पूर्ववत् । एवम्-शैतम् । 'य्वृवर्णाल्लघ्वादेः' (७।१।६९) अण्प्र० → अ । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ दार्ढ्यम्, द्रढिमा, दृढत्वम्, दृढता ]** दृढस्य भावः = दार्ढ्यम्, द्रढिमा । अनेन ट्यणप्र० → य - इमन्प्र० । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः आर् । 'पृथु-मृदु-भृश-कृश-दृढ०' (७।४।३९) इत्यादिना रत्वम् । अग्रे पूर्ववत् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ वार्ढ्यम्, व्रढिमा, वृढत्वम्, वृढता ]** वृढस्य भावः = वार्ढ्यम्, व्रढिमा । अनेन ट्यण्प्र० → य - इमन्प्र० । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आर् । मतान्तरेण 'पृथु-मृदु-भृश०' (७।४।३९) वृढस्य ऋतो रत्वम् । अग्रे पूर्ववत् ।

**[ पारिवृढ्यम्, परिव्रढिमा, परिवृढत्वम्, परिवृढता ]** परिवृढस्य भावः = पारिवृढ्यम्, परिव्रढिमा । अनेन ट्यण्प्र० → य - इमन्प्र० । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः आ । 'पृथु-मृदु-भृश-कृश-दृढ-परिवृढस्य ऋतो रः' (७।४।३९) रत्वम् । एवमग्रेऽपि ।

**[ वैमत्यम्, विमतिमा, विमतित्वम्, विमतिता, वैमतम् ]** विमति मण्ड्यते । विविधा नानाप्रकारा वा मतिः = विमतिः । विमतेर्भावः = वैमत्यम्, विमतिमा । अनेन ट्यण्प्र० → य - इमन्प्र० । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । पूर्ववदग्रेऽपि एवम्-वैमतम् । 'य्वृवर्णाल्लघ्वादेः' (७।४।६९) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ साम्मत्यम्, सम्मतिमा, सम्मतित्वम्, सम्मतिता, साम्मतम् ]** सम्मति । सम्मतेर्भावः = साम्मत्यम्, सम्मतिमा । अनेन ट्यण्प्र० → य - इमन्प्र० । अग्रेऽपि पूर्ववत् । एवम्-साम्मतम् । 'य्वृवर्णाल्लघ्वादेः' (७।१।६९) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**टकारो ङ्यर्थः -**

**[ आर्हन्त्यम्, आर्हन्ती ]** 'अर्ह पूजायाम्' (५६४) अर्ह् । अर्हतीति अर्हन् । 'सुग्-द्विषार्हः सत्रि-शत्रु-स्तुत्ये' (५।२।२६) अतृश्प्र० → अत् । 'कर्त्तर्यनदभ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् । अर्हतो भावः = आर्हन्त्यम् । अनेन ट्यण्प्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अर्हतस्तो न्त् च' (७।१।६१) "न्त"देशः । अग्रेतने आर्हन्त्यशब्दे 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।६८) अलुक्। 'तद्धितयस्वरेऽनाति' (२।४।९२) यलुक् ।

उचितादयो राजादिगणे द्रष्टव्याः, आकृतिगणत्वात् ।

**[ औचिती ]** उचितस्य भावः = औचिती ।

**[ यथाकामी ]** कामस्यानतिक्रमेण = यथाकामम् । यथाकामस्य भावः = यथाकामी ।

**[ सामग्री ]** समग्राणां भावः = सामग्री ।

**[ शैली ]** शीलस्य भावः = शैली ।

**[ पारिख्याती ]** परिख्यातस्य भावः = पारिख्याती ।

**[ आनुपूर्वी ]** यो यः पूर्वोऽनुपूर्वम् । अनुपूर्वस्य भावः = आनुपूर्वी । 'पतिराजान्त०' (७।१।६०) ट्यण्प्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । 'व्यञ्जनात् तद्धितस्य' (२।४।८८) यलुक् ।

**[ स्थैर्यम्, स्थेमा ]** स्थिर । स्थिरस्य भावः = स्थैर्यम्, स्थेमा । अनेन ट्यण्प्र० → य । 'प्रिय-स्थिर-स्फिरोरु-गुरु-बहुल-तृप्र-दीर्घ-वृद्ध-वृन्दारकस्येमनि प्रा-स्था०' (७।४।३८) द्वितीये स्थिरस्य स्थ(था)देशः । प्रथमे 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् । द्वितीये प्र० सि । 'नि दीर्घः' (१।४।८५) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ॥छ॥

Jain Education International　For Personal & Private Use Only　www.jainelibrary.org

## पतिराजान्त-गुणाङ्ग-राजादिभ्यः कर्मणि च ॥ ७।१।६० ॥

**[ पतिराजान्तगुणाङ्गराजादिभ्यः ]** पतिश्च राजा च = पतिराजानौ । पतिराजानावन्ते येषां ते = पतिराजान्ताः । गुणो अङ्गं येषां ते = गुणाङ्गाः । राज आदिर्येषां ते = राजादयः । पतिराजान्ताश्च गुणाङ्गाश्च राजादयश्च = पतिराजान्तगुणाङ्गराजादयः, तेभ्यः ।

**[ कर्मणि ]** कर्मन् सप्तमी ङि ।

**[ च ]** च प्रथमा सि ।

**[ आधिपत्यम्, अधिपतित्वम्, अधिपतिता ]** अधिकः पतिः = अधिपतिः, तस्य भावः कर्म वा = आधिपत्यम् । अनेन ट्यण्प्र० → य । 'वृद्धिः स्वरेष्वा०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । एवम्-अधिपतित्वम्, अधिपतिता । प्राक्त्वादित्यधिकारात् अनेनैव त्व-तल्प्र० ।

**[ नारपत्यम् ]** नराणां पतिः = नरपतिः । नरपतेर्भावः = नारपत्यम् । अनेन ट्यण्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ बार्हस्पत्यम् ]** बृहस्पतेर्भावः कर्म वा = बार्हस्पत्यम् । अनेन ट्यण्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आर् । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ प्राजापत्यम् ]** प्रजापतेर्भावः कर्म वा = प्राजापत्यम् । अनेन ट्यण्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ सैनापत्यम् ]** सेनापतेर्भावः कर्म वा = सैनापत्यम् । अनेन ट्यण्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ आधिराज्यम्, अधिराजत्वम्, अधिराजता ]** अधिको राजा = अधिराजः । 'राजन्-सखेः' (७।३।१०६) अट्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् । अधिराजस्य भावः = आधिराज्यम् । अनेन ट्यण्प्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । अग्रेतनेऽपि अनेनैव त्व-तल्प्र० ।

**[ सौराज्यम् ]** सु-राजन् । शोभनो राजा = सुराजा । 'पूजास्वतेः प्राक् टात्' (७।३।७२) समासान्ताभावः । तस्य भावः = सौराज्यम् ।

**[ यौवराज्यम् ]** युवराजस्य भावः = यौवराज्यम् । अनेन ट्यण्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'नोऽपदस्य तद्धिते' (७।४।६८) अन्लुक् ।

द्रव्याश्रयो गुणः । गुणोऽङ्गं निमित्तं येषां प्रवृत्तौ ते गुणाङ्गाः, गुणद्वारेण ये गुणिनि वर्तन्ते न तु गुणवचना एव (ते गुणाङ्गा उच्यन्ते) ।

**[ मौढ्यम्, मूढत्वम्, मूढता ]** मूढस्य भावः कर्म वा = मौढ्यम् । अनेन ट्यण्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । अग्रेतनेऽपि अनेनैव त्व-तल्प्र० ।

न हि मूढो गुणोऽपि भण्यते, किन्तु मोहगुणद्वारेण गुणिन्येव वर्त्तते । अतो गुणोऽङ्गं प्रवृत्तिनिमित्तमस्यापि विद्यते इति गुणाङ्गः, न तु गुणवचनः । गुणवचना हि पूर्वं गुणे वर्तित्वा पश्चाद् गुणिनि वर्त्तन्ते ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ वैदुष्यम् ]** 'विदक् ज्ञाने' (१०९९) विद् । वेत्तीति विद्वान् । 'वा वेत्तेः क्वसुः' (५।२।२२) क्वसुप्र० → वस् । विदुषो भावः = वैदुष्यम् । अनेन ट्यणप्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः ऐ । 'क्वसुष्मतौ च' (२।१।१०५) "उष्"देशः । 'स्रंस्-ध्वंस्-क्वस्सनडुहो दः' (२।१।६८) इत्यादिना दो भवति ।

**[ राज्यम्, राजत्वम्, राजता ]** राज्ञो भावः कर्म वा = राज्यम् । अनेन ट्यणप्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् । अग्रेतने २ अपि अनेनैव त्व-तल्प्र० ।

**[ काव्यम्, कवित्वम्, कविता ]** कवि । कवेर्भावः = काव्यम् । अनेन ट्यणप्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । अग्रेतने २ अपि अनेनैव त्व-तल्प्र० ।

**[ ब्राह्मण्यम्, ब्राह्मणत्वम्, ब्राह्मणता ]** ब्राह्मणस्य भावः = ब्राह्मण्यम् । अनेन ट्यणप्र० → य । अग्रेतने २ अपि अनेनैव त्व-तल्प्र० ।

**चकारो भावे कर्मणि चेत्युभयसमुच्चयार्थः ।**

**[ अनृशंस ]** नृ 'शंसू स्तुतौ च' (५५०) शंस् । नॄन् शंसति = नृशंसः । 'कर्मणोऽण्' (५।१।७२) अणप्र० → अ । न नृशंसः = अनृशंसः ।।छ।।

## अर्हतस्तो न्त् च ॥ ७।१।६१ ॥

**[ अर्हतः ]** अर्हत् षष्ठी ङस् ।

**[ तः ]** त् षष्ठी ङस् ।

**[ न्त् ]** न्त् प्रथमा सि ।

**[ च ]** च प्रथमा सि ।

**[ आर्हन्त्यम्, आर्हन्ती, अर्हत्त्वम्, अर्हत्ता ]** अरिहननात् रजोहननात् रहस्याभावाच्च अर्हन् । पृषोदरादित्वात् अर्हन्निपात्यते । यद्वा चतुस्त्रिंशतमतिशयान् सुरेन्द्रादिकृतां पूजां अर्हतीति अर्हन् । 'शत्रानशावेष्यति०' (५।२।२०) शतृप्र० → अत् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् । अर्हतो भावः कर्म वा = आर्हन्त्यम् । अनेन ट्यणप्र० → य - त् → "न्त्"देशश्च । अर्हन्त्य मण्ड्यते । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । 'व्यञ्जनात् तद्धितस्य' (२।४।८८) यलुक् । अग्रेतने 'प्राक्त्वादगडुलादेः' (७।१।५६) त्व-तल्प्र० → त । 'आत्' (२।४।१८) आप्प्र० → आ ।।छ।।

## सहायाद् वा ॥ ७।१।६२ ॥

**[ सहायात् ]** सहाय पञ्चमी ङसि ।

**[ वा ]** वा प्रथमा सि ।

**[ साहाय्यम्, साहायकम्, सहायत्वम्, सहायता ]** सहायस्य भावः कर्म वा = साहाय्यम् । अनेन ट्यणप्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम्-साहायकम् । 'योपान्त्याद् गुरूपोत्तमादसुप्रख्यादकञ्' (७।१।७२) अकञ्प्र० → अक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम्-सहायत्वम्, सहायता । 'प्राक्त्वादगडुलादेः' (७।१।५६) त्व-तल्प्र० → त । 'आत्' (२।४।१८) आप्प्र० → आ ।।छ।।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## सखि-वणिग्-दूताद् यः ॥ ७।१।६३ ॥

**[ सखिवणिग्दूतात् ]** सखा च वणिग् च दूतश्च = सखिवणिग्दूतम्, तस्मात् ।

**[ यः ]** य प्रथमा सि ।

**[ सख्यम्, सखित्वम्, सखिता ]** 'षणूयी दाने' (१५००) षण् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सन् । अथवा 'षिवूच् उतौ' (११६४) षिव् । ('षेवृङ् सेवने' (८१८) षेव्) । 'षः सोऽष्ट्यै-ष्ठिव०' (२।३।९८) सिव्(सेव्) । सन्यते सीव्यते(सेव्यते) मित्रतया इति सखि । 'सनेर्डखिः' (उणा० ६२५) डखिप्र० । डिसंज्ञकत्वात् 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । सख्युर्भावः कर्म वा = सख्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । एवम्-सखित्वम्, सखिता । 'प्राक्त्वादगडुलादेः' (७।१।५६) त्व-तल्प्र० → त । 'आत्' (२।१।१८) आप्प्र० → आ ।

**[ वणिज्या, वणिज्यम्, वणिक्त्वम्, वणिक्ता ]** वणिज् । वणिजो भावः = वणिज्या । अनेन यप्र० । 'आत्' (२।४।१८) आप्प्र० → आ । एवम्-वणिक्त्वम्, वणिक्ता । 'प्राक्त्वादगडुलादेः' (७।१।५६) त्व-तल्प्र० → त । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ दूत्यम्, दूतत्वम्, दूतता ]** दूतस्य भावः कर्म वा = दूत्यम् । अनेन यप्र० । अग्रे पूर्ववत् ।

**[ वाणिज्यम् ]** वणिजो भावः = वाणिज्यम् । 'पतिराजान्त०' (७।१।६०) ट्यण्प्र० → य । 'वृद्धिः स्वरे०' (७।१।४) वृद्धिः आ । सि-अम् ।

**[ दौत्यम् ]** दूतस्य भावः = दौत्यम् । 'पतिराजान्त०' (७।१।६०) ट्यण्प्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ॥छा॥

## स्तेनान्नलुक् च ॥ ७।१।६४ ॥

**[ स्तेनात् ]** स्तेन पञ्चमी ङसि ।

**[ नलुक् ]** नस्य लुक् = नलुक् । प्रथमा सि ।

**[ च ]** च प्रथमा सि ।

**[ स्तेयम्, स्तेनत्वम्, स्तेनता, स्तैन्यम् ]** स्तेनस्य भावः कर्म वा = स्तेयम् । अनेन यप्र० - नलुक् च । एवम् - स्तेनत्वम्, स्तेनता । 'प्राक्त्वादगडुलादेः' (७।१।५६) त्व-तल्प्र० । एवम्-स्तैन्यम् । 'पतिराजान्त०' (७।१।६०) ट्यण्प्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छा॥

## कपि-ज्ञातेरेयण् ॥ ७।१।६५ ॥

**[ कपिज्ञातेः ]** कपिश्च ज्ञातिश्च = कपिज्ञाति, तस्मात् (तस्याः) ।

**[ एयण् ]** एयण् प्रथमा सि ।

**[ कापेयम्, कपित्वम्, कपिता ]** कपि । कपेर्भावः कर्म वा = कापेयम् । अनेन एयण्प्र० → एय । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । अग्रेतने 'प्राक्त्वादगडुलादेः' (७।१।५६) त्व-तल्प्र० ।

**[ ज्ञातेयम्, ज्ञातित्वम्, ज्ञातिता ]** ज्ञातेर्भावः कर्म वा = ज्ञातेयम् । अनेन एयण्प्र० → एय । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । अग्रेतने २ 'प्राक्त्वादगडुलादेः' (७।१।५६) त्व-तल्प्र० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यद्यपि कपिशब्दस्य प्राणिजातित्वं तथापि विशेषत्वात् 'य्वृवर्णाल्लघ्वादेः' (७।१।६९) इत्यादिनाऽणि प्राप्ते कपेरिकारान्तत्वादणि प्राप्ते, ज्ञातेश्च प्राणिजातित्वादञि प्राप्ते वचनम् ॥छ॥

## प्राणिजाति-वयोऽर्थादञ् ॥ ७।१।६६ ॥

[ **प्राणिजातिवयोऽर्थात्** ] प्राणी चासौ जातिश्च = प्राणिजातिः । प्राणिजातिश्च वयोऽर्थश्च = प्राणिजातिवयोऽर्थम्, तस्मात् ।

[ **अञ्** ] अञ् प्रथमा सि ।

[ **आश्वम्, अश्वत्वम्, अश्वता** ] अश्वस्य भावः कर्म वा = आश्वम् । अनेन अञ्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् । एवम्-अश्वत्वम्, अश्वता । अनेनैव त्व-तल्प्र० ।

[ **गार्दभम्** ] गर्दभस्य भावः = गार्दभम् । अनेन अञ्प्र० → अ । 'वृद्धिः स्वरेष्वा०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

[ **माहिषम्** ] महिषस्य भावः कर्म वा = माहिषम् । अनेन अञ्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

[ **द्वैपम्** ] द्वीपिन् । द्वीपिनो भावः कर्म वा = द्वैपम् । अनेन अञ्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः ऐ । 'नोऽपदस्य तद्धिते' (७।४।६१) इन्लुक् । सि-अम् ।

[ **हास्तम्** ] हस्तिन् । हस्तिनो भावः कर्म वा = हास्तम् । अनेन अञ्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'नोऽपदस्य तद्धिते' (७।४।६१) इन्लुक् । सि-अम् ।

वयोऽर्थ - [ **कौमारम्, कुमारत्वम्, कुमारता** ] कुमारस्य भावः कर्म वा = कौमारम् । अनेन अञ्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम्-कुमारत्वम्, कुमारता । अनेन त्व-तल्प्र० → त । 'आत्' (२।४।१८) आप्प्र० → आ ।

[ **कैशोरम्** ] किशोरस्य भावः कर्म वा = कैशोरम् । अनेन अञ्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

[ **शावम्** ] शवस्य भावः कर्म वा = शावम् । अनेन अञ्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

[ **वार्क्करम्** ] वर्क्करस्य भावः कर्म वा = वार्क्करम् । अनेन अञ्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

[ **कालभम्** ] कलभस्य भावः कर्म वा = कालभम् । अनेन अञ्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

[ **तृणत्वम्, तृणता** ] तृणस्य भावः = तृणत्वम्, तृणता । 'भावे त्व-तल्' (७।१।५५) त्व-तल्प्र० → त । 'आत्' (२।४।१८) आप्प्र० → आ ।

[ **देवदत्तत्वम्, देवदत्तता** ] देवदत्तस्य भावः = देवदत्तत्वम्, देवदत्तता । 'भावे त्व-तल्' (७।१।५५) त्व-तल्प्र० → त । 'आत्' (२।४।१८) आप्प्र० → आ ॥छ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## युवादेरण् ॥ ७।१।६७ ॥

**[ युवादेः ]** युवा आदिर्यस्य सः = युवादिः, तस्मात् ।

**[ अण् ]** अण् प्रथमा सि ।

**[ यौवनम्, युवत्वम्, युवता ]** युवन् । यूनो लिङ्गविशिष्टस्यापि ग्रहणात् युवतेर्भावः कर्म वा = यौवनम् । अनेन अण्प्र० → अ । 'जातिश्च णि-तद्धितयस्वरे' (३।२।५१) पुंवद्भावः । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः औ । अग्रेतने त्व-तल्प्र० → त ।

**[ यौवनिका ]** यूनो भावः कर्म वा = यौवनिका । 'चोरादेः' (७।१।७३) अकञ्प्र० → अक । 'आत्' (२।४।१८) आप्प्र० → आ । 'इच्चापुंसो०' (२।४।१०७) इ । वृद्धिः औ । 'यूनोऽके' (७।४।५०) अन्त्यस्वरादिलुगभावः ।

**[ स्थाविरम्, स्थविरत्वम्, स्थविरता ]** स्थविरस्य भावः कर्म वा = स्थाविरम् । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । अग्रेतने २ अनेन त्व-तल्प्र० → त ।

**[ सौहार्दम्, दौहार्दम् ]** सुहृदय-दुहृदयशब्दयोरणि 'हृदयस्य०' (३।२।९४) इत्यादिना हृद्देशे कृते 'हृद्-भग-सिन्धोः' (७।४।२५) इत्युभयपदवृद्धौ सौहार्दम्-दौहार्दमिति । एवमुत्तरयोरपि । ततश्च एकतरद्वयोपादानेनैव सिद्धे यद् युगपद् द्वयोपादानं तदर्थभेदार्थम् ॥छ॥

## हायनान्तात् ॥ ७।१।६८ ॥

**[ हायनान्तात् ]** हायनः अन्ते यस्य सः = हायनान्तः, तस्मात् ।

**[ द्वैहायनम्, द्विहायनत्वम्, द्विहायनता ]** द्वे हायने यस्य गृहस्य तत् = द्विहायनम् । द्विहायनस्य भावः = द्वैहायनम् । अनेन अण्प्र० → अ । वृद्धिः ऐ । एवम्-द्विहायनत्वम्, द्विहायनता । अनेन त्व-तल्प्र० → त ।

**[ त्रैहायनम् ]** त्रयो हायना यस्य गृहस्य तत् = त्रिहायनम् । त्रिहायनस्य भावः = त्रैहायनम् । अनेन अण्प्र० → अ । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । अत्र अवयोवचनात् 'चतुस्त्रेर्हायनस्य वयसि' (२।३।७४) इति णत्वं न भवति ।

**[ चातुर्हायनम् ]** चत्वारो हायना यस्य गृहस्य तत् = चतुर्हायनम्, तस्य भावः = चातुर्हायनम् । अनेन अण्प्र० → अ । वृद्धिः आ । अत्र अवयोवचनात् 'चतुस्त्रेर्हायनस्य वयसि' (२।३।७४) इति णत्वं न भवति ।

वयसि तु - **[ त्रैहायणम् ]** त्रिहायनस्य भावः = त्रैहायणम् । 'प्राणिजाति-वयोऽर्थादञ्' (७।१।६६) अञ्प्र० → अ । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'चतुस्त्रेर्हायनस्य वयसि' (२।३।७४) णत्वम् ।

**[ चातुर्हायणम् ]** चतुर्हायनस्य भावः = चातुर्हायणम् । 'प्राणिजाति-वयोऽर्थादञ्' (७।१।६६) अञ्प्र० → अ । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'चतुस्त्रेर्हायनस्य वयसि' (२।३।७४) णत्वम् ॥छ॥

## य्वृवर्णाल्लघ्वादेः ॥ ७।१।६९ ॥

**[ य्वृवर्णात् ]** इश्च उश्च ऋश्च = य्वृ । य्वृ(वृ)णां वर्णः = य्वृवर्णस्तस्मात् ।

**[ लघ्वादेः ]** लघुरादिः समीपो यस्य सः = लघ्वादिः, तस्मात् ।

**[ शौचम्, शुचित्वम्, शुचिता ]** शुचेर्भावः कर्म वा = शौचम् । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । एवम्-शुचित्वम्, शुचिता । अनेनैव त्व-तल्प्र० → त ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ शाकुनम् ]** शकुनेर्भावः = शाकुनम् ।

**[ मौनम् ]** मुनेर्भावः = मौनम् ।

**[ साम्मतम् ]** सङ्गता मतिर्यस्य-सती विद्यमाना मतिर्यस्येति वा = सम्मतिः । सम्मतेर्भावः = साम्मतम् ।

**[ काव्यम् ]** कवेर्भावः कर्म वा = काव्यम् । 'पतिराजान्त०' (७।१।६०) ट्यण्प्र० य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ नाखरजनम् ]** नख 'रञ्जीं रागे' (८९६) रञ्ज् । नखा रज्यन्तेऽनया = नखरजनी । 'करणा-ऽऽधारे' (५।३।१२९) अनट्प्र० → अन । पृषोदरादित्वात् नलोपः । गूर्जर धात्रीदेशे मींती महन्दी कथ्यते । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । नखरजन्या भावः कर्म वा = नाखरजनम् । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् ।

**[ हारीतकम् ]** 'हृंग् हरणे' (८८५) हृ । हरति रोगान् प्राणिनामिति हरीतकी । 'हृ-रुहि-पिण्डिभ्य ईतकः' (उणा० ७९) ईतकप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'गौरादिभ्यो मुख्यान्ङीः' (२।४।१९) ङी । हरीतक्या भावः कर्म वा = हारीतकम् । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् ।

**[ तैतवम् ]** तितउ पुं-नपुंसकः । तितउनो भावः कर्म वा = तैतवम् । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः ऐ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

**[ पार्थवम् ]** पृथु । पृथोर्भावः = पार्थवम् । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः आर् । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

**[ पाटवम् ]** पटोर्भावः = पाटवम् । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

**[ लाघवम् ]** लघोर्भावः = लाघवम् । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

**[ वाधवम् ]** वधू । वध्वा भावः कर्म वा = वाधवम् । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

**[ पैत्रम् ]** पितृ । पितुर्भावः = पैत्रम् । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'ऋतो रस्तद्धिते' (१।२।२६) रत्वम् ।

**आदिग्रहणं समीपमात्रार्थम्, तेन तितउ इत्यत्राव्यवहिते शुच्यादौ चैकवर्णव्यवहिते लघुनि भवति ।**

**[ घटत्वम् ]** घटस्य भावः = घटत्वम् । 'भावे त्व-तल्' (७।१।५५) त्वप्र० ।

**[ पटत्वम् ]** पटस्य भावः = पटत्वम् । 'भावे त्व-तल्' (७।१।५५) त्वप्र० ।

**[ पाण्डुत्वम् ]** पाण्डोर्भावः = पाण्डुत्वम् । 'भावे त्व-तल्' (७।१।५५) त्वप्र० ।

**[ कण्डूत्वम् ]** कण्ड्वा भावः = कण्डूत्वम् । 'भावे त्व-तल्' (७।१।५५) त्वप्र० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ कार्शानवम् ]** कृशानु । कृशानोर्भावः कर्म वा = कार्शानवम् । मतान्तरेण अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आर् । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । सि-अम् ।

**[ आरत्नम् ]** अरत्नेर्भावः कर्म वा = आरत्नम् । मतान्तरेण अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । सि-अम् ।

**[ आरातम् ]** 卐अरातेर्भावः कर्म वा = आरातम् । मतान्तरेण अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । सि-अम् ॥छ॥

## पुरुष-हृदयादसमासे ॥ ७।१।७० ॥

**[ पुरुषहृदयात् ]** पुरुषश्च हृदयश्च = पुरुषहृदयम्, तस्मात् ।

**[ असमासे ]** न समासः = असमासस्तस्मिन् । 'नञत्' (३।२।१२५) न० → अ० ।

न इति प्रसज्यप्रतिषेधः, न पर्युदासः, तत्र हि समासादन्यत्र स्यात् । बहुहृदय-बहुपुरुष इति इह न स्यात् । पौरुषम्-हार्दमिति ।

**[ पौरुषम्, पुरुषत्वम्, पुरुषता ]** पुरुषस्य भावः कर्म वा = पौरुषम् । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम्-पुरुषत्वम्, पुरुषता । अनेन त्व-तल्प्र० ।

**[ हार्दम्, हृदयत्वम्, हृदयता ]** हृदयस्य भावः कर्म वा = हार्दम् । अनेन अण्प्र० → अ । 'हृदयस्य हृल्लास-लेखाऽण्-ये' (३।२।९४) हृदयस्य "हृद्"देशः । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आर् । एवम्-हृदयत्वम्, हृदयता । अनेन त्व-तल्प्र० ।

**[ परमपुरुषत्वम् ]** परमश्चासौ पुरुषश्च = परमपुरुषः, तस्य भावः = परमपुरुषत्वम् । 'भावे त्व-तल्' (७।१।५५) त्वप्र० ।

**[ परमहृदयत्वम् ]** परमश्चासौ हृदयश्च = परमहृदयः, तस्य भावः = परमहृदयत्वम् । 'भावे त्व-तल्' (७।१।५५) त्वप्र० ।

**[ सत्पुरुषत्वम् ]** सतः पुरुषस्य भावः = सत्पुरुषत्वम् । 'भावे त्व-तल्' (७।१।५५) त्वप्र० ।

**[ सौहृदय्यम् ]** शोभनस्य हृदयस्य भावः = सौहृदय्यम् । 'पतिराजान्त०' (७।१।६०) ट्यण्प्र० → य । वृद्धिः औ ।

**[ काकस्य कार्ष्ण्यम् ]** काकस्य कृष्णस्य भावः = काकस्य कार्ष्ण्यम् । 'अस्वस्थगुणैः' (३।१।८७) इति समासनिषेधः । 'पतिराजान्तगुणाङ्ग०' (७।१।६०) ट्यण्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आर् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ बलाकायाः शौक्ल्यम् ]** बलाकायाः शुक्लाया भावः = बलाकायाः शौक्ल्यम् । 'अस्वस्थगुणैः' (३।१।८७) इति समासनिषेधः । 'पतिराजान्तगुणाङ्ग०' (७।१।६०) ट्यण्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ पौरुषम् ]** पुरुषस्य भावः = पौरुषम् । 'प्राणिजाति-वयोऽर्थादञ्' (७।१।६६) अञ्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

卐 है० प्र० - आरातेर्भावः कर्म वा ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**समासविषये प्रतिषेधार्थं पुरुषोपादानम्** ॥छ॥

**श्रोत्रियाद् यलुक् च ॥ ७।१।७१ ॥**

**[ श्रोत्रियात् ]** श्रोत्रिय पञ्चमी ङसि ।

**[ यलुक् ]** यस्य लुक् = यलुक् । प्रथमा सि ।

**[ च ]** च प्रथमा सि ।

**[ श्रौत्रम्, श्रोत्रियत्वम्, श्रोत्रियता, श्रौत्रियकम् ]** छन्दस् । छन्दोऽधीते = श्रोत्रियः । 'छन्दोऽधीते श्रोत्रश्च वा' (७।१।१७३) इयप्र० - "श्रोत्र"देशश्च । श्रोत्रियस्य भावः कर्म वा = श्रौत्रम् । अनेन अण्प्र० → अ - यलुक् च । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम्-श्रोत्रियत्वम्, श्रोत्रियता । अनेन त्व-तल्प्र० । एवम्-श्रौत्रियकम् । 'चोरादेः' (७।१।७३) अकञ्प्र० → अक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छ॥

**योपान्त्याद् गुरूपोत्तमादसुप्रख्यादकञ् ॥ ७।१।७२ ॥**

**[ योपान्त्यात् ]** य उपान्त्यो यस्य सः = योपान्त्यः, तस्मात् ।

**[ गुरूपोत्तमात् ]** गुरुरुपोत्तमं यस्य सः = गुरूपोत्तमः, तस्मात् । यद्वा अक्षराणां पङ्क्तौ तृतीयमक्षरमारभ्य उत्तममिति संज्ञा त्रिप्रभृतीनामन्त्यमुत्तमम्, तत्समीपमुपोत्तमम् । उपोत्तमं गुरुर्यस्य सः = गुरूपोत्तमः, तस्मात् । 'विशेषण-सर्वादि-संख्यं बहुव्रीहौ' (३।१।१५०) इत्यादिना गुरुशब्दस्य पूर्वनिपातः ।

**[ असुप्रख्यात् ]** न सुप्रख्यः = असुप्रख्यः, तस्मात् ।

**[ अकञ् ]** अकञ् प्रथमा सि ।

**[ रामणीयकम्, रमणीयत्वम्, रमणीयता ]** रमणीयस्य भावः कर्म वा = रामणीयकम् । अनेन अकञ्प्र० → अक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम्-रमणीयत्वम्, रमणीयता । अनेनैव त्व-तल्प्र० ।

**[ दार्शनीयकम् ]** दर्शनीयस्य भावः कर्म वा = दार्शनीयकम् । अनेन अकञ्प्र० → अक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ कामनीयकम् ]** कमनीयस्य भावः कर्म वा = कामनीयकम् । अनेन अकञ्प्र० → अक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ औपाध्यायकम् ]** उपाध्यायस्य भावः कर्म वा = औपाध्यायकम् । अनेन अकञ्प्र० → अक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ पानीयकम् ]** पानीयस्य भावः कर्म वा = पानीयकम् । अनेन अकञ्प्र० → अक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**गुरुग्रहणादनेकव्यञ्जनव्यवधानेऽपि भवति-**

**[ आचार्यकम् ]** आचार्यस्य भावः कर्म वा = आचार्यकम् । अनेन अकञ्प्र० → अक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**गुरुग्रहणं हि दीर्घपरिग्रहार्थं संयोगपरपरिग्रहार्थं च, अन्यथा दीर्घोपोत्तमादित्युच्येत ।**

**[ कापोतम् ]** कपोतस्य भावः = कापोतम् । 'प्राणिजाति-वयोऽर्थादञ्' (७।१।६६) अञ्प्र० → अ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ विमानत्वम् ]** विमानस्य भावः = विमानत्वम् । 'भावे त्व-तल्' (७।१।५५) त्वप्र० ।

**[ क्षत्रियत्वम् ]** क्षत्रियस्य भावः = क्षत्रियत्वम् । 'भावे त्व-तल्' (७।१।५५) त्वप्र० ।

**[ कायत्वम् ]** कायस्य भावः = कायत्वम् । 'भावे त्व-तल्' (७।१।५५) त्वप्र० । प्रथमे गुरुर्नास्ति द्वितीये तु उपोत्तमत्वं नास्ति ।

**[ सुप्रख्यत्वम्, सौप्रख्यम् ]** सु-प्र 卐'ख्यांक् प्रथने' (१०७१) ख्या । सुप्रचष्टे = सुप्रख्यः । 'उपसर्गादातो डोऽश्यः' (५।१।५६) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलुक् । सुप्रख्यस्य भावः कर्म वा = सुप्रख्यत्वम् । 'भावे त्व-तल्' (७।१।५५) त्वप्र० । एवम्-सौप्रख्यम् । 'पतिराजान्त०' (७।१।६०) ट्यणप्र० → य । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छा॥

## चोरादेः ॥ ७।१।७३ ॥

**[ चोरादेः ]** चोर आदिर्यस्य सः = चोरादिः, तस्मात् ।

**[ चौरिका, चौरकम् ]** चोरस्य भावः कर्म वा = चौरिका, चौरकम् । अनेन अकञ्प्र० → अक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्-तत्-क्षिपकादीनाम्' (२।४।१११) इ ।

**[ धौर्त्तिका, धौर्त्तकम् ]** धूर्त्तस्य भावः कर्म वा = धौर्त्तिका, धौर्त्तकम् । अनेन अकञ्प्र० → अक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्०' (२।४।१११) अ० → इ० ।

**[ मानोज्ञकम् ]** मनोज्ञस्य भावः कर्म वा । मनोज्ञादीनामकञन्तानां नपुंसकत्वमेव "आ त्वात् त्वादिः" इति । पूर्वेषां तु "चोराद्यमनोज्ञाद्यकञ्" इति स्त्रीनपुंसकता । मानोज्ञकम् ।

**[ प्रैयरूपकम् ]** प्रियं रूपं यस्य सः = प्रियरूपः, तस्य भावः कर्म वा = प्रैयरूपकम् । अनेन अकञ्प्र० → अक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ चोरत्वम्, चोरता ]** चोरस्य भावः कर्म वा = चोरत्वम्, चोरता । अनेनैव त्व-तल्प्र० → त । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ चौर्यम् ]** चोरस्य भावः = चौर्यम् । 'पतिराजान्तगुणाङ्गराजादिभ्यः कर्मणि च' (७।१।६०) ट्यणप्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ धौर्त्त्यम् ]** धूर्त्तस्य भावः = धौर्त्त्यम् । 'पतिराजान्त०' (७।१।६०) ट्यणप्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ ग्रामिक्यम् ]** ग्रामोऽस्यास्ति = ग्रामिकम् । ग्रामिकस्य भावः = ग्रामिक्यम् । 'पतिराजान्त०' (७।१।६०) ट्यणप्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छा॥

---

卐 क्रि० स०-ख्यांक् प्रकथने, प्रकटने इत्यन्ये । धा० पा०-प्रथने, प्रकथने इत्यन्ये ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## द्वन्द्वाल्लित् ॥ ७।१।७४ ॥

**[ द्वन्द्वात् ]** द्वन्द्व पञ्चमी ङसि ।

**[ लित् ]** ल् इदनुबन्धो यस्य सः = लित् । प्रथमा सि ।

**लित्करणं स्त्रीत्वार्थम् ।**

**[ गौपालपशुपालिका ]** गोपालपशुपालानां भावः कर्म वा = गौपालपशुपालिका । अनेन अकञ्प्र० → अक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्-तत्-क्षिपकादीनाम्' (२।४।१११) इ ।

**[ शैष्योपाध्यायिका ]** शिष्याश्च उपाध्यायाश्च = शिष्योपाध्यायाः, तेषां भावः कर्म वा = शैष्योपाध्यायिका । अनेन अकञ्प्र० → अक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्०' (२।४।१११) इ ।

**[ कौत्सकुशिकिका ]** कुत्सस्यापत्यानि वृद्धानि = कुत्साः । कुत्सि(शि)कस्यापत्यानि वृद्धानि = कुत्सि(शि)काः । 'विदादेर्वृद्धे' (६।१।४१) अञ्प्र० । 'यञञोऽश्यापर्णान्त-गोपवनादेः' (६।१।१२६) अञ्लुप् । कुत्साश्च कुशिकाश्च = कौत्सकुशिकिका । अनेन अकञ्प्र० → अक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्०' (२।४।१११) इ ।

**[ वैन्त्रिका ]** विश्च पक्षी-ना च नरः = विनरौ । विन्त्रोर्भावः कर्म वा = वैन्त्रिका । अनेन अकञ्प्र० → अक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः ऐ । 'ऋतो रस्तद्धिते' (१।२।२६) रत्वम् । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्०' (२।४।१११) इ । 'य्वृवर्णाल्लघ्वादेः' (७।१।६९) इत्यणि प्राप्ते परत्वादकञ् ।

**[ भारतबाहुबलिका ]** भरतश्च बाहुबलिश्च । भरतबाहुबल्योर्भावः = भारतबाहुबलिका । अनेन अकञ्प्र० → अक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्-तत्०' (२।४।१११) इ ।

**[ गोपालपशुपालत्वम्, गोपालपशुपालता ]** गोपालपशुपालकानां भावः कर्म वा = गोपालपशुपालत्वम्, गोपालपशुपालता । अनेनैव त्व-तल्प्र० → त । 'आत्' (२।४।१८) आप्प्र० → आ ॥छ॥

## गोत्र-चरणाच्छ्लाघा-ऽत्याकार-प्राप्त्यवगमे ॥ ७।१।७५ ॥

**[ गोत्रचरणात् ]** गोत्रं च चरणं च = गोत्रचरणम्, तस्मात् ।

**[ श्लाघाऽत्याकारप्राप्त्यवगमे ]** श्लाघा च अत्याकारश्च प्राप्तिश्च अवगमश्च = श्लाघाऽत्याकारप्राप्त्यवगमम्, तस्मिन् ।

श्लाघा विकत्थनम् । अत्याकारः परपरिभवः पराधिक्षेपः । विषयभावः पुनः श्लाघादीनां क्रियारूपाणां भावकर्मणी प्रति साध्यत्वात्, भावकर्मभ्यां कर्तृभ्यां श्लाघादयो यत्र साध्यन्ते इति तात्पर्यम् । गोत्रमपत्यं तस्याध्यायस्तत्र पठितं प्रवराध्यायपठितं च । चरणं शाखानिमित्तं कठादिः ।

**[ गार्गिकया श्लाघते ]** गर्गस्यापत्यं वृद्धं = गार्ग्यः । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । गार्ग्यस्य भावः कर्म वा = गार्गिका, तया । अनेन अकञ्प्र० → अक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'तद्धितयस्वरेऽनाति' (२।४।९२) यलुक् । 'श्लाघृङ् कत्थने' (६४५) श्लाघ् । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ काठिकया विकत्थते ]** कठेन प्रोक्तं वेदं विदन्त्यधीयते वा = कठाः । 'तेन प्रोक्ते' (६।३।१८१) अण्प्र० । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० । 'प्रोक्तात्' (६।२।१२९) अण्लुप् । द्वितीयस्य अणो लुप्' 'कठादिभ्यो वेदे लुप्' (६।३।१८३) इत्यनेन । कठानां भावः कर्म वा = काठिका, तया । अनेन अकञ्प्र० → अक । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'टौस्येत्' (१।४।१९) ए । 'एदैतोऽयाय्' (१।२।२३) अय् । एवमग्रेऽपि । 'कत्थि श्लाघायाम्' (७१९) कत्थ् । वर्त्त० ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[ गार्गिकयात्याकुरुते ]** गर्गस्यापत्यं वृद्धं = गार्ग्यः । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । गार्ग्यस्य भावः कर्म वा = गार्गिका, तया । अनेन अकञ्प्र० → अक । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'तद्धितयस्वरेऽनाति' (२।४।९२) यलुक् । अति-आङ् 'डुकृंग् करणे' (८८८) कृ । वर्त्त० ते । 'कृग्-तनादेरुः' (३।४।८३) उप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । 'अतः शित्युत्' (४।२।९८) अ० → उ० ।

**[ काठिकयाधिक्षिपति ]** कठेन प्रोक्तं वेदं विदन्त्यधीयते वा = कठाः । 'तेन प्रोक्ते' (६।३।१८१) अण्प्र० । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० । 'प्रोक्तात्' (६।२।१२९) अण्लुप् । द्वितीयस्य अणो लुप् 'कठादिभ्यो वेदे लुप्' (६।३।१८३) इत्यनेन । कठानां भावः कर्म वा = काठिका, तया । अनेन अकञ्प्र० → अक । वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'टौस्येत्' (१।४।१९) ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'क्षिपींत् प्रेरणे' (१३१७) क्षिप्, अधिपूर्व० । वर्त्त० तिव् । 'तुदादेः शः' (३।४।८१) शप्र० → अ ।

**[ गार्गिकां प्राप्तवान् ]** 'आप्लृंट् व्याप्तौ' (१३०७) आप्, प्रपूर्व० । प्राप्नोति स्म = प्राप्तवान् । 'क्त-क्तवतू' (५।१।१७४) क्तवतुप्र० → तवत् ।

**[ काठिकामधिगतवान् ]** अधिगच्छति स्म = अधिगतवान् । 'क्त-क्तवतू' (५।१।१७४) क्तवतुप्र० → तवत् । 'यमि-रमि-नमि-गमि-हनि-मनि-वनति-तनादेर्धुटि क्ङिति' (४।२।५५) मलुक् ।

**[ गार्गिकामवगतवान् ]** अवगच्छति स्म = अवगतवान् । 'क्त-क्तवतू' (५।१।१७४) क्तवतुप्र० → तवत् । 'यमि-रमि-नमि-गमि०' (४।२।५५) मलुक् ।

**[ काठिकां विज्ञातवान् ]** वि 'ज्ञांश् अवबोधने' (१५४०) ज्ञा । विजानाति स्म । 'क्त-क्तवतू' (५।१।१७४) क्तवतुप्र० → तवत् ।

**[ गार्गम् ]** गार्ग्यस्य भावः = गार्गम् । 'प्राणिजाति-वयोऽर्थादञ्' (७।१।६६) अञ्प्र० → अ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'व्यञ्जनात् तद्धितस्य' (२।४।८८) यलुक् । सि-अम् ।

**[ काठम् ]** कठानां भावः कर्म वा = काठम् । 'प्राणिजाति-वयोऽर्थादञ्' (७।१।६६) अञ्प्र० → अ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ॥छा।

## होत्राभ्य ईयः ॥ ७।१।७६ ॥

**[ होत्राभ्यः ]** होत्रा पञ्चमी भ्यस् ।

**[ ईयः ]** ईय प्रथमा सि ।

**होत्राशब्द ऋत्विग्विशेषवचनः ।**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ मैत्रावरुणीयम्, मैत्रावरुणत्वम्, मैत्रावरुणता ]** मित्रश्च वरुणश्च । 'वेदसहश्रुताऽवायुदेवतानाम्' (३।२।४१) आत्वम् । मित्रावरुणौ देवतेऽस्य = मैत्रावरुणः । 'देवता' (६।२।१०१) अण्प्र० → अ । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । मैत्रावरुणस्य भावः कर्म वा = मैत्रावरुणीयम् । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम्-मैत्रावरुणत्वम्, मैत्रावरुणता । अनेन त्व-तल्प्र० ।

**[ अग्नीधीयम् ]** अग्नि 'ञिइन्धैपि दीप्तौ' (१४९८) इन्ध् । अग्निमिन्द्धे = अग्नीध् । क्विप्प्र० । 'नो व्यञ्जनस्याऽनुदितः' (४।२।४५) नलुक् । अग्नीधो भावः कर्म वा = अग्नीधीयम् । अनेन ईयप्र० ।

**[ नेष्ट्रीयम् ]** नेष्टृ । नेष्टुर्भावः कर्म वा = नेष्ट्रीयम् । अनेन ईयप्र० । 'ऋतो रस्तद्धिते' (१।२।२६) रत्वम् ।

**[ पोत्रीयम् ]** पोतृ । पोतुर्भावः कर्म वा = पोत्रीयम् । अनेन ईयप्र० । 'ऋतो रस्तद्धिते' (१।२।२६) रत्वम् ।

**[ ब्राह्मणाच्छंसीयम् ]** ब्राह्मणाच्छंसिन् । ब्राह्मणाच्छंसिनो भावः कर्म वा = ब्राह्मणाच्छंसीयम् । अनेन ईयप्र० । 'नोऽपदस्य तद्धिते' (७।४।६१) इन्लुक् ।

**बहुवचनं स्वरूपविधिनिरासार्थं, किन्तु होत्रार्थं परिग्रहार्थम्** ॥छ॥

## ब्रह्मणस्त्वः ॥ ७।१।७७ ॥

**[ ब्रह्मणः ]** ब्रह्मन् पञ्चमी ङसि ।

**[ त्वः ]** त्व प्रथमा सि ।

होत्राभ्य इति वर्त्तते ।

**[ ब्रह्मत्वम्, ब्रह्मता ]** ब्रह्मन् । ब्रह्मणो भावः कर्म वा = ब्रह्मत्वम्, ब्रह्मता । अनेन त्वप्र० । 'प्राक्त्वादगडुलादेः' (७।१।५६) तल्प्र० → त । 'आत्' (२।४।१८) आप्प्र० → आ ॥छ॥

## शाकट-शाकिनौ क्षेत्रे ॥ ७।१।७८ ॥

**[ शाकटशाकिनौ ]** शाकटश्च शाकिनश्च = शाकटशाकिनौ ।

**[ क्षेत्रे ]** क्षेत्र सप्तमी ङि ।

**[ इक्षुशाकटम्, इक्षुशाकिनम् ]** इक्षु । इक्षूणां क्षेत्रम् = इक्षुशाकटम्, इक्षुशाकिनम् । अनेन शाकट-शाकिनप्र० ।

**[ मूलकशाकटम्, मूलकशाकिनम् ]** मूलकानां क्षेत्रं = मूलकशाकटम्, मूलकशाकिनम् । अनेन शाकट-शाकिनप्र० ।

**[ शाकशाकटम्, शाकशाकिनम् ]** शाकस्य क्षेत्रं = शाकशाकटम्, शाकशाकिनम् । अनेन शाकट-शाकिनप्र० ॥छ॥

## धान्येभ्य ईनञ् ॥ ७।१।७९ ॥

**[ धान्येभ्यः ]** धानाः प्रयोजनमस्य = धान्यम् । 'स्वर्ग-स्वस्तिवाचनादिभ्यो य-लुपौ' (६।४।१२३) यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक्, तेभ्यः ।

**[ ईनञ् ]** ईनञ् प्रथमा सि ।

**[ कौलत्थीनम् ]** कुलत्थानां क्षेत्रं = कौलत्थीनम् । अनेन ईनञ्प्र० → ईन । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ मौद्गीनम् ]** मुद्गानां क्षेत्रं = मौद्गीनम् । अनेन ईनञ्प्र० → ईन । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ प्रैयङ्गवीणम् ]** प्रियङ्गु । प्रियङ्गूणां क्षेत्रं = प्रैयङ्गवीणम् । अनेन ईनञ्प्र० → ईन । 'वृद्धिः स्वरेष्वादेर्ञ्णितिं०' (७।४।१) वृद्धिः ऐ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । 'र-षृवर्णान्नो ण०' (२।३।६३) णत्वम् ।

**[ नैवारीणम् ]** नीवाराणां क्षेत्रं = नैवारीणम् । अनेन ईनञ्प्र० → ईन । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'र-षृवर्णान्नो ण०' (२।३।६३) णत्वम् ।

**[ कौद्रवीणम् ]** कोद्रवाणां क्षेत्रं = कौद्रवीणम् । अनेन ईनञ्प्र० → ईन । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'र-षृवर्णान्नो ण०' (२।३।६३) णत्वम् ॥छ॥

## व्रीहि-शालेरेयञ् ॥ ७।१।८० ॥

**[ व्रीहिशालेः ]** व्रीहिश्च शालिश्च = व्रीहिशालि, तस्मात् ।

**[ एयञ् ]** एयञ् प्रथमा सि ।

**[ व्रैहेयम् ]** व्रीहीणां क्षेत्रं = व्रैहेयम् । अनेन एयञ्प्र० → एय । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ शालेयम् ]** शालीनां क्षेत्रं = शालेयम् । अनेन एयञ्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ॥छ॥

## यव-यवक-षष्टिकाद् यः ॥ ७।१।८१ ॥

**[ यवयवकषष्टिकात् ]** यवश्च यवकश्च षष्टिकश्च = यवयवकषष्टिकम्, तस्मात् ।

**[ यः ]** य प्रथमा सि ।

**[ यव्यम् ]** यवानां क्षेत्रं = यव्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ यवक्यम् ]** यवानां तुल्याः = यवकाः । 'तस्य तुल्ये कः संज्ञा-प्रतिकृत्योः' (७।१।१०८) कप्र० । यवकानां क्षेत्रं = यवक्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ षष्टिक्यम् ]** षष्टिरात्रेण पच्यमाना व्रीहयः = षष्टिकाः । अत्र(त) एव निपातनात् कप्र० । षष्टिकानां क्षेत्रं = षष्टिक्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छ॥

## वाऽणु-माषात् ॥ ७।१।८२ ॥

**[ वा ]** वा प्रथमा सि ।

**[ अणुमाषात् ]** अणुश्च माषश्च = अणुमाषम्, तस्मात् ।

**[ अणव्यम्, आणवीनम् ]** अणुः - रालकादिधान्यविशेषः । अणूनां क्षेत्रम् = अणव्यम् । अनेन यप्र० । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । एवम्-आणवीनम् । 'धान्येभ्य ईनञ्' (७।१।७९) ईनञ्प्र० → ईन । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः आ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ माष्यम्, माषीणम् ]** माषाणां क्षेत्रं = माष्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम्-माषीणम् । 'धान्येभ्य ईनञ्' (७।१।७९) ईनञ्प्र० → ईन । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'र-षृवर्णान्नो ण०' (२।३।६३) णत्वम् ।।छ।।

## वोमा-भङ्गा-तिलात् ।। ७।१।८३ ।।

**[ वा ]** वा प्रथमा सि ।

**[ उमाभङ्गातिलात् ]** उमा च भङ्गा च तिलश्च = उमाभङ्गातिलम्, तस्मात् । उमाभङ्गेऽपि धान्ये एव इष्येते । यद्यपि धान्यत्वमेतयोर्न प्रसिद्धं तथापि सण सप्तदशधान्यभेदः **सत्तरसं धन्न**मिति वाक्यात् प्रसिद्धम्, ततः पक्षे-ईनञ् ।

**[ उम्यम्, औमीनम् ]** उत्त्वं मीयते = उमा । 'उपसर्गादातो डोऽश्यः' (५।१।५६) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । पृषोदरादित्वात् दलोपत्वं निपात्यते । उमानां = अतसीनां क्षेत्रम् = उम्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । एवम् - औमीनम् । 'धान्येभ्य ईनञ्' (७।१।७९) ईनञ्प्र० → ईन । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ भङ्ग्यम्, भाङ्गीनम् ]** भङ्गा-शणधान्यम् । भङ्गानां क्षेत्रं = भङ्ग्यम् । अनेन यप्र० । एवम्-भाङ्गीनम् । 'धान्येभ्य ईनञ्' (७।१।७९) ईनञ्प्र० → ईन । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ तिल्यम्, तैलीनम् ]** तिलानां क्षेत्रं = तिल्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम्-तैलीनम् । 'धान्येभ्य ईनञ्' (७।४।७९) ईनञ्प्र० → ईन । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।।छ।।

## अलाब्वाश्च कटो रजसि ।। ७।१।८४ ।।

**[ अलाब्वाश्च ]** अलाबू पञ्चमी ङसि । 'स्त्रीदूतः' (१।४।२९) ङसि० → दास्० → आस्० । च प्रथमा सि ।

**[ कटः ]** कट प्रथमा सि ।

**[ रजसि ]** रजस् सप्तमी ङि ।

**[ अलाबूकटम् ]** अलाबूनां रजः = अलाबूकटम् । अनेन कटप्र० ।

**[ उमाकटम् ]** उमानां रजः = उमाकटम् । अनेन कटप्र० ।

**[ भङ्गाकटम् ]** भङ्गानां रजः = भङ्गाकटम् । अनेन कटप्र० ।

**[ तिलकटम् ]** तिलानां रजः = तिलकटम् । अनेन कटप्र० ।।छ।।

## अह्ना गम्येऽश्वादीनञ् ।। ७।१।८५ ।।

**[ अह्ना ]** अहन् तृतीया टा । 'अनोऽस्य' (२।१।१०८) अलुक् ।

**[ गम्ये ]** गम्यत इति गम्यस्तस्मिन् ।

**[ अश्वात् ]** अश्व पञ्चमी ङसि ।

**[ ईनञ् ]** ईनञ् प्रथमा सि ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ आश्वीनोऽध्वा ]** अश्वस्य एकेनाह्ना गम्यः = आश्वीनोऽध्वा । अनेन ईनञ्प्र० → ईन । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ अश्वस्य मासेन गम्यः ]** वाक्ये 'कृत्यस्य वा' (२।२।८८) कर्तृषष्ठी ॥छ॥

## कुलाज्जल्पे ॥ ७।१।८६ ॥

**[ कुलात् ]** कुल पञ्चमी ङसि ।

**[ जल्पे ]** जल्प सप्तमी ङि ।

**[ कौलीनम् ]** कुलस्य जल्पः = कौलीनम् । अनेन ईनञ्प्र० → ईन । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छ॥

## पील्वादेः कुणः पाके ॥ ७।१।८७ ॥

**[ पील्वादेः ]** पीलुरादिर्यस्य सः = पील्वादिः, तस्मात् ।

**[ कुणः ]** कुण प्रथमा सि ।

**[ पाके ]** पाक सप्तमी ङि ।

**[ पीलुकुणः ]** पीलूनां फलानां वृक्षाणां वा पाकः = पीलुकुणः । अनेन कुणप्र० ।

**[ कर्कन्धुकुणः ]** कर्कन्धूनां पाकः = कर्कन्धुकुणः । अनेन कुणप्र० । गणः ॥छ॥

## कर्णादेर्मूले जाहः ॥ ७।१।८८ ॥

**[ कर्णादेः ]** कर्ण आदिर्यस्य सः = कर्णादिः, तस्मात् ।

**[ मूले ]** मूल सप्तमी ङि ।

**[ जाहः ]** जाह प्रथमा सि ।

**[ कर्णजाहम् ]** कर्णस्य मूलं = कर्णजाहम् । अनेन जाहप्र० ।

**[ अक्षिजाहम् ]** अक्ष्णो मूलम् = अक्षिजाहम् । अनेन जाहप्र० ।

गणोऽत्र ॥छ॥

## पक्षात् तिः ॥ ७।१।८९ ॥

**[ पक्षात् ]** पक्ष पञ्चमी ङसि ।

**[ तिः ]** ति प्रथमा सि ।

**[ पक्षतिः ]** पक्षस्य मूलं = पक्षतिः । अनेन तिप्र० । मूलेऽप्यभिधेये शब्दशक्तिस्वाभाव्यात् स्त्रीलिङ्गः ॥छ॥

## हिमादेलुः सहे ॥ ७।१।९० ॥

**[ हिमात् ]** हिम पञ्चमी ङसि ।

**[ एलुः ]** एलु प्रथमा सि ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

[ **सहे** ] सह सप्तमी ङि ।

[ **हिमेलुः** ] हिमस्य सहः-हिमं सहमानो वा = हिमेलुः । अनेन एलुप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छ॥

**बल-वातादूलः ॥ ७।१।९१ ॥**

[ **बलवातात्** ] बलश्च वातश्च = बलवातम्, तस्मात् ।

[ **ऊलः** ] ऊल प्रथमा सि ।

[ **बलूलः** ] बलस्य सहः-बलं सहमानः = बलूलः । अनेन ऊलप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

[ **वातूलः** ] वातस्य सहः = वातूलः । अनेन ऊलप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छ॥

**शीतोष्ण-तृप्रादालुरसहे ॥ ७।१।९२ ॥**

[ **शीतोष्णतृप्रात्** ] शीतश्च उष्णश्च तृप्रश्च = शीतोष्णतृप्रम्, तस्मात् ।

[ **आलुरसहे** ] आलु प्रथमा सि । न सहः = असहस्तस्मिन् ।

[ **शीतालुः** ] शीतस्यासहः-शीतमसहमानः = शीतालुः । अनेन आलुप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

[ **उष्णालुः** ] उष्णस्यासहः-उष्णमसहमानः = उष्णालुः । अनेन आलुप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

[ **तृप्रालुः** ] तृप्रं-दुःखम्, तस्यासहः-तृप्रमसहमानः = तृप्रालुः । अनेन आलुप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छ॥

**यथामुख-सम्मुखादीनस्तद् दृश्यतेऽस्मिन् ॥ ७।१।९३ ॥**

[ **यथामुखसम्मुखात्** ] यथामुखश्च सम्मुखश्च = यथामुखसम्मुखम्, तस्मात् ।

[ **ईनः** ] ईन प्रथमा सि ।

[ **तद्** ] तद् प्रथमा सि ।

[ **दृश्यतेऽस्मिन्** ] दृश्यतेऽस्मिन् सप्तमी ङि । सूत्रत्वाल्लोपः ।

[ **यथामुखीन आदर्शादिः** ] यथामुखं दृश्यतेऽस्मिन् = यथामुखीनः । अनेन ईनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक्, आदर्शादिः । मुखस्य सदृशोऽर्थो यथामुखं-प्रतिबिम्बमुच्यते । अत एव निपातनात् 'यथाऽथा' (३।१।४१) इति प्रतिषेधेऽप्यव्ययीभावः ।

[ **सम्मुखीनः** ] समं मुखं = सम्मुखम् । समं तुल्यं मुखमस्यानेनेति वा = सम्मुखं प्रतिबिम्बमेव । अत एव निपातनात् समशब्दस्य अकारलोपः । सम्मुखं दृश्यतेऽस्मिन्निति सम्मुखीनः । अनेन ईनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । अभिमुखमित्यर्थः ।

[ **यथामुखीनः सीतायाः** ] यथामुखीनः सीतायाः-अग्रेभवनमात्रमत्र साम्यम् । आर्दशो ह्यग्रेभवत्येवं हनूमानमपि सीताया अग्रे भवति । सीताग्रे तिष्ठतीत्यर्थः ॥छ॥

**सर्वादेः पथ्यङ्ग-कर्म-पत्र-पात्र-शरावं व्याप्नोति ॥ ७।१।९४ ॥**

[ **सर्वादेः** ] सर्व आदिर्यस्य सः = सर्वादिः, तस्मात् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ पथ्यङ्गकर्मपत्रपात्रशरावम् ]** पन्थाश्च अङ्गश्च(अङ्गं च) कर्म च पत्रश्च(पत्रं च) पात्रश्च शरावश्च = पथ्यङ्गकर्मपत्रपात्रशरावम् ।

**[ व्याप्नोति ]** व्याप्नोति सप्तमी ङि । सूत्रत्वात् (लोपः) ।

**[ सर्वपथीनो रथः ]** सर्व-पथिन् । सर्वश्चासौ पन्थाश्च = सर्वपथः । 'ऋक्-पूः-पथ्यपोऽत्' (७।३।७६) अत्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) इन्लुक् । सर्वपथं व्याप्नोति = सर्वपथीनो रथः । अनेन ईनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ सर्वपथीनमुदकम् ]** सर्वे च ते पन्थानश्च = सर्वपथाः । 'ऋक्-पूः-पथ्यपोऽत्' (७।३।७६) अत्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) इन्लुक् । सर्वपथान् व्याप्नोति = सर्वपथीनमुदकम् । अनेन ईनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ सर्वाङ्गीणस्तापः ]** सर्वाङ्गी व्याप्नोतीति सर्वाङ्गीणस्तापः । अनेन ईनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ सर्वकर्मीणः पुरुषः ]** सर्वकर्म व्याप्नोतीति सर्वकर्मीणः पुरुषः । अनेन ईनप्र० । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् ।

**[ सर्वपत्रीणः सारथिः ]** सर्वपत्रं व्याप्नोतीति सर्वपत्रीणः सारथिः । अनेन ईनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ सर्वपात्रीण ओदनः ]** सर्वपात्रं व्याप्नोतीति सर्वपात्रीण ओदनः । अनेन ईनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ सर्वशरावीण ओदनः ]** सर्वशरावं व्याप्नोतीति सर्वशरावीण ओदनः । अनेन ईनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।।छ।।

## आप्रपदम् ॥ ७।१।९५ ॥

**[ आप्रपदम् ]** आप्रपदम् सप्तमी ङि । सूत्रत्वात् (लोपः) ।

**[ आप्रपदीनः पटः ]** प्रगतं पदं-प्रवृद्धं वा पदं = प्रपदम् । आ प्रपदात् = आप्रपदम् । 'पर्यपा-ऽऽङ्-बहिरच् पञ्चम्या' (३।१।३२) इत्यादिना अव्ययीभावः । पदाग्रं गुल्फमित्यर्थः । आप्रपदं व्याप्नोति न तदतिवर्त्तते यः स आप्रपदीनः पटः । अनेन ईनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । अनेन पद(ट)स्य प्रमाणमाख्यायते ।।छ।।

## अनुपदं बद्धा ॥ ७।१।९६ ॥

**[ अनुपदम् ]** अनुपदम् पञ्चमी ङसि । सूत्रत्वात् (लोपः) ।

**[ बद्धा ]** बद्धा सप्तमी ङि । सूत्रत्वात् (लोपः) ।

**[ अनुपदीना उपानत् ]** अनुपदस्य दीर्घा = अनुपदम् । 'दैर्घ्येऽनुः' (३।१।३४) इत्यव्ययीभावः । अनुपदं बद्धा-अनुपदं दीर्घा = अनुपदीना । अनेन ईनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'आत्' (२।४।१८) आप्प्र० → आ । उपानत् । पदप्रमाणेत्यर्थः ।।छ।।

## अयानयं नेयः ॥ ७।१।९७ ॥

**[ अयानयम् ]** अयानयम् पञ्चमी ङसि । सूत्रत्वात् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ नेयः ]** नेय प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । प्रथमान्तात् सप्तमी ङि । सूत्रत्वात् ।

**[ अयानयीनः शारः ]** अयानयं नेयोऽयानयीनः । क्षा(शा)रयूतोपकरणं फलकशिरसि स्थित उच्यते । अनेन ईनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । अयः प्रदक्षिणं गमनम्, अनयः प्रसव्यं वामम् । शारिद्यूते हि केचिच्छाराः प्रदक्षिणं गच्छन्ति, केचित् प्रसव्यम्, तेषां गतिरयसहितोऽनयोऽयानय इत्युच्यते । यस्मिन् दक्षिणगमने वामगमने च परशारा बाधिता भवन्ति तस्मिन् परशारैः पदानामप्रवेशः तदुभयं नेयः अयानयीन इति रुढिः । अथवा अयः शुभं दैवम्, अनयोऽशुभम्, शुभदैवादपवर्त्ततेऽशुभं दैवं यस्मिन् कर्मणि तदयानयं शान्तिकर्म चतुःशरणप्रतिपत्तिरनाघातघोषणं देवगुरुपूजा तपोदानं ब्रह्मचर्यादि नियमः तद्यो नेयः । कारयितव्यः सोऽयानयीन ईश्वर इति ॥छ॥

## सर्वाऽन्नमत्ति ॥ ७।१।९८ ॥

**[ सर्वाऽन्नम् ]** सर्वाऽन्नम् पञ्चमी ङसि । सूत्रत्वात् (लोपः) ।

**[ अत्ति ]** अत्तीति अदन्, तस्मिन् ।

**सर्वशब्दः प्रकारकात्स्न्र्ये च ।**

**[ सर्वान्नीनो भिक्षुः ]** सर्वप्रकारमन्नं = सर्वाऽन्नम्, तदत्ति = सर्वान्नीनो भिक्षुः । अनेन ईनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । नियमरहित इत्यर्थः ॥छ॥

## परोवरीण-परम्परीण-पुत्रपौत्रीणम् ॥ ७।१।९९ ॥

**[ परोवरीणपरम्परीणपुत्रपौत्रीणम् ]** परोवरीणश्च परम्परीणश्च पुत्रपौत्रीणश्च = परोवरीणपरम्परीणपुत्रपौत्रीणम् ।

**[ परोवरीणः ]** परांश्च अवरांश्च अनुभवति-साक्षात्करोति = परोवरीणः । अनेन ईनप्र० - अवरशब्दस्य अकारस्य च उत्वं निपात्यते । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ पारोवर्यम् ]** पर 'अव रक्षण-गति-कान्ति-तृप्त्यवगमन-प्रवेश-श्रवण-स्वाम्यर्थ-याचन-क्रियेच्छा-दीप्त्यवाप्त्या-ऽऽलिङ्गन-हिंसा-दहन-भाव-वृद्धिषु' (४८९) अव् । परानवति = परोवरम् । उणादित्वात् परोवरनिपात्यते । परोवरस्य भावः = पारोवर्यम् । 'पतिराजान्तगुणाङ्गराजादिभ्यः कर्मणि च' (७।१।६०) ट्यणप्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ परम्परीणः ]** परांश्च परतरांश्च अनुभवति = परम्परीणः । अनेन ईनप्र० - परम्परभावश्च निपात्यते ।

**[ पुत्रपौत्रीणः ]** पुत्रस्यापत्यमनन्तरं = पौत्रम् । 'पुनर्भू-पुत्र-दुहितृ-ननान्दुरनन्तरेऽञ्' (६।१।३९) अञ्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । पुत्रांश्च पौत्रांश्च अनुभवति = पुत्रपौत्रीणः । अनेन ईनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → णत्वम् ॥छ॥

## यथाकामा-ऽनुकामा-ऽत्यन्तं गामिनि ॥ ७।१।१०० ॥

**[ यथाकामाऽनुकामाऽत्यन्तम् ]** यथाकामश्च अनुकामश्च अत्यन्तश्च = यथाकामाऽनुकामाऽत्यन्तम् । पञ्चमी ङसि । सूत्रत्वात् (लोपः) ।

**[ गामिनि ]** गमिष्यतीति गामी । 'आङश्च णित्' (उणा० ९२०) णित् इन्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः, तस्मिन् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ यथाकामीनः ]** यो यः कामो यथाकामम् । यथाकामं गामी = यथाकामीनः । अनेन ईनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ अनुकामीनः ]** कामस्यानुरूपम् = अनुकामम् । अनुकामं गामी = अनुकामीनः । अनेन ईनप्र० । यथेच्छं गामीत्यर्थः ।

**[ अत्यन्तीनः ]** अतिक्रान्तोऽन्तो यत्र तत् = अत्यन्तम् । अत्यन्तं गामी = अत्यन्तीनः । अनेन ईनप्र० । भृशं गन्तेत्यर्थः ।।छा।

### पारावारं व्यस्त-व्यत्यस्तं च ॥ ७।१।१०१ ॥

**[ पारावारम् ]** पारावारम् पञ्चमी ङसि । सूत्रत्वात् (लोपः) ।

**[ व्यस्तव्यत्यस्तम् ]** व्यस्तव्यत्यस्तम् पञ्चमी ङसि । सूत्रत्वात् (लोपः) ।

**[ च ]** च प्रथमा सि ।

**[ पारावारीणः ]** अवारस्य-समुद्रस्य पारं = पारावारम् । राजदन्तादित्वात् पारशब्दस्य पूर्वनिपातः । पारावारं गामी = पारावारीणः । अनेन ईनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ पारीणः ]** पारं गामी = पारीणः । अनेन ईनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ अवारीणः ]** अवारं गामी = अवारीणः । अनेन ईनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ अवारपारीणः ]** अवारपारं गामी = अवारपारीणः । अनेन ईनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।।छा।

### अनुग्वलम् ॥ ७।१।१०२ ॥

**[ अनुगु ]** गवां पश्चादनुगु । 'क्लीबे' (२।४।९७) ह्रस्वः । द्वि० अम् । 'अनतो लुप्' (१।४।५९) अम्लुप् ।

**[ अलम् ]** अलम् प्रथमा सि । 'अव्ययस्य' (३।२।७) लुप् । अलं-पर्याप्तमित्यर्थः ।

**[ अनुगवीनो गोपालकः ]** गवां पश्चादनुगु । 'विभक्ति-समीप-समृद्धि-व्यृद्ध्यर्थाभावा-ऽत्यया-ऽसंप्रति-पश्चात्-क्रम-ख्याति-युगपत्-सदृक्-सम्पत्-साकल्यान्तेऽव्ययम्' (३।१।३९) इत्यादिना अव्ययीभावः । 'क्लीबे' (२।४।९७) ह्रस्वः । अनुगु अलंगामी = अनुगवीनो गोपालकः । अनेन ईनप्र० । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।।छा।

### अध्वानं येनौ ॥ ७।१।१०३ ॥

**[ अध्वानम् ]** अध्वानम् पञ्चमी ङसि । सूत्रत्वाल्लोपः ।

**[ येनौ ]** यश्च ईनश्च = येनौ । औ ।

अलङ्गामिनीति वर्त्तते ।

**[ अध्वन्यः, अध्वनीनः ]** अध्वानमलङ्गामी = अध्वन्यः, अध्वनीनः । अनेन य-ईनप्र० । 'अनोऽट्ये-ये' (७।४।५१) - 'ईनेऽध्वा-ऽऽत्मनोः' (७।४।४८) अनूलोपाभावः ।।छा।

### अभ्यमित्रमीयश्च ॥ ७।१।१०४ ॥

**[ अभ्यमित्रम् ]** अमित्रमभि = अभ्यमित्रम् । 'लक्षण-वीप्स्येत्थम्भूतेष्वभिना' (२।२।३६) इत्यादिना द्वितीया अम् । पञ्चमी ङसि । सूत्रत्वाल्लोपः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ ईयश्च ]** ईय प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । च प्रथमा सि ।

**[ अभ्यमित्रीयः, अभ्यमित्र्यः, अभ्यमित्रीणः ]** अभ्यमित्र मण्ड्यते । अभ्यमित्रमलङ्गामी = अभ्यमित्रीयः । अनेन ईयप्र० । एवम् - अभ्यमित्र्यः, अभ्यमित्रीणः । अनेनैव य-ईनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'र-षृवर्णान्नो ण एकपदेऽनन्त्यस्या-ऽल-च-ट-तवर्ग-श-सान्तरे' (२।३।६२) णत्वम् । अमित्राभिमुखं भृशं गन्तेत्यर्थः ॥छा॥

**समांसमीना-ऽद्यश्वीना-ऽद्यप्रातीना-ऽऽगवीन-साप्तपदीनम् ॥ ७।१।१०५ ॥**

**[ समांसमीनाऽद्यश्वीनाऽद्यप्रातीनाऽऽगवीनसाप्तपदीनम् ]** समांसमीनश्च अद्यश्वीनश्च अद्यप्रातीनश्च आगवीनश्च साप्तपदीनश्च (साप्तपदीनं च) = समांसमीनाऽद्यश्वीनाऽद्यप्रातीनाऽऽगवीनसाप्तपदीनम् ।

**[ समांसमीना गौः ]** समां समां गर्भं धारयति = समांसमीना । अनेन ईनप्र० - पूर्वपदविभक्तेश्चालुक् । 'अवर्णेवर्णस्य' (७।४।६८) आलुक्, गौः । वर्षं वर्षं प्रति गर्भं धारयतीत्यर्थः । समामिति 'काला-ऽध्वनोर्व्याप्तौ' (२।२।४२) इति द्वितीया । 'वीप्सायाम्' (७।४।८०) समां द्विर्वचनम् । समायां समायां विजायते-गर्भं विमुञ्चति = समांसमीना । मतान्तरेऽनेन ईनप्र० - पूर्वपदस्य यलोपश्च । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । 'आत्' (२।४।१८) आप्प्र० → आ । व्याप्त्यभावाच्चाधिकरणे सप्तमी ।

**[ अद्यश्वीना गौः ]** अद्य-श्वस् मण्ड्यते । अद्य च श्वस् च = अद्यश्वस् । अद्य श्वो वा विजनिष्यमाणा = अद्यश्वीना गौः । अनेन ईनप्र० । 'प्रायोऽव्ययस्य' (७।४।६५) अस्लुक् । 'आत्' (२।४।१८) आप्प्र० → आ । एवं नाम प्रत्यासन्नप्रसवेत्यर्थः ।

**[ अद्यश्वीनो लाभः ]** अद्य श्वो वा भविष्यति = अद्यश्वीनो लाभः । अनेन ईनप्र० । 'प्रायोऽव्ययस्य' (७।४।६५) अस्लुक् ।

**[ अद्यश्वीनं मरणम् ]** अद्य श्वो वा भविष्यति = अद्यश्वीनं मरणम् । अनेन ईनप्र० । 'प्रायोऽव्ययस्य' (७।४।६५) अस्लुक् ।

**[ अद्यप्रातीना गौः ]** अद्य प्रातर्वा विजनिष्यमाणा = अद्यप्रातीना गौः । अनेन ईनप्र० ।

**[ अद्यप्रातीनो लाभः, अद्यप्रातीनं मरणम् ]** अद्य प्रातर्वा विजनिष्यमाणः = अद्यप्रातीनो लाभः, अद्यप्रातीनं मरणम् । मतान्तरे अनेनैव ईनप्र० । 'प्रायोऽव्ययस्य' (७।४।६५) अर्लुप् । मतान्तरेणैतौ । स्वमते तु अद्यश्वीना गौर्विजननप्रत्यासत्तावेव भवति ।

**[ आगवीनः कर्मकरः ]** गोप्रतिदानात् आ = आगोप्रतिदानम् । आगोप्रतिदानं कारी = आगवीनः कर्मकरः । अनेन ईनप्र० - प्रतिदानस्य च लुक् । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । गवा भृतो य आ तस्या गोः प्रत्यर्पणात्कर्म करोति स आगवीनः ।

**[ साप्तपदीनं सख्यम्, साप्तपदीनः सखा, साप्तपदीनं मित्रम् ]** सप्तन्-पद । सप्तभिः पदैरवाप्यं = साप्तपदीनं सख्यं सखा मित्रं वा । अनेन ईनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ॥छा॥

**अषडक्षा-ऽऽशितंग्वलङ्कर्मा-ऽलंपुरुषादीनः ॥ ७।१।१०६ ॥**

**[ अषडक्षाऽऽशितंग्वलङ्कर्माऽलंपुरुषात् ]** अषडक्षश्च आशितङ्गुश्च(ङ्गु च) अलङ्कर्मा(र्म) च अलंपुरुषश्च = अषडक्षाऽऽशितंग्वलङ्कर्माऽलंपुरुषम्, तस्मात् ।

Jain Education International　For Personal & Private Use Only　www.jainelibrary.org

**[ ईनः ]** ईन प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ अषडक्षीणो मन्त्रः, अषडक्षीणा क्रीडा ]** षष्-अक्षि । अविद्यमानानि षडक्षीण्यस्मिन् = अषडक्षीणो मन्त्रः । 'सक्थ्यक्ष्णः स्वाङ्गे' (७।३।१२६) टः समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । अनेन ईनप्र० । 'र-षृवर्णान्नो ण०' (२।३।६३) णत्वम् । 'आत्' (२।४।१८) आप्प्र० → आ । क्रीडा । द्वाभ्यां साध्यत इत्यर्थः ।

**[ अषडक्षीणश्चैत्रः ]** अदृश्यानि षडक्षीण्यस्य = अषडक्षीणश्चैत्रः । पितुः पितामहस्य पुत्रस्य वा प्र(द्र)ष्टोच्यते ।

इन्द्रियपर्यायो वाक्षशब्दः -

**[ अषडक्षीणोऽमनस्कः ]** अविद्यमानानि षडक्षीण्यस्य = अषडक्षीणोऽमनस्कः । विचारेण विना प्रवर्त्तत इत्यर्थः ।

**[ आशितङ्गवीनमरण्यम् ]** आशिता गावोऽस्मिन्निति आशितङ्गु । 'परतः स्त्री पुम्वत् स्त्र्येकार्थेऽनूङ्' (३।२।४९) पुंवत् । 'क्लीबे' (२।४।९७) ह्रस्वत्वे अनेन ईनप्र० । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

**[ अलंकर्मीणः ]** अलं कर्मणे = अलंकर्मीणः । 'प्रात्यव-परि-निरादयो गत-क्रान्त-क्रुष्ट-ग्लान-क्रान्ताद्यर्थाः प्रथमाद्यन्तैः' (३।१।४७) इत्यादिना समासः । अनेन ईनप्र० । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् । 'र-षृवर्णान्नो ण एकपदे०' (२।३।६३) न० → ण० ।

**[ अलंपुरुषीणः ]** अलं पुरुषाय = अलंपुरुषीणः । 'प्रात्यव-परि-निरादयो०' (३।१।४७) इत्यादिना समासः । अनेन ईनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'र-षृवर्णान्नो ण एकपदे०' (२।३।६३) न० → ण० ।

**[ राजाधीनम् ]** राज्ञि अधीनं = राजाधीनम् । 'सप्तमी शौण्डाद्यैः' (३।१।८८) समासः । सि-अम् ।।छ।।

## अदिक्स्त्रियां वाऽञ्चः ॥ ७।१।१०७ ॥

**[ अदिक्स्त्रियाम् ]** दिक् चासौ स्त्री च = दिक्स्त्री । न दिक्स्त्री = अदिक्स्त्री, तस्याम् । 'नञत्' (३।२।१२५) न० → अ० ।

**[ वा ]** वा प्रथमा सि ।

**[ अञ्चः ]** अञ्च् पञ्चमी ङसि ।

**[ प्राक्, प्राचीनम् ]** प्र'अञ्चूग् गतौ च' (८९०) अञ्च् । प्राञ्चतीति प्राक् । क्विप्प्र० । 'अञ्चोऽनर्चायाम्' (४।२।४६) नलुक् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । नपुंसके प्रागेव = प्राचीनम् । अनेन ईनप्र० ।

**[ प्रत्यक्, प्रतीचीनम् ]** प्रत्यञ्चतीति प्रत्यक् । क्विप्प्र० । 'अञ्चोऽनर्चायाम्' (४।२।४६) नलुक् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । नपुंसके प्रत्यगेव = प्रतीचीनम् । अनेन ईनप्र० । 'अच्च् प्राग् दीर्घश्च' (२।१।१०४) अच्० → च्० - पूर्वस्वरस्य दीर्घः ।

**[ उदक्, उदीचीनम् ]** उदञ्चतीति उदक् । क्विप्प्र० । 'अञ्चोऽनर्चायाम्' (४।२।४६) नलुक् । उदगेव = उदीचीनम् । अनेन ईनप्र० । 'उदच उदीच्' (२।१।१०३) उदीच् आदेशः । सि-अम् ।

**[ अवाक्, अवीचीनम् ]** अवाञ्चतीति अवाक् । क्विप्प्र० । 'अञ्चोऽनर्चायाम्' (४।२।४६) नलुक् । अवागेव = अवीचीनम् । अनेन ईनप्र० । सि-अम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ सम्यङ्, समीचीन: ]** समञ्चतीति सम्यङ् । क्विप्प्र० । 'अञ्चोऽन०' (४।२।४६) नलुक् । 'सह-समः सध्रि-समि' (३।२।१२३) समिदेशः - पुल्लिङ्गे इदम् । सम्यङेव = समीचीनम्(नः) । अनेन ईनप्र० । 'अच्च् प्राग् दीर्घश्च' (२।१।१०४) दीर्घः ।

**[ प्राची दिक् ]** प्राञ्चतीति प्राची । क्विप्प्र० । 'अञ्चोऽनर्चायाम्' (४।२।४६) नलुक् । 'अञ्चः' (२।४।३) ङी ।

**[ उदीची दिक् ]** उदञ्चतीति क्विप्प्र० । 'अञ्चोऽनर्चायाम्' (४।२।४६) नलुक् । 'अञ्चः' (२।४।३) ङी ।

**[ प्राचीना शाखा ]** प्राची मण्ड्यते । प्राच्येव = प्राचीना । अनेन ईनप्र० । 'जातिश्च णि-तद्धितय-स्वरे' (३।२।५१) पुंवद्भावः ।

**[ अवाचीना ब्राह्मणी ]** अवाञ्चतीति अवाङ् । क्विप्प्र० । 'अञ्चोऽनर्चायाम्' (४।२।४६) नलुक् । 'अञ्चः' (२।४।३) ङी । अवाच्येव = अवाचीना । अनेन ईनप्र० । 'जातिश्च णि०' (३।२।५१) पुंवद्भावः ।

**[ प्राक् प्राचीनं रमणीयम् ]** प्राची मण्ड्यते । प्राच्यां दिशि । 'दिक्शब्दाद् दिग्-देश-कालेषु प्रथमा-पञ्चमी-सप्तम्याः' (७।२।११३) धाप्र० । 'लुबञ्चेः' (७।२।१२३) लुप् । 'ङ्यादेर्गौण०' (२।४।९५) ङीनिवृत्तिः । प्रागेव = प्राचीनं रमणीयम् । अनेन ईनप्र० । दिश्यपि लुबन्तं स्वभावात् नपुंसकम् ॥छ॥

## तस्य तुल्ये कः संज्ञा-प्रतिकृत्योः ॥ ७।१।१०८ ॥

**[ तस्य ]** तद् षष्ठी ङस् अथवा तस्य चतुर्थी ङे (पञ्चमी ङसि) । सूत्रत्वात् (लोपः) ।

**[ तुल्ये ]** तुल्य सप्तमी ङि ।

**[ कः ]** क प्रथमा सि ।

**[ संज्ञाप्रतिकृत्योः ]** संज्ञा च प्रतिकृतिश्च = संज्ञाप्रतिकृती, तयोः = संज्ञाप्रतिकृत्योः । सप्तमी ओस् ।

**प्रतिकृतिः काष्ठादिमयं प्रतिच्छन्दकम् ।**

**[ अश्वकः ]** अश्वस्य तुल्यः = अश्वकः । अनेन कप्र० ।

**[ उष्ट्रकः ]** उष्ट्रस्य तुल्यः = उष्ट्रकः । अनेन कप्र० ।

**[ गर्दभकः ]** गर्दभस्य तुल्यः = गर्दभकः । अनेन कप्र० ।

अश्वादिसदृशस्य प्राणिविशेषस्य संज्ञा एताः ।

**[ अश्वकं रूपम्, अश्विका प्रतिमा, अश्वकानि रूपाणि ]** अश्वं रूपम् । अनेन कप्र० । एवम्-अश्विका प्रतिमा । अश्वस्य तुल्यानि रूपाणि । अनेन कप्र० । जस् । 'नपुंसकस्य शिः' (१।४।५५) जस्० → शि० → इ० । 'स्वराच्छौ' (१।४।६५) नोऽन्तः । 'नि दीर्घः' (१।४।८५) दीर्घः ।

**[ गवयः ]** 卐'गुंत् पुरीषोत्सर्गे' (१४२७) गु । गुवतीति गवयः । 'कु-गु-वलि-मलि-कणि-तन्याम्यक्षेरयः' (उणा० ३६५) अयप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

**[ शिवकः ]** शिव इव = शिवकः । मतान्तरे अनेनैव कप्र० ॥छ॥

## न नृ-पूजार्थ-ध्वज-चित्रे ॥ ७।१।१०९ ॥

**[ न ]** न प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलोपः ।

卐 उणादौ-गुंङ् शब्दे ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ नृपूजार्थध्वजचित्रे ]** ना च पूजार्थश्च ध्वजश्च चित्रं च = नृपूजार्थध्वजचित्रम्, तस्मिन् ।

नृ - **[ चञ्चा ]** चञ्चा तृणमयः पुरुषः । यः क्षेत्ररक्षणाय क्रियते । चञ्चातुल्यः पुरुषः = चञ्चा ।

**[ वर्धिका ]** कुत्सिता-ऽल्पा-ऽज्ञाता वा वर्ध्री = वर्ध्रिका । 'कुत्सिता-ऽल्पा-ऽज्ञाते' (७।३।३३) कप्र० । 'आत्' (२।४।१८) आप्प्र० → आ । 'ङ्यादीदूतः के' (२।४।१०४) ह्रस्वः । वर्ध्रिकावत् जुगुप्स्यः पुरुषोऽपि वर्ध्रिका ।

पूजार्थः - **[ अर्हन् ]** अर्हन् इव = अर्हन् ।

**[ शिवः ]** शिव इव = शिवः ।

**[ स्कन्दः ]** स्कन्द इव = स्कन्दः ।

ध्वज - **[ गरुडः ]** गरुड इव = गरुडः ।

**[ सिंहः ]** सिंह इव = सिंहः ।

**[ दुर्योधनः ]** दुर्योधन इव = दुर्योधनः ।

**[ भीमसेनः ]** भीमसेन इव = भीमसेनः । सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

## अपण्ये जीवने ॥ ७।१।११० ॥

**[ अपण्ये ]** 'पणि व्यवहार-स्तुत्योः' (७१०) पण् । पणाय्यत इति पण्यम् । 'वर्योपसर्या-ऽवद्य-पण्यमुपेयर्तुमती-गर्ह्य-विक्रेये' (५।१।३२) यप्र० । न पण्यम् = अपण्यम्, तस्मिन् ।

**[ जीवने ]** जीव्यते येन तज्जीवनम्, तस्मिन् ।

**[ वासुदेवः ]** वासुदेवसदृशः = वासुदेवः ।

**[ शिवः ]** शिवसदृशः = शिवः ।

**[ स्कन्दः ]** स्कन्दसदृशः = स्कन्दः ।

**[ विष्णुः ]** विष्णुसदृशः = विष्णुः ।

**[ देवलकाः ]** देव 'लांक् आदाने' (१०६८) ला । देवान् लान्ति । 'आतो डोऽह्वा-वा-मः' (५।१।७६) डप्र० → अ । देवला एव = देवलकाः । देवा(व)लकानां जीविकार्थाः प्रतिकृतय उच्यन्ते ।

**[ हस्तिकान् विक्रीणीते ]** हस्तिनः प्रतिकृतयः = हस्तिकाः । 'तस्य तुल्ये कः संज्ञा-प्रतिकृत्योः' (७।१।१०८) कप्र०, तान् ।

**[ हस्तिकः ]** हस्तिनस्तुल्यः = हस्तिकः । 'तस्य तुल्ये कः संज्ञा-प्रतिकृत्योः' (७।१।१०८) कप्र० ॥छ॥

## देवपथादिभ्यः ॥ ७।१।१११ ॥

**[ देवपथादिभ्यः ]** देवपथ आदिर्येषां ते = देवपथादयः, तेभ्यः = देवपथादिभ्यः । पञ्चमी भ्यस् ।

**[ देवपथः ]** देव-पथिन् । देवस्य पन्थाः = देवपथः । 'ऋक्-पूः-पथ्यपोऽत्' (७।३।७६) अत्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) इन्लुक् । देवपथस्य तुल्यः = देवपथः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

[ **हंसपथः** ] हंसपथस्य तुल्यः = हंसपथः ।

अनेन कप्रत्ययो निषेधः ।।छ।।

## वस्तेरेयञ् ।। ७।१।११२ ।।

[ **वस्तेः** ] वस्ति पञ्चमी ङसि ।

[ **एयञ्** ] एयञ् प्रथमा सि ।

**तस्य तुल्य इत्यनुवर्त्तते, न संज्ञा-प्रतिकृत्योः ।**

[ **वास्तेयम्, वास्तेयी प्रणालिका** ] वस्तेस्तुल्यं = वास्तेयम् । अनेन एयञ्प्र० → एय । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । एवम्-वास्तेयी । 'अणञेयेकण्०' (२।४।२०) ङी । प्रणालिका ।।छ।।

## शिलाया एयच्च ।। ७।१।११३ ।।

[ **शिलायाः** ] शिला पञ्चमी ङसि ।

[ **एयच्** ] एयच् प्रथमा सि ।

[ **च** ] च प्रथमा सि ।

[ **शिलेयं दधि, शिलेयी इष्टका, शैलेयं दधि, शैलेयी इष्टका** ] शिलायास्तुल्यं = शिलेयं दधि, शिलेयी इष्टका । अनेन एयच्प्र० → एय । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । एवम्-शैलेयं दधि, शैलेयी इष्टका । अनेन एयञ्प्र० → एय । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । 'अणञेयेकण्०' (२।४।२०) ङी ।

**चकारः 'अणञेयेकण्०' ( २।४।२० ) इति एयस्य सामान्यग्रहणाविघातार्थः** ।।छ।।

## शाखादेर्यः ।। ७।१।११४ ।।

[ **शाखादेः** ] शाखा आदिर्यस्य सः = शाखादिः, तस्मात् ।

[ **यः** ] य प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

[ **शाख्यः** ] पुरुषस्कन्धस्य वृक्षस्कन्धस्य वा तिर्यक् प्रसृतमङ्गं शाखेत्युच्यते, तद्यथा शाखा पार्श्वायिता तथा कुलस्य यः पार्श्वायितोऽङ्गभूतः स शाखा । शाखायास्तुल्यः = शाख्यः । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

[ **मुख्यः** ] मुख्य(ख)स्य तुल्यः = मुख्यः । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

[ **जघन्यः** ] जघनस्य तुल्यः = जघन्यः । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

गणोऽत्र ।।छ।।

## द्रोर्भव्ये ।। ७।१।११५ ।।

[ **द्रोर्भव्ये** ] द्रु पञ्चमी ङसि । भव्य सप्तमी ङि ।

**विशिष्टेष्टपरिणामेन भवतीति भव्यम्, अभिप्रेतानामर्थानां पात्रम् ।**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ द्रव्यमयं माणवकः, द्रव्यं कार्षापणम् ]** 卐द्रुतुल्यः = द्रव्यम् । अनेन यप्र० । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । एवम्-द्रव्यं कार्षापणम् ।

यथा द्रु अग्रन्थि अजिह्मं दारु उपकल्प्यमानं विशिष्टेष्टरूपं भवति तथा माणवकोऽपि विनीयमानो विद्यालक्ष्म्यादिभाजनं भवतीति द्रव्यमुच्यते । कार्षापणमपि विनियुज्यमानं व्यापार्यमाणं विशिष्टेष्टमाल्योपभोगफलं भवतीति द्रव्यमुच्यते ।

**[ द्रव्यं राजपुत्रः ]** द्रुरिव = द्रव्यम् । अनेन यप्र० । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । राजपुत्रः ।

यथा द्रुमः पुष्पफलादिभिरर्थिनः कृतार्थयति एवमन्योऽपि यः सोऽपि द्रव्यमुच्यते ॥छ॥

## कुशाग्रादीयः ॥ ७।१।११६ ॥

**[ कुशाग्रात् ]** कुशस्य अग्रं = कुशाग्रम्, तस्मात् ।

**[ ईयः ]** ईय प्रथमा सि ।

**[ कुशाग्रीयं शस्त्रम्, कुशाग्रीया बुद्धिः ]** कुशाग्रस्य तुल्यं = कुशाग्रीयम् । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् । दुर्गत्वात् । कुशाग्रीया बुद्धिः तीक्ष्णत्वात् ॥छ॥

## काकतालीयादयः ॥ ७।१।११७ ॥

**[ काकतालीयादयः ]** काकतालीय आदिर्येषां ते = काकतालीयादयः ।

**[ काकतालीयम् ]** काकश्च तालं च(तालश्च) = काकतालम् । यथा कथञ्चिद् व्रजतः काकस्य निपतता तालेनातर्कितोपनतश्चित्रीयमाणः संयोगो लक्षणयोच्यते । काकश्च तालश्च = काकतालम्, तत्तुल्यं = काकतालीयम् । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ खलतिबिल्वीयम् ]** खलतिश्च बिल्वश्च = खलतिबिल्वः । खलतिबिल्वेन तुल्यं = खलतिबिल्वीयम् । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ अन्धकवर्तिकीयम् ]** अन्धकश्च वर्तिकश्च(का च) = अन्धकवर्तिकम् । 'क्लीबे' (२।४।९७) ह्रस्वः । अन्धकस्य वर्तिकाया उपरि अतर्कितः पादन्यास उच्यते । अन्धकस्य बाहूत्क्षेपे वर्त्तिकायाः करे निलयनं वा तत्तुल्यमन्धकवर्तिकीयम् । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ अजाकृपाणीयम् ]** अजया पादेनावकिरति आत्मवधाय कृपाणस्य दर्शनमजाकृपाणम्, तत्तुल्यमजाकृपाणीयम् । अनेन ईयप्र० निपात्यन्ते(ते) ।

**[ अर्द्धजरतीयम् ]** अर्द्धो जरत्याः = अर्द्धजरती, तत्तुल्यमर्द्धजरतीयम् । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् ।

**[ घुणाक्षरीयम् ]** घुणस्याक्षराणि = घुणाक्षराणि, तैस्तुल्यं = घुणाक्षरीयम् । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छ॥

## शर्करादेरण् ॥ ७।१।११८ ॥

**[ शर्करादेः ]** शर्करा आदिर्यस्य सः = शर्करादिः, तस्मात् ।

**[ अण् ]** अण् प्रथमा सि ।

---

卐 है० प्र०-द्रोस्तुल्यः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ शार्करं दधि, शार्करी मृत्तिका ]** शर्करायास्तुल्यं = शार्करं दधि मधुरत्वात् । अनेन अणप्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः । एवम्-शार्करा(री) मृद्वि(त्ति)का । 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङी । कठिनत्वात् ॥छ॥

## अः सपत्न्याः ॥ ७।१।११९ ॥

**[ अः ]** अ प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ सपत्न्याः ]** सपत्नी पञ्चमी ङसि ।

**[ सपत्नः ]** सपत्न्यास्तुल्यः = सपत्नः । अनेन अप्र० । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

## एकशालाया इकः ॥ ७।१।१२० ॥

**[ एकशालायाः ]** एकशाला पञ्चमी ङसि ।

**[ इकः ]** इक प्रथमा सि ।

**[ एकशालिकम् ]** एका चासौ शाला च = एकशाला । एकशालायास्तुल्यमेकशालिकम् । अनेन इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ॥छ॥

## गोण्यादेश्चेकण् ॥ ७।१।१२१ ॥

**[ गोण्यादेश्च ]** गोणी आदिर्यस्य सः = गोण्यादिः, तस्मात् । च प्रथमा सि ।

**[ इकण् ]** इकण् प्रथमा सि ।

**[ गौणिकम् ]** गोण्यास्तुल्यं = गौणिकम् । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् ।

**[ आङ्गुलिकम् ]** अङ्गुलेरङ्गुल्या वा तुल्यमाङ्गुलिकम् । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) इवर्णस्य लुक् ।

**[ ऐकशालिकम् ]** एकशालायास्तुल्यमैकशालिकम् । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

गणोऽत्र ॥छ॥

## कर्क-लोहिताट्टीकण् च ॥ ७।१।१२२ ॥

**[ कर्कलोहितात् ]** कर्कश्च लोहितश्च = कर्कलोहितम्, तस्मात् ।

**[ टीकण् ]** टीकण् प्रथमा सि ।

**[ च ]** च प्रथमा सि ।

**[ कार्कीकः, कार्किकः ]** शुक्लोऽश्वः कर्कः, तस्य तुल्यः = कार्कीकः । अनेन टीकण्प्र० → ईक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम्-कार्किकः । अनेनैव इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ लौहितीकः, लौहितिकः ]** लोहितस्य तुल्यः = लौहितीकः, लौहितिकः । अनेन टीकण्प्र० → ईक - इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । स्फटिकादिः । अलोहितवर्णोऽप्युपाश्रयवशाद्यस्तथावभासते स एवमुच्यते ।

**टकारो ङ्यर्थः** ।।छा।

## वेर्विस्तृते शाल-शङ्कटौ ॥ ७।१।१२३ ॥

**[ वेः ]** वि पञ्चमी ङसि ।

**[ विस्तृते ]** विस्तृत सप्तमी ङि ।

**[ शालशङ्कटौ ]** शालश्च शङ्कटश्च = शालशङ्कटौ ।

**[ विशालः, विशङ्कटः ]** वि-विस्तृतः = विशालः, विशङ्कटः । अनेन शाल-शङ्कटप्र० । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । विस्तृत इत्यर्थः ।।छा।

## कटः ॥ ७।१।१२४ ॥

**[ कटः ]** कट प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ विकटः ]** वि-विस्तृतः = विकटः । अनेन कटप्र० ।।छा।

## सं-प्रोन्नेः सङ्कीर्ण-प्रकाशा-ऽधिक-समीपे ॥ ७।१।१२५ ॥

**[ संप्रोन्नेः ]** सम् च प्रश्च उच्च निश्च = संप्रोन्नि, तस्मात् ।

**[ सङ्कीर्णप्रकाशाऽधिकसमीपे ]** सङ्कीर्णश्च प्रकाशश्च अधिकश्च समीपश्च = सङ्कीर्णप्रकाशाऽधिकसमीपम्, तस्मिन् ।

सङ्कीर्णः - **[ सङ्कटः ]** सम्शब्दात् अनेन कटप्र० ।

प्रकाशः - **[ प्रकटः ]** प्रशब्दात् अनेन कटप्र० ।

अधिकः - **[ उत्कटः ]** उत्शब्दात् अनेन कटप्र० ।

समीपः - **[ निकटम् ]** नि मण्ड्यते । नितरां समीपम् । निशब्दात् अनेन कटप्र० । पुं-नपुंसकोऽयं शब्दः ।।छा।

## अवात् कुटारश्चाऽवनते ॥ ७।१।१२६ ॥

**[ अवात् ]** अव पञ्चमी ङसि ।

**[ कुटारः ]** कुटार प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ च ]** च प्रथमा सि ।

**[ अवनते ]** अवनत सप्तमी ङि ।

**[ अवकुटारः, अवकटः ]** अवशब्दात् कुटार-कटप्र० ।।छा।

## नासानति-तद्वतोष्टीट-नाट-भ्रटम् ॥ ७।१।१२७ ॥

**[ नासानतितद्वतोः ]** तद्-सा = नासानतिरस्यास्ति = तद्वान् । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् । 'मावर्णान्तोपान्ता०' (२।१।९४) म० → व० । नासानतिश्च तद्वांश्च = नासानतितद्वन्तौ, तयोः = नासानतितद्वतोः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ टीटनाटभ्रटम् ]** टीटश्च नाटश्च भ्रटश्च = टीटनाटभ्रटम् ।

**[ अवटीटम्, अवनाटम्, अवभ्रटम् ]** अव नासाया नमनम् = अवटीटम्, अवनाटम्, अवभ्रटम् । अनेन टीट-नाट-भ्रटप्र० ।

सा नासानतिर्विद्यते यस्मिन् स तद्वान् नासा पुरुषः । अपकृष्टे वाऽर्थः तत्र-

**[ अवटीटा, अवनाटा, अवभ्रटा नासिका ]** नासानतिमती = अवटीटा, अवनाटा, अवभ्रटा । अवशब्दात् टीट-नाट-भ्रटप्र० । 'आत्' (२।४।१८) आप्प्र० → आ । नासिका ।

**[ अवटीटः, अवनाटः, अवभ्रटः पुरुषः ]** नासानतिमान् = अवटीटः, अवनाटः, अवभ्रटः । अनेन अवशब्दात् टीट-नाट-भ्रटप्र० । पुरुषः ।

**[ अवटीटम्, अवनाटम्, अवभ्रटं वा ब्रह्मदेयम् ]** नासानतिमत् = अवटीटम्, अवनाटम्, अवभ्रटम् । अनेन अवशब्दात् टीट-नाट-भ्रटप्र० । ब्रह्मभ्यो देयं = ब्रह्मदेयम् । 'य एच्चातः' (५।१।२८) यप्र० - ए० ।

अपकृष्टमपि हि वस्तु दृष्ट्वा लोको नासिकां नामयति । नामं करोति । 'णिज्बहुलं नाम्नः कृगादिषु' (३।४।४२) णिच्प्र० ।।छ।।

## नेरिन-पिट-काश्चिक्-चि-चिकश्चाऽस्य ।। ७।१।१२८ ।।

**[ नेः ]** नि पञ्चमी ङसि ।

**[ इनपिटकाः ]** इनश्च पिटश्च कश्च = इनपिटकाः । जस् ।

**[ चिक्चिचिकः ]** चिक् च चिश्च चिक् च = चिक्चिचिकः ।

**[ च ]** च प्रथमा सि ।

**[ अस्य ]** इदम् षष्ठी ङस् ।

**[ चिकिनम्, चिपिटम्, चिक्कं नासिकानमनम् ]** नि मण्ड्यते । नासायाः(नासिकायाः) नमनम् = चिकिनम्, चिपिटम्, चिक्कम् । अनेन इन-पिट-कप्र०-नेः स्थाने चिक्-चि-चिक्देशाः । नासिकाया नमनं शब्दान्तरेण शब्दस्यार्थकथनम् ।

**[ चिकिना, चिपिटा, चिक्का नासिका ]** नि मण्ड्यते । नासानतिमती = चिकिना, चिपिटा, चिक्का नासिका । अनेन इन-पिट-कप्र०-निस्थाने चिक्-चि-चिक्देशः ।

**[ चिकिनः, चिपिटः, चिक्कः पुरुषः ]** नासानतिमान् = चिकिनः, चिपिटः, चिक्कः पुरुषः । अनेन इन-पिट-कप्र०-निस्थाने चिक्-चि-चिक्देशः ।

**बहुवचनं रूढ्यर्थम्-तेन अपकृष्टे न भवति** ।।छ।।

## बिड-बिरीसौ नीरन्ध्रे च ।। ७।१।१२९ ।।

**[ बिडबिरीसौ ]** बिडश्च बिरीसश्च = बिडबिरीसौ ।

**[ नीरन्ध्रे ]** निर्गतो रन्ध्रात् = नीरन्ध्रस्तस्मिन् ।

**[ च ]** च प्रथमा सि ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ निबिडाः, निबिरीसाः केशाः ]** नि-नीरन्ध्राः = निबिडाः, निबिरीसाः केशाः । अनेन बिड-बिरीसप्र० ।

**[ निबिडम्, निबिरीसं वस्त्रम् ]** नि-नासिकाया नमनं = निबिडम्-निबिरीसम् । अनेन बिड-बिरीसप्र० ।

**[ निबिडा, निबिरीसा नासिका ]** नासानतिमती = निबिडा, निबिरीसा नासिका । अनेन बिड-बिरीसप्र० । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ निबिडो निबिरीसो मैत्रः ]** नासानतिमान् = निबिडो, निबिरीसो मैत्रः । अनेन बिड-बिरीसप्र० ।

विधानसामर्थ्यात् षत्वं न भवति ॥छा॥

## क्लिन्नाल्लश्चक्षुषि चिल्-पिल्-चुल् चास्य ॥ ७।१।१३० ॥

**[ क्लिन्नात् ]** क्लिन्न पञ्चमी ङसि ।

**[ लः ]** ल प्रथमा सि ।

**[ चक्षुषि ]** चक्षुस् सप्तमी ङि ।

**[ चिल्पिल्चुल् ]** चिल् च पिल् च चुल् च = चिल्पिल्चुल् ।

**[ च ]** च प्रथमा सि ।

**[ अस्य ]** इदम् षष्ठी ङस् ।

**[ चिल्लम्, पिल्लम्, चुल्लं चक्षुः ]** क्लिन्न मण्ड्यते । क्लिन्नं चक्षुः = चिल्लम्, पिल्लम्, चुल्लम् । अनेन लप्र० - क्लिन्नस्य च चिल्-पिल्-चुल्देशः ।

## उपत्यका-ऽधित्यके ॥ ७।१।१३१ ॥

**[ उपत्यका-ऽधित्यके ]** उपत्यका च अधित्यका च = उपत्यका-ऽधित्यके । औ । 'औता' (१।४।२०) ए ।

**[ उपत्यका ]** उप-पर्वतस्याऽऽसन्ना भूमिः = उपत्यका । अनेन उपशब्दात् त्यकप्र० । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ अधित्यका ]** अधि-पर्वतमधिरूढा भूः = अधित्यका । अनेन अधिशब्दात् त्यकप्र० । 'आत्' (२।४।१८) आप्प्र० → आ ।

क्षिपकादित्वादित्वाभावः । स्वभावतः स्त्रीलिङ्गावेतौ ॥छा॥

## अवेः सङ्घात-विस्तारे कट-पटम् ॥ ७।१।१३२ ॥

**[ अवेः ]** अवि पञ्चमी ङसि ।

**[ सङ्घातविस्तारे ]** सङ्घातश्च विस्तारश्च = सङ्घातविस्तारम्, तस्मिन् ।

**[ कटपटम् ]** कटश्च पटश्च = कटपटम् ।

**[ अविकटः ]** अवि । अवीनां सङ्घातः = अविकटः । अनेन कटप्र० ।

**[ अविपटः ]** अवि । अवीनां विस्तारः = अविपटः । अनेन पटप्र० ॥छा॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## पशुभ्यः स्थाने गोष्ठः ॥ ७।१।१३३ ॥

**[ पशुभ्यः ]** पशु पञ्चमी भ्यस् ।

**[ स्थाने ]** स्थान सप्तमी ङि ।

**[ गोष्ठः ]** गोष्ठ प्रथमा सि ।

**[ गोगोष्ठम् ]** गवां स्थानं = गोगोष्ठम् । अनेन गोष्ठप्र० । सि-अम् ।

**[ महिषीगोष्ठम् ]** महिषीणां स्थानं = महिषीगोष्ठम् । अनेन गोष्ठप्र० । सि-अम् ।

**[ अश्वगोष्ठम् ]** अश्वानां स्थानम् = अश्वगोष्ठम् । अनेन गोष्ठप्र० । सि-अम् ॥छ॥

## द्वित्वे गोयुगः ॥ ७।१।१३४ ॥

**[ द्वित्वे ]** द्वित्व सप्तमी ङि ।

**[ गोयुगः ]** गोयुग प्रथमा सि ।

**[ गोगोयुगम् ]** गवोर्द्वित्वं = गोगोयुगम् । अनेन गोयुगप्र० ।

**[ अश्वगोयुगम् ]** अश्वस्य(योः) द्वित्वम् = अश्वगोयुगम् । अनेन गोयुगप्र० ।

**[ उष्ट्रगोयुगम् ]** उष्ट्रस्य(योः) द्वित्वम् = उष्ट्रगोयुगम् । अनेन गोयुगप्र० ॥छ॥

## षट्त्वे षड्गवः ॥ ७।१।१३५ ॥

**[ षट्त्वे ]** षट्त्व सप्तमी ङि ।

**[ षड्गवः ]** षड्गव प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ उष्ट्रषड्गवम् ]** उष्ट्राणां षट्त्वमुष्ट्रषड्गवम् । अनेन षड्गवप्र० ।

**[ हस्तिषड्गवम् ]** हस्तिनां षट्त्वं = हस्तिषड्गवम् । अनेन षड्गवप्र० ।

**[ अश्वषड्गवम् ]** अश्वानां षट्त्वमश्वषड्गवम् । अनेन षड्गवप्र० ।

इदमर्थानामपवादः ॥छ॥

## तिलादिभ्यः स्नेहे तैलः ॥ ७।१।१३६ ॥

**[ तिलादिभ्यः ]** तिल आदिर्येषां ते = तिलादयः, तेभ्यः = तिलादिभ्यः । पञ्चमी भ्यस् ।

**[ स्नेहे ]** स्नेह सप्तमी ङि ।

**[ तैलः ]** तैल प्रथमा सि ।

**[ तिलतैलम् ]** तिलानां स्नेहो विकारः = तिलतैलम् । अनेन तैलप्र० ।

**[ सर्षपतैलम् ]** सर्षपाणां स्नेहो विकारः = सर्षपतैलम् । अनेन तैलप्र० ।

**[ इङ्गुदतैलम् ]** इङ्गुदानां स्नेहो विकारः = इङ्गुदतैलम् । अनेन तैलप्र० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ एरण्डतैलम् ]** एरण्डानां स्नेहो विकारः = एरण्डतैलम् । अनेन तैलप्र० ।

विकारप्रत्ययापवादः ॥छ॥

**तत्र घटते कर्मणष्ठः ॥ ७।१।१३७ ॥**

**[ तत्र ]** तत्र पञ्चमी ङसि । 'अव्ययस्य' (३।२।७) ङसिलुप् ।

**[ घटते ]** घटते सप्तमी ङि । सूत्रत्वात् (लोपः) ।

**[ कर्मणष्ठः ]** कर्मन् पञ्चमी ङसि । ठ प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'च-ट-ते०' (१।३।७) र० → ष० ।

**[ कर्मठः ]** कर्मन् । कर्मणि घटते = कर्मठः । अनेन ठप्र० ।

**तदस्य सञ्जातं तारकादिभ्य इतः ॥ ७।१।१३८ ॥**

**[ तद् ]** तद् प्रथमा सि । 'अनतो लुप्' (१।४।५९) लुप् ।

**[ अस्य ]** इदम् षष्ठी ङस् ।

**[ सञ्जातम् ]** सञ्जात सि-अम् ।

**[ तारकादिभ्यः ]** तारका आदिर्येषां ते = तारकादयः, तेभ्यः = तारकादिभ्यः । पञ्चमी भ्यस् ।

**[ इतः ]** इत प्रथमा सि ।

**[ तारकितं नभः ]** तारकाः सञ्जाता अस्य = तारकितं नभः । अनेन इतप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् ।

**[ पुष्पितस्तरुः ]** पुष्पाणि सञ्जातान्यस्य = पुष्पितस्तरुः । अनेन इतप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ ऋजीष ]** ऋजीषो अवस्करमुच्यते ।

**[ आराल ]** आरालो मूत्रं पुरीषयोः संज्ञा ॥छ॥

**गर्भादप्राणिनि ॥ ७।१।१३९ ॥**

**[ गर्भात् ]** गर्भ पञ्चमी ङसि ।

**[ अप्राणिनि ]** न प्राणी = अप्राणी । 'नञत्' (३।२।१२५) न० → अ०, तस्मिन् ।

**[ गर्भितो व्रीहिः ]** गर्भः सञ्जातोऽस्य = गर्भितो व्रीहिः । अनेन इतप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ गर्भिताः शालयः ]** गर्भः सञ्जात एषां ते = गर्भिताः शालयः । अनेन इतप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**प्रमाणान्मात्रट् ॥ ७।१।१४० ॥**

**[ प्रमाणात् ]** प्रमाण पञ्चमी ङसि ।

**[ मात्रट् ]** मात्रट् प्रथमा सि ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तदस्येति वर्त्तते । आयाममानं प्रमाणम्, तद् द्विविधम्, ऊर्ध्वमानं तिर्यग्मानं च ।

**ऊर्ध्वमानात्-[ जानुमात्रमुदकम् ]** जानु प्रमाणमस्य = जानुमात्रमुदकम् । अनेन मात्रट्प्र० → मात्र ।

**[ जानुमात्री खाता ]** जानुनी प्रमाणमस्याः सा = जानुमात्री खाता । अनेन मात्रट्प्र० → मात्र । 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङी ।

**[ ऊरुमात्रमुदकम् ]** ऊरु मण्ड्यते । ऊरु प्रमाणमस्य = ऊरुमात्रमुदकम् । अनेन मात्रट्प्र० → मात्र ।

**[ ऊरुमात्री खाता ]** ऊरु प्रमाणमस्याः सा = ऊरुमात्री खाता । अनेन मात्रट्प्र० → मात्र । 'अणञेयेकण्०' (२।४।२०) ङी ।

**तिर्यग्मानात्-[ रज्जुमात्री भूमिः ]** रज्जुः प्रमाणमस्याः सा = रज्जुमात्री भूमिः । अनेन मात्रट्प्र० → मात्र । 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ तन्मात्री ]** तद् । तत्प्रमाणमस्याः सा = तन्मात्री । अनेन मात्रट्प्र० → मात्र । 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङी ।

**[ तावन्मात्री ]** तावत्प्रमाणमस्याः सा = तावन्मात्री । अनेन मात्रट्प्र० → मात्र । 'अणञेयेकण्०' (२।४।२०) ङी ॥छ॥

## हस्ति-पुरुषाद् वाऽण् ॥ ७।१।१४१ ॥

**[ हस्तिपुरुषात् ]** हस्ती च पुरुषश्च = हस्तिपुरुषम्, तस्मात् ।

**[ वा ]** वा प्रथमा सि ।

**[ अण् ]** अण् प्रथमा सि ।

**[ हास्तिनम्, हस्तिमात्रम्, हस्तिदघ्नम्, हस्तिद्वयसमुदकम् ]** हस्ती प्रमाणमस्य = हास्तिनम् । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः आ । 'अनपत्ये' (७।४।४५) इत्यनेन अन्त्यलोपाभावः । एवम्-हस्तिमात्रम् । 'प्रमाणान्मात्रट्' (७।१।१४०) मात्रट्प्र० → मात्र । एवम्-हस्तिदघ्नम्, हस्तिद्वयसमुदकम् । 'वोर्ध्वं दघ्नट्-द्वयसट्' (७।१।१४२) दघ्नट्प्र० → दघ्न-द्वयसट्प्र० → द्वयस ।

**[ हास्तिनी, हस्तिमात्री, हस्तिदघ्नी, हस्तिद्वयसी खाता ]** हस्ती प्रमाणमस्याः सा = हास्तिनी । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । एवम्-हस्तिमात्री । 'प्रमाणान्मात्रट्' (७।१।१४०) मात्रट्प्र० → मात्र । एवम्-हस्तिदघ्नी, हस्तिद्वयसी खाता । 'वोर्ध्वं दघ्नट्-द्वयसट्' (७।१।१४२) दघ्नट्प्र० → दघ्न-द्वयसट्प्र० → द्वयस । 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ पौरुषम्, पुरुषमात्रम्, पुरुषदघ्नम्, पुरुषद्वयसमुदकम् ]** पुरुषः प्रमाणमस्य । यद्वा पुरुषस्य प्रमाणं = पौरुषम् । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वा०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम्-पुरुषमात्रम् । 'प्रमाणान्मात्रट्' (७।१।१४०) मात्रट्प्र० → मात्र । एवम्-पुरुषदघ्नम्, पुरुषद्वयसम् । 'वोर्ध्वं०' (७।१।१४२) दघ्नट्प्र० → दघ्न-द्वयसट्प्र० → द्वयस । उदकम् ।

**[ पौरुषी, पुरुषमात्री, पुरुषदघ्नी, पुरुषद्वयसी खाता ]** पुरुषः प्रमाणमस्याः सा = पौरुषी । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । एवम्-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पुरुषमात्री । 'प्रमाणान्मात्रट्' (७।१।१४०) मात्रट्प्र० → मात्र । एवम्-पुरुषदघ्नी, पुरुषद्वयसम् । 'वोर्ध्वं दघ्नट्-द्वयसट्' (७।१।१४२) दघ्नट्प्र० → दघ्न-द्वयसट्प्र० → द्वयस । 'अणञेयेकण्०' (२।४।२०) ङी । खाता ।

**[ पौरुषी, पुरुषमात्री छाया ]** पुरुषः प्रमाणमस्याः सा । यद्वा पुरुषस्य प्रमाणा = पौरुषी, पुरुषमात्री । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः औ । मात्रट्प्र० → मात्र । 'अणञेयेकण्०' (२।४।२०) ङी । छाया ।

तिर्यग्माने अत एव दघ्नट्-द्वयसट्प्रत्ययौ न भवतः ॥छ॥

## वोर्ध्वं दघ्नट् द्वयसट् ॥ ७।१।१४२ ॥

**[ वा ]** वा प्रथमा सि ।

**[ ऊर्ध्वम् ]** ऊर्ध्वम् पञ्चमी ङसि । सूत्रत्वात् (लोपः) ।

**[ दघ्नट्द्वयसट् ]** दघ्नट् च द्वयसट् च = दघ्नट्द्वयसट् । प्रथमा सि ।

**[ ऊरुदघ्नम्, ऊरुद्वयसम्, ऊरुमात्रमुदकम् ]** ऊरु । ऊरुः प्रमाणमस्य = ऊरुदघ्नम्, ऊरुद्वयसम् । अनेन दघ्नट्प्र० → दघ्न-द्वयसट्प्र० → द्वयस । एवम्-ऊरुमात्रम् । 'प्रमाणान्मात्रट्' (७।१।१४०) मात्रट्प्र० → मात्र । उदकम् ।

**[ ऊरुदघ्नी, ऊरुद्वयसी, ऊरुमात्री खाता ]** ऊरुः प्रमाणमस्याः सा = ऊरुदघ्नी, ऊरुद्वयसी । अनेन दघ्नट्प्र० → दघ्न-द्वयसट्प्र० → द्वयस । एवम्-ऊरुमात्री । 'प्रमाणान्मात्रट्' (७।१।१४०) मात्रट्प्र० → मात्र । 'अणञेयेकण्०' (२।४।२०) ङी । खाता ।

**[ तद्दघ्नी, तद्द्वयसी, तन्मात्री ]** तत्प्रमाणमस्याः सा = तद्दघ्नी, तद्द्वयसी । अनेन दघ्नट्प्र० → दघ्न-द्वयसट्प्र० → द्वयस । 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ तावद्दघ्नी, तावद्द्वयसी, तावन्मात्री ]** तावत्प्रमाणमस्याः सा = तावद्दघ्नी, तावद्द्वयसी । अनेन दघ्नट्प्र० → दघ्न-द्वयसट्प्र० → द्वयस । 'अणञेयेकण्०' (२।४।२०) ङी ।

वाग्रहणमण्-मात्रटोरबाधनार्थम्, तेन-

**[ पुरुषदघ्नम्, पुरुषद्वयसम्, पुरुषमात्रम्, पौरुषम् ]** पुरुषस्य प्रमाणं = पुरुषदघ्नम्, पुरुषद्वयसम् । अनेन दघ्नट्प्र० → दघ्न-द्वयसट्प्र० → द्वयस । एवम्-पुरुषमात्रम् । 'प्रमाणान्मात्रट्' (७।१।१४०) मात्रट्प्र० → मात्र । एवम्-पौरुषम् । 'हस्ति-पुरुषाद् वाऽण्' (७।१।१४१) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ रज्जुमात्री भूमिः ]** रज्जुः प्रमाणमस्याः सा = रज्जुमात्री भूमिः । 'प्रमाणान्मात्रट्' (७।१।१४०) मात्रट्प्र० → मात्र । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ॥छ॥

## मानादसंशये लुप् ॥ ७।१।१४३ ॥

**[ मानात् ]** मान पञ्चमी ङसि ।

**[ असंशये ]** असंशय सप्तमी ङि ।

**[ लुप् ]** लुप् प्रथमा सि ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रमाणादिति वर्त्तते । मानवाच्येव साक्षाद्यः प्रमाणशब्दो हस्तवितस्त्यादिः प्रसिद्धो न तु रज्ज्वादिर्यो लक्षणया प्रमाणे वर्त्तते ।

**[ हस्तः ]** हस्तः प्रमाणमस्य = हस्तविशेषः । 'प्रमाणान्मात्रट्' (७।१।१४०) मात्रट्प्र० → मात्र । अनेन लुप् ।

**[ वितस्तिः ]** 'तसू उपक्षये' (१२२४) तस्, विपूर्व० । वितस्यत्यनया । 'प्लु-ज्ञा-यजि-षपि-पदि-वसि-वितसिभ्यस्तिः' (उणा० ६४६) तिप्र० । वितस्तिः प्रमाणमस्य = वितस्तिः । 'प्रमाणान्मात्रट्' (७।१।१४०) मात्रट्प्र० । अनेन लुप् ।

**[ दिष्टिः ]** दिष्टिः प्रमाणमस्य = दिष्टिः । 'प्रमाणान्मात्रट्' (७।१।१४०) मात्रट्प्र० । अनेन लुप् ।

**[ शममात्रम् ]** शमश्चतुर्विंशतिरङ्गुलानि । शमः प्रमाणमस्य स्यात् = शममात्रम् । 'प्रमाणान्मात्रट्' (७।१।१४०) मात्रट्प्र० → मात्र ।

**[ प्रस्थः, प्रस्थमात्रो वा व्रीहिः ]** प्रस्थः प्रमाणमस्य = प्रस्थः, प्रस्थमात्रो वा व्रीहिः । 'प्रमाणान्मात्रट्' (७।१।१४०) मात्रट्प्र० । मतान्तरे अनेनैव लुप् ।

**[ हस्तः, हस्तमात्रं वा काष्ठम् ]** हस्तः प्रमाणमस्य = हस्तः, हस्तमात्रं वा काष्ठम् । 'प्रमाणान्मात्रट्' (७।१।१४०) मात्रट्प्र० । मतान्तरे अनेनैव लुप् ।

**[ पलं, पलमात्रं वा सुवर्णम् ]** पलः प्रमाणमस्य तत् = पलं, पलमात्रं वा सुवर्णम् । 'प्रमाणान्मात्रट्' (७।१।१४०) मात्रट्प्र० । मतान्तरे अनेनैव लुप् ।

**[ शतं, शतमात्रा वा गावः ]** शतं मानमेषां = शतं, शतमात्रा वा गावः । 'प्रमाणान्मात्रट्' (७।१।१४०) मात्रट्प्र० । मतान्तरे अनेनैव लुप् । गोशब्दोऽत्र पुल्लिङ्गः ।।छ।।

### द्विगोः संशये च ।। ७।१।१४४ ।।

**[ द्विगोः ]** द्विगु पञ्चमी ङसि ।

**[ संशये ]** संशय सप्तमी ङि ।

**[ च ]** च प्रथमा सि ।

मानादिति वर्त्तते । प्रमाणादिति निवृत्तम् ।

**[ द्विशमः ]** द्वौ शमौ प्रमाणमस्य, द्वौ शमौ प्रमाणमस्य स्यात् वा = द्विशमः । 'प्रमाणान्मात्रट्' (७।१।१४०) मात्रट्प्र० । अनेन लुप् ।

**[ द्विदिष्टिः ]** द्वि 'दिशींत् अतिसर्जने' (१३१८) दिश् । दिश्यतेऽनया इति दिष्टिः । 'श्वादिभ्यः' (५।३।९२) क्तिप्र० → ति । 'यज-सृज-मृज-राज०' (२।१।८७) श० → ष० । 'तवर्गस्य श्चवर्ग-ष्टवर्गाभ्यां०' (१।३।६०) त० → ट० । द्वे दिष्टी प्रमाणमस्य = द्विदिष्टिः । 'प्रमाणान्मात्रट्' (७।१।१४०) मात्रट्प्र० । अनेन लुप् ।

**[ द्विवितस्तिः ]** द्वे वितस्ती प्रमाणमस्य = द्विवितस्तिः । 'प्रमाणान्मात्रट्' (७।१।१४०) मात्रट्प्र० । अनेन लुप् ।

**[ द्विकाण्डा क्षेत्रभक्तिः ]** द्वे काण्डे प्रमाणमस्याः = द्विकाण्डा क्षेत्रभक्तिः । 'प्रमाणान्मात्रट्' (७।१।१४०) मात्रट्प्र० । अनेन लुप् । 'आत्' (२।४।१८) आप्प्र० → आ ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ द्विकाण्डी रज्जुः ]** द्वे काण्डे प्रमाणमस्याः = द्विकाण्डी रज्जुः । 'प्रमाणान्मात्रट्' (७।१।१४०) मात्रट्प्र० । अनेन लुप् । 'काण्डात् प्रमाणादक्षेत्रे' (२।२।२४) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

**[ द्विपुरुषी, द्विपुरुषा खाता ]** द्वौ पुरुषौ प्रमाणमस्याः सा = द्विपुरुषी, द्विपुरुषा खाता । 'प्रमाणान्मात्रट्' (७।१।१४०) मात्रट्प्र० । अथवा 'वोर्ध्वं दघ्नट्-द्वयसट्' (७।१।१४२) दघ्नट्-द्वयसट्प्र० । अनेन लुप् । 'पुरुषाद् वा' (२।४।२५) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

**[ द्विहस्तिनी ]** द्वौ हस्तिनौ प्रमाणमस्याः सा = द्विहस्तिनी । 'प्रमाणान्मात्रट्' (७।१।१४०) मात्रट्प्र० । अनेन लुप् । 'स्त्रियां नृतोऽस्वस्रादेर्ङीः' (२।४।१) ङी ।

**[ त्रिहस्तिनी ]** त्रयो हस्तिनः प्रमाणमस्याः सा = त्रिहस्तिनी । 'प्रमाणान्मात्रट्' (७।१।१४०) मात्रट्प्र० । अनेन लुप् । 'स्त्रियां नृतो०' (२।४।१) ङी ।

**[ द्विप्रस्थः ]** द्वौ प्रस्थौ मानमस्य स्यात् = द्विप्रस्थः । 'प्रमाणान्मात्रट्' (७।१।१४०) मात्रट्प्र० । अनेन लुप् ।

**[ द्विपलम् ]** द्वे पले मानमस्य, द्वे पले प्रमाणमस्य तत् = द्विपलम् । 'प्रमाणान्मात्रट्' (७।१।१४०) मात्रट्प्र० । अनेन लुप् ।

**[ द्विशतः( तम् ) ]** द्वे शते मानमस्य = द्विशतम् । 'प्रमाणान्मात्रट्' (७।१।१४०) मात्रट्प्र० । अनेन लुप् ।

मीयतेऽनेन = मानम्, प्रमाणम्, परिमाणम्, उन्मानम्, संख्या चेह गृह्यते ।

ऊर्ध्वमानं किलोन्मानं, परिमाणं तु सर्वतः ।

आयामस्तु प्रमाणं स्यात्, संख्या बाह्या तु सर्वतः ॥१॥ ॥छ॥

## मात्रट् ॥ ७।१।१४५ ॥

**[ मात्रट् ]** मात्रट् प्रथमा सि ।

मानात् संशये इति च वर्त्तते ।

**[ प्रस्थमात्रं धान्यम् ]** प्रस्थो मानमस्य स्यात् = प्रस्थमात्रं धान्यम् । अनेन मात्रट्प्र० → मात्र । सि ।

**[ प्रस्थमात्रा व्रीहयः ]** प्रस्थो मानमेषां स्यात् ते = प्रस्थमात्रा व्रीहयः । अनेन मात्रट्प्र० → मात्र । जस् ।

**[ कुडवमात्रम् ]** कुडवं मानमस्य स्यात् = कुडवमात्रम् । अनेन मात्रट्प्र० → मात्र ।

**[ पलमात्रम् ]** पलं मानमस्य स्यात् = पलमात्रम् । अनेन मात्रट्प्र० → मात्र ।

**[ कर्षमात्रम् ]** कर्षो मानमस्य स्यात् = कर्षमात्रम् । अनेन मात्रट्प्र० → मात्र ।

**[ पञ्चमात्राः ]** पञ्च मानमेषां स्यात् = पञ्चमात्राः । अनेन मात्रट्प्र० → मात्र । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् । जस् ।

**[ शतमात्राः ]** शतं मानमेषां स्यात् = शतमात्राः । अनेन मात्रट्प्र० → मात्र । जस् ।

**[ शतमात्रम् ]** शतं मानमस्य स्यात् = शतमात्रम् । अनेन मात्रट्प्र० → मात्र । सि-अम् ।

**[ दिष्टिमात्रम् ]** दिष्टिर्मानमस्य स्यात् = दिष्टिमात्रम् । अनेन मात्रट्प्र० → मात्र । सि-अम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

मात्रदघ्नद्वयसानि नामान्यपि सन्ति, अनुबन्धासञ्जनार्थं तु प्रत्ययविधानम्, तेन स्त्रियां विशेषः-

**[ वैश्वदेवमात्रा भिक्षा ]** विश्वे देवा देवता अस्य = वैश्वदेवः । 'देवता' (६।२।१०१) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् । वैश्वदेवो मात्रं मात्रा वाऽस्याः सा = वैश्वदेवमात्रा भिक्षा ॥छ॥

## शन्-शद्-विंशतेः ॥ ७।१।१४६ ॥

**[ शन्शद्विंशतेः ]** शन् च शच्च विंशतिश्च = शन्शद्विंशति, तस्मात् ।

**[ दशमात्राः ]** दशन् । दश मानमेषां स्यात् = दशमात्राः । अनेन मात्रट्प्र० → मात्र । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् । जस् ।

**[ पञ्चदशमात्राः ]** पञ्चदश मानमेषां स्यात् = पञ्चदशमात्राः । अनेन मात्रट्प्र० → मात्र । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् । जस् ।

**[ त्रिंशन्मात्राः ]** त्रिंशन्मानमेषां स्यात् = त्रिंशन्मात्राः । अनेन मात्रट्प्र० → मात्र । 'धुटस्तृतीयः' (२।१।७६) त० → द० । 'प्रत्यये च' (१।३।२) द० → न० । जस् ।

**[ त्रयस्त्रिंशन्मात्राः ]** त्रि-त्रिंशत् मण्ड्यते । त्रिभिरधिका त्रिंशत् = त्रयस्त्रिंशत् । 'द्वि-त्र्यष्टानां द्वा-त्रयोऽष्टाः प्राक् शतादनशीति-बहुव्रीहौ' (३।२।९२) त्रि० → "त्रयस्"देशः । त्रयस्त्रिंशत् मानमेषां स्यात् = त्रयस्त्रिंशन्मात्राः । अनेन मात्रट्प्र० → मात्र । 'धुटस्तृतीयः' (२।१।७६) त० → द० । 'प्रत्यये च' (१।३।२) द० → न० । जस् ।

**[ विंशतिमात्राः ]** विंशतिर्मानमेषां = विंशतिमात्राः । अनेन मात्रट्प्र० → मात्र । जस् ॥छ॥

## डिन् ॥ ७।१।१४७ ॥

**[ डिन् ]** डिन् प्रथमा सि ।

संशये इति निवृत्तम्, योगविभागात्, अन्यथा "शन्शद्विंशतेर्डिन् वा" इत्येक एव योगः क्रियेत ।

**[ पञ्चदशी अर्धमासः, पञ्चदशिनौ, पञ्चदशिनः ]** पञ्चदशाहोरात्राः परिमाणमस्य = पञ्चदशी अर्धमासः । पञ्चदशाहोरात्राः परिमाणमनयोः = पञ्चदशिनौ । पञ्चदशाहोरात्राः परिमाणमेषां = पञ्चदशिनः । अनेन डिन्प्र० → इन् । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्लुक् । सि-औ-जस् ।

**[ त्रिंशी, त्रिंशिनौ, त्रिंशिनो मासाः ]** 卐त्रिंशत् परिमाणमस्य = त्रिंशी । त्रिंशत् परिमाणमनयोः = त्रिंशिनौ । त्रिंशत् परिमाणमेषां = त्रिंशिनो मासाः । अनेन डिन्प्र० → इन् । 'डित्यन्त्यस्वरादेः' (२।१।११४) अत्लुक् । सि-औ-जस् ।

**[ त्रयस्त्रिंशिनो देवविशेषाः ]** त्रयस्त्रिंशत् परिमाणमेषां = त्रयस्त्रिंशिनो देवविशेषाः । अनेन डिन्प्र० → इन् । 'डित्यन्त्यस्वरादेः' (२।१।११४) अत्लुक् । जस् ।

**[ विंशिनो भवनेन्द्राः ]** विंशतिः परिमाणमेषां = विंशिनो भवनेन्द्राः । अनेन डिन्प्र० → इन् । 'डित्यन्त्यस्वरादेः (२।१।११४) अतिलुक् । जस् ॥छ॥

## इदं-किमोऽतुरिय्-किय् चास्य ॥ ७।१।१४८ ॥

**[ इदंकिमः ]** इदं च किं च = इदंकिम्, तस्मात् ।

---

卐 म० वृत्तौ-त्रिंशतोऽहोरात्राः परिमाणमस्य ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ अतुः ]** अतु प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ इय्किय् ]** इय् च किय् च = इय्किय् ।

**[ च ]** च प्रथमा सि ।

**[ अस्य ]** इदम् षष्ठी ङस् ।

तदस्य मानादिति वर्त्तते । चतुर्विधं मानम् । तत्र प्रमाणात् -

**[ इयान् पटः ]** इदं मानमस्य = इयान् पटः । अनेन अतुप्र० → अत्० - इदम्० → इय्देशश्च ।

**[ कियान् पटः ]** किं मानमस्य = कियान् पटः । अनेन अतुप्र० → अत्० - किम्० → किय्देशश्च । पटः ।

परिमाणात् - **[ इयद्धान्यम् ]** इदं परिमाणमस्य = इयत् । अनेन अतुप्र० → अत्० - इदम्० → इय्देशश्च । धान्यम् ।

**[ कियद्धान्यम् ]** किं परिमाणमस्य = कियत् । अनेन अतुप्र० → अत्० - किम्० → किय्देशश्च । धान्यम् ।

उन्मानात् - **[ इयत्सुवर्णम् ]** इदं मानमस्य = इयत् । अनेन अतुप्र० → अत्० - इदम्० → इय्देशश्च । सुवर्णम् ।

**[ कियत्सुवर्णम् ]** किं मानमस्य = कियत् । अनेन अतुप्र० → अत्० - किम्० → किय्देशश्च । सुवर्णम् ।

संख्यायाः - **[ इयन्तो गुणिनः ]** इदं मानमेषां = इयन्तः । अनेन अतुप्र० → अत्० - इदम्० → इय्देशश्च । जस् । गुणिनः ।

**[ कियन्तो गुणिनः ]** किं मानमेषां = कियन्तः । अनेन अतुप्र० → अत्० - किम्० → किय्देशश्च । जस् । गुणिनः ।

**[ इयती ]** इदं मानमस्याः = इयती । अनेन अतुप्र० → अत्० - इदम्० → इय्देशश्च । 'अधातूदृदितः' (२।४।२) ङी ।

**[ कियती ]** किं परिमाणमस्याः = कियती । अनेन अतुप्र० → अत्० - किम्० → किय्देशश्च । 'अधातूदृदितः' (२।४।२) ङी ।

उदित्करणं दीर्घत्वाद्यर्थम्, आदिशब्दात् 'ऋदुदितः' (१।४।७०) नागमः । 'अधातूदृदितः' (२।४।२) इति ङीश्च गृह्यते ॥छा॥

## यत्-तदेतदो डावादिः ॥ ७।१।१४९ ॥

**[ यत्तदेतदः ]** यच्च तच्च एतच्च = यत्तदेतत्, तस्मात् ।

**[ डावादिः ]** डाव आदिर्यस्य सः = डावादिः ।

**[ यावान्, तावान्, एतावान् पटः ]** यत्-तद्-एतद्वा प्रमाणमस्य = यावान् तावान्, एतावान् पटः । अनेन अतुप्र० → अत्-डावादिः । 'डित्यन्त्यस्वरादेः' (२।१।११४) अद्लुक् ।

**[ यावत्, तावत्, एतावत् धान्यम् ]** यत्-तद्-एतद्वा परिमाणमस्य = यावत्, तावत्, एतावत् धान्यम् । अनेन अतुप्र० → अत् - डावादिः । 'डित्यन्त्यस्वरादेः' (२।१।११४) अद्लुक् ।

**[ यावत्, तावत्, एतावत् सुवर्णम् ]** यत्-तद्-एतद्वा उन्मानमस्य = यावत्, तावत्, एतावत् सुवर्णम् । अनेन अतुप्र० → अत् - डावादिः । 'डित्यन्त्यस्वरादेः' (२।१।११४) अद्लुक् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ यावन्ति, तावन्ति, एतावन्ति अधिकरणानि ]** या-सा-एषा वा संख्या मानमेषां = यावन्ति, तावन्ति, एतावन्ति अधिकरणानि । अनेन अतुप्र० → अत्-डावादिः । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । जस् । 'नपुंसकस्य शिः' (१।४।५५) जस्० → शि० → इ० । नोऽन्तः ।

**[ यावती, तावती, एतावती ]** यत्-तद्-एतत्प्रमाणमस्याः सा = यावती, तावती, एतावती । अनेन अतुप्र० → अत्-डावादिः । 'डित्यन्त्यस्वरादेः' (२।१।११४) अद्लुक् । 'अधातूदृदितः' (२।४।२) ङी ।

ननु मात्रडादयोऽपि दृश्यन्ते-

**[ इदंमात्रम् ]** इदं प्रमाणमस्य = इदंमात्रम् । इत्यादि, सत्यम्, स्वविषये मानविशेषे प्रमाणे मात्रडादयो भवन्त्येव, मानसामान्येऽतुरेवेति विभागः ॥छ॥

## यत्-तत्-किमः संख्याया डतिर्वा ॥ ७।१।१५० ॥

**[ यत्तत्किमः ]** यच्च तच्च किञ्च = यत्तत्किम्, तस्मात् ।

**[ संख्यायाः ]** संख्या पञ्चमी ङसि ।

**[ डतिः ]** डति प्रथमा सि ।

**[ वा ]** वा प्रथमा सि ।

**[ यति ]** यद् । या संख्या मानमेषां = यति । अनेन डतिप्र० → अति । 'डित्यन्त्यस्वरादेः' (२।१।११४) अद्लुक् । जस् । 'डति-ष्णः संख्याया लुप्' (१।४।५४) लुप् ।

**[ यावन्तः ]** यत्परिमाणमेषां = यावन्तः । 'यत्-तदेतदो डावादिः' (७।१।१४९) अतुप्र० → अत् - डावादिः । 'डित्यन्त्यस्वरादेः' (२।१।११४) अद्लुक् । जस् । 'ऋदुदितः' (१।४।७०) नोऽन्तः ।

**[ तति ]** तद् । सा संख्या मानमेषां = तति । अनेन डतिप्र० → अति । 'डित्यन्त्यस्वरादेः' (२।१।११४) अद्लुक् । जस् । 'डति-ष्णः०' (१।४।५४) लुप् ।

**[ तावन्तः ]** तत्परिमाणमेषां = तावन्तः । 'यत्-तदेतदो डावादिः' (७।१।१४९) अतुप्र० → अत् - डावादिः । 'डित्यन्त्यस्वरादेः' (२।१।११४) अद्लुक् । जस् । 'ऋदुदितः' (१।४।७०) नोऽन्तः । एवमग्रेऽपि ।

**[ कति ]** का संख्या मानमेषां = कति । पूर्ववत् साध्यः ।

**[ कियन्तः ]** किं परिमाणमेषां = कियन्तः । पूर्ववत् साध्यः । एतौ च अतुडतिप्रत्ययौ स्वभावाद् बहुवचनविषयावेव भवतः ।

**[ कियान्, यावान्, तावान् पटः ]** किं मानमस्य = कियान् । 'इदं-किमोऽतुरिय्-किय् चास्य' (७।१।१४८) अतुप्र० → अत् - कियदेशश्च । यावान्, तावान् पटः । शेषं पूर्ववत् ॥छ॥

## अवयवात् तयट् ॥ ७।१।१५१ ॥

**[ अवयवात् ]** अवयव पञ्चमी ङसि ।

**[ तयट् ]** तयट् प्रथमा सि ।

तदस्येति संख्याया इति च वर्त्तते, मानादिति निवृत्तम्, अवयवादिति विशेषणान्तरोपादानात् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ चतुष्टयी शब्दानां प्रवृत्तिः ]** चतुर् । चत्वारोऽवयवा अस्याः = चतुष्टयी शब्दानां प्रवृत्तिः । अनेन तयट्प्र० → तय । 'ह्रस्वान्नाम्नस्ति' (२।३।३४) र० → षत्वम् । 'तवर्गस्य श्चवर्ग-ष्टवर्गाभ्यां योगे च-टवर्गौ' (१।३।६०) त० → ट० । 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ चतुष्टयी रज्जुः ]** चतुर् । चत्वारोऽवयवा अस्याः = चतुष्टयी रज्जुः । अनेन तयट्प्र० → तय । 'ह्रस्वान्नाम्नस्ति' (२।३।३४) र० → षत्वम् । 'तवर्गस्य श्चवर्ग०' (१।३।६०) त० → ट० । 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ पञ्चतयो यमः ]** पञ्च अवयवा अस्य = पञ्चतयो यमः । अनेन तयट्प्र० → तय । प्राणातिपात - मृषावाद - अदत्तादान - मैथुन - परिग्रहभेदो यमः ।

**[ सप्ततयी नयप्रवृत्तिः ]** सप्त अवयवा अस्य = सप्ततयी नयप्रवृत्तिः । अनेन तयट्प्र० → तय । 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ दशतयो धर्मः ]** दश अवयवा अस्य = दशतयो धर्मः । अनेन तयट्प्र० → तय ।

**[ द्वादशतयः सिद्धान्तः ]** द्वादश अवयवा अस्य = द्वादशतयः सिद्धान्तः । अनेन तयट्प्र० → तय ॥छा॥

## द्वि-त्रिभ्यामयट् वा ॥ ७।१।१५२ ॥

**[ द्वित्रिभ्याम् ]** द्विश्च त्रिश्च = द्वित्री, ताभ्याम् ।

**[ अयट् ]** अयट् प्रथमा सि ।

**[ वा ]** वा प्रथमा सि ।

**[ द्वयम्, द्वितयं तपः ]** द्वावयवावस्य = द्वयम्, द्वितयं तपः । अनेन अयट्प्र० → अय । 'अवयवात् तयट्' (७।१।१५१) तयट्प्र० → तय ।

**[ त्रयम्, त्रितयं जगत् ]** त्रयोऽवयवा अस्य = त्रयम्, त्रितयं जगत् । अनेन अयट्प्र० → अय । 'अवयवात् तयट्' (७।१।१५१) तयट्प्र० → तय ।

**[ त्रयः, त्रितयो मोक्षमार्गः ]** त्रि । त्रयोऽवयवा अस्य = त्रयः, त्रितयो मोक्षमार्गः । ज्ञानदर्शनचारित्राणि । अनेन अयट्प्र० → अय । 'अवयवात् तयट्' (७।१।१५१) तयट्प्र० → तय ।

**[ द्वयी, द्वितयी रज्जुः ]** द्वावयवावस्याः = द्वयी, द्वितयी । अनेन अयट्प्र० → अय । 'अवयवात् तयट्' (७।१।१५१) तयट्प्र० → तय । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

**[ त्रयी, त्रितयी रज्जुः ]** त्रयोऽवयवा अस्याः = त्रयी, त्रितयी । अनेन अयट्प्र० → अय । 'अवयवात् तयट्' (७।१।१५१) तयट्प्र० → तय । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

**[ त्रयाणि पानानि यथातथा पिबेत् ]** त्रयोऽवयवा एषां = त्रयाणि । अनेन अयट्प्र० → अय । 'त्र्यन्त्य०' (७।४।४३) (अवर्णे० (७।४।६८)) इलुक् । जस् ।

पयश्च दिव्यं शुचि मेघसंभवं, स्वतिप्रसन्नां परमां च वारुणीं ।
ममातुलं वारि च वक्त्रसंभवं, त्रयाणि पानानि यथातथा पिबेत् ॥

द्वित्रिभ्यामेव अयट् उक्तस्तत्कथमुभयो मणिरित्यादि ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ उभयो मणिः, उभये देवमनुष्याः, उभयी दृष्टिः ]** उभ 'यांक् प्रापणे' (१०६२) या । उभौ यातीति । 'आतो डोऽह्वा-वा-मः' (५।१।७६) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलुक् । यद्वा 'उभ पूरणे' (१३८५) उभ् । उम्भतीति उभयी दृष्टिः । 'गय-हृदयादयः' (उणा० ३७०) इति अयट् प्रत्ययान्तो निपात्यते । टित्वात्- 'अणञेयेकण्०' (२।४।२०) ङी । द्वितीय उभयशब्दस्याग्रे जस् । 'जस इः' (१।४।९) इत्यनेन सूत्रेण जस्स्थाने इ । 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) ए । देवाश्च मनुष्याश्च = देवमनुष्याः । उभयशब्दः सर्वादिषु उभयट् इति पठ्यमानः शब्दान्तरमेव विज्ञेयम् । तेन जस्स्थाने 'नेमा-ऽर्द्ध०' (१।४।१०) जस इकारविकल्पो न भवति ॥छ॥

## द्व्यादेर्गुणान्मूल्य-क्रेये मयट् ॥ ७।१।१५३ ॥

**[ द्व्यादेः ]** द्विरादिर्यस्य सः = द्व्यादिः, तस्मात् ।

**[ गुणात् ]** गुण पञ्चमी ङसि ।

**[ मूल्यक्रेये ]** मूल्यं च क्रेयश्च = मूल्यक्रेयम्, तस्मिन् ।

**[ मयट् ]** मयट् प्रथमा सि ।

संख्याया इति वर्त्तते ।

**[ द्विमयमुदश्विद्यवानाम् ]** यवानां द्वौ गुणौ मूल्यमस्योदश्वितः क्रेयस्य = द्विमयमुदश्विद्यवानाम् । द्विशब्दस्याऽग्रे अनेन मयट्प्र० → मय । द्वौ भागौ यवानामेको भाग उदश्वितः, द्विगुणा यवा इत्यर्थः ।

**[ त्रिमयम् ]** त्रि । त्रयो गुणा मूल्यमस्योदश्वितः क्रेयस्य = त्रिमयम् । अनेन मयट्प्र० → मय ।

**[ चतुर्मयम् ]** चत्वारो गुणा मूल्यमस्योदश्वितः क्रेयस्य = चतुर्मयम् । अनेन मयट्प्र० → मय ।

**[ द्विमया यवा उदश्वितः ]** उदश्वितो द्वौ गुणौ क्रेयावेषां यवानां = द्विमया यवा उदश्वितः । अनेन मयट्प्र० → मय । जस् ।

**[ त्रिमयाः ]** त्रयो गुणाः क्रेया एषां यवानां = त्रिमयाः । अनेन मयट्प्र० → मय । जस् ।

**[ चतुर्मयाः ]** चत्वारो गुणाः क्रेया एषां यवानां = चतुर्मयाः । अनेन मयट्प्र० → मय । जस् ।

इह तु (द्वि)गुणत्वं उदश्वितः, एको भागो यवानां, द्वौ गुणौ इत्युक्ते हि यवादीनामित्यपेक्ष्यते । द्व्यादिपदस्य सापेक्षस्यापि नित्यसापेक्षत्वेन गमकत्वाद्वृत्तिः ।

अपरः प्रकारः । मूल्यक्रेय इति प्रत्ययार्थविशेषणम् । पूर्वं हि प्रकृतिविशेषणत्वेन व्याख्या ।

**[ द्विमया यवा उदश्वितो मूल्यम् ]** द्वौ गुणौ एषां मूल्यभूतानां यवानामुदश्वितः = द्विमया यवा उदश्वितो मूल्यम् । अनेन मयट्प्र० → मय । जस् ।

**[ त्रिमयाः ]** त्रयो गुणा एषां मूल्यभूतानां यवानामुदश्वितः = त्रिमयाः । अनेन मयट्प्र० → मय । जस् ।

**[ चतुर्मयाः ]** चत्वारो गुणा एषां मूल्यभूतानां यवानामुदश्वितः = चतुर्मयाः । अनेन मयट्प्र० → मय । जस् ।

**[ द्विमयमुदश्विद्यवानां क्रेयम् ]** द्वौ गुणावस्योदश्वितः क्रेयभूतस्य = द्विमयमुदश्विद्यवानां क्रेयम् । अनेन मयट्प्र० → मय । सि-अम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ त्रिमयम् ]** त्रयो गुणा अस्योदश्वितः क्रेयभूतस्य = त्रिमयम् । अनेन मयट्प्र० → मय । सि-अम् ।

**[ चतुर्मयम् ]** चत्वारो गुणा अस्योदश्वितः क्रेयभूतस्य = चतुर्मयम् । अनेन मयट्प्र० → मय । सि-अम् ।

द्वौ गुणाविति क्रेयं मूल्यं चैकगुणं कृत्वा तदपेक्षया मूल्यक्रेययोर्द्विस्तावत्तोच्यते ॥छा॥

**अधिकं तत्संख्यमस्मिन् शत-सहस्रे शति-शद्-दशान्ताया डः ॥ ७।१।१५४ ॥**

**[ अधिकम् ]** अधि । अधि आरूढोऽधिकम् । 'अधेरारूढे' (७।१।१८७) कप्र० । सि-अम् ।

**[ तत्संख्यम् ]** सा संख्या यस्य = तत्संख्यम् । 'क्लीबे' (२।४।९७) ह्रस्वत्वम् । सि-अम् ।

**[ अस्मिन् ]** अस्मिन् सप्तमी ङि । सूत्रत्वात् ।

**[ शतसहस्रे ]** शतं च सहस्रं च = शतसहस्रम्, तस्मिन् ।

**[ शतिशद्दशान्तायाः ]** शतिश्च शच्च दशा च = शतिशद्दशानः । शतिशद्दशानः अन्ते यस्याः सा = शतिशद्दशान्ता, तस्याः = शतिशद्दशान्तायाः । पञ्चमी ङसि ।

**[ डः ]** ड प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

संख्याया इति वर्त्तते-तदिति च । सा शतसहस्रलक्षणा संख्या यस्य योजनादेस्तत्संख्यं शतं सहस्रमिति च यत्संख्यायते तदेव यद्यधिकमपि भवतीत्यर्थः ।

**[ विंशं योजनशतम्, विंशं शतं योजनानि ]** विंशति मण्ड्यते । योजनानां संख्यानेत्युत्पत्तिः - विंशतिर्योजनानि संख्येयेत्युत्पत्तिः वा । विंशतिरधिकास्मिन् योजनशते शते वा योजनेषु = विंशं योजनशतम्, विंशं शतं योजनानि । अनेन डप्र० → अ । 'विंशतेस्तेर्डिति' (७।४।६७) तिलुक् । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् ।

**[ विंशं योजनसहस्रम्, विंशं सहस्रं योजनानि ]** योजनानां विंशतिर्योजनानि वा विंशतिरधिकास्मिन् योजनसहस्रे सहस्रे वा योजनेषु = विंशं योजनसहस्रम्, विंशं सहस्रं योजनानि । अनेन डप्र० → अ । 'विंशतेस्तेर्डिति' (७।४।६७) तिलुक् । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् ।

**[ विंशं कार्षापणशतम्, विंशं शतं कार्षापणानि ]** कार्षापणानां विंशतिः कार्षापणानि वा विंशतिरधिकास्मिन् कार्षापणशते शते वा कार्षापणेषु = विंशं कार्षापणशतम्, विंशं शतं कार्षापणानि । अनेन डप्र० → अ । शेषं पूर्ववत् ।

**[ विंशं कार्षापणसहस्रम्, विंशं सहस्रं कार्षापणानि ]** कार्षापणानां विंशतिः कार्षापणानि वा विंशतिरधिकास्मिन् कार्षापणसहस्रे सहस्रे वा कार्षापणेषु = विंशं कार्षापणसहस्रम्, विंशं सहस्रं कार्षापणानि । अनेन डप्र० → अ । शेषं पूर्ववत् ।

**[ एकविंशम् ]** योजनानां एकविंशतिरधिकास्मिन् योजनशते = एकविंशम् । अनेन डप्र० → अ । शेषं पूर्ववत् ।

**[ द्वाविंशं शतम् ]** योजनानां द्वाविंशतिरधिकास्मिन् योजनशते = द्वाविंशं शतम् । अनेन डप्र० → अ । शेषं पूर्ववत् ।

शत् - **[ त्रिंशं शतम् ]** योजनानां त्रिंशत् अधिकास्मिन् योजनशते = त्रिंशं शतम् । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अत्लुक् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ त्रिंशं सहस्रम् ]** योजनानां त्रिंशत् अधिकास्मिन् योजनसहस्रे = त्रिंशं सहस्रम् । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अत्लुक् ।

**[ एकत्रिंशम् ]** योजनानां एकत्रिंशत् अधिकास्मिन् योजनशते सहस्रे वा = एकत्रिंशम् । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अत्लुक् ।

**[ चत्वारिंशम् ]** योजनानां चत्वारिंशत् अधिकास्मिन् योजनशते सहस्रे वा = चत्वारिंशम् । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अत्लुक् ।

**[ पञ्चाशम् ]** योजनानां पञ्चाशत् अधिकास्मिन् योजनशते सहस्रे वा = पञ्चाशम् । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अत्लुक् ।

**[ एकादशं शतम्, एकादशं सहस्रम् ]** एकादशानि योजनानि अधिकानि अस्मिन् योजनशते सहस्रे वा = एकादशं शतम्, एकादशं सहस्रम् । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

**[ द्वादशम् ]** द्वादशानि योजनानि अधिकानि अस्मिन् योजनशते सहस्रे वा = द्वादशम् । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

**[ त्रयोदशं शतम्, सहस्रं वा ]** त्रयोदशानि योजनानि अधिकानि अस्मिन् योजनशते सहस्रे वा = त्रयोदशम् । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

योजनादीनामिव शतानामपि सहस्रे भवति–

**[ विंशं शतसहस्रम् ]** विंशतिः शतान्यधिकान्यस्मिन् शतानां सहस्रे = विंशं शतसहस्रम् । अनेन डप्र० । कोऽर्थः विंशतिशतानि(धि)को लक्ष इत्यर्थः ।

**[ त्रिंशम् ]** त्रिंशत् शतान्यधिकान्यस्मिन् शतानां सहस्रे = त्रिंशम् । अनेन डप्र० । त्रिंशत्शताधिको लक्ष इत्यर्थः ।

**[ एकादशम् ]** एकादशानि शतान्यधिकान्यस्मिन् शतानां सहस्रे = एकादशम् । अनेन डप्र० । एकादशशताधिको लक्ष इत्यर्थः ।

एवं सहस्राणामपि शते भवति–

**[ विंशं शतसहस्रम् ]** विंशतिः सहस्राण्यधिकान्यस्मिन्सहस्राणां शते = विंशं शतसहस्रम् । अनेन डप्र० । सहस्राणां शतं शतसहस्रमिति कृत्वा 'षष्ठ्ययत्नाच्छेषे' (३।१।७६) इति समासे प्रथमोक्तत्वात् सहस्रस्य पूर्वनिपाते प्राप्ते राजदन्तादिषु पाठात् शतशब्दस्य पूर्वनिपातः ।

**[ त्रिंशं शतसहस्रम् ]** त्रिंशत् सहस्राण्यधिकान्यस्मिन् सहस्राणां शते = त्रिंशं शतसहस्रम् । अनेन डप्र० ।

**[ एकादशं शतसहस्रम् ]** एकादशानि सहस्राण्यधिकान्यस्मिन्सहस्राणां शते = एकादशम् । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

गोविंशतिरधिका अस्मिन् गोशते । न गोविंशतिशब्दः एकविंशत्यादिवत् संख्याशब्दः ॥छ॥

## संख्यापूरणे डट् ॥ ७।१।१५५ ॥

**[ संख्यापूरणे ]** संख्या 'पूरी(रै)चि आप्यायने' (१२६८) पूर् । संख्या पूर्यते येन तत् = संख्यापूरणम् । अनट्प्र० → अन । 'र-षृवर्णान्नो ण०' (१।३।६०) णत्वम्, तस्मिन् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ डट् ]** डट् प्रथमा सि ।

संख्याया इति वर्त्तते ।

**[ एकादशः ]** एकादशानां पूरणः = एकादशः । अनेन डट्प्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । एकादशसंख्यापूरण इत्यर्थः ।

**[ द्वादशः ]** द्वादशानां पूरणः = द्वादशः । अनेन डट्प्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

**[ त्रयोदशः ]** त्रयोदशानां पूरणः = त्रयोदशः । अनेन डट्प्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

**[ चतुर्दशः ]** चतुर्दशानां पूरणः = चतुर्दशः । अनेन डट्प्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

**[ एकादशी स्त्री ]** एकादशानां पूरणी = एकादशी । अनेन डट्प्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

## विंशत्यादेर्वा तमट् ॥ ७।१।१५६ ॥

**[ विंशत्यादेः ]** विंशतिरादिर्यस्य सः = विंशत्यादिः, तस्मात् ।

**[ वा ]** वा प्रथमा सि ।

**[ तमट् ]** तमट् प्रथमा सि ।

**[ विंशतितमः, विंशः ]** विंशतेः पूरणः = विंशतितमः । अनेन तमट्प्र० → तम । एवम्-विंशः । 'संख्यापूरणे डट्' (७।१।१५५) डट्प्र० → अ । 'विंशतेस्तेर्डिति' (७।४।६७) तिलुक् । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

**[ विंशतितमी, विंशी स्त्री ]** विंशतेः पूरणी = विंशतितमी । अनेन तमट्प्र० → तम । 'अणञेयेकण्०' (२।४।२०) ङी । एवम्-विंशी । 'संख्यापूरणे डट्' (७।१।१५५) डट्प्र० → अ । 'विंशतेस्तेर्डिति' (७।४।६७) तिलुक् । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ एकविंशतितमः, एकविंशः ]** एकविंशतेः पूरणः = एकविंशतितमः, एकविंशः । प्रथमे अनेन तमट्प्र० → तम । द्वितीये 'संख्यापूरणे डट्' (७।१।१५५) डट्प्र० → अ । 'विंशतेस्तेर्डिति' (७।४।६७) तिलुक् । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ द्वाविंशतितमः, द्वाविंशः ]** द्वाविंशतेः पूरणः = द्वाविंशतितमः, द्वाविंशः । प्रथमे अनेन तमट्प्र० → तम । द्वितीये 'संख्यापूरणे डट्' (७।१।१५५) डट्प्र० → अ । 'विंशतेस्तेर्डिति' (७।४।६७) तिलुक् । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ एकान्नत्रिंशत्तमः, एकान्नत्रिंशः ]** एकान्नत्रिंशतः पूरणः = एकान्नत्रिंशत्तमः, एकान्नत्रिंशः । प्रथमे अनेन तमट्प्र० → तम । द्वितीये 'संख्यापूरणे डट्' (७।१।१५५) डट्प्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अत्लुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ चत्वारिंशत्तमः, चत्वारिंशः ]** चत्वारिंशतः पूरणः = चत्वारिंशत्तमः, चत्वारिंशः । प्रथमे अनेन तमट्प्र० → तम । द्वितीये 'संख्यापूरणे डट्' (७।१।१५५) डट्प्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अत्लुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ द्वाचत्वारिंशत्तमः, द्वाचत्वारिंशः ]** द्वाचत्वारिंशतः पूरणः = द्वाचत्वारिंशत्तमः, द्वाचत्वारिंशः । प्रथमे अनेन तमट्प्र० → तम । द्वितीये 'संख्यापूरणे डट्' (७।१।१५५) डट्प्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अत्लुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ पञ्चाशत्तमः, पञ्चाशः ]** पञ्चाशतः पूरणः = पञ्चाशत्तमः, पञ्चाशः । प्रथमे अनेन तमट्प्र० → तम । द्वितीये 'संख्यापूरणे डट्' (७।१।१५५) डट्प्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अत्लुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ अष्टपञ्चाशत्तमः, अष्टपञ्चाशः ]** अष्टपञ्चाशतः पूरणः = अष्टपञ्चाशत्तमः, अष्टपञ्चाशः । प्रथमे अनेन तमट्प्र० → तम । द्वितीये 'संख्यापूरणे डट्' (७।१।१५५) डट्प्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अत्लुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

## शतादि-मासा-ऽर्द्धमास-संवत्सरात् ॥ ७।१।१५७ ॥

**[ शतादिमासाऽर्द्धमाससंवत्सरात् ]** शतादिश्च मासश्च अर्द्धमासश्च संवत्सरश्च = शतादिमासाऽर्द्धमाससंवत्सरम्, तस्मात् ।

**[ शततमः ]** शतस्य पूरणः = शततमः । अनेन तमट्प्र० → तम ।

**[ शततमी ]** शतस्य पूरणी = शततमी । अनेन तमट्प्र० → तम । 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

**[ एकशततमः ]** एकशतस्य पूरणः = एकशततमः । अनेन तमट्प्र० → तम ।

**[ सहस्रतमः ]** सहस्रस्य पूरणः = सहस्रतमः । अनेन तमट्प्र० → तम ।

**[ लक्षतमः ]** लक्षस्य पूरणः = लक्षतमः । अनेन तमट्प्र० → तम ।

**[ मासतमो दिवसः ]** मासस्य पूरणः = मासतमो दिवसः । अनेन तमट्प्० → तम ।

**[ अर्द्धमासतमः ]** अर्द्धमासस्य पूरणः = अर्द्धमासतमः । अनेन तमट्प्र० → तम ।

**[ संवत्सरतमः ]** संवत्सरस्य पूरणः = संवत्सरतमः । अनेन तमट्प्र० → तम ॥छ॥

## षष्ट्यादेरसंख्यादेः ॥ ७।१।१५८ ॥

**[ षष्ट्यादेः ]** षष्टी(ष्टि) आदिर्यस्य सः = षष्ट्यादिः, तस्मात् ।

**[ असंख्यादेः ]** संख्या आदिरवयवो यस्याऽसौ संख्यादिः । न संख्यादिरसंख्यादिस्तस्मात् ।

**[ षष्टितमः ]** षष्टेः पूरणः = षष्टितमः । अनेन तमट्प्र० → तम ।

**[ सप्ततितमः ]** सप्ततेः पूरणः = सप्ततितमः । अनेन तमट्प्र० → तम ।

**[ अशीतितमः ]** अशीतेः पूरणः = अशीतितमः । अनेन तमट्प्र० → तम ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ नवतितमः ]** नवतेः पूरणः = नवतितमः । अनेन तमट्प्र० → तम ।

**[ एकषष्टितमः, एकषष्टः ]** एकषष्टेः पूरणः = एकषष्टितमः । 'विंशत्यादेर्वा तमट्' (७।१।१५६) तमट्प्र० → तम । एवम्-एकषष्टः । 'संख्यापूरणे डट्' (७।१।१५५) डट्प्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

**[ एकसप्ततितमः, एकसप्ततः ]** एकसप्ततेः पूरणः = एकसप्ततितमः । 'विंशत्यादेर्वा तमट्' (७।१।१५६) तमट्प्र० → तम । एवम्-एकसप्ततः । 'संख्यापूरणे डट्' (७।१।१५५) डट्प्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ॥छ॥

## नो मट् ॥ ७।१।१५९ ॥

**[ नः ]** न् पञ्चमी ङसि ।

**[ मट् ]** मट् प्रथमा सि ।

**[ पञ्चमः ]** पञ्चानां पूरणः = पञ्चमः । अनेन मट्प्र० → म ।

**[ पञ्चमी ]** पञ्चानां पूरणी = पञ्चमी । अनेन मट्प्र० → म । 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ सप्तमः ]** सप्तानां पूरणः = सप्तमः । अनेन मट्प्र० → म ।

**[ अष्टमः ]** अष्टानां पूरणः = अष्टमः । अनेन मट्प्र० → म ।

**[ नवमः ]** नवानां पूरणः = नवमः । अनेन मट्प्र० → म ।

**[ दशमः ]** दशानां पूरणः = दशमः । अनेन मट्प्र० → म ।

**[ विंशः ]** विंशतेः पूरणः = विंशः । 'संख्यापूरणे डट्' (७।१।१५५) डट्प्र० → अ । 'विंशतेस्तेर्डिति' (७।४।६७) तिलुक् । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् ।

**[ एकादशः ]** एकादशानां पूरणः = एकादशः । 'संख्यापूरणे डट्' (७।१।१५५) डट्प्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

**[ द्वादशः ]** द्वादशानां पूरणः = द्वादशः । 'संख्यापूरणे डट्' (७।१।१५५) डट्प्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ॥छ॥

## पित्तिथट् बहु-गण-पूग-सङ्घात् ॥ ७।१।१६० ॥

**[ पित् ]** प् इदनुबन्धो यस्य सः = पित् । प्रथमा सि ।

**[ तिथट् ]** तिथट् प्रथमा सि । 'दीर्घङ्याब्-व्यञ्जनात् सेः' (१।४।४५) सिलुक् ।

**[ बहुगणपूगसङ्घात् ]** बहुश्च गणश्च पूगश्च सङ्घश्च = बहुगणपूगसङ्घम्, तस्मात् ।

**[ बहुतिथः ]** बहु । बहूनां पूरणः = बहुतिथः । 'बहु-गणं भेदे' (१।१।४०) संख्यावत्त्वम्, तस्य फलमनेन तिथट्प्र० → तिथ ।

**[ बहुतिथी ]** बहु । 'स्वरादुतो गुणादखरोः' (२।४।३५) ङी । बह्वीनां पूरणी = बहुतिथी । अनेन तिथट्प्र० → तिथ । पित् फलं किम् ? 'क्यङ्-मानि-पित्तद्धिते' (३।२।५०) पुंवद्भावः । 'अणञेयेकण्०' (२।४।२०) ङी ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ गणतिथः ]** गणानां पूरणः = गणतिथः । 'बहु-गणं भेदे' (१।१।४०) संख्यावत्त्वम्, तस्य फलमनेन तिथट्प्र० → तिथ ।

**[ गणतिथी ]** गणानां पूरणी = गणतिथी । अनेन तिथट्प्र० → तिथ । 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ पूगतिथः ]** पूगानां पूरणः = पूगतिथः । अनेन तिथट्प्र० → तिथ ।

**[ पूगतिथी ]** पूगानां पूरणी = पूगतिथी । अनेन तिथट्प्र० → तिथ । 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ सङ्घतिथः ]** सङ्घस्य पूरणः = सङ्घतिथः । अनेन तिथट्प्र० → तिथ ।

**[ सङ्घतिथी ]** सङ्घस्य पूरणी = सङ्घतिथी । अनेन तिथट्प्र० → तिथ । 'अणञेयेकण्०' (२।४।२०) ङी ।।छ।।

## अतोरिथट् ।। ७।१।१६१ ।।

**[ अतोः ]** अतु पञ्चमी ङसि ।

**[ इथट् ]** इथट् प्रथमा सि ।

**[ इयतिथः ]** इदम् । इदं परिमाणमेषाम् = इयन्तः । 'इदं-किमोऽतुरिय्-किय् चास्य' (७।१।१४८) अतुप्र० → अत्०-इय्देशश्च । इयतां पूरणः = इयतिथः । अनेन इथट्प्र० → इथ ।

**[ इयतिथी ]** इयतीनां पूरणी = इयतिथी । अनेन इथट्प्र० → इथ । 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङी ।

**[ कियतिथः ]** किम् । किं परिमाणमेषां = कियन्तः । 'इदं-किमोऽतुरिय्-किय् चास्य' (७।१।१४८) अतुप्र० → अत्०-किय्देशश्च । कियतां पूरणः = कियतिथः । अनेन इथट्प्र० → इथ ।

**[ कियतिथी ]** कियतीनां पूरणी = कियतिथी । अनेन इथट्प्र० → इथ । 'अणञेयेकण्-नञ्०' (२।४।२०) ङी ।

**[ यावतिथः ]** यत्परिमाणमेषां = यावन्तः । 'यत्-तदेतदो डावादिः' (७।१।१४९) अतुप्र० → अत्०-डावादिः । 'डित्यन्त्यस्वरादेः' (२।१।११४) अद्लुक् । यावतां पूरणः = यावतिथः । अनेन इथट्प्र० → इथ ।

**[ यावतिथी ]** यावतां पूरणी = यावतिथी । अनेन इथट्प्र० → इथ । 'अणञेयेकण्-नञ्०' (२।४।२०) ङी ।

**[ तावतिथः ]** तत्परिमाणमेषां = तावन्तः । 'यत्-तदेतदो डावादिः' (७।१।१४९) अतुप्र० → अत्०-डावादिः । 'डित्यन्त्यस्वरादेः' (२।१।११४) अद्लुक् । यावतां पूरणः = यावतिथः । अनेन इथट्प्र० → इथ ।

**[ तावतिथी ]** तावतां पूरणी = तावतिथी । अनेन इथट्प्र० → इथ । 'अणञेयेकण्-नञ्०' (२।४।२०) ङी ।

**[ एतावतिथः ]** एतत्परिमाणमेषाम् = एतावन्तः । 'यत्-तदेतदो डावादिः' (७।१।१४९) अतुप्र० → अत्०-डावादिः । 'डित्यन्त्यस्वरादेः' (२।१।११४) अत्लुक् । एतावतां पूरणः = एतावतिथः । अनेन इथट्प्र० → इथ ।

**[ एतावतिथी ]** एतावतां पूरणी = एतावतिथी । अनेन इथट्प्र० → इथ । 'अणञेयेकण्-नञ्०' (२।४।२०) ङी ।।छ।।

## षट्-कति-कतिपयात् थट् ।। ७।१।१६२ ।।

**[ षट्कतिकतिपयात् ]** षट् च कतिश्च कतिपयश्च = षट्कतिकतिपयम्, तस्मात् ।

**[ थट् ]** थट् प्रथमा सि ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ षष्ठः ]** षण्णां पूरणः = षष्ठः । अनेन थट्प्र० → थ ।

**[ षष्ठी ]** षण्णां पूरणी = षष्ठी । अनेन थट्प्र० → थ । 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ कतिथः ]** किम् । का संख्या मानमेषां = कति । 'यत्-तत्-किमः संख्याया डतिर्वा' (७।१।१५०) डतिप्र० → अति । 'डित्यन्त्यस्वरादेः' (२।१।११४) इम्लुक् । कतीनां पूरणः = कतिथः । अनेन थट्प्र० → थ ।

**[ कतिथी ]** कतीनां पूरणी = कतिथी । अनेन थट्प्र० → थ । 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ कतिपयथः ]** कति अयि (७९०) - वयि (७९१) - 'पयि गतौ' (७९२) पय् । कति पयन्ते = कतिपयाः । 'लिहादिभ्यः' (५।१।५०) अच्प्र० → अ । 'कतिपयानां पूरणः = कतिपयथः । अनेन थट्प्र० → थ ।

**[ कतिपयथी ]** कतिपयानां स्त्रीणां पूरणी = कतिपयथी । अनेन थट्प्र० → थ । 'अणञेयेकण्०' (२।४।२०) ङी ।

'षष्ठी वाऽनादरे' (२।२।१०८) - 'चतुर्थी' (२।२।५३) इति च निर्देशात् थटि 'नाम सिदय्व्यञ्जने' (१।१।२१) इति पदत्वं न भवति, पदत्वाभावे 'धुटस्तृतीयः' (२।१।७६) इति डत्वम्, 'च-ट-ते सद्वितीये' (१।३।७) सत्वं च न भवति ॥छ॥

## चतुरः ॥ ७।१।१६३ ॥

**[ चतुरः ]** चतुर् पञ्चमी ङसि ।

**[ चतुर्थः ]** चतुर्णां पूरणः = चतुर्थः । अनेन थट्प्र० → थ ।

**[ चतुर्थी ]** चतसृणां पूरणी = चतुर्थी । अनेन थट्प्र० → थ । 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङी ॥छ॥

## येयौ चलुक् च ॥ ७।१।१६४ ॥

**[ येयौ ]** यश्च ईयश्च = येयौ । औ ।

**[ चलुक् ]** चस्य लुक् = चलुक् । प्रथमा सि ।

**[ च ]** च प्रथमा सि ।

**[ तुर्यः, तुरीयः, तुर्या, तुरीया ]** चतुर्णां पूरणः = तुर्यः, तुरीयः । अनेन य-ईयप्र०-चलुक् च । अग्रेतने उभये 'आत्' (२।४।१८) आप्प्र० → आ ॥छ॥

## द्वेस्तीयः ॥ ७।१।१६५ ॥

**[ द्वेस्तीयः ]** द्वि पञ्चमी ङसि । तीय प्रथमा सि ।

**[ द्वितीयः ]** द्वयोः पूरणः = द्वितीयः । अनेन तीयप्र० ।

**[ द्वितीया ]** द्वयोः पूरणी = द्वितीया । अनेन तीयप्र० । 'आत्' (२।४।१८) आप्प्र० → आ ॥छ॥

## त्रेस्तृ च ॥ ७।१।१६६ ॥

**[ त्रेस्तृ ]** त्रि पञ्चमी ङसि । तृ प्रथमा सि । सूत्रत्वात् (लोपः) ।

**[ च ]** च प्रथमा सि ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ तृतीयः ]** त्रयाणां पूरणः = तृतीयः । अनेन तीयप्र०-त्रि० → तृदेशश्च ।

**[ तृतीया ]** तिसृणां पूरणी = तृतीया । अनेन तीयप्र०-त्रि० → तृदेशश्च । 'आत्' (२।४।१८) आप्प्र० → आ ॥छ॥

## पूर्वमनेन सादेश्चेन् ॥ ७।१।१६७ ॥

**[ पूर्वम् ]** पूर्व 'क्रियाविशेषणात्' (२।२।४१) अम् ।

**[ अनेन ]** अनेन सप्तमी ङि । सूत्रत्वात् (लोपः) ।

**[ सादेः ]** सह आदिना वर्त्तते = सादिस्तस्मात् । 'सहस्य सोऽन्यार्थे' (३।२।१४३) सह सभावः ।

**[ च ]** च प्रथमा सि ।

**[ इन् ]** इन् प्रथमा सि ।

**[ पूर्वी ]** पूर्वमनेन = पूर्वी । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि ।

**[ पूर्विणौ ]** पूर्वमाभ्यां = पूर्विणौ । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । औ ।

**[ पूर्विणः ]** पूर्वमेभिः = पूर्विणः । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । जस् ।

**[ पूर्वी कटम् ]** पूर्वं कटोऽनेन = पूर्वी कटम् । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ पूर्वी ओदनम् ]** पूर्वं ओदनो अनेन = पूर्वी ओदनम् । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ पूर्वी पयः ]** पूर्वं पयोऽनेन = पूर्वी पयः । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ कृतपूर्वी कटम् ]** कृतं पूर्वं कटोऽनेन = कृतपूर्वी कटम् । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ भुक्तपूर्वी ओदनम् ]** भुक्तं पूर्वमोदनोऽनेन = भुक्तपूर्वी ओदनम् । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ पीतपूर्वी पयः ]** पीतं पूर्वं पयोऽनेन = पीतपूर्वी पयः । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छ॥

## इष्टादेः ॥ ७।१।१६८ ॥

**[ इष्टादेः ]** इष्ट आदिर्यस्य सः = इष्टादिः, तस्मात् ।

**[ इष्टी यज्ञे ]** इष्टमनेन = इष्टी । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ पूर्ती श्राद्धे ]** 'पृश् पालन-पूरणयोः' (१५३२) पृ । पूर्यते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'ओष्ठ्यादुर्' (४।४।११७) उर् । तस्य नो न भवति 'ॠ-ल्वादेरेषां तो नोऽप्रः' (४।२।६८) इत्यनेन निषेधात् । पूर्त्तमनेन = पूर्ती श्राद्धे । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'व्याप्ये क्तेनः' (२।२।९९) इति कर्मणि सप्तमी ।

गणोऽत्र ॥छ॥

## श्राद्धमद्यभुक्तमिकेनौ ॥ ७।१।१६९ ॥

**[ श्राद्धम् ]** श्राद्धम् पञ्चमी ङसि । सूत्रत्वात् (लोपः) ।

**[ अद्यभुक्तम् ]** अद्यभुक्तम् पञ्चमी ङसि । सूत्रत्वात् (लोपः) ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ इकेनौ ]** इकश्च इन् च = इकेनौ ।

**[ श्राद्धिकः, श्राद्धी ]** श्रद्धा प्रयोजनमस्य = श्राद्धः । 'चूडादिभ्योऽण्' (६।४।११९) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः । श्राद्धमनेनाद्यभुक्तं = श्राद्धिकः, श्राद्धी । अनेन इक-इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'इन्-हन्-पूषाऽर्यम्णः शिस्योः' (१।४।८७) दीर्घः । 'दीर्घङ्याब्-व्यञ्जनात् सेः' (१।४।४५) सिलुक् ॥छा॥

## अनुपद्यन्वेष्टा ॥ ७।१।१७० ॥

**[ अनुपदी ]** अनुपदिन् प्रथमा सि । 'इन्-हन्-पूषाऽर्यम्णः शिस्योः' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ अन्वेष्टा ]** अनु 'इषत् इच्छायाम्' (१४१९) इष् । अन्विच्छतीति अन्वेष्टा । 'णक-तृचौ' (५।१।४८) तृच्प्र० → तृ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । 'तवर्गस्य श्चवर्ग०' (१।३।६०) त० → ट० । प्रथमा सि । 'ऋदुशनस्-पुरुदंशोऽनेहसश्च सेर्डाः' (१।४।८४) सि० → डा० । 'डित्यन्त्यस्वरादेः' (२।१।११४) ऋलोपः ।

**[ अनुपदी उष्ट्राणाम्, अनुपदी गवाम् ]** पदानां समीपमनुपदम् । अनुपदमन्वेष्टा = अनुपदी उष्ट्राणाम्-गवां च । अनेन इन्प्र० निपात्यते । प्रथमा सि । 'इन्-हन्०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् ॥छा॥

## दाण्डाजिनिका-ऽऽयःशूलिक-पार्श्वकम् ॥ ७।१।१७१ ॥

**[ दाण्डाजिनिकाऽऽयःशूलिकपार्श्वकम् ]** द(दा)ण्डाजिनिकश्च आयःशूलिकश्च पार्श्वकश्च = दाण्डाजिनिका-ऽऽयःशूलिकपार्श्वकम् ।

**[ दाण्डाजिनिकः ]** दण्डाजिनं दम्भः, तेनान्वेष्टा = द(दा)ण्डाजिनिकः । अनेन इकण्प्र० निपात्यते । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । वृद्धिः । यो मिथ्याव्रती परप्रसादार्थं दण्डाजिनमुपादायार्थानन्विच्छति स दाम्भिक उच्यते । निपातनं रूढ्यर्थम्, तेन शैवभागवतादौ न भवति ।

**[ आयःशूलिकः ]** अयःशूलसाम्यात् तीक्ष्णः = अयःशूलम्, तेनान्वेष्टा = आयःशूलिकः । अनेन इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । यो मृदुनोपायेनान्वेष्टव्यानर्थान् तीक्ष्णोपायेनान्विच्छति राभसिकः स एवमुच्यते ।

**[ पार्श्वकः ]** पार्श्वमनृजुरुपायः लञ्चादिः, तेनान्वेष्टा = पार्श्वकः । ऋजुनोपायेनान्वेष्टव्यानर्थाननृजुनोपायेन योऽन्विच्छति स पार्श्वक उच्यते ॥छा॥

## क्षेत्रेऽन्यस्मिन्नाश्य इयः ॥ ७।१।१७२ ॥

**[ क्षेत्रे ]** क्षि क्षये (१०) क्षि । क्षयति-वृद्धिंगच्छति = क्षेत्रम् । 'हु-या-मा-श्रु-वसि-भसि-गु-वी-पचि-वचि-धृ-यम्यमि-मनि-तनि-सदि-छादि-क्षि-क्षदि-लुपि-पति-धूभ्यस्त्रः' (उणा० ४५१) त्रप्र० । 'नामिनो०' (४।३।१) गु० ए । तस्मिन् ।

**[ अन्यस्मिन् ]** अन्य सप्तमी ङि । 'ङेः स्मिन्' (१।४।८) स्मिन् ।

**[ नाश्ये ]** 'नशौच् अदर्शने' (१२०२) नश् । नश्यन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । नाशयितुं शक्यं = नाश्यम् । 'शक्तार्हे कृत्याश्च' (५।४।३५) यप्र० । 'णेरनिटि' (४।३।८३) णिग्लुक् । तस्मिन् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ इयः ]** इय प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ क्षेत्रियो व्याधिः ]** अन्यस्मिन् क्षेत्रे नाश्यः = क्षेत्रियो व्याधिः । अनेन इयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । क्षेत्रं शरीरम् । अन्यदिति जन्मान्तरशरीरमुच्यते । तत्र नाश्यो नेहे(ह)त्यसाध्यो व्याधिरुच्यते ।

**[ क्षेत्रियं विषम् ]** अन्यस्मिन् क्षेत्रे नाश्यं = क्षेत्रियं विषम् । अनेन इयप्र० । तद्धि स्वशरीरादन्यस्मिन्परशरीरे मन्त्रादिबलेन तद्विषं संक्रमय्य किञ्चिन्नाश्यं चिकित्स्यं भवति ।

**[ क्षेत्रियाणि तृणानि ]** अन्यस्मिन् क्षेत्रे नाश्यानि = क्षेत्रियाणि तृणानि । अनेन इयप्र० । जस् । 'नपुंसकस्य शिः' (१।४।५५) जस्० → शि० → इ० । 'स्वराच्छौ' (१।४।६५) नोऽन्तः' । 'नि दीर्घः' (१।४।८५) दीर्घः । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → ण० । तानि हि सस्यक्षेत्रे इतरप्रदेशापेक्षया अन्यस्मिन्नुत्पन्नानि नाश्यान्युत्पाद्यानि भवन्ति ।

**[ क्षेत्रियः पारदारिकः ]** अन्यस्मिन् क्षेत्रे नाश्यः = क्षेत्रियः पारदारिकः । अनेन इयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । परदारान् गच्छति = पारदारिकः । 'परदारादिभ्यो गच्छति' (६।४।३८) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । स हि स्वक्षेत्रादन्यस्मिन् क्षेत्रे परदारेषु पवर्त्तमानस्तत्र नाश्यो निग्राह्यो भवति । दाराः क्षेत्रम् ॥छ॥

## छन्दोऽधीते श्रोत्रश्च वा ॥ ७।१।१७३ ॥

**[ छन्दः ]** छन्दस् अमन्तात् पञ्चमी ङसि । सूत्रत्वात् (लोपः) ।

**[ अधीते ]** अधीते सप्तमी ङि । सूत्रत्वात् (लोपः) ।

**[ श्रोत्रश्च ]** श्रोत्र प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । च प्रथमा सि ।

**[ वा ]** वा प्रथमा सि ।

**[ श्रोत्रियः, छान्दसः ]** छन्दस् । छन्दोऽधीते = श्रोत्रियः । अनेन इयप्र० – छन्दस्शब्दस्य श्रोत्रभावश्च । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । पक्षे-छान्दसः । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० → अ । वृद्धिः ॥छ॥

## इन्द्रियम् ॥ ७।१।१७४ ॥

**[ इन्द्रियम् ]** इन्द्रिय सि-अम् ।

**[ इन्द्रियम् ]** इन्द्र-आत्मा । इन्द्रस्य लिङ्गमिन्द्रियम् । अनेन इयप्र० निपात्यते । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । चक्षुराद्युच्यते, तेन हि करणेनात्मानुमीयते 'नाकर्तृकं करण'मिति ।

इन्द्रेण दृष्टमिन्द्रियम्, आत्मा हि चक्षुरादीनि दृष्ट्वा स्वविषये नियुङ्क्ते ।

इन्द्रेण सृष्टमिन्द्रियम् । अनेन इयप्र० निपात्यते । आत्मकृतेन हि शुभाशुभेन कर्मणा तथाविधविषयोपभोगायास्य चक्षुरादीनि भवन्ति ।

इन्द्रेण जुष्टमिन्द्रियम् । अनेनैव निपात्यते । तद्द्वारेणाऽस्य विज्ञानोत्पादनात् ।

इन्द्रेण दत्तमिन्द्रियम् । विषयग्रहणाय विषयेभ्यः समर्पणात् ।

*इन्द्रस्यावरणक्षयोपशमसाधनमिन्द्रियम् । अनेन इयप्र० निपात्यते ॥छ॥*

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## तेन वित्ते चञ्चु-चणौ ॥ ७।१।१७५ ॥

**[ तेन ]** तेन पञ्चमी ङसि । सूत्रत्वात् (लोपः) ।

**[ वित्ते ]** वित्त सप्तमी ङि ।

**[ चञ्चुचणौ ]** चञ्चुश्च चणश्च = चच्चुचणौ ।

वित्तो ज्ञातः प्रकाश इत्यर्थः ।

**[ विद्याचञ्चुः, विद्याचणः ]** विद्यया वित्तः = विद्याचञ्चुः, विद्याचणः । अनेन चञ्चु-चणप्र० ।

**[ केशचञ्चुः, केशचणः ]** केशैर्वित्तः = केशचञ्चुः, केशचणः । अनेन चञ्चु-चणप्र० ॥छ॥

## पूरणाद् ग्रन्थस्य ग्राहके को लुक् चाऽस्य ॥ ७।१।१७६ ॥

**[ पूरणात् ]** 'पूरैचि आप्यायने' (१२६८) पूर् । पूर्यतेऽनेनेति पूरणम् । 'करणा-ऽऽधारे' (५।३।१२९) अनट्प्र० → अन । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → णत्वम् । तस्मात् ।

**[ ग्रन्थस्य ]** ग्रन्थ षष्ठी ङस् ।

**[ ग्राहके ]** ग्राहक सप्तमी ङि ।

**[ कः ]** क प्रथमा सि ।

**[ लुक् ]** लुक् प्रथमा सि ।

**[ च ]** च प्रथमा सि ।

**[ अस्य ]** इदम् षष्ठी ङस् ।

**[ द्विकः ]** द्वयोः पूरणः = द्वितीयः । 'द्वेस्तीयः' (७।१।१६५) तीयप्र० । द्वितीयेन रूपेण ग्रन्थस्य ग्राहकः = द्विकः । अनेन कप्र०-तीयस्य लुक् ।

**[ त्रिकः ]** त्रयाणां पूरणः = तृतीयः । 'त्रेस्तृ च' (७।१।१६६) तीयप्र०-त्रिस्थाने तृदेशश्च । तृतीयेन रूपेण ग्रन्थस्य ग्राहकः = त्रिकः । अनेन कप्र०-तीयस्य लुक् ।

**[ चतुष्कः ]** चतुर्णां पूरणः = चतुर्थः, तुर्यः, तुरीयः । 'चतुरः' (७।१।१६३) थट्प्र० → थ । 'येयौ चलुक् च' (७।१।१६४) य-ईयप्र०-चलुक् च । चतुर्थेन तुर्येण तुरीयेण वा रूपेण ग्रन्थस्य ग्राहकः = चतुष्कः । अनेन कप्र०-थ-य-ईय-लुक् च । 'निर्दुर्बहिराविष्प्रादुश्चतुराम्' (२।३।९) र० → षत्वम् ।

**[ पञ्चकः ]** पञ्चानां पूरणः = पञ्चमः । 'नो मट्' (७।१।१५९) मट्प्र० → म । पञ्चमेन रूपेण ग्रन्थस्य ग्राहकः = पञ्चकः । अनेन कप्र०-मलुक् च ।

**[ षट्कः वैयाकरणः ]** षष् । षण्णां पूरणः = षष्ठः । 'षट्-कति-कतिपयात् थट्' (७।१।१६२) थट्प्र० → थ । षष्ठेन रूपेण ग्रन्थस्य ग्राहकः । अनेन कप्र०-थलुक् च । वैयाकरणः ॥छ॥

## ग्रहणाद् वा ॥ ७।१।१७७ ॥

**[ ग्रहणात् ]** ग्रहण पञ्चमी ङसि ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

[ **वा** ] वा प्रथमा सि ।

ग्रन्थस्येति वर्त्तते पूरणादिति च ।

[ **द्विकं ग्रन्थग्रहणमस्य, द्वितीयकं ग्रन्थग्रहणमस्य** ] द्वितीयमेव = द्विकम्, द्वितीयकं ग्रन्थग्रहणमस्य । अनेन कप्र०-तीयलुक् च विकल्पेन ।

[ **त्रिकं व्याकरणस्य ग्रहणम्, तृतीयकं व्याकरणस्य ग्रहणम्** ] तृतीयमेव त्रिकम्, तृतीयकं व्याकरणस्य ग्रहणम् । अनेन कप्र०-पूरणप्रत्ययस्य वा लुक् च ।

[ **चतुष्कम्, चतुर्थकम्** ] चतुर्थमेव = चतुष्कम्, चतुर्थकम् । अनेन कप्र०-पूरणप्रत्ययस्य वा लुक् च ।

[ **पञ्चकम्, पञ्चमकम्** ] पञ्चममेव = पञ्चकम्, पञ्चमकम् । अनेन कप्र०-पूरणप्रत्ययस्य वा लुक् च ॥छा।

## सस्याद् गुणात् परिजाते ॥ ७।१।१७८ ॥

[ **सस्यात्** ] सस्य पञ्चमी ङसि ।

[ **गुणात्** ] गुण पञ्चमी ङसि ।

[ **परिजाते** ] परिजात सप्तमी ङि ।

परिः सर्वतोभावे, जनिः सम्पत्तौ ।

[ **सस्यकः शालिः** ] सस्येन-गुणसमूहेन परिजातः = सस्यकः शालिः । अनेन कप्र० । सस्यशब्दो धान्यवत् गुणेऽपि वर्त्तते । यः सर्वतो गुणैः संपन्नो न यस्य किञ्चिदपि वैगुण्यमस्ति स एवमुच्यते ।

[ **सस्यको देशः** ] सस्येन परिजातः = सस्यको देशः । अनेन कप्र० ।

[ **सस्यको वत्सः** ] सस्येन परिजातः = सस्यको वत्सः । अनेन कप्र० ।

[ **सस्यकं सीधु** ] सस्येन परिजातं = सस्यकं सीधु-मदिरा । अनेन कप्र० ।

[ **सस्यको मणिः** ] सस्येन परिजातः = सस्यको मणिः । अनेन कप्र० । रूढिशब्दश्चायं मणिविषये ।

[ **सस्यकः खड्गः** ] सस्येन परिजातः = सस्यकः खड्गः । सर्वतः सारेण सम्बद्धः ॥छा।

## धन-हिरण्ये कामे ॥ ७।१।१७९ ॥

[ **धनहिरण्ये** ] धनहिरण्ये पञ्चमी ङसि । सूत्रत्वात् (लोपः) ।

[ **कामे** ] काम सप्तमी ङि ।

[ **धनकः चैत्रस्य** ] धने कामः = धनकः चैत्रस्य । अनेन कप्र० ।

[ **हिरण्यको मैत्रस्य** ] हिरण्ये कामः = हिरण्यको मैत्रस्य । अनेन कप्र० ॥छा।

## स्वाङ्गेषु सक्ते ॥ ७।१।१८० ॥

[ **स्वाङ्गेषु** ] स्वाङ्गेषु पञ्चमी ङसि ।

[ **सक्ते** ] सक्त सप्तमी ङि ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ केशकः ]** केशेषु सक्तः = केशकः । अनेन कप्र० ।

**[ नखकः ]** नखेषु सक्तः = नखकः । अनेन कप्र० ।

**[ दन्तकः ]** दन्तेषु सक्तः = दन्तकः । अनेन कप्र० ।

केशादिरचनायां प्रसक्त उच्यते ।

बहुवचनात् स्वाङ्गसमुदायादपि-

**[ दन्तौष्ठकः ]** दन्ताश्च ओष्ठौ च = दन्तौष्ठाः, तेषु सक्तः = दन्तौष्ठकः । अनेन कप्र० ।

**[ केशनखकः ]** केशाश्च नखाश्च = केशनखाः, तेषु सक्तः = केशनखकः । अनेन कप्र० ॥छ॥

## उदरे त्विकणाद्यूने ॥ ७।१।१८१ ॥

**[ उदरे ]** उदरे पञ्चमी ङसि । सूत्रत्वात् (लोपः) ।

**[ तु ]** तु प्रथमा सि ।

**[ इकण् ]** इकण् प्रथमा सि ।

**[ आद्यूने ]** 'दिवूच् क्रीडा-जयेच्छा-पणि-द्युति-स्तुति-गतिषु' (११४४) दिव्, आङ्पूर्व० । आदीव्यति स्म = आद्यूनः । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'पू-दिव्यञ्चेर्नाशा-ऽद्यूता-ऽनपादाने' (४।१।७२) त० → न० । 'अनुनासिके च च्छ्-वः शूट्' (४।१।१०८) व० → ऊट् → ऊ । 'इवर्णादेरस्वे०' (१।२।२१) यत्, तस्मिन् ।

**[ औदरिक आद्यूनः, औदरिकी ]** उदरे सक्तः = औदरिकः । अनेन इकणप्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । आद्यूनः । एवम्-औदरिकी । 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ उदरकोऽन्यः ]** उदरे सक्तः = उदरकोऽन्यः । 'स्वाङ्गेषु सक्ते' (७।१।१८०) कप्र० ॥छ॥

## अंशं हारिणि ॥ ७।१।१८२ ॥

**[ अंशम् ]** अंशम् पञ्चमी ङसि । सूत्रत्वात् (लोपः) ।

**[ हारिणि ]** 'हृंग् हरणे' (८८५) हृ । अवश्यं हरिष्यतीति । 'णिन् चाऽऽवश्यकाऽधमर्ण्ये' (५।४।३६) णिन्प्र० इन् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् । तस्मिन् । 'र-षृवर्णान्नो ण०' (२।३।६३) णत्वम् ।

**[ अंशको दायादः ]** अंश । अंशं हारी = अंशको दायादः । अनेन कप्र० ॥छ॥

## तन्त्रादचिरोद्धृते ॥ ७।१।१८३ ॥

**[ तन्त्रात् ]** तन्त्र पञ्चमी ङसि ।

**[ अचिरोद्धृते ]** न चिरोद्धृतः = अचिरोद्धृतस्तस्मिन् ।

**[ तन्त्रकः पटः ]** तन्त्रात् पटवानोपकरणादचिरोत्तीर्णः = तन्त्रकः । अनेन कप्र० । प्रत्यग्रः पट इत्यर्थः ॥छ॥

## ब्राह्मणान्नाम्नि ॥ ७।१।१८४ ॥

**[ ब्राह्मणात् ]** ब्राह्मण पञ्चमी ङसि ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ नाम्नि ]** नामन् सप्तमी ङि । 'ई-ङौ वा' (२।१।१०९) अलुक् ।

**[ ब्राह्मणको नाम देशः ]** सदाचारब्राह्मणेभ्यस्तदानीमेवोद्धृत्य पृथक्कृतः = ब्राह्मणको देशः । अनेन कप्र० ॥छ॥

## उष्णात् ॥ ७।१।१८५ ॥

**[ उष्णात् ]** उष्ण पञ्चमी ङसि ।

**[ उष्णिका यवागूः ]** उष्णादग्नेरचिरोद्धृता = उष्णिका यवागूः । अल्पान्ना पेया विलेपिकेति यावत् । अनेन कप्र० । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्०' (२।४।१११) इ ॥छ॥

## शीताच्च कारिणि ॥ ७।१।१८६ ॥

**[ शीतात् ]** शीत पञ्चमी ङसि ।

**[ च ]** च प्रथमा सि ।

**[ कारिणि ]** 'डुकृंग् करणे' (८८८) कृ । अवश्यं करोतीति । 'णिन् चाऽऽवश्यकाऽधमर्ण्ये' (५।४।३६) णिन्प्र० → इन् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् । तस्मिन् । 'र-षृवर्णान्नो ण०' (२।३।६३) णत्वम् ।

**[ शीतकोऽलसः ]** शीतं मन्दं करोति = शीतकोऽलसः । अनेन कप्र० ।

**[ उष्णको दक्षः ]** उष्णं क्षिप्रं करोति = उष्णको दक्षः । अनेन कप्र० ।

शीतोष्णशब्दाविह मान्द्यशीघ्रवचनौ गृह्य(ह्ये)ते, न स्पर्शवचनौ । क्रियाविशेषणत्वात् द्वितीया ॥छ॥

## अधेरारूढे ॥ ७।१।१८७ ॥

**[ अधेः ]** अधि पञ्चमी ङसि ।

**[ आरूढे ]** आ 'रुहं जन्मनि' (९८८) रुह् । आरोहति स्म = आरूढः । तस्मिन् । 'श्लिष-शीङ्-स्था-ऽऽस-वस-जन-रुह-जॄ-भजेः क्तः' (५।१।९) क्तप्र० → त० । 'हो धुट्-पदान्ते' (२।१।८२) ह० → ढ० । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९) त० → ध० । 'तवर्गस्य०' (१।३।६०) ध० → ढ० । 'ढस्तड्ढे' (१।३।४२) ढलुक्-उदीर्घश्च ।

आरूढशब्दः कर्तरि कर्मणि च क्तप्रत्यये सिद्धः । तत्र यदा कर्त्तरि तदा-

**[ अधिको द्रोणः खार्याः, अधिको द्रोणः खार्याम् ]** अधि-आरूढः = अधिको द्रोणः खार्याः, अधिको द्रोणः खार्यामिति वा । अनेन कप्र० । 'अधिकेन भूयसस्ते' (२।२।१११) पञ्चमी-सप्तमी वा ।

यदा तु कर्मणि तदा-

**[ अधिका खारी द्रोणेन ]** अधि-आरूढा = अधिका खारी द्रोणेन । 'तृतीयाऽल्पीयसः' (२।२।११२) तृतीया । अत्र अनेन कप्र० । 'आत्' (२।४।१८) आप्प्र० → आ ॥छ॥

## अनोः कमितरि ॥ ७।१।१८८ ॥

**[ अनोः ]** अनु पञ्चमी ङसि ।

**[ कमितरि ]** कमितृ सप्तमी ङि । 'अर्डौ च' (१।४।३९) अर् ।

**[ अनुकः ]** अनु-कामयते = अनुकः भर्त्ता । अनेन कप्र० ॥छ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## अभेरीश्च वा ॥ ७।१।१८९ ॥

**[ अभेः ]** अभि पञ्चमी ङसि ।

**[ ईश्च ]** ई प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । च प्रथमा सि ।

**[ वा ]** वा प्रथमा सि ।

**[ अभिकः, अभीकः ]** अभि-कामयते = अभिकः भर्ता, अभीकः । अनेन कप्र०-विकल्पेन ईकारश्च ।।छ।।

## सोऽस्य मुख्यः ॥ ७।१।१९० ॥

**[ सोऽस्य ]** सो(सः) पञ्चमी ङसि । सूत्रत्वात् (लोपः) । अस्य सप्तमी ङि । सूत्रत्वात् (लोपः) ।

**[ मुख्यः ]** मुख्य प्रथमा सि ।

**[ देवदत्तकः सङ्घः ]** देवदत्तो मुख्योऽस्य = देवदत्तकः सङ्घः । अनेन कप्र० ।

**[ जिनदत्तकः ]** जिनदत्तो मुख्योऽस्य = जिनदत्तकः । अनेन कप्र० ।

**[ देवदत्तकाः ]** देवदत्तो मुख्य एषां = देवदत्तकाः । अनेन कप्र० । जस् ।

**[ जिनदत्तकाः ]** जिनदत्तो मुख्य एषां = जिनदत्तकाः । अनेन कप्र० । जस् ।।छ।।

## शृङ्खलकः करभे ॥ ७।१।१९१ ॥

**[ शृङ्खलकः ]** शृङ्खलक प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ करभे ]** करभ सप्तमी ङि ।

**[ शृङ्खलकः करभः ]** कृ (१५२९) - मृ (१५३०) - 'शृश् हिंसायाम्' (१५३१) शृ । शृणाति-हिनस्ति गतिं = शृङ्खलः । 'श्रो नोऽन्तो हृस्वश्च' (उणा० ४९८) खलप्र० - नोऽन्तः-हृस्वश्च । शृङ्खलं बन्धनमस्य = शृङ्खलकः । अनेन कप्र० । करभ उच्यते । करभाणां काष्ठमयं पादबन्धनं शृङ्खलम् । वयःशब्दश्चाऽयम् । शृङ्खलं बन्धनं भवतु मा वा भूत् । त्रिवार्षिक उष्ट्रशिशुः करभ उच्यते । यतः उक्तमभिधानचिन्तामणौ-"करभस्तु त्रिहायणः स तु शृङ्खलकः" ॥ श्लोकाङ्कः १२५५ ।।छ।।

## उदुत्सोरुन्मनसि ॥ ७।१।१९२ ॥

**[ उदुत्सोः ]** उच्च उत्सुश्च = उदुत्सुः, तस्मात् ।

**[ उन्मनसि ]** उद्गतं मनो यस्याऽसौ उन्मनाः, तस्मिन् ।

**[ उत्कः ]** उद्गतं मनोऽस्य = उत्कः । अनेन कप्र० ।

**[ उत्सुकः ]** उत्सुगतं मनोऽस्य = उत्सुकः । अनेन कप्र० ।।छ।।

## काल-हेतु-फलाद् रोगे ॥ ७।१।१९३ ॥

**[ कालहेतुफलात् ]** कालश्च हेतुश्च फलं च = कालहेतुफलम्, तस्मात् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ रोगे ]** रोग सप्तमी ङि ।

**[ द्वितीयको ज्वरः ]** द्वितीयो दिवसोऽस्याविर्भावाय = द्वितीयको ज्वरः । अनेन कप्र० ।

**[ तृतीयको ज्वरः ]** तृतीयो दिवसोऽस्याविर्भावाय = तृतीयको ज्वरः । अनेन कप्र० ।

**[ चतुर्थको ज्वरः ]** चतुर्थः दिवसोऽस्याविर्भावाय = चतुर्थको ज्वरः । अनेन कप्र० ।

**[ विषपुष्पकः ]** विषस्य पुष्पं = विषपुष्पम् । विषपुष्पं हेतुः कारणमस्य = विषपुष्पकः । अनेन कप्र० ।

**[ काशपुष्पकः ]** काशस्य पुष्पं = काशपुष्पम् । काशपुष्पं हेतुः कारणमस्य = काशपुष्पकः । अनेन कप्र० ।

**[ पर्वतको रोगः ]** पवतो हेतुः कारणमस्य = पर्वतको रोगः । अनेन कप्र० ।

फलम् - **[ शीतकः ]** शीतं फलं कार्यमस्य = शीतकः । अनेन कप्र० ।

*[ उष्णको ज्वरः ] उष्णः(ष्णं) फलं कार्यमस्य = उष्णको ज्वरः । अनेन कप्र० ॥छ॥*

## प्रायोऽन्नमस्मिन् नाम्नि ॥ ७।१।१९४ ॥

**[ प्रायः ]** प्रायस् तृतीया टा । सूत्रत्वात् (लोपः) ।

**[ अन्नम् ]** अन्न प्रथमा सि । प्रथमान्तात् पञ्चमी ङसि । सूत्रत्वात् (लोपः) ।

**[ अस्मिन् ]** अस्मिन् सप्तमी ङि । सूत्रत्वात् (लोपः) ।

**[ नाम्नि ]** नामन् सप्तमी ङि । 'ई-ङौ वा' (२।१।१०९) अलुक् ।

स इति वर्त्तते । प्रायशब्दोऽत्रान्नसमानाधिकरणो नियतलिङ्गसंख्यः । प्रायः अकृत्स्नबहुत्वम् ।

**[ गुडापूपिका पौर्णमासी ]** गुडापूपाः प्रायेण प्रायो वाऽन्नमस्यां पूर्णिमायां = गुडापूपिका पौर्णमासी । अनेन कप्र० । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्-तत्०' (२।४।१११) इ ।

**[ तिलापूपिका ]** तिलापूपाः प्रायेण प्रायो वाऽन्नमस्यां = तिलापूपिका । अनेन कप्र० । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्-तत्०' (२।४।१११) इ ।

**[ कृशरिका ]** कृस(श)रा प्रायेण प्रायो वाऽन्नमस्यां = कृस(श)रिका । अनेन कप्र० । 'ङ्यादीदूतः के' (२।१।१०४) ह्रस्वः । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्०' (२।४।१११) इ ।

**[ त्रिपुटिका ]** त्रिपुटः प्रायेण प्रायो वाऽन्नमस्यां = त्रिपुटिका । अनेन कप्र० । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्या•यत्०' (२।४।१११) इ ॥छ॥

## कुल्मासादण् ॥ ७।१।१९५ ॥

**[ कुल्मासात् ]** कुल्मास पञ्चमी ङसि ।

**[ अण् ]** अण् प्रथमा सि ।

**[ कौल्मासी पौर्णमासी ]** कुल्मासाः प्रायेण प्रायो वाऽन्नमस्यां पौर्णमास्यां = कौल्मासी पौर्णमासी । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्०' (२।४।२०) ङी ।

कुल्माष इति मूर्धन्योपान्त्योप्यस्ति ॥छ॥

## वटकादिन् ॥ ७।१।१९६ ॥

**[ वटकात् ]** वटक पञ्चमी ङसि ।

**[ इन् ]** इन् प्रथमा सि ।

**[ वटकिनी ]** वटकानि प्रायेण प्रायो वाऽन्नमस्यां पौर्णमास्यां = वटकिनी । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'स्त्रियां नृतोऽस्वस्रादेर्ङी' (२।४।१) ङी ॥छ॥

## साक्षाद् द्रष्टा ॥ ७।१।१९७ ॥

**[ साक्षात् ]** साक्षात् पञ्चमी ङसि । 'अव्ययस्य' (३।२।७) ङसिलोपः ।

**[ द्रष्टा ]** द्रष्टृ प्रथमा सि । 'ऋदुशनस्०' (१।४।८४) सि० → डा० । 'डित्यन्त्यस्वरादेः' (२।१।११४) ऋलोपः । सप्तमी ङि । सूत्रत्वाल्लोपः ।

**[ साक्षी, साक्षिणौ, साक्षिणः ]** साक्षाद् द्रष्टा = साक्षी । साक्षाद् द्रष्टारौ = साक्षिणौ । साक्षाद् द्रष्टारः = साक्षिणः । अनेन इन्प्र० । 'प्रायोऽव्ययस्य' (७।४।६५) अन्त्यस्वरादिलोपः । सि-औ-जस् ।

**[ साक्षाद् द्रष्टा ]** साक्षात् प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । द्रष्टा ॥छ॥

**इत्याचार्यश्रीहेमचन्द्रविरचितायां बृहद्वृत्तौ तद्धितस्य**
**पञ्चमः पादः ॥छ॥**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

॥ अर्हम् ॥

## ॥ अथ सप्तमाध्यायस्य द्वितीयः पादः ॥

### तदस्याऽस्त्यस्मिन्निति मतुः ॥ ७।२।१ ॥

[**तद्**] तद् पञ्चमी ङसि । सूत्रत्वात् (लोपः) ।

[**अस्य**] अस्य सप्तमी ङि । सूत्रत्वात् (लोपः) ।

[**अस्ति**] अस्ति प्रथमा सि । सूत्रत्वात् (लोपः) ।

[**अस्मिन्**] अस्मिन् प्रथमा सि-सप्तमी ङि वा । सूत्रत्वात् (लोपः) ।

[**इति**] इति प्रथमा सि ।

[**मतुः**] मतु प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

[**गोमान्**] गावोऽस्य सन्ति = गोमान् ।

[**यवमान्**] यवाः सन्त्यस्य = यवमान् ।

[**वृक्षवान्**] वृक्षा अस्मिन् सन्ति = वृक्षवान् ।

[**प्लक्षवान् पर्वतः**] प्लक्षा अस्मिन् सन्ति = प्लक्षवान् पर्वतः ।

[**अस्तिमान्**] अस्ति-धनमस्य = अस्तिमान् ।

[**स्वस्तिमान्**] स्वस्ति-आरोग्यमस्यास्ति = स्वस्तिमान् । सर्वत्र अनेन मतुप्र० → मत् । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'अभ्वादेरत्वसः सौ' (१।४।९०) दीर्घः । यथादर्शनं 'मावर्णान्तोपान्ताऽपञ्चम०' (२।१।९४) म० → व० । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'पदस्य' (२।१।८९) तलुक् । अत्र अस्ति-स्वस्ती अव्ययौ धनारोग्यवचनौ ।

अष्टौ कस्मान्न भवति

[**चित्रगुः**] चित्रा गावोऽस्य सन्ति = चित्रगुः । 'गोश्चान्ते ह्रस्वोऽनंशिसमासेयोबहुव्रीहौ' (२।४।९६) ह्रस्वः । 'परतः स्त्री पुम्वत् स्त्र्येकार्थेऽनूङ्' (३।२।४९) पुंवत् । चित्रगोमानिति प्राप्नोति बहुव्रीहिणैव मत्वर्थस्योक्तत्वात् ।

[**शबलगुः**] शबला गावोऽस्य सन्ति = शबलगुः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः । 'परतः स्त्री पुम्वत्०' (३।२।४९) पुंवत् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ पूर्वशालः ]** पूर्वा शाला अस्यास्ति = पूर्वशालः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः । 'परतः स्त्री पुम्वत्०' (३।२।४९) पुंवत् ।

**[ अपरशालः ]** अपरा शाला अस्यास्ति = अपरशालः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः । 'परतः स्त्री पुम्वत्०' (३।२।४९) पुंवत् ।

**[ पञ्चगुः ]** पञ्च गावोऽस्य सन्ति = पञ्चगुः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः ।

**[ दशगुः ]** दश गावोऽस्य सन्ति = दशगुः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः । इत्यत्राप्यस्तीतिपदसापेक्षम् ।

**[ द्वैमातुरः ]** द्वयोर्मात्रोरपत्यं = द्वैमातुरः । 'संख्या-सं-भद्रान्मातुर्मातुर्च' (६।१।६६) अण्प्र० → अ-मातृशब्दस्य मातुर् आदेशश्च । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः ऐ । इत्यादौ तद्धितद्विगुं सावकाशं बाधित्वा अस्तिपदनिरपेक्षत्वादन्तरङ्गेण बहुव्रीहिणा भवता उक्तार्थत्वात् मतुर्न भवति ।

इतिकरणो विवक्षार्थः । तेन-

भूमनिन्दाप्रशंसासु, नित्ययोगेऽतिशायने ।
संसर्गेऽस्तिविवक्षायां, प्रायो मत्वादयो मताः ॥१॥

भूम्नि - **[ गोमान् ]** गावोऽस्य सन्ति = गोमान् ।

**[ यवमान् ]** यवाः सन्त्यस्मिन् = यवमान् ।

निन्दायाम् - **[ शङ्खादकी ]** शम् 'खादृ भक्षणे' (२९४) खाद् । शं खादतीत्येवंशीलः । 'निन्द-हिंस-क्लिश-खाद-विनाशि-व्याभाषाऽसूयाऽनेकस्वरात्' (५।२।६८) णकप्र० → अक । शङ्खादक आवर्त्तविशेषोऽस्यास्ति = शङ्खादकी । 'प्राणिस्थादस्वाङ्गाद् द्वन्द्व-रुग्-निन्द्यात्' (७।२।६०) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'इन्-हन्-पूषाऽर्यम्णः शिस्योः' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ ककुदावर्ती ]** ककुदे आवर्त्तः - ककुदमावर्त्तयति वा । 'अच्' (५।१।४९) अच्प्र० → अ । 'णेरनिटि' (४।३।८३) णिलुक् । ककुदावर्त्तोऽस्यास्ति = ककुदावर्ती । 'प्राणिस्थादस्वाङ्गाद्०' (७।२।६०) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'इन्-हन्०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

प्रशंसायाम् - **[ रूपवती कन्या ]** रूपं विद्यतेऽस्याः सा = रूपवती । अनेन मतुप्र० → मत् । 'अधातूदृदितः' (२।४।२) ङी । 'मावर्णान्तोपान्तापञ्चम०' (२।१।९४) म० → व० ।

**[ शीलवती कन्या ]** शीलं विद्यतेऽस्याः सा = शीलवती । अनेन मतुप्र० → मत् । 'अधातूदृदितः' (२।४।२) ङी । 'मावर्णान्तोपान्तापञ्चम०' (२।१।९४) म० → व० ।

नित्ययोगे - **[ क्षीरिणो वृक्षाः ]** क्षीरं दुग्धमेष्वस्ति = क्षीरिणः । 'अतोऽनेकस्वरात्' (७।२।६) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । जस् ।

**[ कण्टकिनः ]** कण्टकाः सन्त्येषु = कण्टकिनः । 'अतोऽनेकस्वरात्' (७।२।६) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । जस् ।

अतिशायने - **[ उदरिणी कन्या ]** उदरमस्या अस्ति = उदरिणी कन्या । 'अतोऽनेकस्वरात्' (७।२।६) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'स्त्रियां नृतोऽस्वस्रादेर्ङीः' (२।४।१) ङी । 'र-षृवर्णान्नो ण०' (२।३।६३) णत्वम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ बलवान् मल्लः ]** बलं विद्यतेऽस्यासौ = बलवान् मल्लः । अनेन मतुप्र० → मत् । शेषं पूर्ववत् ।

संसर्गे - **[ दण्डी ]** दण्डो विद्यतेऽस्यासौ = दण्डी । 'अतोऽनेकस्वरात्' (७।२।६) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'इन्-हन्०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ छत्री ]** छत्रं विद्यतेऽस्यासौ = छत्री । 'अतोऽनेकस्वरात्' (७।२।६) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'इन्-हन्-पूषाऽर्यम्णः शिस्योः' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

प्रायिकमेतद्भूमादिदर्शनं, सत्तामात्रेऽपि प्रत्ययो दृश्यते-

**[ व्याघ्रवान् पर्वतः ]** व्याघ्रो विद्यतेऽस्मिन् असौ = व्याघ्रवान् पर्वतः ।

**[ स्पर्शरसगन्धवर्णवन्तः पुद्गलाः ]** स्पर्शश्च रसश्च गन्धश्च वर्णश्च = स्पर्शरसगन्धवर्णाः । स्पर्शरसगन्धवर्णा विद्यन्ते एषु ते = स्पर्शरसगन्धवर्णवन्तः पुद्गलाः । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् । जस् ।

**[ रूपरसगन्धस्पर्शवती पृथिवी ]** रूपश्च रसश्च गन्धश्च स्पर्शश्च = रूपरसगन्धस्पर्शाः । रूपरसगन्धस्पर्शा विद्यन्तेऽस्यां सा = रूपरसगन्धस्पर्शवती । 'तदस्याऽस्त्य०' (७।२।१) मतुप्र० → मत् । 'अधातूदृदितः' (२।४।२) ङी । 'मावर्णान्तो०' (२।१।९४) म० → व० ।

**[ रूपरसस्पर्शवत्य आपः ]** रूपं च रसश्च स्पर्शश्च = रूपरसस्पर्शाः । रूपरसस्पर्शा विद्यन्ते आसु ताः = रूपरसस्पर्शवत्य आपः । 'तदस्याऽस्त्य०' (७।२।१) मतुप्र० → मत् । 'अधातूदृदितः' (२।४।२) ङी । जस् । 'मावर्णान्तोपा०' (२।१।९४) म० → व० ।

**[ रूपस्पर्शवत्तेजः ]** रूपं च स्पर्शश्च = रूपस्पर्शौ । रूपस्पर्शौ विद्येते यत्र तत् = रूपस्पर्शवत्तेजः ।

**[ स्पर्शवान् वायुः ]** स्पर्शो विद्यते यस्य सः = स्पर्शवान् वायुः ।

**[ यवमतीभिरद्भिर्यूपं प्रोक्षन्ति ]** यवा विद्यन्ते आसु ताः = यवमत्यस्ताभिः । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् । 'नोर्म्यादिभ्यः' (२।१।९९) इत्यनेन मकारस्य वत्वं निषेधः । 'अधातूदृदितः' (२।४।२) ङी । इदमेकं विमुच्य अन्यत्र 'मावर्णान्तोपान्ता०' (२।१।९४) म० → वत्वम् । अप् तृतीया भिस् । 'अपोऽद्भे' (२।१।४) प० → द० । पानीयैरित्यर्थः । 'उक्ष सेचने' (५६६) उक्ष्, प्रपूर्व० । वर्त्त० अन्ति । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् ।

तथा मत्वर्थीयान्मत्वर्थीयः सरूपो न भवति-

**[ गोमन्तः ]** गाव एषां सन्तीति गोमन्तः । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् । गोमन्तोऽत्र सन्तीति मतुर्न भवति ।

**[ दण्डिकाः ]** दण्ड एषामस्तीति दण्डिकाः । 'नावादेरिकः' (७।२।३) इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । दण्डिका अत्र सन्तीति इको न भवति ।

विरूपस्तु भवत्येव-

**[ दण्डिमती शाला ]** दण्डो विद्यते एषां ते = दण्डिनः । 'अतोऽनेकस्वरात्' (७।२।६) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । दण्डिनोऽस्यां सन्ति । अनेन मतुप्र० → मत् । 'अधातूदृदितः' (२।४।२) ङी ।

Jain Education International　For Personal & Private Use Only　www.jainelibrary.org

**[हस्तिमती उपत्यका]** हस्तो विद्यतेऽस्य = हस्ती । 'हस्त-दन्त-कराज्जातौ' (७।२।६८) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । हस्ती अत्रास्ति = हस्तिमती उपत्यका । अनेन मतुप्र० → मत् । 'अधातूदृदितः' (२।४।२) ङी ।

**[दण्डिकाः, दण्डिनः]** दण्ड एषामस्तीति दण्डिकाः, दण्डिनः । 'नावादेरिकः' (७।२।३) इकप्र० । 'अतोऽनेकस्वरात्' (७।२।६) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । दण्डिका अस्य सन्ति । इन्-मतू न भवति(तः) । एषामस्येति षष्ठ्याः सद्भावात् समाना वृत्तिः । क्वचिदिति समानायामसमानायां च वृत्तौ ।

**[शालीयः]** शालायां भवः = शालीयः । 'दोरीयः' (६।३।३२) ईयप्र० । पुनः शालीये भवः समाना वृत्तिः, शालीयस्यायं वेतीयो न भवति । विरूपस्तु भवति-

**[आहिच्छत्रीयः]** अहिच्छत्रे भवः = आहिच्छत्रः । 'भवे' (६।३।१२३) अण्प्र० → अ । आहिच्छत्रे भवः = आहिच्छत्रीयः । 'दोरीयः' (६।३।३२) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

तथा असंज्ञाभूतात् कर्मधारयान्मत्वर्थीयो न भवति-

**[वीरपुरुषा अस्मिन् ग्रामे सन्ति]** वीराश्च ते पुरुषाश्च = वीरपुरुषाः । अत्र मत्वर्थीयो नायातः । अस्मिन् ग्रामे सन्ति ।

अत्र बहुव्रीहिरेव भवति-

**[वीरपुरुषको ग्रामः]** वीरपुरुषा अत्र सन्ति = वीरपुरुषको ग्रामः । 'शेषाद् वा' (७।३।१७५) कच्प्र० → क ।

संज्ञायास्तु भवत्येव-

**[गौरखरवदरण्यम्]** गौरश्चासौ खरश्च = गौरखरः । गौरखरोऽत्रास्ति = गौरखरवत् । अनेन मतुप्र० → मत् । 'मावर्णान्तोपान्तापञ्चमवर्गान् मतोर्मो वः' (२।१।९४) म० → व० । प्रथमा सि । 'अनतो लुप्' (१।४।५९) लुप् । अरण्य प्रथमा सि । 'अतः स्यमोऽम्' (१।४।५७) अम् ।

**[कृष्णसर्पवान् वल्मीकः]** कृष्णश्चासौ सर्पश्च = कृष्णसर्पः । कृष्णसर्पोऽत्रास्ति = कृष्णसर्पवान् वल्मीकः । अनेन मतुप्र० → मत् । 'मावर्णान्तोपा०' (२।१।९४) म० → वत्वम् । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'अभ्वादेरत्वसः सौ' (१।४।९०) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् ।

**[लोहितशालिमान् ग्रामः]** लोहितशालिर्विद्यतेऽस्मिन् = लोहितशालिमान् ग्रामः । अनेन मतुप्र० → मत् । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'अभ्वादे०' (१।४।९०) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् ।

**[ऐकगविकः]** एका चासौ गौश्च = एकगवः । 'गोस्तत्पुरुषात्' (७।३।१०५) अट्समासान्तः → अ । 'अस्वयम्भुवो०' (७।४।७०) अव् । स अत्रास्ति = ऐकगविकः । 'एकादेः कर्मधारयात्' (७।२।५८) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ ।

**[सर्वधनी]** सर्वं च तद् धनं च = सर्वधनम्, तदत्रास्ति = सर्वधनी । 'सर्वादेरिन्' (७।२।५९) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'इन्-हन्०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

तथा गुणे गुणिनि च ये गुणशब्दा वर्त्तन्ते तेभ्यो मत्वर्थीयो न भवति ।

ये तु गुणमात्रे एव वर्त्तन्ते तेभ्यो भवत्येव-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ रूपवान् ]** रूपं विद्यतेऽस्यासौ = रूपवान् । अनेन मतुप्र० → मत् । 'मावर्णान्तोपा०' (२।१।९४) म० → व० । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । शेषं स्पष्टम् ।

**[ रसवान् ]** रसो विद्यतेऽस्य = रसवान् । अनेन मतुप्र० → मत् । 'मावर्णान्तोपा०' (२।१।९४) म० → व० । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । शेषं स्पष्टम् ।

**[ शौक्ल्यवान् ]** शौक्ल्यं विद्यतेऽस्यासौ = शौक्ल्यवान् । अनेन मतुप्र० → मत् । 'मावर्णान्तोपा०' (२।१।९४) म० → व० । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । शेषं स्पष्टम् ।

**[ काष्ण्र्यवान् ]** काष्ण्र्यं विद्यतेऽस्यासौ = काष्ण्र्यवान् । अनेन मतुप्र० → मत् । 'मावर्णान्तोपा०' (२।१।९४) म० → व० । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । शेषं स्पष्टम् ॥छ॥

## आ यात् ॥ ७।२।२ ॥

**[ आ ]** आ प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[ यात् ]** य पञ्चमी ङसि ।

**[ कुमारीमान् ]** कुमारी अस्यास्ति = कुमारीमान् । 'नावादेरिकः' (७।२।३) इत्यनेन इकप्राप्तौ अनेन मतुप्र० → मत् ।

**[ व्रीहिमान् ]** व्रीहिरस्यास्ति = व्रीहिमान् । 'व्रीह्यादिभ्यस्तौ' (७।२।५) इत्यस्य प्राप्तौ अनेन मतुप्र० → मत् ।

**[ दण्डवान् ]** दण्डोऽस्यास्ति = दण्डवान् । 'अतोऽनेकस्वरात्' (७।२।६) इत्यस्य प्राप्तौ अनेन मतुप्र० → मत् ।

**[ अशीर्षवान् ]** न विद्यते शिरोऽस्य अशिराः, सोऽस्यास्ति = अशीर्षवान् । 'अशिरसोऽशीर्षश्च' (७।२।७) इत्यनेन इन्प्राप्तौ अनेन मतुप्र० → मत्-अशिरसो अशीर्ष आदेशः ।

**[ वातवान् ]** वातोऽस्यास्ति = वातवान् । 'बल-वात-दन्त-ललाटादूलः' (७।२।१९) इत्यस्य प्राप्तौ अनेन मतुप्र० → मत् ।

**[ चूडावान् ]** चूडा अस्यास्ति = चूडावान् । 'प्राण्यङ्गादातो लः' (७।२।२०)-'शिखादिभ्य इन्' (७।२।४) अनयोः प्राप्तौ अनेन मतुप्र० → मत् ।

**[ सिध्मवान् ]** सिध्मान्यस्य सन्ति = सिध्मवान् । 'सिध्मादि-क्षुद्रजन्तु-रुग्भ्यः' (७।२।२१) इत्यस्य प्राप्तौ अनेन मतुप्र० → मत् ।

**[ गोमान् ]** गौरस्यास्ति = गोमान् । 'गोः' (७।२।५०) इत्यनेन सूत्रेण मिन्प्राप्तौ अनेन मतुप्र० → मत् ।

**[ गुणवान् ]** गुणा विद्यन्तेऽस्य सः = गुणवान् । 'गुणादिभ्यो यः' (७।२।५३) इत्यस्य प्राप्तौ अनेन मतुप्र० → मत् ।

आ यादित्यभिविधावाङ् । अपवादैर्बाधा मा भूदिति वचनम् । तेन यथाभिधानमिति कोऽर्थः ? 'काला-जटा-घाटात् क्षेपे' (७।२।२३) इत्यादिभिः कैश्चित्सूत्रैरर्थविशेषे प्रत्ययोऽभिहितः, स च मतुना न गम्यते इति तदर्थप्रतिपादनाय- तत्सूत्रविहित एव प्रत्ययो भवति, न तु मतुरित्याशयः ॥छ॥

## नावादेरिकः ॥ ७।२।३ ॥

**[ नावादेः ]** नौरादिर्यस्य सः = नावादिः, तस्मात् ।

**[ इकः ]** इक प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

[ **नाविकः, नौमान्** ] नौरस्यास्मिन् वास्तीति नाविकः, नौमान् । अनेन इक-मतुप्र० → मत् ।

[ **कुमारिकः, कुमारीमान्** ] कुमारी अस्यास्मिन् वास्तीति कुमारिकः, कुमारीमान् । अनेन इक-मतुप्र० → मत् । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् ।

[ **यवखदिकः, यवखदावान्** ] खदनं = खदा । 'भिदादयः' (५।३।१०८) अङ्प्र० → अ । 'आत्' (२।४।१८) आप्प्र० → अ । यवानां खदा-यवखदा । यवखदा अस्यास्ति = यवखदिकः, यवखदावान् । अनेन इक-मतुप्र० → मत् । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । 'मावर्णान्तोपान्ता०' (२।१।९४) म० → वत्वम् ।

[ **नावी** ] नौरस्यास्मिन् वास्तीति नावी । मतान्तरे 'शिखादिभ्य इन्' (७।२।४) इन्प्र० । प्रथमा सि । 'इन्-हन्-पूषा०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

[ **कुमारी** ] कुमारी अस्यास्मिन् = कुमारी । मतान्तरे 'शिखादिभ्य इन्' (७।२।४) इन्प्र० । प्रथमा सि । 'इन्-हन्०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ॥छा॥

## शिखादिभ्य इन् ॥ ७।२।४ ॥

[ **शिखादिभ्यः** ] शिखा आदिर्येषां ते = शिखादयः, तेभ्यः = शिखादिभ्यः । पञ्चमी भ्यस् ।

[ **इन्** ] इन् प्रथमा सि ।

[ **शिखी, शिखावान्** ] शिखा अस्यास्ति = शिखी, शिखावान् । अनेन इन्-मतुप्र० → मत् । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

[ **माली, मालावान्** ] माला अस्यास्ति = माली, मालावान् । अनेन इन्-मतुप्र० → मत् । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ॥छा॥

## व्रीह्यादिभ्यस्तौ ॥ ७।२।५ ॥

[ **व्रीह्यादिभ्यः** ] व्रीहिरादिर्येषां ते = व्रीह्यादयः, तेभ्यः = व्रीह्यादिभ्यः । पञ्चमी भ्यस् ।

[ **तौ** ] तद् प्रथमा औ । 'आ द्वेरः' (२।१।४२) द्० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् । 'ऐदौत् सन्ध्यक्षरैः' (१।२।१२) औ ।

[ **व्रीहिकः, व्रीही, व्रीहिमान्** ] व्रीह्योऽस्यास्मिन् वा सन्ति = व्रीहिकः, व्रीही, व्रीहिमान् । अनेन इक-इन्-मतुप्र० → मत् । 'अवर्णेवर्णस्य' (७।४।६८) इवर्णस्य लुक् ।

[ **मायिकः, मायी, मायावान्, मायावी** ] माया अस्यास्मिन् वा अस्ति = मायिकः, मायी, मायावान् । अनेन इक-इन्-मतुप्र० → मत् । एवम्-मायावी । 'अस् तपो-माया-मेधा-स्रजो विन्' (७।२।४७) विन्प्र० ॥छा॥

## अतोऽनेकस्वरात् ॥ ७।२।६ ॥

[ **अतः** ] अत् पञ्चमी ङसि ।

[ **अनेकस्वरात्** ] न विद्यते एकस्वरो यस्य सः = अनेकस्वरः । 'अन् स्वरे' (३।२।१२९) अन् । तस्मात् ।

[ **दण्डिकः, दण्डी, दण्डवान्** ] दण्डोऽस्यास्ति = दण्डिकः, दण्डी, दण्डवान् । अनेन इक-इन्-मतुप्र० → मत् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'मावर्णान्तो०' (२।१।९४) म० → वत्वम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ छत्रिकः, छत्री, छत्रवान् ]** छत्रमस्यास्ति = छत्रिकः, छत्री, छत्रवान् । अनेन इक-इन्-मतुप्र० → मत् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'मावर्णान्तोपान्ता०' (२।१।९४) म० → वत्वम् ।

**[ खट्वावान् ]** खट्वा अस्यास्ति = खट्वावान् । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् ।

**[ मालावान् ]** माला अस्यास्ति = मालावान् । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् ।

**[ खवान् ]** खमस्यास्ति = खवान् ।

**[ स्ववान् ]** स्वं-द्रव्यमस्यास्ति = स्ववान् ।

**[ राप्यवान् ]** 'रप जल्पे' (व्यक्ते वचने) (३३५) रप् । रप्यते = राप्यम् । 'आसु-यु-वपि-रपि-लपि-त्रपि-डिपि-दभि-चम्यानमः' (५।१।२०) घ्यण्प्र० → य । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । राप्यमस्यास्ति = राप्यवान् ।

**[ लाप्यवान् ]** 'लप जल्पे' (व्यक्ते वचने) (३३६) लप् । लप्यते = लाप्यम् । 'आसु-यु-वपि-रपि-लपि०' (५।१।२०) घ्यण्प्र० → य । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । लाप्यमस्यास्ति = लाप्यवान् ।

**[ लव्यवान् ]** 'लूग्श् छेदने' (१५१९) लू । लूयते = लव्यम् । 'य एच्चातः' (५।१।२८) यप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'य्यक्ये' (१।२।२५) अव् । लव्यमस्यास्ति = लव्यवान् ।

**[ हव्यवान् ]** 'हुंक् दाना-ऽदनयोः' (११३०) हु । हूयते = हव्यम् । 'य एच्चातः' (५।१।२८) यप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'य्यक्ये' (१।२।२५) अव् । हव्यमस्यास्ति = हव्यवान् ।

**[ कृत्यवान् ]** 'डुकृंग् करणे' (८८८) कृ । क्रियत इति कृत्यम् । 'कृ-वृषि-मृजि-शंसि-गुहि-दुहि-जपो वा' (५।१।४२) क्यप्प्र० → य । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः । कृत्यमस्यास्ति = कृत्यवान् ।

**[ भृत्यवान् ]** 'टुडुभृंग्क् पोषणे च' (११४०) भृ । भ्रियत इति भृत्यम् । 'भृगोऽसंज्ञायाम्' (५।१।४५) क्यप्प्र० → य । 'ह्रस्वस्य०' (४।४।११३) तोऽन्तः । भृत्योऽस्यास्ति = भृत्यवान् ।

**[ कारकवान् ]** 'डुकृंग् करणे' (८८८) कृ । करोतीति कारकः । 'णक-तृचौ' (५।१।४८) णकप्र० → अक । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् । कारकोऽस्यास्ति = कारकवान् ।

**[ हारकवान् ]** 'हृंग् हरणे' (८८५) हृ । हरतीति हारकः । 'णक-तृचौ' (५।१।४८) णकप्र० → अक । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् । हारकोऽस्यास्ति = हारकवान् ।

**[ कुम्भकारवान् ]** कुम्भं करोतीति कुम्भकारः । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् । कुम्भकारोऽस्यास्ति = कुम्भकारवान् ।

**[ धान्यमायवान् ]** धान्य 'मांक् माने' (१०७३) मा । 'मांङ्क् मानशब्दयोः' (११३७) मा । 'मेङ् प्रतिदाने' (६५०३) मे । धान्यं माति मिमीते मयते वा = धान्यमायः । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'आत ऐः कृञ्ञौ' (४।३।५३) आ० → ऐ० । 'एदैतोऽयाय्' (१।२।२३) आय् । धान्यमायोऽस्यास्ति = धान्यमायवान् ।

**[ हिंस्रवान् ]** 'हिसु हिंसायाम्' (१४९४) हिस् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) नोऽन्तः । हिनस्तीति हिंस्रः । 'रम्यजस-हिंस-दीप-कम्प-कम-नमो रः' (५।२।७९) रप्र० । हिंस्रोऽस्यास्ति = हिंस्रवान् ।

**[ ईश्वरवान् ]** 'ईशिक् ऐश्वर्ये' (१११६) ईश् । ईष्टे = ईश्वरः । 'स्थेश-भास-पिस-कसो वरः' (५।२।८१) वरप्र० । 'ईश्वरोऽस्यास्ति = ईश्वरवान् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ पाकवान् ]** 'डुपचींष् पाके' (८९२) पच् । पचनं = पाकः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'क्तेऽनिट-श्च-जोः क-गौ घिति' (४।१।१११) च० → क० । पाकोऽस्यास्ति = पाकवान् ।

**[ स्नेहवान् ]** स्नेहोऽस्यास्ति = स्नेहवान् । सर्वत्र 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् । 'मावर्णान्तो०' (२।१।९४) म० → व० ।

**[ कार्यिकः, कार्यी ]** कार्यमस्यास्ति = कार्यिकः, कार्यी । अनेन इक-इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ हार्यिकः, हार्यी ]** हार्यमस्यास्ति = हार्यिकः, हार्यी । अनेन इक-इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ गृहिकः, गृही ]** 'ग्रहीश् उपादाने' (१५१७) ग्रह् । गृह्णाति सर्वमिति गृहम् । 'गेहे ग्रहः' (५।१।५५) कप्र० → अ । 'ग्रह-व्रस्च-भ्रस्ज-प्रच्छः' (४।१।८४) य्वृत् ग्र० → गृ० । गृहमस्यास्ति = गृहिकः, गृही । अनेन इक-इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ दात्रिकः, दात्री ]** दैंव् शोधने' (२९) दै । 'आत् सन्ध्यक्षरस्य' (४।२।१) दा । दायते-क्षेत्रं शुध्यते = दात्रम् । 'नी-दाव्-शसू-यु-युज-स्तु-तुद-सि-सिच-मिह-पत-पा-नहस्त्रट्' (५।२।८८) त्रट्प्र० → त्र । दात्रमस्यास्ति = दात्रिकः, दात्री । अनेन इक-इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ पोत्रिकः, पोत्री ]** 'पूग्श् पवने' (१५१८) पू । पूयते इति पोत्रम् । 'हल-क्रोडाऽऽस्ये पुवः' (५।२।८९) त्रट्प्र० → त्र । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । हलसुकरयोर्मुखं = पोत्रम् । पोत्रमस्यास्ति = पोत्रिकः, पोत्री । अनेन इक-इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ भोगिकः, भोगी ]** 'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । भोजनं = भोगः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'क्तेऽनिटश्च-जोः०' (४।१।१११) ज० → ग० । भोगोऽस्यास्ति = भोगिकः, भोगी । अनेन इक-इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ तरिकः, तरी ]** 'तॄ प्लवन-तरणयोः' (२७) तॄ । तरतीति तरः । 'युवर्ण-वृ-दृ-वश-रण-गमृद्-ग्रहः' (५।३।२८) अल्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । तरोऽस्यास्ति = तरिकः, तरी । अनेन इक-इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ विजयिकः, विजयी ]** 'जिं अभिभवे' (८) जि, विपूर्व० । विजयनं = विजयः । 'युवर्ण-वृ-दृ०' (५।३।२८) अल्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । विजयोऽस्यास्ति = विजयिकः, विजयी । अनेन इक-इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ संयमिकः, संयमी ]** 'यमूं उपरमे' (३८६) यम्, सम्पूर्व० । संयमनं = संयमः । 'सं-नि-व्युपाद् यमः' (५।३।२५) अल्प्र० → अ । संयमोऽस्यास्ति संयमिकः, संयमी । अनेन इक-इन्प्र० । 'अवर्णेवर्णस्य' (७।४।८६) अलुक् ।

**[ स्थानिकः, स्थानी ]** स्थानमस्यास्ति = स्थानिकः, स्थानी । अनेन इक-इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

जातिशब्देभ्यो न भवतः -

**[ व्याघ्रवान् ]** व्याघ्रोऽत्रास्ति = व्याघ्रवान् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ सिंहवान् ]** सिंहोऽत्रास्ति = सिंहवान् ।

**[ वृक्षवान् ]** वृक्षोऽत्रास्ति = वृक्षवान् ।

**[ प्लक्षवान् ]** प्लक्षोऽत्रास्ति = प्लक्षवान् ।

**[ द्रव्यवान् ]** द्रुं (११) - दुं (१२) - 'द्रुं गतौ' (१३) द्रु । द्रोस्तुल्यः = द्रव्यम् । 'द्रोर्भव्ये' (७।१।११५) यप्र० । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । द्रव्यं विद्यतेऽस्य = द्रव्यवान् ।

**[ क्रव्यवान् ]** क्रव्यं-मांसं विद्यतेऽस्य = क्रव्यवान् ।

**[ सस्यवान् ]** सस्यं-धान्यं विद्यतेऽस्य = सस्यवान् ।

**[ माल्यवान् ]** माल्यं विद्यतेऽस्य = माल्यवान् ।

**[ पुण्यवान् ]** पुण्यं विद्यतेऽस्य = पुण्यवान् ।

**[ सत्यवान् ]** सत्यं विद्यतेऽस्य = सत्यवान् ।

**[ धनवान् ]** धनं विद्यतेऽस्य = धनवान् । सर्वत्र 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् । 'मावर्णान्तो०' (२।१।९४) म० → व० ।

व्याघ्रादयो लोकप्रसिद्धा जातिशब्दाः, द्रव्यादयस्तु सुशास्त्रप्रसिद्धा जातिशब्दा इति दर्शयितुं तथेत्युक्तम् । क्वचिद्भवतः -

**[ तण्डुलिकः, तण्डुली ]** तण्डुलाः सन्त्यस्यां = तण्डुलिकः, तण्डुली । अनेन इक-इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ कर्पटिकः, कर्पटी ]** कर्पटोऽस्यास्ति = कर्पटिकः, कर्पटी । अनेन इक-इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ धनिकः, धनी ]** धनमस्यास्ति = धनिकः, धनी । अनेन इक-इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

सप्तम्यर्थे च न भवतः -

**[ दण्डवद् गृहम् ]** दण्डोऽस्मिन्नस्ति = दण्डवद् गृहम् । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् ।

**[ वीरवान् ग्रामः ]** वीरोऽत्रास्ति = वीरवान् ग्रामः । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् ।

क्वचित् सप्तम्यर्थेऽपि भवतः -

**[ खलिनी भूमिः ]** खलानि अस्यां सन्ति = खलिनी । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'स्त्रियां नृतोऽस्वस्रादेर्ङीः' (२।४।१) ङी ।

**[ शाद्वलिनी भूमिः ]** शाद्वलोऽत्रास्ति = शाद्वलिनी भूमिः । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'स्त्रियां नृतोऽस्वस्रादेर्ङीः' (२।४।१) ङी ।

क्वचिद्भवतः -

**[ रसिको नटः ]** रसोऽत्रास्ति = रसिको नटः । अनेन इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ रसी इक्षुः ]** रसोऽत्रास्ति = रसी इक्षुः । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'स्त्रियां नृतो०' (२।४।१) ङी ।

**[ रूपिको दारकः ]** रूपमत्रास्ति = रूपिको दारकः । अनेन इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ रूपिणी कन्या ]** रूपमत्रास्ति = रूपिणी कन्या । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'स्त्रियां नृतोऽस्व०' (२।४।१) ङी ।

**[ रूपिष्ववधिः ]** रूपमेष्वस्ति = रूपीणि, तेषु । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । रूपिद्रव्येषु अवधिज्ञानस्य प्रवृत्तिरित्यर्थः ।

**[ रूपिसमवायाच्चाक्षुषाणि ]** रूपिसमवायाच्चाक्षुषाणि । चक्षुषा गृह्यन्ते = चाक्षुषाणि । 'क्वचित्' (६।२।१४५) इत्यनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः आ । 'नाम्यन्तस्था-कवर्गात्०' (२।३।१५) षत्वम् ।

**[ स्पर्शिको वायुः ]** स्पर्शोऽस्यास्ति = स्पर्शिको वायुः । अनेन इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ गन्धिकः, गन्धी ]** गन्धोऽस्यास्ति = गन्धिकः, गन्धी । अनेन इक - इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

यदा तु कस्यचिद्रूपं रस इत्यादि नाम भवति तदा भवत्येव ॥छ॥

## अशिरसोऽशीर्षश्च ॥ ७।२।७ ॥

**[ अशिरसः ]** अशिरस् पञ्चमी ङसि ।

**[ अशीर्षः ]** अशीर्ष प्रथमा सि ।

**[ च ]** च प्रथमा सि ।

**[ अशीर्षिकः, अशीर्षी, अशीर्षवान् ]** न शिरस् । नास्ति शिरोऽस्य = अशीर्षिकः, अशीर्षी, अशीर्षवान् । अनेन इक-इन्-मतुप्र० → मत् - अशिरस् शब्दस्य अशीर्षदेशश्च । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

इकेनोः 'शीर्षः स्वरे तद्धिते' (३।२।१०३) इति शीर्षादेशो विद्यत एव, मतौ त्वशिरसोऽशीर्षभावोऽनेन विधीयते ॥छ॥

## अर्था-ऽर्थान्ताद् भावात् ॥ ७।२।८ ॥

**[ अर्थाऽर्थान्तात् ]** अर्थश्च अर्थान्तश्च = अर्थाऽर्थान्तम्, तस्मात् ।

**[ भावात् ]** भाव पञ्चमी ङसि ।

नियमार्थमिदम् । उभयथा चायं नियमो वाक्यभेदेन क्रियते, भाववाचिन एवैतौ प्रत्ययौ भवतः, भाववाचिनश्चैतावेवेकेनौ भवतः अनुक्रमेण प्रत्ययनियमः-प्रकृतिनियमः ।

**[ अर्थिकः, अर्थी ]** 'अर्थणि उपयाचने' (१९३१) अर्थ । 'युजादेर्नवा' (३।४।१८) विकल्पत्वात् णिग् । अर्थनमर्थः । 'युवर्ण-वृ-दृ-वश-रण-गमृद्-ग्रहः' (५।३।२८) अल्प्र० → अ । 'णेरनिटि' (४।३।८३) णिलुक् । अर्थोऽस्यास्तीति अर्थिकः, अर्थी । अनेन इक-इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ प्रत्यर्थिकः, प्रत्यर्थी ]** प्रतीपमर्थनं = प्रत्यर्थः, सोऽस्यास्तीति प्रत्यर्थिकः, प्रत्यर्थी । शत्रुरित्यर्थः । अनेन इक-इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इकेनावेवेति नियमादतो मतुर्न भवति । भावादेवेति नियमादतो द्रव्यवाचिन इकेनौ न भवतः –

**[ अर्थवान् ]** अर्थ्यतेऽसौ अर्थः । 'युवर्ण-वृ-दृ०' (५।३।२८) अल्प्र० → अ । अथवा 'ऋक् गतौ' (११३५) ऋ । अर्यत-उपार्यते जनैरसाविति अर्थः । 'कमि-प्रु-गार्तिभ्यस्थः' (उणा० २२५) थप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । अर्थो हिरण्यादिरस्यास्ति = अर्थवान् । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् । 'मावर्णान्तोपान्तापञ्च०' (२।१।९४) म० → वत्वम् ॥छ॥

## व्रीह्यर्थ-तुन्दादेरिलश्च ॥ ७।२।९ ॥

**[ व्रीह्यर्थतुन्दादेः ]** व्रीह्यर्थश्च तुन्दादिश्च = व्रीह्यर्थतुन्दादि, तस्मात् ।

**[ इलः ]** इल प्रथमा सि ।

**[ च ]** च प्रथमा सि ।

चकारादिकेनौ ।

**[ कलमिलः, कलमिकः, कलमी, कलमवान् ]** कलम । कलमा अस्यास्मिन् वा सन्ति = कलमिलः, कलमिकः, कलमी । अनेन इल-इक-इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम्-कलमवान् । 'आ यात्' (७।२।२) मतुप्र० → मत् । 'मावर्णान्तोपान्ता०' (२।१।९४) म० → वत्वम् ।

**[ शालिलः, शालिकः, शाली, शालिमान् ]** शालि । शालयो अस्यास्मिन् वा सन्ति = शालिलः, शालिकः, शाली । अनेन इल-इक-इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । एवम्-शालिमान् । 'आ यात्' (७।२।२) मतुप्र० → मत् ।

व्रीहिशब्दोऽपि व्रीह्यर्थो भवति, किन्तु तस्य पूर्वसूत्रोपादानादिलो न भवति । भावे हि तत्रोपादानमनर्थकं स्यात् ।

**[ तुन्दिलः, तुन्दिकः, तुन्दी, तुन्दवान् ]** तुन्दमस्यास्मिन् वास्ति = तुन्दिलः, तुन्दिकः, तुन्दी । अनेन इल-इक-इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम्-तुन्दवान् । 'आ यात्' (७।२।२) मतुप्र० → मत् ।

**[ उदरिलः, उदरिकः, उदरी, उदरवान् ]** उदरमस्यास्मिन् वास्ति = उदरिलः, उदरिकः, उदरी । अनेन इल-इक-इन्प्र० । एवम्-उदरवान् । 'आ यात्' (७।२।२) मतुप्र० → मत् ।

गणोऽत्र ॥छ॥

## स्वाङ्गाद् विवृद्धात् ते ॥ ७।२।१० ॥

**[ स्वाङ्गात् ]** स्वस्याङ्गं = स्वाङ्गम्, तस्मात् ।

**[ विवृद्धात् ]** विशेषेण वृद्धं = विवृद्धम्, तस्मात् ।

**[ ते ]** तद् प्रथमा जस् । 'आद्वेरः' (२।१।४१) द्० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् । 'जस इः' (१।४।९) इ । 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) ए ।

**[ कर्णिलः, कर्णिकः, कर्णी, कर्णवान् ]** विवृद्धे-महान्तौ कर्णावस्य स्तः = कर्णिलः, कर्णिकः, कर्णी, कर्णवान् । अनेन इल-इक-इन्-मतुप्र० → मत् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ ओष्ठिलः, ओष्ठिकः, ओष्ठी, ओष्ठवान् ]** विवृद्धौ-महान्तावाष्ठावस्य स्तः = ओष्ठिलः, ओष्ठिकः, ओष्ठी, ओष्ठवान् । अनेन इल-इक-इन्-मतुप्र० → मत् ॥छ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

वृन्दादारकः ॥ ७।२।११ ॥

**[ वृन्दात् ]** वृन्द पञ्चमी ङसि ।

**[ आरकः ]** आरक प्रथमा सि ।

**[ वृन्दारकः, वृन्दवान्, वृन्दी ]** वृन्दमस्यास्ति = वृन्दारकः । अनेन आकप्र० । एवम्-वृन्दवान् । 'आ यात्' (७।२।२) मतुप्र० → मत् । एवम्-वृन्दी । 'शिखादिभ्य इन्' (७।२।४) इन्प्र० । प्रथमा सि । 'इन्-हन्-पूषाऽर्यम्णः शिस्योः' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ॥छ॥

शृङ्गात् ॥ ७।२।१२ ॥

**[ शृङ्गात् ]** शृङ्ग पञ्चमी ङसि ।

**[ शृङ्गारकः, शृङ्गवान्, शृङ्गी ]** शृङ्गमस्यास्ति = शृङ्गारकः । अनेन आरकप्र० । एवम्-शृङ्गवान् । अनेन मतुप्र० → मत् । एवम्-शृङ्गी । 'शिखादिभ्य इन्' (७।२।४) इन्प्र० । प्रथमा सि । 'इन्-हन्०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ॥छ॥

फल-बर्हाच्चेनः ॥ ७।२।१३ ॥

**[ फलबर्हात् ]** फलं च बर्हं च = फलबर्हम्, तस्मात् ।

**[ च ]** च प्रथमा सि ।

**[ इनः ]** इन प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ फलिनः, फलवान्, फली ]** फलमस्यास्ति = फलिनः, फलवान् । अनेन इन-मतुप्र० → मत् । एवम्-फली । 'शिखादिभ्य इन्' (७।२।४) इन्प्र० ।

**[ बर्हिणः, बर्हवान्, बर्ही ]** बर्हाणि अस्य सन्ति = बर्हिणः, बर्हवान् । अनेन इनप्र० । 'आ यात्' (७।२।२) इत्यधिकारात् अनेनैव मतुप्र० → मत् । एवम्-बर्ही । शिखिनां बर्हभारेषु केशानिति दर्शनात् 'शिखादिभ्य इन्' (७।२।४) इन्प्र० ।

**[ शृङ्गिणः, शृङ्गवान् ]** शृङ्गमस्यास्ति = शृङ्गिणः, शृङ्गवान् । अनेन इन-मतुप्र० → मत् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'र-षृवर्णान्नो ण०' (२।३।६३) णत्वम् ॥छ॥

मलादीमसश्च ॥ ७।२।१४ ॥

**[ मलात् ]** मल पञ्चमी ङसि ।

**[ ईमसश्च ]** ईमस प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । च प्रथमा सि ।

**[ मलीमसः, मलिनः, मलवान् ]** मलमस्यास्ति = मलीमसः, मलिनः । अनेन ईमस-इनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम्-मलवान् । 'आ यात्' (७।२।२) इत्यधिकारात् अनेनैव मतुप्र० → मत् । 'मावर्णान्तोपान्ता०' (२।१।९४) म० → व० ॥छ॥

मरुत्-पर्वणस्तः ॥ ७।२।१५ ॥

**[ मरुत्पर्वणः ]** मरुच्च पर्वा च = मरुत्पर्व, तस्मात् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ तः ]** त प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ मरुत्तः, मरुत्वान् ]** मरुदस्यास्ति = मरुत्तः, मरुत्वान् । अनेन त-मतुप्र० → मत् । प्रथमा सि । 'मावर्णान्तोपान्ता०' (२।१।९४) म० → व० ।

**[ पर्वतः, पर्ववान् ]** पर्वन् । पर्वाणि सन्त्यस्यां = पर्वतः, पर्ववान् । अनेन त-मतुप्र० → मत् । प्रथमा सि । 'मावर्णान्तोपान्ता०' (२।१।९४) म० → व० ।।छा।

## वलि-वटि-तुण्डेर्भः ।। ७।२।१६ ।।

**[ वलिवटितुण्डेः ]** वलिश्च वटिश्च तुण्डिश्च = वलिवटितुण्डि, तस्मात् ।

**[ भः ]** भ प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ वलिभः, वलिनः, वलिमान् ]** वलिरस्यास्ति = वलिभः । अनेन भप्र० । एवम्-वलिनः । 'नोऽङ्गादेः' (७।२।२९) नप्र० । एवम्-वलिमान् । 'आ यात्' (७।२।२) मतुप्र० → मत् ।

**[ वटिभः ]** वटिरुन्नतनाभिरस्यास्ति = वटिभः । अनेन भप्र० ।

**[ तुण्डिभः, तुण्डिलः ]** तुण्डिः-प्रवृद्धा नाभिरस्यास्ति = तुण्डिभः । अनेन भप्र० । एवम्-तुण्डिलः । 'सिध्मादि-क्षुद्रजन्तु-रुग्भ्यः' (७।२।२१) लप्र० ।

एकदेशविकृतस्याऽनन्यत्वात् तुन्दिशब्दादपि भे **तुन्दिभ** इति क्षीरः ।।छा।

## ऊर्णा-ऽहं-शुभमो युस् ।। ७।२।१७ ।।

**[ ऊर्णाऽहंशुभमः ]** ऊर्णा च अहं च शुभं च = ऊर्णाऽहंशुभम्, तस्मात् ।

**[ युस् ]** युस् प्रथमा सि । 'दीर्घङ्याब्-व्यञ्जनात् सेः' (१।४।४५) सिलुक् ।

**[ ऊर्णायुः उरभ्रः ]** ऊर्णा अस्यास्ति = ऊर्णायुः उरभ्रः । अनेन युस्प्र० । सकारोऽनुबन्धार्थः ।

**[ अहंयुः अहंकारी ]** अहमस्यास्ति = अहंयुः अहंकारी । अनेन युस्प्र० ।

**[ शुभंयुः कल्याणवृद्धिः ]** शुभमस्यास्ति = शुभंयुः । अनेन युस्प्र० । कल्याणवृद्धिः ।।छा।

## कं-शंभ्यां युस्-ति-यस्-तु-त-व-भम् ।। ७।२।१८ ।।

**[ कंशंभ्याम् ]** कं च शं च = कंशमौ, ताभ्याम् = कंशंभ्याम् । पञ्चमी भ्याम् ।

**[ युस्तियस्तुतवभम् ]** युस् च तिश्च यस् च तुश्च तश्च वश्च भश्च = युस्तियस्तुतवभम् ।

**[ कंयुः, कन्तिः, कंयः, कन्तुः, कन्तः, कंवः, कम्भः ]** कमस्यास्ति = कंयुः, कन्तिः, कंयः, कन्तुः, कन्तः, कंवः, कम्भः । अनेन युस्-ति-यस्-तु-त-व-भप्र० । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ शंयुः, शन्तिः, शंयः, शन्तुः, शन्तः, शंवः, शम्भः ]** शमस्यास्ति = शंयुः, शन्तिः, शंयः, शन्तुः, शन्तः, शंवः, शम्भः । अनेन युस्-ति-यस्-तु-त-व-भप्र० । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

पूर्वत्र सूत्रे इह च युस्-यसोः सकारो 'नाम सिदय्व्यञ्जने' (१।१।२१) इति पदत्वार्थः, तेन 'तौ मुमो व्यञ्जने स्वौ' (१।३।१४) इत्यनुस्वाराऽनुनासिकौ **कंयुः, कय्यँुः, शंयः, शय्यँः** यतश्चतुष्कं भणितम्-''य-ल-वानामनुनासिकोऽननुनासिकश्च द्वौ भेदौ परस्परं स्वौ'' 'तुल्यस्थानाऽऽस्यप्रयत्नः स्वः' (१।१।१७) इत्यस्मिन् सूत्रे ।।छा।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## बल-वात-दन्त-ललाटादूलः ॥ ७।२।१९ ॥

**[ बलवातदन्तललाटात् ]** बलश्च वातश्च दन्तश्च ललाटश्च = बलवातदन्तललाटम्, तस्मात् ।

**[ ऊलः ]** ऊल प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ बलूलः, बलवान् ]** बलमस्यास्ति = बलूलः । अनेन ऊलप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम्-बलवान् । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् । 'मावर्णान्तोपान्ता०' (२।१।९४) म० → व० ।

**[ वातूलः, वातवान् ]** वातोऽस्यास्ति = वातूलः । अनेन ऊलप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम्-वातवान् । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् । 'मावर्णान्तोपान्ता०' (२।१।९४) म० → व० ।

**[ दन्तूलः, दन्तवान् ]** दन्ता अस्य सन्ति = दन्तूलः । अनेन ऊलप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम्-दन्तवान् । तदस्याऽस्त्य०' (७।२।१) मतुप्र० → मत् । 'मावर्णान्तोपान्ता०' (२।१।९४) म० → व० ।

**[ ललाटूलः, ललाटवान् ]** ललाटमस्यास्ति = ललाटूलः । अनेन ऊलप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम्-ललाटवान् । तदस्याऽस्त्य०' (७।२।१) मतुप्र० → मत् । 'मावर्णान्तोपान्ताञ्चम०' (२।१।९४) म० → व० ।

## प्राण्यङ्गादातो लः ॥ ७।२।२० ॥

**[ प्राण्यङ्गात् ]** प्राण्यङ्ग पञ्चमी ङसि ।

**[ आतः ]** आत् पञ्चमी ङसि ।

**[ लः ]** ल प्रथमा सि ।

चूडा-शिखाभ्यां चूलायां शिरस्यपि वर्त्तमानाभ्यां प्राण्यङ्गत्वात् लः ।

**[ चूडालः, चूडावान् ]** चूडा अस्यास्ति = चूडालः । अनेन लप्र० । एवम्-चूडावान् । 'आ यात्' (७।२।२) इत्यधिकारात् अनेन मतुप्र० → मत् ।

**[ जङ्घालः, जङ्घावान् ]** जङ्घा अस्यास्ति = जङ्घालः । अनेन लप्र० । एवम्-जङ्घावान् । 'आ यात्' (७।२।२) इत्यधिकारात् अनेन मतुप्र० → मत् ।

**[ शिखालः, शिखावान् ]** शिखा अस्याऽस्ति = शिखालः । अनेन लप्र० । एवम्-शिखावान् । 'आ यात्' (७।२।२) इत्यधिकारात् अनेन मतुप्र० → मत् ।

**[ जङ्घावान् प्रासादः ]** जङ्घा अस्यास्ति = जङ्घावान् प्रासादः । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् ।

**[ शिखावान् प्रदीपः ]** शिखा अस्यास्ति = शिखावान् प्रदीपः । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् ।

**[ इच्छावान् ]** 'इषत् इच्छायाम्' (१४१९) इष् । इष्यते-अन्विष्यतेऽनयेति । 'मृगयेच्छा०' (५।३।१०१) इच्छा निपात्यते । इच्छा अस्यास्ति = इच्छावान् । 'तदस्याऽस्त्य०' (७।३।२) मतुप्र० → मत् ।

**[ वासनावान् ]** वासना अस्यास्ति = वासनावान् । 'तदस्याऽस्त्य०' (७।२।१) मतुप्र० → मत् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ कर्णिकाल: ]** कर्णिका अस्यास्ति = कर्णिकाल: । मतान्तरेऽनेन लप्र० । कर्णिकाशब्द: प्राण्यङ्गस्यैव वाचक इत्याहु: ।

**[ हस्तवान् ]** हस्तौ विद्य(द्ये)तेऽस्य = हस्तवान् । 'तदस्याऽस्त्यस्मिन्निति मतु:' (७।२।१) मतुप्र० → मत् । 'मावर्णान्तोपान्तापञ्चम०' (२।१।९४) म० → व० ।

**[ पादवान् ]** पादौ विद्यतेऽस्य = पादवान् । 'तदस्याऽस्त्यस्मिन्निति मतु:' (७।२।१) मतुप्र० → मत् । 'मावर्णान्तोपान्ता०' (२।१।९४) म० → व० ।।छ।।

## सिध्मादि-क्षुद्रजन्तु-रुग्भ्य: ।। ७।२।२१ ।।

**[ सिध्मादिक्षुद्रजन्तुरुग्भ्य: ]** सिध्म आदिर्यस्य स: = सिध्मादि: । क्षुद्राश्च जन्तवश्च = क्षुद्रजन्तव: । सिध्मादिश्च क्षुद्रजन्तवश्च रुग् च = सिध्मादिक्षुद्रजन्तुरुज:, तेभ्य: = सिध्मादिक्षुद्रजन्तुरुग्भ्य: । पञ्चमी भ्यस् ।

**[ सिध्मल:, सिध्मवान् ]** सिध्मान्यस्य सन्ति = सिध्मल: । अनेन लप्र० । एवम्-सिध्मवान् । 'आ यात्' (७।२।२) इत्यधिकारात् अनेन मतुप्र० → मत् ।

**[ वर्ध्मल:, वर्ध्मवान्, वर्ध्मन: ]** वर्ध्मान्यस्य सन्ति = वर्ध्मल:, वर्ध्मवान् । अनेन लप्र० । अनेन मतुप्र० → मत् । एवम्-वर्ध्मन: । 'नोऽङ्गादे:' (७।२।२९) नप्र० । प्रथमा सि । 'सो रु:' (२।१।७२) स० → र० ।

**[ गडुल:, गडुमान् ]** गडुरस्यास्ति = गडुल: । अनेन लप्र० । एवम्-गडुमान् । अनेनैव मतुप्र० → मत् ।

**[ पार्ष्णील: ]** पार्ष्णी अस्यास्ति = पार्ष्णील: । अनेन लप्र० ।

**[ धमनील: ]** धमन्योऽस्य सन्ति = धमनील: । अनेन लप्र० ।

**[ यूकाल:, यूकावान् ]** यूका अस्य सन्ति = यूकाल:, यूकावान् । अनेन ल-मतुप्र० → मत् ।

**[ मक्षिकाल:, मक्षिकावान् ]** मक्षिका अस्य सन्ति = मक्षिकाल:, मक्षिकावान् । अनेन ल-मतुप्र० → मत् ।

आ नकुलात् क्षुद्रजन्तु: ।

रोगवाची - **[ मूर्च्छाल:, मूर्च्छावान् ]** मूर्च्छा अस्यास्ति = मूर्च्छाल:, मूर्च्छावान् । अनेन ल-मतुप्र० → मत् ।

**[ विचर्चिकाल:, विचर्चिकावान् ]** विचर्चिका अस्यास्ति = विचर्चिकाल:, विचर्चिकावान् । अनेन ल-मतुप्र० → मत् ।

**रुग्भ्य इति बहुवचनं स्वरूपविधिनिषेधार्थम् ।**

पा(पे)शं लाति, कुशं लातीत्येवमनयोर्व्युत्पत्तिरेव, एवं वत्सलांसलयोरपि । औणादिकौ वा मनोज्ञमेधाविवाचिनौ । सिध्मशब्देन दुर्भित्तकान्युच्यन्ते । सिध्म-वर्ध्मन्-कण्डूशब्दानां रुग्द्वारेणैव सिद्धे गणपाठे यथासंख्यं 'प्राणिस्थादस्वाङ्गाद् द्वन्द्व-रुग्-निन्द्यात्' (७।२।६०) इति बाधनार्थम् 'नोऽङ्गादे:' (७।२।२९) इति 'मध्यादिभ्यो र:' (७।२।२६) इति च समावेशार्थम् । अत्र गडुशब्दो गडुलत्वरूपे गुणे वर्त्तते इति रुग्द्वारेण न सिध्यति ।।छ।।

## प्रज्ञा-पर्णोदक-फेनाल्लेलौ ।। ७।२।२२ ।।

**[ प्रज्ञापर्णोदकफेनात् ]** प्रज्ञा च पर्णश्च उदकं च फेनश्च = प्रज्ञापर्णोदकफेनम्, तस्मात् ।

**[ लेलौ ]** लश्च इलश्च = लेलो ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ प्रज्ञालः, प्रज्ञिलः, प्रज्ञावान् ]** प्रज्ञा अस्यास्ति = प्रज्ञालः, प्रज्ञिलः । अनेन ल-इलप्र० । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । एवम्-प्रज्ञावान् । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'मावर्णान्तोपान्ता०' (२।१।९१) म० → व० । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'पदस्य' (२।१।८९) तलुक् ।

**[ पर्णलः, पर्णिलः, पर्णवान् ]** पर्णान्यस्य सन्ति = पर्णलः, पर्णिलः । अनेन ल-इलप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम्-पर्णवान् । 'तदस्याऽस्त्य०' (७।२।१) मतुप्र० → मत् ।

**[ उदकलः, उदकिलः, उदकवान् ]** उदकमत्रास्ति = उदकलः, उदकिलः । अनेन ल-इलप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम्-उदकवान् । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् ।

**[ फेनलः, फेनिलः, फेनवान् ]** फेनोऽत्रास्ति = फेनलः, फेनिलः । अनेन ल-इलप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम्-फेनवान् । 'तदस्या०' (७।२।१) मतुप्र० → मत् ॥छ॥

## काला-जटा-घाटात् क्षेपे ॥ ७।२।२३ ॥

**[ कालाजटाघाटात् ]** काला च जटा च घाटा च = कालाजटाघाटम् । 'क्लीबे' (२।४।९७) ह्रस्वः । तस्मात् ।

**[ क्षेपे ]** क्षेप सप्तमी ङि ।

**[ कालालः, कालिलः ]** काला अस्यास्ति = कालालः, कालिलः । अनेन ल-इलप्र० । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । पादस्नसाविशेषः ।

**[ जटालः, जटिलः ]** जटा अस्यास्ति = जटालः, जटिलः । अनेन ल-इलप्र० । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ घाटालः, घाटिलः ]** घाटा-कृकाटिका अस्यास्ति = घाटालः, घाटिलः । अनेन ल-इलप्र० । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

मतुना क्षेपो न गम्यते इति क्षेपे मतुर्न भवति ।

**[ कालावान् ]** काला अस्यास्ति = कालावान् । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् । शेषं स्पष्टम् ॥छ॥

## वाच आलाटौ ॥ ७।२।२४ ॥

**[ वाचः ]** वाच् पञ्चमी ङसि ।

**[ आलाटौ ]** आलश्च आटश्च = आलाटौ ।

**[ वाचालः, वाचाटः ]** नित्यं वागस्यास्ति = वाचालः, वाचाटः । अनेन आल-आटप्र० ।

**[ वाग्मी, वाग्वान् ]** प्रशस्ता वागस्यास्ति = वाग्मी, वाग्वान् । 'ग्मिन्' (७।२।२५) इत्यनेन ग्मिन्प्र० । 'तदस्याऽस्त्य०' (७।२।१) मतुप्र० → मत् । प्रथमा सि ' इन्-हन्०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् । 'मावर्णान्तोपान्ता०' (२।१।९४) म० → व० ॥छ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ग्मिन् ॥ ७।२।२५ ॥

**[ ग्मिन् ]** ग्मिन् प्रथमा सि ।

**[ वाग्मी, वाग्वान् ]** प्रशस्ता वागस्यास्ति = वाग्मी, वाग्वान् । अनेन ग्मिन्प्र० । प्रथमा सि । 'इन्-हन्०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् । एवम्-वाग्वान् । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् । 'मावर्णान्तोपान्ता०' (२।१।९४) म० → वत्वम् ।

गकारः 'प्रत्यये च' (१।३।२) इति अनुनासिकनिवृत्त्यर्थः ।।छ।।

## मध्वादिभ्यो रः ॥ ७।२।२६ ॥

**[ मध्वादिभ्यः ]** मधुरादिर्येषां ते = मध्वादयः, तेभ्यः = मध्वादिभ्यः । पञ्चमी भ्यस् ।

**[ रः ]** र प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

मधुशब्दो माधुर्येऽर्थे पुल्लिङ्गः, क्षौद्राद्यर्थे तु नपुंसकः, तस्मात् माधुर्येऽर्थे पुल्लिङ्गेन वाक्यम् -

**[ मधुरो रसः ]** मधुरस्यास्ति = मधुरो रसः । अनेन रप्र० ।

अत्र मधुशब्दः स्वादुत्वे गुणत्वे गुणसामान्ये वर्त्तते ।

**[ मधुरं मधु, मधुरं क्षीरम् ]** मधुरस्यास्ति = मधुरं मधु, मधुरं क्षीरम् । अत्र गुणे ।

यस्तु द्रव्ये मधुशब्दो मधु क्षौद्रम्, मधु मद्यम्, मधुः पुष्पसवो मधुर्मास इति ततो रप्रत्ययो न भवति, मतुरेव भवतीत्याह इति न्यासकाराशङ्का स्वादुत्वं नाम गुणसामान्यमस्ति यद्योगान्मधुरो रस उच्यते, गुणश्च यद्योगान्मधुरं मधु, मधुरं क्षीरमिति द्रव्यं व्यपदिश्यते, तस्मिन्नुभयस्मिन्नपि वर्त्तमानो मधुशब्दो रप्रत्ययमुत्पादयतीति न्यासः ।

**[ मधुमान् घटः ]** मधुरस्यास्ति = मधुमान् घटः । 'आ यात्' (७।२।२) मतुप्र० → मत् ।

**[ खरो गर्दभः, खवानन्यः ]** खं महत्कण्ठविवरमस्यास्ति खरो गर्दभः । अनेन रप्र० । खवानन्यः । 'आ यात्' (७।२।२) मतुप्र० → मत् ।

**[ मुखरो वाचालः, मुखवानन्यः ]** मुखं सर्वस्मिन् वक्तव्येऽस्यास्तीति मुखरो वाचालः । अनेन रप्र० । द्वितीये मतुप्र० → मत् ।

**[ कुञ्जरो हस्ती, कुञ्जवानन्यः ]** कुञ्जावस्य स्तः = कुञ्जरो हस्ती । अनेन रप्र० । कुञ्जशब्दोऽत्र हनुपर्यायः । द्वितीये मतुप्र० → मत् ।

**[ नगरं पुरम्, नगवदन्यत् ]** नगा-वृक्षा अत्र सन्ति = नगरं पुरम् । अनेन रप्र० । द्वितीये मतुप्र० → मत् ।

**[ ऊषरं क्षेत्रम्, ऊषवदन्यत् ]** ऊषः-क्षारोऽत्रास्ति = ऊषरं क्षेत्रम् । अनेन रप्र० । द्वितीये मतुप्र० → मत् ।

**[ मुष्करः पशुः, मुष्कवानन्यः ]** मुष्कोऽस्यास्ति = मुष्करः पशुः । अनेन रप्र० । द्वितीये मतुप्र० → मत् ।

**[ शुषिरम्, शुषिमत्काष्ठम् ]** शुषिच्छिद्रमस्यास्ति = शुषिरम् । अनेन रप्र० । द्वितीये मतुप्र० → मत् ।

**[ कण्डूरः, कण्डूमान् ]** कण्डूरस्यास्ति = कण्डूरः । अनेन रप्र० । द्वितीये मतुप्र० → मत् ।

**[ पाण्डुरः, पाण्डुमान् ]** पाण्डुरस्यास्ति = पाण्डुरः । अनेन रप्र० । पाण्डुशब्दः पाण्डुत्वरूपे गुणे वर्त्तते । द्वितीये मतुप्र० → मत् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ पांशुरः, पांशुमान् ]** पांशुरस्यास्ति = पांशुरः । अनेन रप्र० । द्वितीये मतुप्र० → मत् ॥छा॥

## कृष्यादिभ्यो वलच् ॥ ७।२।२७ ॥

**[ कृष्यादिभ्यः ]** कृषिरादिर्येषां ते = कृष्यादयः, तेभ्यः = कृष्यादिभ्यः । पञ्चमी भ्यस् ।

**[ वलच् ]** वलच् प्रथमा सि ।

**[ कृषीवलः कुटुम्बी, कृषिमत् क्षेत्रम् ]** कृषिरस्यास्ति = कृषीवलः । अनेन वलच्प्र० → वल । 'वलच्यपित्रादेः' (३।२।८२) दीर्घः । कुटुम्बी । एवम्-कृषिमत् क्षेत्रम् । 'आ यात्' (७।२।२) मतुप्र० → मत् ।

**[ आसुतीवलः कल्यपालः, आसुतिमान् ]** 'षुंगूट् अभिषवे' (१२८६) षु, आङ्पूर्व० । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सु । आसूयत इति आसुतिः । 'समिणा सुगः' (५।३।९३) क्तिप्र० → ति । आसुतिरस्यास्ति = आसुतीवलः । अनेन वलच्प्र० → वल । 'वलच्यपित्रादेः' (३।२।८२) दीर्घः । कलायाङ्गीनादौ साधुः = कल्यम् । 'तत्र साधौ' (७।४।१५) यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् । 'पलण् रक्षणे' (१६९९) पल् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । कल्यं पालयति = कल्यपालः । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'णेरनिटि' (४।३।८२) णिच्लुक् । एवम्-आसुतिमान् । 'आ यात्' (७।२।२) मतुप्र० → मत् ।

**[ परिषद्वलः, परिषद्वान् ]** परि 'षद्लृं विशरण-गत्यवसादनेषु' (१३७१) षद् । 'षः सोऽष्ट्यै-ष्ठिव०' (२।३।९८) सद् । परिषद्यते-प्राप्यते न्यायार्थिभिर्जनैरिति परिषत्' । 'क्वुत्-संपदादिभ्यः क्विप्' (५।३।११४) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 'सदोऽप्रतेः परोक्षायां त्वादेः' (२।३।४४) षत्वम् । परिषदस्यास्ति = परिषद्वलः । अनेन वलच्प्र० → वल । एवम्-परिषद्वान् । 'आ यात्' (७।२।२) मतुप्र० → मत् ।

**[ पर्षद्वलः, पर्षद्वान् ]** पर्षदस्यास्ति = पर्षद्वलः । अनेन वलच्प्र० → वल । एवम्-पर्षद्वान् । 'आ यात्' (७।२।२) मतुप्र० → मत् ।

**[ परिपद्वलं तीर्थम्, परिपद्वत् ]** परि 'पदिंच् गतौ' (१२५७) । पद् । परिपद्यते-प्राप्नोति सूकरादिकं = परिपत् पङ्कः । क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । परिपत् अत्रास्ति = परिपद्वलं तीर्थम् । अनेन वलच्प्र० → वल । पङ्कोऽत्रास्ति = पङ्किल इत्यर्थः । 'व्रीह्यर्थ-तुन्दादेरिलश्च' (७।२।९) इलप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम्-परिपत् पङ्कोऽस्यास्ति = परिपद्वत् । 'आ यात्' (७।२।२) मतुप्र० → मत् ।

**[ रजस्वला स्त्री ]** रजोऽस्या अस्ति = रजस्वला । अनेन वलच्प्र० → वल । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ दन्तावलो नाम राजा हस्ती च, दन्तवान् ]** दन्ता अस्य सन्ति = दन्तावलो नाम राजा हस्ती च । अनेन वलच्प्र० → वल । द्वितीये 'आ यात्' (७।२।२) मतुप्र० → मत् ।

**[ शिखावलं नगरम्, शिखावलो मयूरः, शिखावला स्थूणा, शिखावानन्यः ]** शिखा अस्यास्ति = शिखावलं नगरम्, शिखावलो मयूरः, शिखावला स्थूणा । अनेन वलच्प्र० → वल । 'आत्' (२।४।१८) आप्प्र० → आ । शाखार्थः प्राणिजातिवचनो वा, यथा कस्यां शाखायामुत्पन्नस्त्वमिति, इतिकरणात् प्राण्यङ्गार्थादपि शा(शि)खाशब्दात् वलच्, न तु ल एव, शिखावलो मयूर इत्यादौ दन्त-शिखाभ्यां संज्ञायामिति पूर्वैरुक्तत्वात् । द्वितीये 'आ यात्' (७।२।२) मतुप्र० → मत् ।

**[ मातृवलः ]** माता अस्याऽस्ति = मातृवलः । अनेन वलच्प्र० → वल ।

**[ पितृवलः ]** पिता अस्यास्ति = पितृवलः । अनेन वलच्प्र० → वल ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ भ्रातृवलः ]** भ्राता अस्यास्ति = भ्रातृवलः । अनेन वलच्प्र० → वल ।

**[ उत्साहवलः ]** उत्साहोऽस्यास्ति = उत्साहवलः । अनेन वलच्प्र० → वल ।

**[ पुत्रावलः ]** पुत्रा अस्य सन्ति = पुत्रावलः । अनेन वलच्प्र० → वल ।

**[ उत्सङ्गावलः ]** उत्सङ्गोऽस्यास्ति = उत्सङ्गावलः । अनेन वलच्प्र० → वल । 'वलच्यपित्रादेः' (३।२।८२) दीर्घः ॥छ॥

## लोम-पिच्छादेः शेलम् ॥ ७।२।२८ ॥

**[ लोमपिच्छादेः ]** लोमा च पिच्छश्च = लोमपिच्छौ । लोमपिच्छौ आदी यस्य सः = लोमपिच्छादिः, तस्मात् ।

**[ शेलम् ]** शश्च इलश्च = शेलम् ।

**[ लोमशः, लोमवान् ]** लोमान्यस्य सन्ति = लोमशः, लोमवान् । अनेन शप्र० । द्वितीये 'आ यात्' (७।२।२) मतुप्र० → मत् ।

**[ रोमशः, रोमवान् ]** रोमान्यस्य सन्ति = रोमशः, रोमवान् । अनेन शप्र० । द्वितीये 'आ यात्' (७।२।२) मतुप्र० → मत् ।

**[ पिच्छिलः, पिच्छवान् ]** पिच्छं चिक्कणत्वमस्यास्ति । यद्वा मयूरादिसत्कमस्यास्त्युपमानतया = पिच्छिलः, पिच्छवान् । अनेन इलप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । द्वितीये 'आ यात्' (७।२।२) मतुप्र० → मत् ।

**[ उरसिलः, उरस्वान् ]** उरोऽस्यास्ति = उरसिलः, उरस्वान् । अनेन इलप्र० । द्वितीये 'आ यात्' (७।२।२) मतुप्र० → मत् ॥छ॥

## नोऽङ्गादेः ॥ ७।२।२९ ॥

**[ नः ]** न प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ अङ्गादेः ]** अङ्ग इत्येवमादिर्यस्य सः = अङ्गादिः, तस्मात् ।

**[ अङ्गना कल्याणाङ्गी स्त्री, अङ्गवती ]** अङ्गान्यस्याः सन्ति इति अङ्गना । अनेन नप्र० । रूढिशब्दोऽयम् । कल्याणाङ्गी स्त्री उच्यते । कल्याणमङ्गं यस्याः सा । 'नासिकोद०' (२।४।३९) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । एवम्-अङ्गवती । 'तदस्याऽस्त्य०' (७।२।१) मतुप्र० → मत् । 'अधातूदृदितः' (२।४।२) ङी । 'मावर्णान्तोपान्ता०' (२।१।९४) म० → व० ।

**[ पामनः, पामवान् ]** 'पां पाने' (२) पा । पिबति शरीरकान्तिमिति पामा । 'मन्' (उणा० ९११) मन्प्र० । पामा अस्याऽस्ति = पामनः, पामवान् । अनेन नप्र० । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् । 'मावर्णान्तोपान्ता०' (२।१।९४) म० → व० ।

**[ वामनः, वामवान् ]** 'वांक् गति-गन्धनयोः' (१०६३) वा । वाति-गच्छति नीचतामिति वामा । 'मन्' (उणा० ९११) इत्यनेन सूत्रेण मन्प्र० । वामानि-नीचानि अर्थादङ्गान्यस्य सन्ति = वामनः, वामवान् । अनेन नप्र० । 'तदस्याऽस्त्य०' (७।२।१) मतुप्र० → मत् । 'मावर्णान्तोपान्तापञ्च०' (२।१।९४) म० → व० ॥छ॥

## शाकी-पलाली-दर्द्वा ह्रस्वश्च ॥ ७।२।३० ॥

**[ शाकीपलालीदर्द्वा ]** शाकी च पलाली च दर्दूश्च = शाकीपलालीदर्दूः, तस्याः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ ह्रस्वश्च ]** ह्रस्व प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । च प्रथमा सि ।

**[ शाकिनः, शाकीमान् ]** महच्छाकं कूष्माण्डादिशाकसमूहो वा शाकी । महत्त्वे समूहेऽपि "तद् बहुलमि"ति स्त्रीत्वे 'गौरादिभ्यो मुख्यान्ङीः' (२।४।१९) ङी । शाकी अस्यास्ति = शाकिनः, शाकीमान् । अनेन नप्र०-ह्रस्वश्च । 'आ यात्' (७।२।२) मतुप्र० → मत् ।

**[ पलालिनः, पलालीमान् ]** महत्पलालं पलालक्षोदो वा = पलाली । 'गौरादिभ्यो मुख्यान्ङीः' (२।४।१९) ङी । पलाली अस्यास्ति = पलालिनः, पलालीमान् । अनेन नप्र०-ह्रस्वश्च । 'आ यात्' (७।२।२) मतुप्र० → मत् ।

**[ दर्द्रूणः, दर्द्रूमान् ]** दर्द्रूर्नाम व्याधिः । दर्द्रूरस्यास्ति = दर्द्रूणः, दर्द्रूमान् । अनेन नप्र०-ह्रस्वश्च । 'र-षृवर्णान्नो ण०' (२।३।६३) न० → णत्वम् । 'आ यात्' (७।२।२) मतुप्र० → मत् ॥छ॥

## विष्वचो विषुश्च ॥ ७।२।३१ ॥

**[ विष्वचः ]** विष्वच् पञ्चमी ङसि ।

**[ विषुश्च ]** विषु प्रथमा सि । च प्रथमा सि ।

**[ विषुण आदित्यः, विषुणो वायुः, विष्वग्वान् ]** विषु 'अञ्चू गतौ च' (१०५) अञ्च् । विष्वञ्चतीति विष्वक् । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'अञ्चोऽनर्चायाम्' (४।२।४६) नलुक् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । विष्वञ्चो रश्मयो विष्वग्गतानि वा अस्य सन्ति इति विषुणः आदित्यो वायुर्वा । अनेन नप्र०-विषुदेशश्च । 'र-षृवर्णान्नो ण०' (२।३।६३) णत्वम् । एवम्-विष्वग्वान् । 'आ यात्' (७।२।२) इत्यधिकारात् मतुप्र० → मत् । प्रथमा सि । 'मावर्णान्तोपान्ता०' (२।१।९८४) म० → व० ।

**[ विषुमानहोरात्रप्रविभाग इति ]** विषुर्नाम मुहूर्तोऽत्रास्ति = विषुमान् । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् ॥छ॥

## लक्ष्म्या अनः ॥ ७।२।३२ ॥

**[ लक्ष्म्याः ]** लक्ष्मी पञ्चमी ङसि । 'स्त्रीदूतः' (१।४।२९) ङसि० → दास्० → आस्० ।

**[ अनः ]** अन प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ लक्ष्मणः, लक्ष्मीवान् ]** लक्ष्मीरस्यास्ति = लक्ष्मणः । अनेन अनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । एवम्-लक्ष्मीवान् । 'तदस्याऽस्त्यस्मि०' (७।२।१) मतुप्र० → मत् । 'मावर्णान्तोपा०' (२।१।९४) म० → व० ॥छ॥

## प्रज्ञा-श्रद्धा-ऽर्चा-वृत्तेर्णः ॥ ७।२।३३ ॥

**[ प्रज्ञाश्रद्धाऽर्चावृत्तेः ]** प्रज्ञा च श्रद्धा च अर्चा च वृत्तिश्च = प्रज्ञाश्रद्धाऽर्चावृत्ति, तस्मात् ।

**[ णः ]** ण प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ प्राज्ञः, प्रज्ञावान्, प्राज्ञा ]** प्र 'ज्ञांश् अवबोधने' (१५४०) ज्ञा । प्रज्ञानं = प्रज्ञा । 'उपसर्गादातः' (५।३।११०) अङ्प्र० → अ । 'इडेत्-पुसि चाऽऽतो लुक्' (४।३।९४) आलुक् । 'आत्' (२।४।१८) आप्प्र० → आ । 'प्रज्ञा अस्यास्ति = प्राज्ञः, प्रज्ञावान् । अनेन णप्र० → अ-मतुप्र० → मत् । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । स्त्रीलिङ्गेऽपि एवं साध्यः । 'आत्' (२।४।१८) आप्प्र० → आ ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ श्राद्धः, श्रद्धावान्, श्राद्धा ]** श्रत् 'डुधांग्क् धारणे च' (११३९) धा । श्रद्धानं = श्रद्धा । 'मृगयेच्छा-याच्ञा-तृष्णा-कृपा-भा-श्रद्धा-ऽन्तर्द्धा' (५।३।१०१) अङ्प्र० → अ-श्रद्धानिपातश्च । श्रद्धा अस्यास्ति = श्राद्धः, श्रद्धावान् । अनेन णप्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । 'आ यात्' (७।२।२) इत्यधिकारात् अनेनैव मतुप्र० → मत् । स्त्रीलिङ्गेऽपि एवं साध्यः । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ आर्चः, अर्चावान्, आर्चा ]** 'अर्च(र्चि)ण् पूजायाम्' (१९५४) अर्च् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० → इ । अर्चनम् = अर्चा । 'क्तेटो गुरोर्व्यञ्जनात्' (५।३।१०६) अप्र० । 'णेरनिटि' (४।३।८३) णिच्लुक् । 'आत्' (२।४।१८) आप्प्र० → आ । अर्चा अस्यास्ति = आर्चः, अर्चावान् । अनेन णप्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । 'आ यात्' (७।२।२) इत्यधिकारात् अनेनैव मतुप्र० → मत् । स्त्रीलिङ्गेऽपि एवं साध्यः । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ वार्त्तः, वृत्तिमान्, वार्त्ता ]** 'वृतूङ् वर्त्तने' (९५५) वृत् । वर्त्तनं = वृत्तिः । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति । वृत्तिरस्यास्ति = वार्त्तः, वृत्तिमान् । अनेन णप्र० → अ-मतुप्र० → मत् । शेषं पूर्ववत् । स्त्रीलिङ्गेऽपि एवं साध्यः । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ प्राज्ञी ]** प्रज्ञा । प्रज्ञैव = प्राज्ञी । 'प्रज्ञादिभ्योऽण्' (७।२।१६५) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । 'अणञेयेकण्०' (२।४।२०) ङी ॥छ॥

## ज्योत्स्नादिभ्योऽण् ॥ ७।२।३४ ॥

**[ ज्योत्स्नादिभ्यः ]** ज्योत्स्ना आदिर्येषां ते = ज्योत्स्नादयः, तेभ्यः = ज्योत्स्नादिभ्यः । पञ्चमी भ्यस् ।

**[ अण् ]** अण् प्रथमा सि ।

**[ ज्यौत्स्नः पक्षः ]** ज्योत्स्ना अस्मिन्नस्ति = ज्यौत्स्नः पक्षः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ ज्यौत्स्नी रात्रिः ]** ज्योत्स्ना अस्यामस्ति = ज्यौत्स्नी रात्रिः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । 'अणञेयेकण्-नञ्०' (२।४।२०) ङी ।

**[ तामिस्रः पक्षः, तामिस्री रात्रिः ]** तमोऽत्र अस्ति = तमिस्रा । तमिस्रा अत्र अस्ति = तामिस्रः पक्षः, तामिस्री रात्रिः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वा०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । द्वितीये 'अणञेयेकण्-नञ्०' (२।४।२०) ङी ।

**[ तामिस्राणि गुहामुखानि ]** तमिस्रा एष्वस्ति = तामिस्राणि गुहामुखानि । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । जस् । 'नपुंसकस्य शिः' (१।४।५५) जस्० → शि० → इ० । 'स्वराच्छौ' (१।४।६५) नोऽन्तः । 'नि दीर्घः' (१।४।८५) दीर्घः ।

**[ वैसर्पो व्याधिः ]** वि 'सृप्लृं गतौ' (३४१) सृप् । विविधं सर्पणं = विसर्पः । 'अच्' (५।१।४९) अच्प्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० अर् । विसर्पोऽत्रास्ति = वैसर्पो व्याधिः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ वैपादिकं कुष्ठम् ]** विपादिका अत्रास्ति = वैपादिकं कुष्ठम् । अनेन अण्प्र० → अ । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ कौतुपं गृहम् ]** कुतुमा(पा) अत्र सन्ति = कौतुमं(पं) गृहम् । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् ।

**[ कौण्डलो युवा ]** कुण्डलेऽस्य स्तः = कौण्डलो युवा । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ तापसः पाखण्डी ]** तपोऽस्यास्ति = तापसः पाखण्डी । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ ।

**[ साहस्त्रो देवदत्तः ]** सहस्त्रमस्यास्ति = साहस्त्रो देवदत्तः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ ज्योत्स्नावान् ]** ज्योत्स्ना अस्मिन्नस्ति = ज्योत्स्नावान् । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् । प्रथमा सि । 'मावर्णान्तोपान्ता०' (२।१।९४) म० → व० ।

**[ तमिस्त्रावान् ]** तमिस्त्रा अत्रास्ति = तमिस्त्रावान् । 'तदस्याऽस्त्यस्मि०' (७।२।१) मतुप्र० → मत् । प्रथमा सि । 'मावर्णान्तोपान्ता०' (२।१।९४) म० → व० ।

**[ कुण्डली ]** कुण्डलमस्यास्ति = कुण्डली । 'शिखादिभ्य इन्' (७।२।४) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'इन्-हन्-पूषा०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ सहस्त्री ]** सहस्त्रमस्यास्ति = सहस्त्री । 'शिखादिभ्य इन्' (७।२।४) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'इन्-हन्०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ ज्योत्स्ना ]** ज्योत्स्नादयः प्रयोगगम्याः । 'द्युति दीप्तौ' (९३७) द्युत् । द्योतते = ज्योतिस् । 'द्युतेरादेश्च जः' (उणा० ९९१) इसप्र०-द० → जश्च । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । ज्योतिरस्यास्ति = ज्योत्स्ना । 'तमिस्त्रा-ऽर्णव-ज्योत्स्नाः' (७।२।५२) ज्योत्स्नानिपात्यते ॥छा॥

## सिकता-शर्करात् ॥ ७।२।३५ ॥

**[ सिकताशर्करात् ]** सिकता च शर्करा च = सिकताशर्करम् । 'क्लीबे' (२।४।९७) ह्रस्वः । तस्मात् ।

**[ सैकतः, सिकतावान् देशः ]** सिकता अत्र सन्ति = सैकतः, सिकतावान् । अनेन अण्प्र० → अ-मतुप्र० → मत् । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । देशः ।

**[ शार्करः, शर्करावान् ओदनः ]** शर्करा अत्र सन्ति = शार्करः, शर्करावान् । अनेन अण्प्र० → अ-मतुप्र० → मत् । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । ओदनः ॥छा॥

## इलश्च देशे ॥ ७।२।३६ ॥

**[ इलश्च ]** इल प्रथमा सि । च प्रथमा सि ।

**[ देशे ]** देश सप्तमी ङि ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ सिकतिलः, सैकतः, सिकतावान् देशः ]** सिकता अस्मिन्नस्ति = सिकतिलः, सैकतः, सिकतावान् देशः । अनेन इल-अण्-मतुप्र० → मत् । प्रथमा सि ।

**[ शर्करिलः, शार्करः, शर्करावान् देशः ]** शर्करा अस्मिन्नस्ति = शर्करिलः, शार्करः, शर्करावान् देशः । अनेन इल-अण्-मतुप्र० → मत् । प्रथमा सि ॥छा॥

## द्यु-द्रोर्मः ॥ ७।२।३७ ॥

**[ द्युद्रोः ]** द्युश्च द्रुश्च = द्युद्रु, तस्मात् ।

**[ मः ]** म प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ द्युमः ]** द्यौर्द्युर्वास्यास्मिन् वास्तीति द्युमः । अनेन मप्र० ।

**[ द्रुमः ]** उच्चैस्तरद्रूणि दारुण्यस्यास्मिन् वा सन्तीति द्रुमः । अनेन मप्र० ।

रूढिशब्दाविमौ । रूढिविषये च मतुर्न भवति । अन्यत्र तु मतुरेव । एवम्-

**[ द्युमान् ]** 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् । प्रथमा सि ।

**[ द्रुमान् ]** 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् । प्रथमा सि । ॥छा॥

## काण्डा-ऽऽण्ड-भाण्डादीरः ॥ ७।२।३८ ॥

**[ काण्डाऽऽण्डभाण्डात् ]** काण्डश्च आण्डश्च भाण्डश्च = काण्डाऽऽण्डभाण्डम्, तस्मात् ।

**[ ईरः ]** ईर प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ काण्डीरः, काण्डवान् ]** काण्डान्यत्र सन्ति = काण्डीरः, काण्डवान् । अनेन ईर-मतुप्र० → मत् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ आण्डीरः, आण्डवान् ]** आण्डौ अस्य स्तः = आण्डीरः, आण्डवान् । अनेन ईर-मतुप्र० → मत् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ भाण्डीरः, भाण्डवान् ]** भाण्डमस्यास्ति = भाण्डीरः, भाण्डवान् । अनेन ईर-मतुप्र० → मत् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

आण्डौ मुष्कौ । **एकदेशविकृतस्यानन्यत्वात् अण्डीर इत्यपि जयगौडयोर्मतम्** ॥छा॥

## कच्छ्वा डुरः ॥ ७।२।३९ ॥

**[ कच्छ्वाः ]** कच्छू पञ्चमी ङसि । 'स्त्रीदूतः' (१।४।२९) ङसि० → दास्० → आस्० ।

**[ डुरः ]** डुर प्रथमा सि ।

**[ कच्छुरः, कच्छूमान् ]** 'कष हिंसायाम्' (५०७) कष् । कषति कान्तिमिति कच्छूः । 'कषेण्र्ड-च्छौ च षः' (उणा० ८३१) ऊप्र०-षश्च च्छ० । कच्छूरस्यास्ति = कच्छुरः, कच्छूमान् । अनेन डुरप्र० → उर । 'डित्यन्त्यस्वरादेः' (२।१।११४) ऊलुक् । 'आ यात्' (७।२।२) इत्यधिकारात् अनेनैव मतुप्र० → मत् ॥छा॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## दन्तादुन्नतात् ॥ ७।२।४० ॥

**[ दन्तात् ]** दन्त पञ्चमी ङसि ।

**[ उन्नतात् ]** उन्नत पञ्चमी ङसि ।

**[ दन्तुरः ]** उन्नता दन्ता अस्य सन्ति = दन्तुरः । अनेन डुरप्र० → उर । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् ।

निर्गतत्वमुन्नतत्वम् । प्रमाणातिरेकस्तु वृद्धिरिति भिन्नत्वम् । तत्रोन्नतत्वे दन्तुरः । विवृद्धिविवक्षायां तु 'स्वाङ्गाद् विवृद्धात् ते' (७।२।१०) - 'आ यात्' (७।२।२) इति च दन्तिलः, दन्तिकः, दन्ती, दन्तवान् इति यथायोगं भवति । उन्नतार्थो मतुना न गम्यते इत्यत्र मतुर्न भवति । एवम्-

**[ दन्तवान् ]** दन्ता अस्य सन्ति = दन्तवान् । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् ।।छ।।

## मेधा-रथान्नवेरः ॥ ७।२।४१ ॥

**[ मेधारथात् ]** मेधा च रथश्च = मेधारथम्, तस्मात् ।

**[ नवा ]** नवा प्रथमा सि ।

**[ इरः ]** इर प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ मेधिरः, मेधावान्, मेधावी ]** मेधा अस्यास्ति = मेधिरः, मेधावान् । अनेन इरप्र० । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । 'आ यात्' (७।२।२) इत्यधिकारात् अनेनैव मतुप्र० → मत् । 'अस् तपो-माया-मेधा-स्रजो विन्' (७।२।४७) विन्प्र० । प्रथमा सि ।

**[ रथिरः, रथिकः, रथी, रथवान् ]** रथोऽस्यास्ति = रथिरः । अनेन इरप्र० । एवम्-रथिकः । 'नावादेरिकः' (७।२।३) ('अतोऽनेक०' (७।२।६) इकप्र०) । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम्-रथी । 'अतोऽनेकस्वरात्' (७।२।६) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम्-रथवान् । 'आ यात्' (७।२।२) इत्यधिकारात् अनेन मतुप्र० → मत् । प्रथमा सि । 'मावर्णान्तो०' (२।१।९४) म० → व० ।।छ।।

## कृपा-हृदयादालुः ॥ ७।२।४२ ॥

**[ कृपाहृदयात् ]** कृपा च हृदयश्च(हृदयं च) = कृपाहृदयम्, तस्मात् ।

**[ आलुः ]** आलु प्रथमा सि ।

**[ कृपालुः, कृपावान् ]** कृपा अस्यास्ति = कृपालुः, कृपावान् । अनेन आलुप्र० । 'आ यात्' (७।२।२) इत्यधिकारात् अनेन मतुप्र० → मत् ।

**[ हृदयालुः, हृदयिकः, हृदयी, हृदयवान् ]** हृदयमस्यास्ति = हृदयालुः, हृदयवान् । अनेन आलु-मतुप्र० → मत् । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'अभ्वादेरत्वसः सो' (१।४।९०) दीर्घः । 'पदस्य' (२।१।८९) तलुक् । एवम्-हृदयिकः, हृदयी । 'अतोऽनेकस्वरात्' (७।२।६) इक-इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।।छ।।

## केशाद् वः ॥ ७।२।४३ ॥

**[ केशात् ]** केश पञ्चमी ङसि ।

**[ वः ]** व प्रथमा सि ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ केशवः, केशिकः, केशी, केशवान् ]** केशा अस्य सन्ति = केशवः । अनेन वप्र० । एवम्-केशिकः । 'नावादेरिकः' (७।२।३) ('अतोऽनेक०' (७।२।६)) इकप्र० । एवम्-केशी । 'अतोऽनेकस्वरात्' (७।२।६) इन्प्र० । एवम्-केशवान् । 'आ यात्' (७।२।२) इत्यधिकारात् अनेन मतुप्र० → मत् ।

न केवलं यस्य केशाः सन्ति स एव केशवः, विष्णुवाची केशवशब्दो रूढिशब्दोऽप्यस्ति इति भावः ॥छ॥

## मण्यादिभ्यः ॥ ७।२।४४ ॥

**[ मण्यादिभ्यः ]** मणिरादिर्येषां ते = मण्यादयः, तेभ्यः = मण्यादिभ्यः । पञ्चमी भ्यस् ।

योगविभागाद्वेति निवृत्तम् ।

**[ मणिवः, मणिमान्, मणिलः ]** मणिरस्यास्ति = मणिवः, मणिमान् । अनेन वप्र० । 'आ यात्' (७।२।२) इत्यधिकारात् अनेन मतुप्र० → मत् । एवम्-मणिलः । 'सिध्मादि-क्षुद्रजन्तु-रुग्भ्यः' (७।२।२१) लप्र० ।

**[ हिरण्यवः, हिरण्यमान् ]** हिरण्यमस्यास्ति = हिरण्यवः, हिरण्यमान् । अनेन व-मतुप्र० → मत् ।

**[ बिम्बावम् ]** बिम्बमत्रास्ति = बिम्बावम् । अनेन वप्र० । 'घञ्युपसर्गस्य बहुलम्' (३।२।८६) इति बाहुलकाद्दीर्घः । बिम्बादयस्त्रयोऽपि सरोवाचिनः ।

**[ कुररावम् ]** कुररा अत्र सन्ति = कुररावम् । अनेन वप्र० । 'घञ्युपसर्गस्य बहुलम्' (३।२।८६) इति बाहुलकाद्दीर्घः ।

**[ कुरवावम् ]** कुत्सितो रवः शब्दो येषां ते = कुरवाः । कुरवा अत्र सन्ति = कुरवावम् । अनेन वप्र० । 'घञ्युपसर्गस्य बहुलम्' (३।२।८६) इति बाहुलकाद्दीर्घः ।

**[ राजीवम् ]** राजिशब्दात् 'इतोऽक्त्यर्थात्' (२।४।३२) ङी । राजी अत्रास्ति = राजीवम् । अनेन वप्र० ।

**[ इष्टकावम् ]** इष्टका अत्रास्ति = इष्टकावम् । अनेन वप्र० ।

**[ गाण्डिवम् ]** गाण्डिशब्देन धनुः पर्व । अतो गाण्डिरस्यास्ति = गाण्डिवम् । अनेन वप्र० । गाण्डिवं धनुरुच्यते ।

**[ गाण्डीवम् ]** गाण्डी अत्रास्ति = गाण्डीवम् । अनेन वप्र० ।

**[ अजकावम् ]** अजका-अस्थिविकारोऽत्रास्ति = अजकावम् । अनेन वप्र० ।

बिम्बावमित्यादयो रूढिशब्दाः । रूढिशब्दविषये च मतुर्न भवति ॥छ॥

## हीनात् स्वाङ्गादः ॥ ७।२।४५ ॥

**[ हीनात् ]** 'ओहांक् त्यागे' (११३१) हा । जहाति स्म । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० → त । 'सूयत्याद्योदितः' (४।२।७०) त० → न० । 'ई व्यञ्जनेऽयपि' (४।३।९७) ई । तस्मात् ।

**[ स्वाङ्गात् ]** स्वं च तद् अङ्गं च = स्वाङ्गम्, तस्मात् ।

**[ अः ]** अ प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ कर्णः ]** खण्डः कर्णोऽस्यास्ति = कर्णः । अनेन अप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ नासिकः ]** छिन्ना नासिका अस्यास्ति = नासिकः । अनेन अप्र० । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ कर्णवान् ]** कर्णोऽस्यास्ति = कर्णवान् । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् । 'मावर्णान्तोपान्ता०' (२।१।९४) म० → व० ।

**[ नासिकावान् ]** नासिका अस्यास्ति = नासिकावान् । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् । 'मावर्णान्तोपान्तापञ्चमवर्गान्०' (२।१।९४) म० → व० ।।छ।।

**अभ्रादिभ्यः ॥ ७।२।४६ ॥**

**[ अभ्रादिभ्यः ]** अभ्र इत्येवमादिर्येषां ते = अभ्रादयः, तेभ्यः = अभ्रादिभ्यः । पञ्चमी भ्यस् ।

**[ अभ्रं नभः ]** अभ्राण्यस्मिन् सन्ति = अभ्रं नभः । अनेन अप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ अर्शसो देवदत्तः ]** अर्शस् । अर्शांस्यस्य सन्ति = अर्शसो देवदत्तः । अनेन अप्र० ।

**[ उरसः, उरस्वान् ]** उरोऽस्यास्ति = उरसः । लोम-पिच्छादिपाठात् इलोऽपि । अनेन अप्र० । एवम्-उरस्वान् । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् ।।छ।।

**अस्-तपो-माया-मेधा-स्रजो विन् ॥ ७।२।४७ ॥**

**[ अस्तपोमायामेधास्रजः ]** अस् च तपस् च (तपश्च) माया च मेधा च स्रज्(क्) च = अस्तपोमायामेधास्रज्(क्), तस्मात् ।

**[ विन् ]** विन् प्रथमा सि ।

असन्त - **[ यशस्वी, यशस्वान् ]** यशो विद्यतेऽस्य = यशस्वी । अनेन विन्प्र० । प्रथमा सि । 'इन्-हन्-पूषाऽर्यम्णः शिस्योः' (१।४।८७) दीर्घः । 'दीर्घङ्याब्-व्यञ्जनात् सेः' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् । एवम्-यशस्वान् । 'आ यात्' (७।२।२) इत्यधिकारात् अनेनैव मतुप्र० → मत् । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'मावर्णान्तोपान्ता०' (२।१।९४) म० → वत्वम् । 'अभ्वादेरत्वसः सौ' (१।४।९०) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'पदस्य' (२।१।८९) तलुक् ।

**[ सरस्वी, सरस्वान्, सरस्वती ]** सरोऽत्रास्ति । यदा नदी तदा सरः । सरणं गमनमस्यास्तीति वाक्यम् । यदा तु भारती तदा सरो मानसाद्यस्या अस्तीति सरस्वी । अनेन विन्प्र० । एवम्-सरस्वान् । 'आ यात्' (७।२।२) इत्यधिकारात् अनेनैव मतुप्र० → मत् । एवम्-सरस्वती । 'अधातूदृदितः' (२।४।२) ङी ।

**[ तेजस्वी ]** तेजस् । तेजोऽस्यास्ति = तेजस्वी । अनेन विन्प्र० । प्रथमा सि । 'इन्-हन्०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ वर्चस्वी ]** वर्चोऽत्रास्ति = वर्चस्वी । अनेन विन्प्र० । प्रथमा सि । 'इन्-हन्-पूषाऽर्यम्णः०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ तपस्वी, तपस्वान् ]** तपोऽस्यास्ति तपस्वी । अनेन विन्प्र० । प्रथमा सि । 'इन्-हन्०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् । एवम्-तपस्वान् । अनेनैव मतुप्र० → मत् । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'मावर्णान्तोपान्ता०' (२।१।९४) म० → वत्वम् । 'अभ्वादेरत्वसः सौ' (१।४।९०) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'पदस्य' (२।१।८९) तलुक् ।

असन्तेनैव सिद्धे तपसो ग्रहणं ज्योत्स्नाद्यणा बाधो मा भूदित्येवमर्थम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ मायावी, मायावान्, मायी, मायिकः ]** माया अस्यास्ति = मायावी, मायावान् । अनेन विन्-मतुप्र० → मत् । एवम्-मायी, मायिकः । 'व्रीह्यादिभ्यस्तौ' (७।२।५) इन्-इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ मेधावी, मेधावान् ]** मेधा अस्यास्ति = मेधावी । अनेन विन्प्र० । प्रथमा सि । 'इन्-हन्-पूषाऽर्यम्णः शिस्योः' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् । एवम्-मेधावान् । अनेन मतुप्र० → मत् । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'अभ्वादेरत्वसः सौ' (१।४।९०) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'पदस्य' (२।१।८९) तलुक् ।

**[ स्रग्वी, स्रग्वान् ]** स्रगस्यास्तीति स्रग्वी । अनेन विन्प्र० । प्रथमा सि । 'इन्-हन्०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् । एवम्-स्रग्वान् । अनेन मतुप्र० → मत् । प्रथमा सि । 'मावर्णान्तोपान्ता०' (२।१।९४) म० → व० । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'अभ्वादेरत्वसः सौ' (१।४।९०) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'पदस्य' (२।१।८९) तलुक् ॥छ॥

## आमयाद् दीर्घश्च ॥ ७।२।४८ ॥

**[ आमयात् ]** आमय पञ्चमी ङसि ।

**[ दीर्घश्च ]** दीर्घ प्रथमा सि । च प्रथमा सि ।

**[ आमयावी, आमयवान् ]** आ'मींग्श् हिंसायाम्' (१५१२) मी । आमीनाति-हिनस्ति प्राणिगणमिति आमयः । अच्प्र० । अथवा 'अमण् रोगे' (७४७) अम् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० → इ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । आमयतीति आमयः । 'गय-हृदयादयः' (उणा० ३७०) अयप्र०-आमयनिपातः । अयि तु 'णेरनिटि' (४।३।८३) णिलुक् स्यात् । आमयोऽस्यास्ति = आमयावी, आमयवान् । अनेन विन्प्र०-दीर्घश्च । 'आ यात्' (७।२।२) इत्यधिकारात् अनेन मतुप्र० → मत् । 'मावर्णान्तोपान्ता०' (२।१।९४) म० → व० ॥छ॥

## स्वान्मिन्नीशे ॥ ७।२।४९ ॥

**[ स्वात् ]** स्व पञ्चमी ङसि ।

**[ मिन् ]** मिन् प्रथमा सि ।

**[ ईशे ]** ईश सप्तमी ङि ।

**[ स्वामी ]** स्वमस्यास्ति = स्वामी । अनेन मिन्प्र०-दीर्घश्च ।

**[ स्ववान् ]** स्वमस्यास्ति । रक्ष्यतया न तु भोग्यतया । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् । 'मावर्णान्तोपान्ता०' (२।१।९४) म० → व० ॥छ॥

## गोः ॥ ७।२।५० ॥

**[ गोः ]** गो पञ्चमी ङसि । 'एदोद्भ्यां ङसि-ङसो रः' (१।४।३५) ङसि० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[ गोमी, गोमान् ]** गावोऽस्य सन्ति = गोमी । अनेन मिन्प्र० । प्रथमा सि । 'इन्-हन्-पूषाऽर्यम्णः०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् । एवम्-गोमान् । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् ॥छ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ऊर्जो विन्-वलावश्चान्तः ॥ ७।२।५१ ॥

**[ ऊर्जः ]** ऊर्ज् पञ्चमी ङसि ।

**[ विन्वलौ ]** विन् च वलश्च = विन्वलौ ।

**[ अस् ]** अस् प्रथमा सि । 'दीर्घङ्याब्-व्यञ्जनात् सेः' (१।४।४५) सिलुक् ।

**[ च ]** च प्रथमा सि ।

**[ अन्तः ]** अन्त प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ ऊर्जस्वी, ऊर्जस्वलः, ऊर्ग्वान् ]** 'ऊर्जण् बल-प्राणनयोः' (१५८२) ऊर्ज् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० → इ । ऊर्जनम् = ऊर्ज्(र्क्) । 'क्रुत्-संपदादिभ्यः क्विप्' (५।३।११४) क्विप्प्र० । 'णेरनिटि' (४।३।८३) णिच्लुक् । 'अप्रयोगीत्' (१।१।३७) क्विप्लुक् । 'ऊर्गस्यास्ति = ऊर्जस्वी, ऊर्जस्वलः । अनेन विन्-वलप्र०-अस् अन्तश्च । एवम्-ऊर्ग्वान् । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् । 'मावर्णान्तोपान्ता०' (२।१।९४) म० → वत्वम् ।

**[ ऊर्जस्वान् ]** 'ऊर्जण् बल-प्राणनयोः' (१५८२) ऊर्ज् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । ऊर्जयतीति ऊर्जस् । 'अस्' (उणा० ९५२) अस्प्र० । 'णेरनिटि' (४।३।८३) णिच्लुक् । ऊर्जोऽस्यास्ति = ऊर्जस्वान् । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् ॥छ॥

## तमिस्रा-ऽर्णव-ज्योत्स्नाः ॥ ७।२।५२ ॥

**[ तमिस्राऽर्णवज्योत्स्नाः ]** तमिस्रा च अर्णवश्च ज्योत्स्ना च = तमिस्राऽर्णवज्योत्स्नाः ।

**[ तमिस्रा रात्रिः, तमिस्रं तमःसमूहः, तमिस्राणि गुहामुखानि, तमस्वान् ]** तमोऽत्रास्ति = तमिस्रा । अनेन तमस्शब्दात् रप्र०-उपान्त्यस्य च इत्वम् । 'आत्' (२।४।१८) आप्प्र० → आ । एवम्-तमिस्रं तमःसमूहः । तम एषु सन्ति = तमिस्राणि गुहामुखानि । एवम्-तमस्वान् । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् । 'मावर्णान्तोपान्ता०' (२।१।९४) म० → वत्वम् ।

**[ अर्णवः समुद्रः ]** अर्णो जलमत्रास्ति = अर्णवः समुद्रः । अनेन वप्र०-सलोपो निपात्यते ।

**[ ज्योत्स्ना चन्द्रप्रभा, ज्योतिष्मती रात्रिः ]** ज्योतिस् । ज्योतिर्दीप्तिरत्रास्ति = ज्योत्स्ना । अनेन नप्र०-उपान्त्य इकारलोपश्च निपात्यते । 'आत्' (२।४।१८) आप्प्र० → आ । एवम्-ज्योतिष्मती । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् । 'अधातूदृदितः' (२।४।२) ङी । 'नाम्यन्तस्था-कवर्गात्०' (२।३।१५) षत्वम् ॥छ॥

## गुणादिभ्यो यः ॥ ७।२।५३ ॥

**[ गुणादिभ्यः ]** गुण आदिर्येषां ते = गुणादयः, तेभ्यः = गुणादिभ्यः । पञ्चमी भ्यस् ।

**[ यः ]** य प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ गुण्यः पुरुषः, गुणवान्, 'को नाम गुणिनो नार्चयेत् ?' ]** गुणा अस्य सन्ति = गुण्यः पुरुषः । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम्-गुणवान् । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् । एवम्-गुणिन् द्वितीया शस् । 'शिखादिभ्य इन्' (७।२।४) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ हिम्यः पर्वतः, हिमवान् ]** हिममत्रास्ति = हिम्यः पर्वतः । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम्-हिमवान् । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् ।।छा।

## रूपात् प्रशस्ता-ऽऽहतात् ।। ७।२।५४ ।।

**[ रूपात् ]** रूप पञ्चमी ङसि ।

**[ प्रशस्ताऽऽहतात् ]** प्रशस्तं च आहतं च = प्रशस्ताऽऽहतम्, तस्मात् ।

**[ रूप्यो गौः, रूप्यः पुरुषः ]** प्रशस्तं रूपमस्यास्ति = रूप्यो गौः । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम्-रूप्यः पुरुषः ।

**[ रूप्यः कार्षापणः ]** आहतं रूपमस्यास्ति = रूप्यः कार्षापणः । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । निघातिकाताडनात् कोऽर्थः ? हस्तिपुटिकाताडनाद् दीनारादिषु यद्रूपमुत्पद्यते तद् आहतं रूपमुच्यते ।

**[ रूपवान् ]** रूपमस्यास्ति = रूपवान् । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् । प्रथमा सि ।

**[ रूपवती कन्या ]** रूपमस्या अस्ति = रूपवती कन्या । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् । 'अधातूदृदितः' (२।४।२) ङी । 'मावर्णान्तोपा०' (२।१।९४) म० → व० ।

आहते न भवति इतिकरणात् ।

**[ रूपिणी कन्या ]** रूपमस्या अस्ति = रूपिणी कन्या । 'व्रीह्यादिभ्यस्तौ' (७।२।५) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'स्त्रियां नृतोऽस्वस्रादेर्ङीः' (२।४।१) ङी ।

**[ रूपिको दारकः ]** रूपमस्यास्ति = रूपिको दारकः । 'व्रीह्यादिभ्यस्तौ' (७।२।५) इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**'आ यात्' ( ७।२।२ ) इत्यस्य पूर्णोऽवधिः । अतः परं मतुर्नास्ति** ।।छा।

## पूर्णमासोऽण् ।। ७।२।५५ ।।

**[ पूर्णमासः ]** पूर्णमास् पञ्चमी ङसि ।

**[ अण् ]** अण् प्रथमा सि ।

**[ पौर्णमासी ]** पूर्णो माश्चन्द्रोऽस्यामस्ति = पौर्णमासी । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः औ । 'अणञेयेकण्-नञ्०' (२।४।२०) ङी ।।छा।

## गोपूर्वादत इकण् ।। ७।२।५६ ।।

**[ गोपूर्वात् ]** गौः पूर्वपदं यस्य सः = गोपूर्वपदस्तस्मात् । 'ते लुग्वा' (३।२।१०८) पदशब्दलोपः ।

**[ अतः ]** अत् पञ्चमी ङसि ।

**[ इकण् ]** इकण् प्रथमा सि ।

**[ गौशतिकः ]** गोशतमस्यास्ति = गौशतिकः । अनेन इकण्प्र० → इक । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ गौसहस्त्रिकः ]** गोसहस्त्रमस्यास्ति = गौसहस्त्रिकः । अनेन इकण्प्र० → इक । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ गोविंशतिमान् ]** गोविंशतिरस्यास्ति = गोविंशतिमान् । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् । प्रथमा सि ।

**[ गौशकटिकः ]** गोभिर्युक्तं शकटमस्यास्ति = गौशकटिकः । अनेन इकण्प्र० → इक । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

शकटीशब्देन समानार्थः शकटशब्दोऽस्ति । शकटीशब्दात्तु मतुरनभिधानान्न भवति ।

**[ गौत्रिकः ]** गो । गवां समूहः = गोत्रा । 'गो-रथ-वातात् त्रल्-कट्यलूलम्' (६।२।२४) त्रल्प्र० → त्र० । 'आत्' (२।४।१८) आप्प्र० → आ । गोत्रा विद्यते यस्य = गौत्रिकः । मतान्तरे अनेनैव इकण्प्र० → इक । वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ गौवयसिकः ]** गो - वयस् । गावश्च वयांसि च = गोवयांसि, तान्यत्र सन्ति इति कार्यमन्यथा नामसमुदायात् तद्धितो न स्यात् । मतान्तरे अनेनैव इकण्प्र० → इक । वृद्धिः औ ॥छ॥

## निष्कादेः शत-सहस्रात् ॥ ७।२।५७ ॥

**[ निष्कादेः ]** निष्क आदिर्यस्य सः = निष्कादिः, तस्मात् ।

**[ शतसहस्रात् ]** शतं च सहस्रं च = शतसहस्रम्, तस्मात् ।

**[ नैष्कशतिकः ]** निष्कशतमस्यास्ति = नैष्कशतिकः । अनेन इकण्प्र० → इक । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ नैष्कसहस्त्रिकः ]** निष्कसहस्रमस्यास्ति = नैष्कसहस्त्रिकः । अनेन इकण्प्र० → इक । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ शती ]** शतमस्यास्ति = शती । 'शिखादिपाठात् 'शिखादिभ्य इन्' (७।२।४) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ सहस्त्री ]** सहस्रमस्यास्ति = सहस्त्री । शिखादिपाठात् 'शिखादिभ्य इन्' (७।२।४) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छ॥

## एकादेः कर्मधारयात् ॥ ७।२।५८ ॥

**[ एकादेः ]** एकश्चासावादिश्च = एकादिस्तस्मात् । यद्वा एक आदिर्यस्य सः = एकादिस्तस्मात् ।

**[ कर्मधारयात् ]** कर्मधारय पञ्चमी ङसि ।

**[ ऐकगविकः ]**卐 एको गौरेकगवः । 'गोस्तत्पुरुषात्' (७।३।१०५) अट्समासान्तः → अ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । 'एकगवोऽस्यास्ति = ऐकगविकः । अनेन इकण्प्र० → इक । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ ऐकशतिकः ]** एकं च तत् शतं च = एकशतम् । एकशतमस्यास्ति = ऐकशतिकः । अनेन इकण्प्र० → इक । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

---

卐 म० वृत्तौ - एका गौः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ ऐकसहस्रिकः ]** एकं च तत् सहस्रं च = एकसहस्रम् । एकसहस्रमस्यास्ति = ऐकसहस्रिकः । अनेन इकण्प्र० → इक । वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ एकद्रव्यवत्त्वात् ]** द्रव्यमस्यास्ति = द्रव्यवान् । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् । 'मावर्णान्तोपा०' (२।१।९४) म० → व० । द्रव्यवतो भावः = द्रव्यवत्त्वम् । 'भावे त्व-तल्' (७।१।५५) त्वप्र० । एकेन द्रव्यवत्त्वमेकद्रव्यवत्त्वम्, तस्मात् । 'ऊनार्थपूर्वाद्यैः' (३।१।६७) समासः ॥छ॥

## सर्वादेरिन् ॥ ७।२।५९ ॥

**[ सर्वादेः ]** सर्वश्चासौ आदिश्च, यद्वा सर्व आदिर्यस्य सः = सर्वादिः, तस्मात् ।

**[ इन् ]** इन् प्रथमा सि ।

**[ सर्वधनी ]** सर्वं धनं = सर्वधनम् । सर्वधनमस्यास्ति = सर्वधनी । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'इन्-हन्-पूषाऽर्यम्णः शिस्योः' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ सर्वबीजी ]** सर्वं बीजं = सर्वबीजम्, तदस्यास्तीति सर्वबीजी । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'इन्-हन्०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ सर्वकेशी नटः ]** सर्वे केशा अस्य सन्ति = सर्वकेशी नटः । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् । प्रथमा सि । 'इन्-हन्०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ॥छ॥

## प्राणिस्थादस्वाङ्गाद् द्वन्द्व-रुग्-निन्द्यात् ॥ ७।२।६० ॥

**[ प्राणिस्थात् ]** प्राणिनि तिष्ठतीति प्राणिस्थम्, तस्मात् ।

**[ अस्वाङ्गात् ]** स्वं च तद् अङ्गं च = स्वाङ्गम्, न स्वाङ्गमस्वाङ्गम्, तस्मात् ।

**[ द्वन्द्वरुग्निन्द्यात् ]** द्वन्द्वश्च रुग्(क्)च निन्द्यश्च = द्वन्द्वरुग्निन्द्यम्, तस्मात् ।

द्वन्द्व - **[ कटकवलयिनी ]** कटकानि च वलयानि च = कटकवलयानि । कटकवलयान्यस्य सन्ति = कटकवलयिनी । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'स्त्रियां नृतोऽस्वस्रादेर्ङीः' (२।४।१) ङी ।

**[ शङ्खनूपुरिणी ]** शङ्ख । अनुपरतो रवो यस्य यस्माद् वा तदनुपरतरवम्, तस्य पृषोदरादित्वात् नूपुरदेशः ।

'श्वशुर-कुकुन्दुर-दर्दुर-निचुर-प्रचुर-चिकुर-कुकुर-कुक्कुर-कुर्कुर-शर्कुर-नूपुर-निष्ठुर-विथुर-मद्गुर-वागुरादयः' (उणा० ४२६) इति निपातनाद्वा । शङ्खाश्च नूपुराणि च = शङ्खनूपुराणि । शङ्खनूपुराण्यस्या(ः) सन्ति = शङ्खनूपुरिणी । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'स्त्रियां नृतोऽस्वस्रादेर्ङीः' (२।४।१) ङी ।

रुग् - **[ कुष्ठी ]** कुष्ठोऽस्यास्ति = कुष्ठी । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'इन्-हन्०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ किलासी ]** किलासोऽस्यास्ति = किलासी । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'इन्-हन्०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

निन्द्य - **[ककुदावर्त्ती]** ककुदे आवर्त्तः - ककुदमावर्त्तयति वा । 'अच्' (५।१।४९) अच्प्र० → अ । 'णेरनिटि' (४।३।८३) णिच्लुक् । ककुदावर्त्तोऽस्यास्ति = ककुदावर्त्ती । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'इन्-हन्०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[काकतालुकी]** काक-तालु । काकस्य तालुनस्तुल्यः । 'तस्य तुल्ये कः संज्ञा-प्रतिकृत्योः' (७।१।१०८) कप्र० । काकतालुकं लाञ्छनविशेषे(षो)ऽस्यास्ति = काकतालुकी । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'इन्-हन्०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[पुष्पफलवान् वृक्षः]** पुष्पाणि च फलानि च = पुष्पफलानि । पुष्पफलान्यत्र सन्ति = पुष्पफलवान् वृक्षः । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् ।

**[स्तनकेशवती]** स्तनौ च केशाश्च = स्तनकेशम् । 'प्राणि-तूर्याङ्गाणाम्' (३।१।१३७) इति समाहारः । स्तनकेशमस्या अस्ति = स्तनकेशवती । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् । 'अधातूदृदितः' (२।४।२) ङी । 'मावर्णान्तोपा०' (२।१।९४) म० → व० ।

**[चित्रकललाटिकावती]** चित्रकं च ललाटिका च = चित्रकललाटिके । चित्रकललाटिके अस्याः स्तः = चित्रकललाटिकावती । 'तदस्याऽस्त्य०' (७।२।१) मतुप्र० → मत् । 'अधातूदृदितः' (२।४।२) ङी । 'मावर्णान्तोपा०' (२।१।९४) म० → व० ।

**[विपादिकावती]** विपादिका अस्या अस्ति = विपादिकावती । 'तदस्याऽस्त्य०' (७।२।१) मतुप्र० → मत् । 'अधातूदृदितः' (२।४।२) ङी । 'मावर्णान्तोपान्ताप०' (२।१।९४) म० → व० ।

**[काकतालुमती]** काकनिर्मितं तालु यस्य तत् । काकताल्वेव = काकतालुकम्, तदपि निन्द्यं तदस्या अस्ति = काकतालुमती । 'तदस्याऽस्त्य०' (७।२।१) मतुप्र० → मत् । 'अधातूदृदितः' (२।४।२) ङी ॥छ॥

## वाता-ऽतीसार-पिशाचात् कश्चान्तः ॥ ७।२।६१ ॥

**[वाताऽतीसारपिशाचात्]** वातश्च अतीसारश्च पिशाचश्च = वाताऽतीसारपिशाचम्, तस्मात् ।

**[कश्च]** क प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । च प्रथमा सि ।

**[अन्तः]** अन्त प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**वाता-ऽतीसारयो रुक्त्वात् पूर्वेणेन् सिद्धः कार्थमुपादानम् । पिशाचस्य तूभयार्थं-इन्प्रत्ययार्थं-कार्थं च इति भावः ।**

**[वातकी]** वातोऽस्यास्ति = वातकी । अनेन इन्प्र०-कश्चान्तः ।

**[अतीसारकी, अतिसारकी]** अति 'सृं गतौ' (२५) सृ । अतिसरणम् = अतीसारः । 'सर्तेः स्थिर-व्याधि-बल-मत्स्ये' (५।३।१७) घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् । 'घञ्युपसर्गस्य बहुलम्' (३।२।८६) दीर्घः । अतीसारोऽस्यास्ति = अतीसारकी । अनेन इन्प्र०-कश्चान्तः । 'एकदेशविकृतमनन्यवत्' (न्या० सं० वक्ष० (१) सूत्र(७)) इति न्यायात् अतिसारकी ।

**[पिशाचकी]** पिशाचोऽस्यास्ति = पिशाचकी । अनेन इन्प्र०-कश्चान्तः ॥छ॥

## पूरणाद् वयसि ॥ ७।२।६२ ॥

**[पूरणात्]** पूरण पञ्चमी ङसि ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ वयसि ]** वयस् सप्तमी ङि ।

**[ पञ्चमी बालकः ]** पञ्चन् । पञ्चानां पूरणः = पञ्चमः । 'नो मट्' (७।१।१५९) मट्प्र० → म । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् । पञ्चमो मासः संवत्सरो वाऽस्यास्तीति पञ्चमी बालकः । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'इन्-हन्०' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ दशमी करभः ]** दशन् । दशानां पूरणः = दशमः । 'नो मट्' (७।१।१५९) मट्प्र० → म । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् । दशमो मासः संवत्सरो वाऽस्यास्तीति दशमी करभः । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'इन्-हन्-पूषाऽर्यम्णः शिस्योः' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ॥छ॥

## सुखादेः ॥ ७।२।६३ ॥

**[ सुखादेः ]** सुखमादिर्यस्य तत् = सुखादि, तस्मात् ।

**[ सुखी ]** सुखमस्यास्ति = सुखी । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ दुःखी ]** दुःखमस्यास्ति = दुःखी । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

गणोऽत्र ॥छ॥

## मालायाः क्षेपे ॥ ७।२।६४ ॥

**[ मालायाः ]** माला पञ्चमी ङसि ।

**[ क्षेपे ]** क्षेप सप्तमी ङि ।

**[ माली, मालावान् ]** माला अस्यास्ति । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । एवम्-मालावान् । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् । 'मावर्णान्तोपान्ता०' (२।१।९४) म० → व० ।

मालाशब्दः शिखादिः, ततः क्षेपे मतुनिवृत्त्यर्थं वचनम् ॥छ॥

## धर्म-शील-वर्णान्तात् ॥ ७।२।६५ ॥

**[ धर्मशीलवर्णान्तात् ]** धर्मं च शीलं च वर्णश्च = धर्मशीलवर्णाः, धर्मशीलवर्णा अन्ते यस्य सः = धर्मशीलवर्णान्तः, तस्मात् ।

**[ मुनिधर्मी ]** मुनिधर्मोऽस्यास्ति = मुनिधर्मी । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि ।

**[ यतिशीली ]** यतिशीलमस्यास्ति = यतिशीली । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि ।

**[ ब्राह्मणवर्णी ]** ब्राह्मणस्य वर्णो जातिरस्यास्ति = ब्राह्मणवर्णी । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि ॥छ॥

## बाहूर्वादेर्बलात् ॥ ७।२।६६ ॥

**[ बाहूर्वादेः ]** बाहुश्च ऊरुश्च, ते आदी यस्य = बाहूर्वादिः, तस्मात् ।

**[ बलात् ]** बल पञ्चमी ङसि ।

**[ बाहुबली ]** बाहोर्बलं = बाहुबलम्, तदस्यास्ति = बाहुबली । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ ऊरुबली ]** ऊर्वोर्बलम् = ऊरुबलम्, तदस्यास्ति = ऊरुबली । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छ॥

## मन्-मा-ऽब्जादेर्नाम्नि ॥ ७।२।६७ ॥

**[ मन्माऽब्जादेः ]** मन् च मश्च अब्जश्च = मन्माऽब्जाः । मन्माऽब्जा आदयो यस्य सः = मन्माऽब्जादिः, तस्मात् ।

**[ नाम्नि ]** नामन् सप्तमी ङि ।

**[ दामिनी ]** 卐'दों अवखण्डने(छेदने)' (११४८) दो । 'आत् सन्ध्यक्षरस्य' (४।२।१) दा । द्यति-खण्डयति दुर्गन्धतामिति दाम । 'मन्' (उणा० ९११) इत्यनेन मन्प्र० । दाम अस्या अस्ति = दामिनी । अनेन इन्प्र० । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् । 'स्त्रियां नृतोऽस्वस्रादेर्ङीः' (२।४।१) ङी ।

**[ सामिनी ]** 'षोंच् अन्तकर्मणि' (११५०) षो । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सो । स्यति-अन्तंनयति पापमिति साम । 'स्यतेरी च वा' (उणा० ९१५) मन्प्र० । साम अस्यास्ति = सामिनी । अनेन इन्प्र० । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् । 'स्त्रियां नृतोऽस्वस्रादेर्ङीः' (२।४।१) ङी ।

**[ प्रथिमिनी ]** पृथु । पृथोर्भावः = प्रथिमा । 'पृथ्वादेरिमन् वा' (७।१।५८) इमन्प्र० । 'त्र्यन्त्यस्वरादेः' (७।४।४३) अन्त्यस्वरादिलोपः । 'पृथु-मृदु-भृश-कृश-दृढ-परिवृढस्य ऋतो रः' (७।४।३९) ऋकारस्य रत्वम् क्रियते । प्रथिमा अस्यामस्ति = प्रथिमिनी । अनेन इन्प्र० । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् । 'स्त्रियां नृतोऽस्व०' (२।४।१) ङी ।

**[ महिमिनी ]** महत् । महतो भावः = महिमा । 'पृथ्वादेरिमन् वा' (७।१।५८) इमन्प्र० । 'त्र्यन्त्यस्वरादेः' (७।४।४३) अत्लुक् । महिमा अस्यामस्ति = महिमिनी । अनेन इन्प्र० । 'स्त्रियां नृतोऽस्वस्रादेर्ङीः' (२।४।१) ङी ।

**[ वर्मिणी ]** वर्मन् । 'वर्म-सन्नाहोऽस्यामस्ति = वर्मिणी । अनेन इन्प्र० । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् । 'स्त्रियां०' (२।४।१) ङी ।

**[ कर्मिणी ]** कर्मन् । कर्माण्यस्यां सन्ति = कर्मिणी । अनेन इन्प्र० । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् । 'स्त्रियां०' (२।४।१) ङी ।

मान्ता - **[ प्रथमिनी ]** प्रथमं वयोऽस्यास्ति = प्रथमिनी । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'स्त्रियां नृतो०' (२।४।१) ङी ।

**[ भामिनी ]** भामः = क्रोधोऽस्यास्ति = भामिनी । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'स्त्रियां नृतोऽस्वस्रादेर्ङीः' (२।४।१) ङी ।

**[ कामिनी ]** कामोऽस्यास्ति = कामिनी । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'स्त्रियां नृतोऽस्व०' (२।४।१) ङी ।

**[ यामिनी ]** यामः-प्रहरोऽस्यामस्ति = यामिनी । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'स्त्रियां नृतोऽस्व०' (२।४।१) ङी ।

**[ सोमिनी ]** 'षुंगट् अभिषवे' (१२८६) षु । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सु । सुनोतीति सोमः । 'अर्तीरि-स्तु-सु-हु-सृ-घृ-धृ-शृ-क्षि-यक्षि-भा-वा-व्याधा-पाया-वलि-पदि-नीभ्यो मः' (उणा० ३३८) मप्र० । 'सोमोऽस्यामस्ति = सोमिनी । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'स्त्रियां नृतोऽस्व०' (२।४।१) ङी ।

---

卐 टि० दो अवखण्डने इति काशकृत्स्नक्षीरस्वामिनौ ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अब्जिन्यादयः कमलिनीवाचकाः, यवासिनी त्वौषधिः ।

अब्जादि - **[ अब्जिनी ]** अब्जमस्यास्ति = अब्जिनी । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'स्त्रियां नृतोऽस्व०' (२।४।१) ङी ।

**[ कमलिनी ]** कमलमस्यास्ति = कमलिनी । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'स्त्रियां नृतोऽस्वस्रादेर्ङीः' (२।४।१) ङी ।

**[ सरोरुहिणी ]** सरस् 'रुहं जन्मनि' (९८८) रुह् । सरसि रोहन्तीति सरोरुहाणि । 'मूलविभुजादयः' (५।१।१४४) कप्र० → अ । सरोरुहाणि अस्यामस्ति = सरोरुहिणी । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'स्त्रियां नृतोऽस्वस्रादेर्ङीः' (२।४।१) ङी ।

**[ सरोजिनी ]** सरोजानि अस्यामस्ति = सरोजिनी । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'स्त्रियां नृतोऽस्व०' (२।४।१) ङी ।

**[ अम्भोजिनी ]** अम्भोजानि अस्यामस्ति = अम्भोजिनी । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'स्त्रियां नृतोऽस्व०' (२।४।१) ङी ।

**[ राजीविनी ]** राजा अस्यास्ति = राजीवम् । 'मण्यादिभ्यः' (७।२।४४) वप्र० । राजीवमस्यास्ति = राजीविनी । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'स्त्रियां नृतोऽस्व०' (२।४।१) ङी ।

**[ अरविन्दिनी ]** अर 'विद्लृंती लाभे' (१३२२) विद् । 'विदिंप् विचारणे' (१४९७) विद् । अरं विन्दतीति विन्ते इति । 'नि-गवादेर्नाम्नि' (५।१।६१) शप्र० । 'रुधां स्वराच्श्नो नलुक् च' (३।४।८२) श्नप्र० → न । 'श्ना-ऽस्त्योर्लुक्' (४।२।९०) अलुक् । अरविन्दानि अस्यामस्ति = अरविन्दिनी । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'स्त्रियां नृतोऽस्व०' (२।४।१) ङी ।

**[ पङ्कजिनी ]** पङ्कजानि अस्यामस्ति = पङ्कजिनी । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'स्त्रियां नृतोऽस्व०' (२।४।१) ङी ।

**[ पुटकिनी ]** प(पु)टस्य तुल्यानि = पुटकानि । 'तस्य तुल्ये कः संज्ञा-प्रतिकृत्योः' (७।१।१०८) कप्र० । पुटकानि अस्यामस्ति = पुटकिनी । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'स्त्रियां नृतोऽस्वस्रादेर्ङीः' (२।४।१) ङी ।

**[ नालीकिनी ]** सौरभ्यं प्रति न अलीकं = नालीकम् । नालीकमस्यास्ति = नालीकिनी । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'स्त्रियां नृतोऽस्वस्रादेर्ङीः' (२।४।१) ङी ।

**[ मृणालिनी ]** मृणालमत्रास्ति = मृणालिनी । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'स्त्रियां०' (२।४।१) ङी ।

**[ बिसिनी ]** बिसमत्रास्ति = बिसिनी । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'स्त्रियां०' (२।४।१) ङी ।

**[ तामरसिनी ]** ताम[र]सानि अस्यां सन्ति । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'स्त्रियां नृतोऽस्वस्रादेर्ङीः' (२।४।१) ङी ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ यवासिनी ]** 'युक् मिश्रणे' (१०८०) यु । यौतीति यवासः । 'यु-वलिभ्यामासः' (उणा० ५७४) आसप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । यवासोऽस्यामस्ति = यवासिनी । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'स्त्रियां नृतोऽस्वस्रादेर्ङीः' (२।४।१) ङी ।

**[ सामवान् ]** साम-वेदोऽस्यास्ति = सामवान् । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् । 'मावर्णान्तोपा०' (२।१।९४) म० → वत्वम् ।

**[ सोमवान् ]** सोमोऽत्रास्ति = सोमवान् । 'तदस्याऽस्त्य०' (७।२।१) मतुप्र० → मत् । 'मावर्णान्तोपान्ता०' (२।१।९४) म० → वत्वम् ।

**[ अब्जवान् ]** अब्जान्यत्र सन्ति = अब्जवान् । 'तदस्याऽस्त्यस्मिन्निति०' (७।२।१) मतुप्र० → मत् । 'मावर्णान्तोपा०' (२।१।९४) म० → वत्वम् ॥छ॥

## हस्त-दन्त-कराज्जातौ ॥ ७।२।६८ ॥

**[ हस्तदन्तकरात् ]** हस्तश्च दन्तश्च करश्च = हस्तदन्तकरम्, तस्मात् ।

**[ जातौ ]** जाति सप्तमी ङि ।

**[ हस्ती, हस्तवान् नरः ]** हस्तोऽस्यास्ति = हस्ती । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम्-हस्तवान् नरः । 'तदस्याऽस्त्यस्मिन्निति०' (७।२।१) मतुप्र० → मत् । 'मावर्णान्तोपान्ता०' (२।१।९४) म० → वत्वम् ।

**[ दन्ती, दन्तवान् नरः ]** दन्तौ अस्य स्तः = दन्ती । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम्-दन्ता अस्य सन्ति = दन्तवान् नरः । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् । 'मावर्णान्तोपान्ता०' (२।१।९४) म० → वत्वम् ।

**[ करी, करवान् नरः ]** करोऽस्यास्ति = करी । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम्-करवान् नरः । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् । 'मावर्णान्तोपान्ता०' (२।१।९४) म० → वत्वम् ॥छ॥

## वर्णाद् ब्रह्मचारिणि ॥ ७।२।६९ ॥

**[ वर्णात् ]** वर्ण पञ्चमी ङसि ।

**[ ब्रह्मचारिणि ]** ब्रह्मन् 'चर भक्षणे च' (४१०) चर् । ब्रह्म चरतीत्येवंशीलः = ब्रह्मचारी । 'व्रता-ऽऽभीक्ष्ण्ये' (५।१।१५७) णिन्प्र० → इन् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः, तस्मिन् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ वर्णी ब्रह्मचारीत्यर्थः ]** वर्णो ब्रह्मचर्यमस्यास्ति = वर्णी । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । ब्रह्मचारीत्यर्थः ।

**[ त्रैवर्णिको वर्णी ]** त्रि-वर्ण । त्रयो वर्णास्त्रिवर्णाः, तेषु भवः = त्रैवर्णिको वर्णीत्युच्यते । 'अध्यात्मादिभ्य इकण्' (६।३।७८) इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । विधानसामर्थ्यादस्य न लुप् । 'प्रयोजनम्' (६।४।११७) इति वा इकण् अस्य च प्राग्जितीयत्वाभावात् न 'द्विगोरनपत्ये०' (६।१।२४) इति लुप् । स हि विद्याग्रहणार्थमुपनीतो ब्रह्म चरति न शूद्र इति ।

**[ वर्णवान् ]** वर्णोऽस्यास्ति = वर्णवान् । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् । 'मावर्णान्तोपान्तापञ्चम०' (२।१।९४) म० → वत्वम् ॥छ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## पुष्करादेर्देशे ॥ ७।२।७० ॥

[ **पुष्करादेः** ] पुष्कर आदिर्यस्य सः = पुष्करादिः, तस्मात् ।

[ **देशे** ] देश सप्तमी ङि ।

[ **पुष्करिणी** ] पुष्करं देशविशेषोऽस्यामस्ति = पुष्करिणी । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

[ **पद्मिनी** ] पद्मं देशविशेषोऽस्यामस्ति = पद्मिनी । अनेन इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

[ **पुष्करवान् हस्ती** ] पुष्करं करिकराग्रमस्यास्ति = पुष्करवान् हस्ती । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् । 'मावर्णान्तोपान्ता०' (२।१।९४) म० → वत्वम् ।

यवासशब्दोऽब्जादौ पुष्करादौ चाधीतस्तत्र देशो(शे) इदं सूत्रं प्रवर्त्तते, औषधौ तु पूर्वसूत्रमिति विवेकः ।

अत्र गणपाठात् कुमुदिनी इत्येव प्राप्नोति कथं मत्प्रत्ययो भवतीत्याह - यद्वा अयमर्थः अत्र 'नड-शादाद् वलः' (६।२।७५) इत्यनेन नड्वल-नड्वान्शब्दाभ्यां देश उच्यते, अतो देशे अभिधेये केन सूत्रेण प्रत्ययो भविष्यतीत्याशङ्कायामाह- [अत्रोत्तरं - 'नडकुमुद०' इत्यादिना चातुरर्थिकेन मतुना भविष्यति इति मध्यमवृत्तौ]

[ **कुमुद्वती सरसी** ] कुमुदान्यस्यां सन्ति । कुमुदैर्निवृत्ता । कुमुदानामदूरभवा । कुमुदानां निवासः = कुमुद्वती सरसी ।

[ **कुमुद्वान् ह्रदः** ] कुमुदान्यत्र सन्ति । कुमुदैर्निवृत्तम् । कुमुदानां निवासः । कुमुदानामदूरभवः = कुमुद्वान् ह्रदः ।

[ **नड्वान्, नड्वलम्** ] नडा अत्र सन्ति । नडैर्निवृत्तः । नडानां निवासः । नडानामदूरभवः = नड्वान् । 'नड-कुमुद-वेतस-महिषाड्डित्' (६।२।७४) डिद् मतुप्र० → मत् । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् । 'मावर्णान्तोपान्ता०' (२।१।९४) म० → वत्वम् । एवम्-नड्वलमिति 'नड-शादाद् वलः' (६।२।७५) डिद् वलप्र० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् ॥छ॥

## सूक्त-साम्नोरीयः ॥ ७।२।७१ ॥

[ **सूक्तसाम्नोः** ] सूक्तं च साम च = सूक्तसाम्नी, तयोः = सूक्तसाम्नोः । सप्तमी ओस् ।

[ **ईयः** ] ईय प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

[ **अच्छावाकीयम्** ] अच्छ 'वचंक् भाषणे' (१०९६) वच् । अच्छं वक्तीति अच्छावाकः । 'कर्मणोऽण्' (५।१।७२) अण्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । पृषोदरादित्वाद्दीर्घत्वम् । अच्छावाकशब्दोऽत्र सूक्तेऽस्ति = अच्छावाकीयम् । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

[ **मैत्रावरुणीयम्** ] मैत्रश्च वरुणश्च = मैत्रावरुणम् । 'वेदसहश्रुताऽवायुदेवतानाम्' (३।२।४१) आ । 'मैत्रावरुणशब्दोऽत्र सूत्रे(क्ते) अस्ति = मैत्रावरुणीयम् । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

[ **यज्ञायज्ञीयम्** ] यज्ञायज्ञशब्दोऽत्र साम्न्यस्ति = यज्ञायज्ञीयम् । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

[ **अशनापिपासीयम्** ] अशनं च पिपासा च = अशनापिपासा । 'वेदसहश्रुताऽवायुदेवतानाम्' (३।२।४१) आ । अशनापिपासाशब्दोऽत्र साम्न्यस्ति = अशनापिपासीयम् । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

[ **वारतन्तवीयं साम** ] वारतन्तुशब्दोऽत्र साम्न्यस्ति = वारतन्तवीयं साम । अनेन ईयप्र० । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ अस्यवामीयं सूक्तम् ]** अस्यवामशब्दोऽत्र सूत्रे(क्ते) अस्ति = अस्यवामीयं सूक्तम् । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ कयानश्चित्रीयं साम ]** कयानश्चित्रशब्दोऽत्र साम्न्यस्ति = कयानश्चित्रीयं साम । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

यत एवामी अखण्डा अनुकरणशब्दा अत एव तेनैवानुकार्येणार्थेनार्थवत्त्वान्नामत्वे प्रथमान्ततायां प्रथमान्तात् प्रत्यय उत्पन्नः, अन्यथा वाक्यत्वात् अस्यवामशब्दात् प्रथमा न स्यात् । सूक्त-साम्नी ग्रन्थविशेषौ ॥छ॥

## लुब् वाऽध्याया-ऽनुवाके ॥ ७।२।७२ ॥

**[ लुप् ]** लुप् प्रथमा सि ।

**[ वा ]** वा प्रथमा सि ।

**[ अध्यायाऽनुवाके ]** अध्यायश्च अनुवाकश्च = अध्यायाऽनुवाकम्, तस्मिन् । अनु 'ब्रूंग्क् व्यक्तायां वाचि' (११२५) ब्रू । अनुब्रवीति = अनुवाकः । 'अच्' (५।१।४९) अच्प्र० → अ । 'न्यङ्कूद्ग-मेघाऽऽदयः' (४।१।११२) अनुवाकनिपात्यते ।

अध्याया-ऽनुवाकयोरर्थान्तरत्वात् पूर्वेण न प्राप्नोतीत्याह-**अध्यायाऽनुवाकौ ग्रन्थविशेषौ ।**

**[ गर्दभाण्डः, गर्दभाण्डीयोऽध्यायोऽनुवाको वा ]** गर्दभाण्डशब्दोऽस्मिन्नध्यायेऽनुवाके वास्तीति गर्दभाण्डः, गर्दभाण्डीयोऽध्यायोऽनुवाको वा । अनेन ईयप्र० आनीयते-लुप्यते विकल्पेन ।

**[ दीर्घजीवितः, दीर्घजीवितीयः ]** दीर्घजीवितशब्दोऽस्मिन्नध्यायेऽनुवाके वास्तीति दीर्घजीवितः, दीर्घजीवितीयः । अनेन ईयप्र०-लुप् च विकल्पेन ।

**[ पलितस्तम्भः, पलितस्तम्भीयः ]** पलितस्तम्भशब्दोऽस्मिन्नध्यायेऽनुवाके वास्तीति पलितस्तम्भः, पलितस्तम्भीयः । अनेन ईयप्र०-लुप् च वा ।

**[ पलितः, पलितीयः ]** पलितशब्दोऽस्मिन्नध्यायेऽनुवाके वास्तीति पलितः, पलितीयः । अनेन ईयप्र० आनीयते-विकल्पेन लुप्यते च । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ स्तम्भः, स्तम्भीयः ]** स्तम्भशब्दोऽस्मिन्नध्यायेऽनुवाके वास्तीति स्तम्भः, स्तम्भीयः । अनेन ईयप्र० आनीयते-विकल्पेन लुप्यते च । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ उच्छिष्टः, उच्छिष्टीयः ]** उच्छिष्टशब्दोऽस्मिन्नध्यायेऽनुवाके वास्तीति उच्छिष्टः, उच्छिष्टीयः । अनेन ईयप्र० आनीयते-विकल्पेन लुप्यते च । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ द्रुमपुष्पः, द्रुमपुष्पीयः ]** द्रुमपुष्पशब्दोऽस्मिन्नध्यायेऽनुवाके वास्तीति द्रुमपुष्पः, द्रुमपुष्पीयः । अनेन ईयप्र० आनीयते-विकल्पेन लुप्यते च । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छ॥

## विमुक्तादेरण् ॥ ७।२।७३ ॥

**[ विमुक्तादेः ]** विमुक्त आदिर्यस्य सः = विमुक्तादिः, तस्मात् ।

**[ अण् ]** अण् प्रथमा सि ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ वैमुक्तः ]** विमुक्तशब्दोऽस्मिन्नध्यायेऽनुवाके वाऽस्ति = वैमुक्तः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ दैवासुरः ]** देवासुरशब्दोऽस्मिन्नध्यायेऽनुवाके वाऽस्ति = दैवासुरः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

गणोऽत्र ॥छ॥

## घोषदादेरकः ॥ ७।२।७४ ॥

**[ घोषदादेः ]** घोषत् आदिर्यस्य सः = घोषदादिः, तस्मात् ।

**[ अकः ]** अक प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ घोषदकः ]** घोषच्छब्दोऽस्मिन्नध्यायेऽनुवाके वाऽस्ति = घोषदकः । अनेन अकप्र० ।

**[ गोषदकः ]** गोषच्छब्दोऽस्मिन्नध्यायेऽनुवाके वाऽस्ति = गोषदकः । अनेन अकप्र० ।

**[ इषेत्वकः ]** इषेत्व(त्वा)शब्दोऽस्मिन्नध्यायेऽनुवाके वाऽस्ति = इषेत्वकः । अनेन अकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् ।

गणोऽत्र ॥छ॥

## प्रकारे जातीयर् ॥ ७।२।७५ ॥

**[ प्रकारे ]** प्रकार सप्तमी ङि ।

**[ जातीयर् ]** जातीयर् प्रथमा सि ।

**सामान्यस्य भिद्यमानस्य यो विशेषो विशेषान्तरानुप्रवृत्तः स प्रकारः ।**

**[ पटुजातीयः ]** पटुः प्रकारोऽस्य = पटुजातीयः । अनेन जातीयर्प्र० → जातीय ।

**[ मृदुजातीयः ]** मृदुः प्रकारोऽस्य = मृदुजातीयः । अनेन जातीयर्प्र० → जातीय ।

**[ यज्जातीयः ]** यत्प्रकारोऽस्य = यज्जातीयः । अनेन जातीयर्प्र० → जातीय ।

**[ तज्जातीयः ]** तत्प्रकारोऽस्य = तज्जातीयः । अनेन जातीयर्प्र० → जातीय ।

**[ नानाजातीयः ]** नानाभूतः प्रकारोऽस्य = नानाजातीयः । अनेन जातीयर्प्र० → जातीय ।

**[ एवंजातीयः ]** एवंभूतः प्रकारोऽस्य = एवंजातीयः । अनेन जातीयर्प्र० → जातीय ।

**[ यथाजातीयः ]** येन प्रकारेण = यथा । 'प्रकारे था' (७।२।१०२) थाप्र० । यथा प्रकारोऽस्य = यथाजातीयः । अनेन जातीयर्प्र० → जातीय ।

**[ तथाजातीयः ]** तेन प्रकारेण = तथा । 'प्रकारे था' (७।२।१०२) थाप्र० । तथा प्रकारोऽस्य = तथाजातीयः । अनेन जातीयर्प्र० → जातीय ।

**[ कथंजातीयः ]** केन प्रकारेण = कथम् । 'कथमित्थम्' (७।२।१०३) "कथम्" निपात्यते । कथं प्रकारोऽस्य = कथंजातीयः । अनेन जातीयर्प्र० → जातीय ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ इत्थंजातीयः ]** अनेन प्रकारेण = इत्थम् । 'कथमित्थम्' (७।२।१०३) इत्थम् निपात्यते । इत्थं प्रकारोऽस्य = इत्थंजातीयः । अनेन जातीयर्प्र० → जातीय ।

रित्करणं 'रिति' (३।२।५८) इत्यनेन सूत्रेण पुंवद्भावार्थः ॥छ॥

## कोऽण्वादेः ॥ ७।२।७६ ॥

**[ कोऽण्वादेः ]** क प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । अणुरादिर्यस्य सः = अण्वादिः, तस्मात् ।

**[ अणुकः पटः ]** अणुः प्रकारोऽस्य = अणुकः पटः । अनेन कप्र० ।

**[ स्थूलकः पटः ]** स्थूलः प्रकारोऽस्य = स्थूलकः पटः । अनेन कप्र० ।

**[ अणुका माषाः ]** अणुः प्रकार एषाम् = अणुकाः माषाः । अनेन कप्र० । जस् ।

**[ स्थूलका माषाः ]** स्थूलः प्रकार एषां = स्थूलकाः माषाः । अनेन कप्र० । जस् ।

**[ माषकं हिरण्यम् ]** माषः प्रकारोऽस्य तत् = माषकं हिरण्यम् । अनेन कप्र० ।

**[ इषुका ]** इषुः प्रकारोऽस्याः = इषुका । अनेन कप्र० । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ गोलिका ]** गोलिका इषुवत् धनुषा या क्षिप्यते । अनेन कप्र० । 'आत्' (२।४।१८) आप्प्र० → आ ।

गणोऽत्र ॥छ॥

## जीर्ण-गोमूत्रा-ऽवदात-सुरा-यव-कृष्णाच्छाल्याच्छादन-सुरा-ऽहि-व्रीहि-तिले ॥ ७।२।७७ ॥

**[ जीर्णगोमूत्राऽवदातसुरायवकृष्णात् ]** जीर्णं च गोमूत्रश्च अवदातश्च सुरा च यवश्च कृष्णश्च = जीर्णगोमूत्राऽवदातसुरायवकृष्णम्, तस्मात् ।

**[ शाल्याच्छादनसुराऽहिव्रीहितिले ]** शालिश्च आच्छादनं च सुरा च अहिश्च व्रीहिश्च तिलश्च = शाल्याच्छादनसुराऽहिव्रीहितिलम्, तस्मिन् ।

**[ जीर्णकाः शालयः ]** जीर्णः प्रकार एषां = जीर्णकाः शालयः । अनेन कप्र० । प्रथमा जस् ।

**[ गोमूत्रकमाच्छादनम् ]** गोमूत्रवर्ण(ः) प्रकारोऽस्य = गोमूत्रकमाच्छादनम् । अनेन कप्र० ।

**[ अवदातिका सुरा ]** अवदातः प्रकारोऽस्य = अवदातिका सुरा । अनेन कप्र० । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्-तत्-क्षिपकादीनाम्' (२।४।१११) इ ।

**[ सुरकोऽहिः ]** सुरावर्णः प्रकारोऽस्य = सुरकोऽहिः । अनेन कप्र० । 'ङ्यादीदूतः के' (२।४।१०४) ह्रस्वत्वम् ।

**[ यवका व्रीहयः ]** यवः प्रकार एषां = यवका व्रीहयः । अनेन कप्र० । प्रथमा जस् ।

**[ कृष्णकास्तिलाः ]** कृष्णः प्रकार एषां = कृष्णकास्तिलाः । अनेन कप्र० । प्रथमा जस् ॥छ॥

## भूतपूर्वे प्चरट् ॥ ७।२।७८ ॥

**[ भूतपूर्वे ]** भूतपूर्व सप्तमी ङि ।

**[ प्चरट् ]** प्चरट् प्रथमा सि ।

अतः परं प्रायः स्वार्थिकाः प्रत्ययाः । तत्रोपाधिः प्रकृतेर्विज्ञायते, स प्रत्ययस्य द्योत्यो भवति ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ आढ्यचरः ]** पूर्वं भूतः = भूतपूर्वः । भूतपूर्व आढ्यः = आढ्यचरः । अनेन प्चरट्प्र० → चर । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ दर्शनीयचरः ]** भूतपूर्वो दर्शनीयः = दर्शनीयचरः । अनेन प्चरट्प्र० → चर । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

टकारो ङ्यर्थः । पकारः पुंवद्भावार्थः । यथा-

**[ आढ्यचरी ]** आढ्या भूतपूर्वा = आढ्यचरी । अनेन प्चरट्प्र० → चर । 'क्यङ्-मानि पित्तद्धिते' (३।२।५०) पुंवद्भावः । 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

**[ दर्शनीयचरी ]** दर्शनीया भूतपूर्वा = दर्शनीयचरी । अनेन प्चरट्प्र० → चर । 'क्यङ्-मानि-पित्तद्धिते' (३।२।५०) पुंवद्भावः । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

भूतशब्दो वर्त्तमानेऽप्यस्ति । पूर्वशब्दो दिगादावपीति अतिक्रान्त-कालप्रतिपत्त्यर्थमुभयोरुपादानम् । प्रत्यासत्तेः शब्दप्रवृत्तिनिमित्तस्य भूतपूर्वत्वेऽयं प्रत्यय इतीह न भवति "अर्जुनो माहिष्मत्यां भूतपूर्वः" ।।छ।।

## गोष्ठादीनञ् ॥ ७।२।७९ ॥

**[ गोष्ठात् ]** गोष्ठ पञ्चमी ङसि ।

**[ ईनञ् ]** ईनञ् प्रथमा सि ।

**[ गौष्ठीनो देशः ]** गोष्ठ । गोष्ठो भूतपूर्वः = गौष्ठीनो देशः । अनेन ईनञ्प्र० → ईन । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।।छ।।

## षष्ठ्या रूप्य-प्चरट् ॥ ७।२।८० ॥

**[ षष्ठ्याः ]** षष्ठी पञ्चमी ङसि ।

**[ रूप्यप्चरट् ]** रूप्यश्च प्चरट् च = रूप्यप्चरट् । प्रथमा सि ।

**भूतपूर्व इतीह प्रत्ययार्थः ।**

**[ देवदत्तरूप्यो गौः, देवदत्तचरः ]** देवदत्तस्य भूतपूर्वः = देवदत्तरूप्यो गौः, देवदत्तचरः । अनेन रूप्यप्र०-प्चरट्प्र० → चर । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**पकार-टकारौ पुंवद्भाव-ङीप्रत्ययार्थौ ।**

**[ देवदत्तचरी ]** देवदत्ताया भूतपूर्वा = देवदत्तचरी । अनेन प्चरट्प्र० → चर । 'क्यङ्-मानि-पित्तद्धिते' (३।२।५०) पुंवत् । 'अणञेयेकण्०' (२।४।२०) ङी ।।छ।।

## व्याश्रये तसुः ॥ ७।२।८१ ॥

**[ व्याश्रये ]** वि-आङ्पूर्व० 'श्रिग् सेवायाम्' (८८३) श्रि । 'विविधमाश्रयणं व्याश्रयस्तस्मिन् । यद्वा-नानापक्षाश्रयो व्याश्रयस्तस्मिन् । 'भू-श्र्यदोऽल्' (५।३।२३) अल्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ तसुः ]** तसु प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**उकारः 'अथणत्स्वाद्या शसः' ( १।१।३२ ) इत्यत्र विशेषणार्थः ।**

**[ देवा अर्जुनतोऽभवन् ]** अर्जुनस्य पक्षे = अर्जुनतः । अनेन तसुप्र० → तस् । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[ आदित्यः कर्णतोऽभवत् ]** कर्णस्य पक्षे = कर्णतः । अनेन तसुप्र० → तस् ।

अर्जुन-कर्णयोर्विवदमानयोरर्जुनस्य पक्षे देवाः, कर्णस्य पक्षे आदित्योऽभवदित्यर्थः ।

**[ यत्तोऽभवत् ]** यस्य पक्षे = यत्तः । अनेन तसुप्र० → तस् । तसु(सोः) उकारानुबन्धत्वात् 'आ द्वेरः' (२।१।४१) इति न भवति ।

**[ तत्तोऽभवत् ]** तस्य पक्षे = तत्तः । अनेन तसुप्र० → तस् ।

**[ त्वत्तोऽभवत् ]** तव पक्षे = त्वत्तोऽभवत् । अनेन तसुप्र० → तस् ।

**[ मत्तोऽभवत् ]** मम पक्षे = मत्तोऽभवत् । अनेन तसुप्र० → तस् ।।छ।।

## रोगात् प्रतीकारे ॥ ७।२।८२ ॥

**[ रोगात् ]** रोग पञ्चमी ङसि ।

**[ प्रतीकारे ]** प्रतीकार सप्तमी ङि ।

**[ प्रवाहिकातः कुरु ]** प्र 'वहीं प्रापणे' (९९६) वह् । प्रवहणं = प्रवाहिका-प्रोह्यतेऽनयेति वा । 'नाम्नि पुंसि च' (५।३।१२१) णकप्र० → अक । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्-तत्-क्षिपकादीनाम्' (२।४।१११) इ । प्रवाहिकायाः प्रतीकारः = प्रवाहिकातः । अनेन तसुप्र० → तस् ।

**[ प्रच्छर्दिकातः कुरु ]** प्र 'छर्दण् वमने' (१६५९) छर्द् । प्रच्छर्दनं-प्रच्छर्द्यतेऽनयेति वा = प्रच्छर्दिका । 'नाम्नि पुंसि च' (५।३।१२१) णकप्र० → अक । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्०' (२।४।१११) इ । प्रच्छर्दिकायाः प्रतीकारः = प्रच्छर्दिकातः । अनेन तसुप्र० → तस् । अस्य रोगस्य चिकित्सां कुर्वित्यर्थः ।।छ।।

## पर्यभेः सर्वोभये ॥ ७।२।८३ ॥

**[ पर्यभेः ]** परिश्च अभिश्च = पर्यभिस्तस्मात् ।

**[ सर्वोभये ]** सर्वश्च उभयश्च = सर्वोभयम्, तस्मिन् ।

**[ परितः ]** परि - सर्वस्मात् = परितः । अनेन तसुप्र० → तस् । सर्वत इत्यर्थः ।

**[ अभितः ]** अभि - उभयस्मात् = अभितः । अनेन तसुप्र० → तस् । उभयत इत्यर्थः ।।छ।।

## आद्यादिभ्यः ॥ ७।२।८४ ॥

**[ आद्यादिभ्यः ]** आदिरादिर्येषां ते = आद्यादयः, तेभ्यः = आद्यादिभ्यः । पञ्चमी भ्यस् ।

**[ आदितः ]** आदौ आदेर्वा = आदितः ।

**[ मध्यतः ]** मध्ये = मध्यतः ।

**[ अन्ततः ]** अन्ते = अन्ततः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

[ **अग्रतः** ] अग्रे = अग्रतः ।

[ **वक्षस्तः** ] वक्षसि = वक्षस्तः ।

[ **पार्श्वतः** ] पार्श्वे = पार्श्वतः ।

[ **पृष्ठतः** ] पृष्ठे = पृष्ठतः ।

[ **मुखतः** ] मुखे = मुखतः ।

[ **सर्वतः** ] सर्वस्मिन् = सर्वतः ।

[ **विश्वतः** ] विश्वस्मिन् = विश्वतः ।

[ **उभयतः** ] उभयस्मिन् = उभयतः ।

[ **अन्यतः** ] अन्यस्मिन् = अन्यतः ।

[ **पूर्वतः** ] पूर्वस्मिन् = पूर्वतः ।

[ **एकतः** ] एकस्मिन् = एकतः ।

[ **इतः** ] इदम् । अस्मिन् = इतः । अनेन तसुप्र० → तस् । पृषोदरादित्वात् इनिपातः ।

[ **प्रमाणतः** ] प्रमाणेन प्रमाणाद्वा = प्रमाणतः ।

[ **पृष्ठतोऽर्कं सेवेत** ] पृष्ठेन = पृष्ठतः । अनेन तसुप्र० → तस् ।

[ **पार्श्वतः** ] पार्श्वेन = पार्श्वतः । अनेन तसुप्र० → तस् ।

[ **इतः** ] अनेन = इतः । अनेन तसुप्र० → तस् ।

[ **स्वरतो वर्णतो वा** ] स्वरेणः = स्वरतः वर्णतः । अनेन तसुप्र० → तस् ।

[ **शब्दतः** ] शब्देन = शब्दतः ।

[ **अर्थतः** ] अर्थेन = अर्थतः ।

[ **अभिधानतः** ] अभिधानेन = अभिधानतः ।

[ **यतः** ] येन यस्मिन् वा = यतः ।

[ **ततः** ] तेन तस्मिन् वा = ततः । अनेन तसुप्र० → तस् । पृषोदरादित्वात् दलुप् निपातः । 'आ द्वेरः' (२।१।४१) इति तु न तसादावित्यधिकारात् । अयं तु उदनुबन्धः ॥छा॥

## क्षेपा-ऽतिग्रहा-ऽव्यथेष्वकर्तुस्तृतीयायाः ॥ ७।२।८५ ॥

[ **क्षेपाऽतिग्रहाऽव्यथेषु** ] क्षेपश्च अतिग्रहश्च अव्यथश्च = क्षेपाऽतिग्रहाऽव्यथाः, तेषु ।

[ **अकर्तुः** ] न कर्त्ता = अकर्त्ता, तस्मात् ।

[ **तृतीयायाः** ] तृतीया पञ्चमी ङसि । 'आपो ङितां यै-यास्-यास्-याम्' (१।४।१७) ङसि० → यास्० ।

[ **वृत्ततः क्षिप्तः** ] वृत्तेन क्षिप्तः = वृत्ततः क्षिप्तः । वृत्तेन निन्दित इत्यर्थः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अतिक्रम्य ग्रहणमतिग्रहः - **[ वृत्ततोऽतिगृह्यते ]** वृत्तेनातिगृह्यते = वृत्ततोऽतिगृह्यते । साधुवृत्तोऽन्योऽनतिक्रम्य वृत्तेन गृह्यते साध्वाचार इति सम्भाव्यत इत्यर्थः । अतिशयेन वा ग्रहणमतिग्रहः । तत्रातिशयेन गृह्यत इत्यर्थः ।

अचलनमक्षोभणमव्यथा अभीतिर्वा - **[ वृत्ततो न व्यथते ]** वृत्तेन न व्यथते = वृत्ततो न व्यथते । अनेन तसुप्र० → तस् । वृत्तेन न चलति, न बिभेति चेत्यर्थः ॥छ॥

## पाप-हीयमानेन ॥ ७।२।८६ ॥

**[ पापहीयमानेन ]** पापं च हीयमानं च = पापहीयमानम्, तेन ।

**[ वृत्ततः पापः ]** वृत्तेन पापः = वृत्ततः पापः ।

**[ वृत्ततो हीयते ]** वृत्तेन हीयते = वृत्ततो हीयते ।

**[ शब्दतो हीनः, स्वरतो वर्णतो वा ]** शब्देन हीयते, स्वरेण हीयते = शब्दतः, स्वरतः । वर्णेन हीयते = वर्णतः । सर्वत्र अनेन तसुप्र० → तस् । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ॥छ॥

## प्रतिना पञ्चम्याः ॥ ७।२।८७ ॥

**[ प्रतिना ]** प्रति तृतीया टा । 'टः पुंसि ना' (१।४।२४) ना ।

**[ पञ्चम्याः ]** पञ्चमी पञ्चमी ङसि । 'स्त्रीदूतः' (१।४।२९) ङसि० → दास्० → आस्० ।

**[ अभिमन्युरर्जुनात् प्रति अभिमन्युरर्जुनतः प्रति ]** अभिमन्युरर्जुनात् प्रति = अभिमन्युरर्जुनतः प्रति । अनेन तसुप्र० → तस् । अर्जुनस्य प्रतिनिधिरित्यर्थः ।

**[ माषानस्मै तिलेभ्यः प्रति यच्छति तिलतः प्रति यच्छति ]** माषानस्मै तिलेभ्यः प्रति यच्छति तिलतः प्रति यच्छति । अनेन तसुप्र० तस् ।

## अहीय-रुहोऽपादाने ॥ ७।२।८८ ॥

**[ अहीयरुहः ]** अहीयश्च रुह् च = अहीयरुह्, तस्मात् ।

**[ अपादाने ]** अपादान सप्तमी ङि ।

**[ ग्रामादागच्छति, ग्रामत आगच्छति ]** ग्रामादागच्छति = ग्रामत आगच्छति । अनेन तसुप्र० → तस् ।

**[ चौराद्बिभेति, चौरतो बिभेति ]** चौराद्बिभेति = चौरतो बिभेति । अनेन तसुप्र० → तस् ।

**[ सार्थात् हीयते ]** 'ओहांक् त्यागे' (११३१) हा । जहाति सार्थो देवदत्तः स एवं विवक्षते नाहं जहामि किन्तु सार्थात् स्वयमेव हीयते देवदत्त इत्यर्थः ।

**[ भूमित उज्जिहीते ]** भूमेरुज्जिहीते = भूमितः । अनेन तसुप्र० → तस् । उज्जिहीते - उत्तिष्ठते इत्यर्थः ॥छ॥

## किमद्व्यादिसर्वाद्यवैपुल्यबहोः पित् तस् ॥ ७।२।८९ ॥

**[ किमद्व्यादिसर्वाद्यवैपुल्यबहोः ]** द्विरादिर्यस्य सः = द्व्यादिः, न द्व्यादिरद्व्यादिः, सर्व आदिर्यस्य सः = सर्वादिः, अद्व्यादिश्चासौ सर्वादिश्च = अद्व्यादिसर्वादिः, वैपुल्ये बहु = वैपुल्यबहु, न वैपुल्यबहु = अवैपुल्यबहु । किम् च अद्व्यादिसर्वादिश्च अवैपुल्यबहु च = किमद्व्यादिसर्वाद्यवैपुल्यबहु, तस्मात् ।

**[ पित् ]** प् इदनुबन्धो यस्य सः = पित् । प्रथमा सि ।

**[ तस् ]** तस् प्रथमा सि ।

पञ्चम्या इत्यनुवर्त्तते ।

**[ कुतः ]** किम् । कस्मात् = कुतः । अनेन तस्प्र० । 'इतोऽतः कुतः' (७।२।९०) किम्० → कु० ।

**[ सर्वतः ]** सर्वस्मात् = सर्वतः । अनेन तस्प्र० ।

**[ विश्वतः ]** विश्वस्मात् = विश्वतः । अनेन तस्प्र० ।

**[ यतः ]** यस्मात् = यतः । अनेन तस्प्र० । 'आद्वेरः' (२।१।४२) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् ।

**[ ततः ]** तस्मात् = ततः । अनेन तस्प्र० । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् ।

**[ बहुतः ]** बहुभ्यः = बहुतः । अनेन तस्प्र० ।

किमः सर्वादित्वेऽपि द्व्यादिवर्जनान्न प्राप्नोतीति पृथगुपादानम् ।

**[ द्वितः ]** द्वाभ्याम् = द्वितः ।

**[ त्वत्तः ]** त्वत् = त्वत्तः ।

**[ मत्तः ]** मत् = मत्तः ।

**[ युष्मत्तः ]** युष्मत् = युष्मत्तः ।

**[ अस्मत्तः ]** अस्मत् = अस्मत्तः । सर्वत्र 'अहीय-रुहोऽपादाने' (७।२।८८) इत्यनेन तसुप्र० → तस् ।

अनेन हि तस्विधाने 'आ द्वेरः' (२।१।४१) इत्यत्वं स्यात् ।

**पित्करणं पुंवद्भावार्थम् ।**

**[ बहुतः ]** बहु । 'स्वरादुतो गुणादखरोः' (२।४।३५) ङी । बह्वीभ्यः = बहुतः । अनेन तस्प्र० । 'क्यङ्-मानि-पित्तद्धिते' (३।२।५०) पुंवत्-ङीगता इत्यर्थः ।

**न तु अपादान एव विहितपञ्चम्यन्तात्, किन्तु पञ्चम्यन्तमात्रादयं विधिः ।**

**[ सर्वतो हीयते ]** सर्वस्मात् = सर्वतो हीयते । अत्र अपादाने पञ्चमी ।

**[ सर्वतो रोहति ]** सर्वस्मात् = सर्वतो रोहति ।

**[ सर्वतो हेतोः ]** सर्वस्मात् = सर्वतो हेतोः । वाक्ये 'सर्वादेः सर्वाः' (२।१।११९) पञ्चमी ।

**[ सर्वतः पूर्वम् ]** सर्वस्मात् = सर्वतः पूर्वम् । 'प्रभृत्यन्यार्थ-दिक्शब्द-बहिरारादितरैः' (२।२।७५) पञ्चमी । सर्वत्र अनेन तस्प्र० । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।।छ।।

## इतोऽतः-कुतः ।। ७।२।९० ।।

**[ इतोऽतःकुतः ]** इतस् च अतस् च कुतस् च = ते । जस् । सूत्रत्वात् (लोपः) ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[इतः]** इदम् । अस्मात् = इतः । अनेन तस्प्र०-इदम्स्थाने "इ"निपातः । इदम् । कुत्सितात् अल्पात् अज्ञातात् अस्मात् = इमकस्मात् । 'लोकात्' (१।१।३) "अम्" विश्लेषियइ । 'त्यादि-सर्वादेः स्वरेष्वन्त्यात् पूर्वोऽक्' (७।३।२९) अक्प्र० । 'दो मः स्यादौ' (२।१।३९) द० → म० । 'सर्वादेः स्मै-स्मात्(तौ)' (१।४।७) ङसिस्थाने "स्मात्"आदेशे वाक्यसाधनेयं इमकस्मात् = इतः । अनेन तस्प्र०-इमकस्थाने "इ"आदेशश्च ।

**[अतः]** एतद् । एतस्मात् = अतः । अनेन तस्प्र०-एतद्स्थाने "अ"देशश्च । कुत्सित एषः = एतकस्मात् । 'लोकात्' (१।१।३) "अद्"विश्लेषियइ । 'त्यादि-सर्वादेः०' (७।३।२९) अक्प्र० । एतकस्मात् = अतः । अनेन तस्प्र०-एतकस्थाने "अ"देशश्च ।

**[कुतः]** किम् । कस्मात् = कुतः । अनेन तस्प्र०-किम्स्थाने "कु"देशश्च ।

इह पञ्चम्या इति नानुवर्त्तते । लक्षणान्तरेण तसि-तसौ वा सिद्धे आदेशमात्रं विधीयते । तेन-

**[इतो भवान्]** इदम् । अयं भवान् । 'भवत्वायुष्मद्-दीर्घायुर्देवानांप्रियैकार्थात्' (७।२।९१) तस्प्र० । अनेन "इ"देशः ।

**[अतो भवान्]** एतद् । एष भवान् । 'भवत्वायुष्मद्-दीर्घायुर्देवानांप्रियैकार्थात्' (७।२।९१) तस्प्र० । अनेन "अ"देशः ।

**[इत आस्यताम्]** इदम् । अस्मिन् = इतः । 'आद्यादिभ्यः' (७।२।८४) तसुप्र० → तस् । 'आसिक् उपवेशने' (१११९) आस् । पञ्चमी ताम् । 'क्यः शिति' (३।४।७०) क्यप्र० → य ।।छ।।

## भवत्वायुष्मद्-दीर्घायुर्देवानांप्रियैकार्थात् ॥ ७।२।९१ ॥

**[भवत्वायुष्मद्दीर्घायुर्देवानांप्रियैकार्थात्]** भवतुश्च आयुष्मांश्च दीर्घायुश्च देवानांप्रियश्च = भवत्वायुष्मद्दीर्घायुर्देवानांप्रियाः । भवत्वायुष्मद्दीर्घायुर्देवानांप्रियैः एकार्थं = भवत्वायुष्मद्दीर्घायुर्देवानांप्रियैकार्थम्, तस्मात् ।

**[स भवान्, ततो भवान्]** तद् मण्ड्यते । स भवान्, ततः ।

**[तौ भवन्तौ, ततो भवन्तौ]** तौ भवन्तौ, ततः ।

**[ते भवन्तः, ततो भवन्तः]** ते भवन्तः, ततः ।

**[तं भवन्तम्, ततो भवन्तम्]** तं भवन्तम्, ततः ।

**[तेन भवता, ततो भवता]** तेन भवता, ततः ।

**[तस्मै भवते, ततो भवते]** तस्मै भवते, ततः ।

**[तस्माद्भवतः, ततो भवतः]** तस्माद् भवतः, ततः ।

**[तस्य भवतः, ततो भवतः]** तस्य भवतः, ततः ।

卐**[तस्मिन् भवति, ततो भवति]** तस्मिन् भवति, ततः । अनेन तस्प्र०-सर्वत्र ।

**[अयं भवान्, इतो भवान्]** इदम् । अयं भवान्, इतः । अनेन तस्प्र० । 'इतोऽतः कुतः' (७।२।९०) "इ"देशश्च ।

**[को भवान्, कुतो भवान्]** किम् । कस्मात् = कुतः । अनेन तस्प्र० । 'इतोऽतः कुतः' (७।२।९०) "कु"देशश्च ।

---

卐 इदमुदाहरणं बृहद्वृत्तौ नास्ति ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ स आयुष्मान्, तत आयुष्मान् ]** स आयुष्मान्, ततः ।

**[ स दीर्घायुः, ततो दीर्घायुः ]** स दीर्घायुः, ततः ।

**[ स देवानांप्रियः, ततो देवानांप्रियः ]** स देवानांप्रियः, ततः ।

**[ अयमायुष्मान्, इत आयुष्मान् ]** अयमायुष्मान्, इतः । अनेन तसूप्र० । 'इतोऽतःकुतः' (७।२।९०) "इ"देशः ।

**[ क आयुष्मान्, कुत आयुष्मान् ]** क आयुष्मान्, कुतः । अनेन तसूप्र० । 'इतोऽतःकुतः' (७।२।९०) "कु"देशः ।

**भवत्वित्युकारः, सर्वादिपरिग्रहार्थः, तेन मतुशत्रन्तव्युदासः** ।।छा।

## त्रप् च ॥ ७।२।९२ ॥

**[ त्रप् ]** त्रप् प्रथमा सि ।

**[ च ]** च प्रथमा सि ।

**[ स भवान्, तत्र भवान् ]** स भवान्, तत्र ।

**[ तौ भवन्तौ, तत्र भवन्तौ ]** तौ भवन्तौ, तत्र ।

**[ ते भवन्तः, तत्र भवन्तः ]** ते भवन्तः, तत्र ।

**[ तं भवन्तम्, तत्र भवन्तम् ]** तं भवन्तम्, तत्र ।

**[ तेन भवता, तत्र भवता ]** तेन भवता, तत्र ।

**[ तस्मै भवते, तत्र भवते ]** तस्मै भवते, तत्र ।

**[ तस्माद्भवतः, तत्र भवतः ]** तस्माद् भवतः, तत्र ।

**[ तस्य भवतः, तत्र भवतः ]** तस्य भवतः, तत्र ।

**[ तस्मिन् भवति, तत्र भवति ]** तस्मिन् भवति, तत्र । सर्वत्र अनेन त्रपूप्र० ।

**योगविभागश्चकारेण पुनस्तस्विधानार्थः, तेन सप्तम्यन्तादपि तस् भवति ।**

**[ ततो भवति, तत्र भवति ]** तस्मिन् भवति = ततो भवति, तत्र भवति । अनेन तस्-त्रप् च प्रत्ययः । अन्यथा हि 'ततः सप्तम्याः' (७।२।९४) इति परत्वात् त्रबेव स्यात् ।

केचित्तु भवच्छब्दस्यामन्त्रणे सौ भो इत्यादेशं कुर्वन्ति-

**[ ततो भोः, तत्र भोः ]** भवत् आमन्त्रणे सि । तन्मते भवच्छब्दस्य स्थाने भोस् इत्यस्य सिद्धत्वात् ।

केचित्तु भवदाद्ययोगेऽपि त्रप्-तसाविच्छन्ति-

**[ क्व गमिष्यसि ]** किम् । कस्मिन् गमिष्यसि = क्व । तन्मते अनेनैव त्रपूप्र० । 'क्व-कुत्रा-ऽत्रेह' (७।२।९३) किम्स्थाने क्व-त्रप्स्थाने अ० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । अग्रे लिखितं वाक्यं ज्ञेयं मूलप्रतौ ।।छा।

## क्व-कुत्रा-ऽत्रेह ॥ ७।२।९३ ॥

**[ क्वकुत्राऽत्रेह ]** क्वश्च कुत्रश्च अत्रश्च इहश्च = क्वकुत्राऽत्रेह । प्रथमा सि । सूत्रत्वात् (लोपः) ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ क्व ]** किम् । कस्मिन् = क्व । 'सप्तम्याः' (७।२।९४) त्रप्प्र० । अनेन किमः क्वादेशः-त्रपश्च अकारः ।

**[ कुत्र ]** किम् । कस्मिन् = कुत्र । 'सप्तम्याः' (७।२।९४) त्रप्प्र०-किमः "कु"देशश्च ।

**[ अत्र ]** एतद् । एतस्मिन् = अत्र । 'सप्तम्याः' (७।२।९४) त्रप्प्र० । अनेन एतद्स्थाने "अ" । कुत्सितोऽल्पोऽज्ञातो वा एतस्मिन् = एतकस्मिन् । 'त्यादि-सर्वादेः स्वरेष्वान्त्यात् पूर्वोऽक्' (७।३।२९) अक् । इयं वाक्यनिष्पत्तिः । एतकस्मिन् = अत्र । 'सप्तम्याः' (७।२।९४) त्रप्प्र० → त्र । अनेन एतकस्थाने अ० ।

**[ इह ]** इदम् । अस्मिन् = इह । 'सप्तम्याः' (७।२।९४) त्रप्प्र० । अनेन इदम्स्थाने इकारादेशः-त्रपश्च हादेशः । इमकस्मिन् = इह । 'सप्तम्याः' (७।२।९४) त्रप्प्र० । अनेन इमकस्थाने इ-त्रपश्च हादेशः ।

**[ क्व भवान्, कुत्र भवान् ]** को भवान् = क्व-कुत्र भवान् ।

**[ अत्र भवान्, इह भवान् ]** एषो भवान् = अत्र-अयं भवान्, इह ।

**[ क्वायुष्मान्, कुत्रायुष्मान् ]** क आयुष्मान् = क्व-कुत्रायुष्मान् ।

**[ अत्रायुष्मान्, इहायुष्मान् ]** एष आयुष्मान् = अत्रायुष्मान्, अयमायुष्मान् = इहायुष्मान् ।

एवमग्रेऽपि अनेन पूर्ववन्निपात्यते ॥छ॥

## सप्तम्याः ॥ ७।२।९४ ॥

**[ सप्तम्याः ]** सप्तमी पञ्चमी ङसि । 'स्त्रीदूतः' (१।४।२९) ङसि० → दास्० → आस्० ।

**[ कुत्र ]** किम् । कस्मिन् = कुत्र । अनेन त्रप्प्र० । 'क्व-कुत्रा-ऽत्रेह' (७।२।९३) किमः स्थाने "कु"देशः ।

**[ सर्वत्र ]** सर्वस्मिन् = सर्वत्र । अनेन त्रप्प्र० → त्र ।

**[ तत्र ]** तद् । तस्मिन् = तत्र । अनेन त्रप्प्र० → त्र । 'आ द्वेरः' (२।१।४२) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् ।

**[ बहुत्र ]** बहुषु = बहुत्र । अनेन त्रप्प्र० → त्र ।

**पकारः पुंवद्भावार्थः-**

**[ बहुत्र ]** बहु 'स्वरादुतो गुणादखरोः' (२।४।३५) ङी । बह्वीषु = बहुत्र । अनेन त्रप्प्र० → त्र । 'क्यङ्-मानि-पित्तद्धिते' (३।२।५०) पुंवत् ॥छ॥

## किम्-यत्-तत्-सर्वैका-ऽन्यात् काले दा ॥ ७।२।९५ ॥

**[ किम्यत्तत्सर्वैकाऽन्यात् ]** किम् च यच्च तच्च सर्वश्च एकश्च अन्यश्च = किम्यत्तत्सर्वैकाऽन्यत्, तस्मात् ।

**[ काले ]** काल सप्तमी ङि ।

**[ दा ]** दा प्रथमा सि । सूत्रत्वात् सिलुप् ।

**[ कदा ]** कस्मिन् काले = कदा । अनेन दाप्र० । 'किमः कस्तसादौ च' (२।१।४०) किम्० → क० ।

**[ यदा ]** यस्मिन् काले = यदा । अनेन दाप्र० । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ तदा ]** तस्मिन् काले = तदा । अनेन दाप्र० । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् ।

**[ सर्वदा ]** सर्वस्मिन् काले = सर्वदा । अनेन दाप्र० ।

**[ एकदा ]** एकस्मिन् काले = एकदा । अनेन दाप्र० ।

**[ अन्यदा ]** अन्यस्मिन् काले = अन्यदा । अनेन दाप्र० ।

**[ क्व देशे ]** कस्मिन् = क्व । 'क्व-कुत्रा-ऽत्रेह' (७।२।९३) "क्व"निपात्यते ॥छ॥

## सदा-ऽधुनेदानीं-तदानीमेतर्हि ॥ ७।२।९६ ॥

**[ सदाऽधुनेदानींतदानीमेतर्हि ]** सदा च अधुना च इदानीं च तदानीं च एतर्हिश्च = सदाऽधुनेदानींतदानीमेतर्हि । प्रथमा सि । सूत्रत्वात् (लोपः) ।

**[ सदा, सर्वदा ]** सर्वस्मिन् काले = सदा । अनेन दाप्र०-सर्वशब्दस्य सभावो निपात्यते । सर्वदेति पूर्वेण ।

**[ अधुना ]** अस्मिन् काले = अधुना । अनेन धुनाप्र०-इदम्स्थाने अकारादेशश्च निपात्यते ।

**[ इदानीम् ]** अस्मिन् काले = इदानीम् । अनेन दानीम्प्र०-इदम्स्थाने इकारादेशश्च निपात्यते ।

**[ तदानीम् ]** तस्मिन् काले = तदानीम् । अनेन दानीम्प्र० । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् ।

**[ एतर्हि ]** अस्मिन् काले = एतर्हि । अनेन र्हिप्र०-इदम्स्थाने एतदेशश्च निपात्यते ॥छ॥

## सद्यो-ऽद्य-परेद्यव्यह्नि ॥ ७।२।९७ ॥

**[ सद्योऽद्यपरेद्यवि ]** सद्यस् च अद्यश्च परेद्यविश्च = सद्योऽद्यपरेद्यवि । प्रथमा जस् । सूत्रत्वात् (लोपः) ।

**[ अह्नि ]** अहन् सप्तमी ङि ।

**[ सद्यः ]** समानेऽह्नि = सद्यः । अनेन द्यस्प्र०-समानस्य च सभावो निपात्यते ।

**[ अद्य ]** अस्मिन्नहनि = अद्य । अनेन द्यप्र०-इदम्शब्दस्य अकारादेशश्च निपात्यते ।

**[ परेद्यवि ]** परस्मिन्नहनि = परेद्यवि । अनेन एद्यविप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छ॥

## पूर्वा-ऽपरा-ऽधरोत्तरा-ऽन्या-ऽन्यतरेतरादेद्युस् ॥ ७।२।९८ ॥

**[ पूर्वाऽपराऽधरोत्तराऽन्याऽन्यतरेतरात् ]** पूर्वश्च अपरश्च अधरश्च उत्तरश्च अन्यश्च अन्यतरश्च इतरश्च = पूर्वाऽपराऽधरोत्तराऽन्याऽन्यतरेतरम्, तस्मात् ।

**[ एद्युस् ]** एद्युस् प्रथमा सि । 'दीर्घङ्याब्-व्यञ्जनात् सेः' (१।४।४५) सिलुक् ।

**[ पूर्वेद्युः ]** पूर्वस्मिन्नहनि = पूर्वेद्युः । अनेन एद्युसप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[ अपरेद्युः ]** अपरस्मिन्नहनि = अपरेद्युः । अनेन एद्युसप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ अधरेद्युः ]** अधरस्मिन्नहनि = अधरेद्युः । अनेन एद्युसप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[ उत्तरेद्युः ]** उत्तरस्मिन्नहनि = उत्तरेद्युः । अनेन एद्युसप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[ अन्येद्युः ]** अन्यस्मिन्नहनि = अन्येद्युः । अनेन एद्युसप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[ अन्यतरेद्युः ]** अन्यतरस्मिन्नहनि = अन्यतरेद्युः । अनेन एद्युसप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[ इतरेद्युः ]** इतरस्मिन्नहनि = इतरेद्युः । अनेन एद्युसप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ॥छ॥

## उभयाद् द्युस् च ॥ ७।२।९९ ॥

**[ उभयात् ]** उभय पञ्चमी ङसि ।

**[ द्युस् ]** द्युस् प्रथमा सि ।

**[ च ]** च प्रथमा सि ।

**[ उभयद्युः, उभयेद्युः ]** उभयस्मिन्नहनि = उभयद्युः, उभयेद्युः । अनेन द्युस्-एद्युसप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छ॥

## ऐषमः-परुत्-परारि वर्षे ॥ ७।२।१०० ॥

**[ ऐषमःपरुत्परारि ]** ऐषमश्च परुच्च परारिश्च = ऐषमःपरुत्परारि ।

**[ वर्षे ]** वर्ष सप्तमी ङि ।

**[ ऐषमः ]** अस्मिन् संवत्सरे = ऐषमः । अनेन समसिणप्र० → समस्-इदम्स्थाने "इ"देशश्च निपात्यते । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः ऐ । 'नाम्यन्तस्था-कवर्गात्०' (२।३।१५) षत्वम् ।

इमकस्मिन् = ऐषमः । अनेन समसिणप्र० → समस्-इमकशब्दस्य "इ"देशश्च निपात्यते । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः ऐ । 'नाम्यन्तस्था-कवर्गात्०' (२।३।१५) षत्वम् ।

**[ परुत् ]** पूर्वस्मिन् परस्मिन् वा संवत्सरे = परुत् । अनेन उत्प्र०-पूर्व-परयोः परादेशश्च निपात्यते ।

**[ परारि ]** पूर्वतरे परतरे वा संवत्सरे = परारि । अनेन आरिप्र०-पूर्वतरस्य परतरस्य वा परदेशश्च निपात्यते ॥छ॥

## अनद्यतने र्हिः ॥ ७।२।१०१ ॥

**[ अनद्यतने ]** न अद्यतनमनद्यतनम्, तस्मिन् । 'अन् स्वरे' (३।२।१२९) अन् ।

**[ र्हिः ]** र्हि प्रथमा सि ।

**[ कर्हि ]** कस्मिन्ननद्यतने काले = कर्हि । अनेन र्हिप्र० । 'किमः कस्तसादौ च' (२।१।४०) किम्० → क० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ यर्हि ]** यस्मिन्ननद्यतने काले = यर्हि । अनेन र्हिप्र० । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् ।

**[ तर्हि ]** तस्मिन्ननद्यतने काले = तर्हि । अनेन र्हिप्र० । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् ।

**[ अन्यर्हि ]** अन्यस्मिन्ननद्यतने काले = अन्यर्हि । अनेन र्हिप्र० ।

**[ एतर्हि ]** एतस्मिन् काले = एतर्हि । अनेन र्हिप्र० । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् ।

एतदः साकस्य इदमस्तु अनेन नेष्यते ।

**[ अमुर्हि ]** अदस् । अमुष्मिन् काले = अमुर्हि । अनेन र्हिप्र० । 'आ द्वेरः' (२।१।४१) स० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् । 'मोऽवर्णस्य' (२।१।४५) द० → म० । 'मादुवर्णोऽनु' (२।१।४७) अ० → उ० ।

**[ बहुर्हि ]** बहुषु कालेषु = बहुर्हि । अनेन र्हिप्र० ।

**[ यत्र ]** यस्मिन्ननद्यतने भोजने = यत्र । 'सप्तम्याः' (७।२।९४) त्रप्प्र० → त्र० ।

**[ यदा ]** यस्मिन् काले = यदा । 'किम्-यत्-तत्-सर्वैका-ऽन्यात् काले दा' (७।२।९५) दाप्र० । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् ।

**[ कदा ]** कस्मिन् काले = कदा । 'किम्-यत्-तत्-सर्वैका-ऽन्यात् काले दा' (७।२।९५) दाप्र० ।

**[ यदा ]** यस्मिन् काले = यदा । 'किम्-यत्-तत्-सर्वैका-ऽन्यात् काले दा' (७।२।९५) दाप्र० । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् ।

**[ तदा ]** तस्मिन् काले = तदा । 'किम्-यत्-तत्-सर्वैका-ऽन्यात् काले दा' (७।२।९५) दाप्र० । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् ।

**[ तदानीम् ]** तस्मिन् काले = तदानीम् । 'सदा-ऽधुनेदानीं-तदानीमेतर्हि' (७।२।९६) दानीम्प्र० । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् ।

**[ अन्यदा ]** अन्यस्मिन् काले = अन्यदा । 'किम्-यत्-तत्-सर्वैका-ऽन्यात् काले दा' (७।२।९५) दाप्र० ।

**[ अमुत्र काले ]** अमुष्मिन् = अ(मु)त्र काले । 'सप्तम्याः' (७।२।९४) त्रप्प्र० → त्र । शेषं पूर्ववत् । अत्र पश्चात् काले इत्यनेन सम्बन्धः ॥छा॥

## प्रकारे था ॥ ७।२।१०२ ॥

**[ प्रकारे ]** प्रकार सप्तमी ङि ।

**[ था ]** था प्रथमा सि ।

सप्तम्या इति निवृत्तम् । इष्टितो ह्यधिकाराणां प्रवृत्तिर्निवृत्तिर्वा यथाविभवं(सम्भवं) विभक्तिः ।

**सामान्यस्य भिद्यमानस्य भेदान्तरानुप्रवृत्तो भेदः प्रकारः ।**

**[ सर्वथा ]** सर्वेण प्रकारेण = सर्वथा । अनेन थाप्र० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ यथा ]** येन प्रकारेण = यथा । अनेन थाप्र० । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् ।

**[ तथा ]** तेन प्रकारेण = तथा । अनेन थाप्र० । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् ।

**[ उभयथा ]** उभयेन प्रकारेण = उभयथा । अनेन थाप्र० ।

**[ अन्यथा ]** अन्येन प्रकारेण = अन्यथा । अनेन थाप्र० ।

**[ अपरथा ]** अपरेण प्रकारेण = अपरथा । अनेन थाप्र० ।

**[ इतरथा ]** इतरेण प्रकारेण = इतरथा । अनेन थाप्र० ।

बहोस्तु परत्वात् 'संख्याया धा' (७।२।१०४) इत्यनेन धाप्र० भवति ॥छ॥

### कथमित्थम् ॥ ७।२।१०३ ॥

**[ कथमित्थम् ]** कथम् च इत्थम् च = कथमित्थम् ।

**[ कथम् ]** केन प्रकारेण = कथम् । 'प्रकारे था' (७।२।१०२) इत्यस्य प्राप्तौ अनेन थम्प्र०-निपात्यते ।

**[ इत्थम् ]** अनेन एतेन वा प्रकारेण = इत्थम् । अनेन थम्प्र०-इदम्-एतदश्च "इत्"देशश्च निपात्यते ॥छ॥

### संख्याया धा ॥ ७।२।१०४ ॥

**[ संख्यायाः ]** संख्या पञ्चमी ङसि ।

**[ धा ]** धा प्रथमा सि ।

**[ एकधा ]** एकेन प्रकारेण = एकधा ।

**[ द्विधा ]** द्वाभ्यां प्रकाराभ्यां = द्विधा ।

**[ त्रिधा ]** त्रिभिः प्रकारैः = त्रिधा ।

**[ चतुर्धा ]** चतुर्भिः प्रकारैः = चतुर्धा ।

**[ पञ्चधा ]** पञ्चभिः प्रकारैः = पञ्चधा ।

**[ बहुधा ]** बहुभिः प्रकारैः = बहुधा ।

**[ गणधा ]** गणेन प्रकारेण = गणधा ।

**[ कतिधा ]** कतिभिः प्रकारेण(रैः) = कतिधा ।

**[ तावद्धा ]** तावद्भिः प्रकारैः = तावद्धा । अनेन सर्वत्र धाप्र० ॥छ॥

### विचाले च ॥ ७।२।१०५ ॥

**[ विचाले ]** विचलनं = विचालः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः, तस्मिन् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

[ **च** ] च प्रथमा सि ।

**द्रव्यस्य पूर्वसंख्यायाः प्रच्युतिः संख्यान्तरापत्तिः एकस्यानेकीभावः अनेकस्य चैकीभावः विचालः ।**

[ **द्वौ क्रियते, द्विधा क्रियते** ] एको राशिर्द्वौ क्रियते = द्विधा क्रियते । अनेन धाप्र० ।

[ **त्रिधा क्रियते** ] एको राशिस्त्रयः क्रियते = त्रिधा क्रियते । अनेन धाप्र० ।

[ **द्वौ भवति, द्विधा भवति** ] एको राशिर्द्वौ भवति = द्विधा भवति । अनेन धाप्र० ।

[ **त्रिधा भवति** ] एको राशिस्त्रयो भवति = त्रिधा भवति । अनेन धाप्र० ।

[ **द्वौ करोति, द्विधा करोति** ] एकं राशिं द्वौ करोति = द्विधा करोति ।

[ **त्रिधा करोति** ] एकं राशिं त्रयः करोति = त्रिधा करोति । अनेन धाप्र० ।

[ **शतधा** ] शतेन = शतधा । अनेन धाप्र० ।

**यदि मे यतमानाया, वचनं न करिष्यसि ।**
**उन्मत्तः शतधा मूर्धा, तवैषोऽद्य फलिष्यति ॥१॥**

[ **शतधा मूर्धा** ] एको मूर्धा शतेन भागैः ।

[ **एकधा क्रियते** ] अनेक एकः क्रियते = एकधा क्रियते । अनेन धाप्र० ।

[ **एकधा भवति** ] अनेक एको भवति = एकधा भवति । अनेन धाप्र० ।

[ **एकधा करोति** ] अनेकमेकं करोति = एकधा करोति । अनेन धाप्र० ।

[ **त्रिधा द्विधा एकधा वा क्रियन्ते** ] पञ्च राशयस्त्रयो द्वौ एको वा क्रियन्ते = त्रिधा द्विधा एकधा वा क्रियन्ते ।

[ **त्रिधा द्विधा एकधा वा भवन्ति** ] पञ्च राशयस्त्रयो द्वौ एको वा भवन्ति = त्रिधा द्विधा एकधा वा भवन्ति ।

[ **त्रिधा द्विधा एकधा वा करोति** ] पञ्च राशीन् त्रीन् द्वौ एकं वा करोति = त्रिधा द्विधा एकधा वा करोति ।

[ **गणधा** ] एको राशिः गणः क्रियते = गणधा ।

[ **कतिधा** ] एको राशिः कति क्रियते = कतिधा ।

[ **तावद्धा** ] एको राशिस्तावत् क्रियते = तावद्धा । अनेन धाप्र० । 'क्रियाविशेषणात्' (२।१।४१) अम् । 'अव्ययस्य' (३।२।७) लुप् ।

**चकार उत्तरत्र प्रकारे विचाले चेत्युभयोः समुच्चयार्थः ॥छ॥**

## वैकाद् ध्यमञ् ॥ ७।२।१०६ ॥

[ **वा** ] वा प्रथमा सि ।

[ **एकात्** ] एक पञ्चमी ङसि ।

[ **ध्यमञ्** ] ध्यमञ् प्रथमा सि ।

[ **ऐकध्यम्, एकधा भुङ्क्ते** ] एकेन प्रकारेण = ऐकध्यम्, एकधा भुङ्क्ते । अनेन विकल्पेन ध्यमञ्प्र० → ध्यम् । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः ऐ । पक्षे-'संख्याया धा' (७।२।१०४) धाप्र० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ ऐकध्यं करोति, एकधा करोति ]** अनेकमेकं करोति = ऐकध्यम्-एकधा करोति । अनेन ध्यमञ्प्र० → ध्यम् । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः ऐ । पक्षे-'संख्याया धा' (७।२।१०४) धाप्र० ।

**अकार उच्चारणार्थः** ।।छ।।

## द्वि-त्रेर्धमञेधौ वा ॥ ७।२।१०७ ॥

**[ द्वित्रेः ]** द्विश्च त्रिश्च = द्वित्रि, तस्मात् ।

**[ धमञेधौ ]** धमञ् च एधा च = धमञेधौ ।

**[ वा ]** वा प्रथमा सि ।

**[ द्वैधम्, द्वेधा, द्विधा भुङ्क्ते ]** द्वाभ्यां प्रकाराभ्यां = द्वैधम्, द्वेधा । अनेन धमञ्प्र० → धम् - एधाप्र० । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । एवम्-द्विधा । 'संख्याया धा' (७।२।१०४) धाप्र० । भुङ्क्ते ।

**[ त्रैधम्, त्रेधा, त्रिधा भुङ्क्ते ]** त्रिभिः प्रकारैः = त्रैधम्, त्रेधा । अनेन धमञ्प्र० → धम्-एधाप्र० । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः ऐ । द्वितीये-'अवर्णेवर्णस्य' (७।४।६८) इलुक् । एवम्-त्रिधा । 'संख्याया धा' (७।२।१०४) धाप्र० । भुङ्क्ते ।

**[ द्वैधम्, द्वेधा, द्विधा करोति ]** एकं राशिं द्वौ करोति = द्वैधम्-द्वेधा । अनेन धमञ्प्र० → धम्-एधाप्र० । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । द्वितीये-'अवर्णेवर्णस्य' (७।४।६८) इलुक् । एवम्-द्विधा । 'विचाले च' (७।२।१०५) धाप्र० । करोति ।

**[ त्रैधम्, त्रेधा, त्रिधा करोति ]** एकं राशिं त्रीन् करोति = त्रैधम्, त्रेधा । अनेन धमञ्प्र० → धम्-एधाप्र० । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । द्वितीये-'अवर्णेवर्णस्य' (७।४।६८) इलुक् । एवम्-त्रिधा । 'विचाले च' (७।२।१०५) धाप्र० । करोति ।।छ।।

## तद्वति धण् ॥ ७।२।१०८ ॥

**[ तद्वति ]** तद् । तौ-प्रकारविचालावर्थौ अस्य स्तः सः = तद्वान्, तस्मिन् । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् । 'मावर्णान्तोपान्तापञ्चम०' (२।१।९४) म० → वत्वम् ।

**[ धण् ]** धण् प्रथमा सि ।

**[ द्वैधानि ]** द्वौ प्रकारौ विभागौ वा एषां = द्वैधानि । अनेन धण्प्र० → ध । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः ऐ । जस् । 'नपुंसकस्य शिः' (१।४।५५) जस्० → शि० → इ० । 'स्वराच्छौ' (१।४।६५) नोऽन्तः । 'नि दीर्घः' (१।४।८५) दीर्घः ।

**[ त्रैधानि ]** त्रयः प्रकारा विभागा वा एषां = त्रैधानि । अनेन धण्प्र० → ध । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । जस् । 'नपुंसकस्य शिः' (१।४।५५) जस्० → शि० → इ० । 'स्वराच्छौ' (१।४।६५) नोऽन्तः । 'नि दीर्घः' (१।४।८५) दीर्घः ।

**[ राजद्वैधानि ]** द्वैधानि पूर्ववत् । राज्ञो द्वैधानि = राजद्वैधानि ।

**[ राजत्रैधानि ]** त्रैधानि पूर्ववत् । राज्ञस्त्रैधानि = राजत्रैधानि ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ द्वैधीभावः ]** द्वौ प्रकारौ विभागौ वास्य = द्वैधम् । अनेन धण्प्र० → ध । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः ऐ । अद्वैधस्य द्वैधस्य भवनं = द्वैधीभावः । 'भू सत्तायाम्' (१) भू । पूर्वमुक्तं वाक्यम् । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । 'कृ-भ्वस्तिभ्यां०' (७।२।१२६) च्विप्र० । 'ईश्च्वाववर्णस्या-ऽनव्ययस्य' (४।३।१११) ई । 'अप्रयोगीत्' (१।१।३७) च्विलोपः ।

**[ त्रैधीभावः ]** त्रयः प्रकारा विभागा वास्य = त्रैधम् । अनेन धण्प्र० → ध० । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः ऐ । 'अत्रैधस्य त्रैधस्य भवनं = त्रैधीभावः । 'भू सत्तायाम्' (१) भू । पूर्वमुक्तं वाक्यम् । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । 'कृ-भ्वस्तिभ्यां०' (७।२।१२६) च्विप्र० । 'ईश्च्वाववर्णस्या-ऽनव्ययस्य' (४।३।१११) ई । 'अप्रयोगीत्' (१।१।३७) च्विलोपः ॥छ॥

## वारे कृत्वस् ॥ ७।२।१०९ ॥

**[ वारे ]** वार सप्तमी ङि ।

**[ कृत्वस् ]** कृत्वस् प्रथमा सि ।

**संख्याया इति वर्त्तते, वारो धात्वर्थस्यायौगपद्येन वृत्तिः, तत्कालो वा ।**

**[ पञ्चकृत्वो भुङ्क्ते ]** पञ्च वारा अस्य = पञ्चकृत्वो भुङ्क्ते । अनेन कृत्वसूप्र० ।

**[ षट्कृत्वः ]** षड् वारा अस्य = षट्कृत्वः ।

**[ शतकृत्वः ]** शतं वारा अस्य = शतकृत्वः ।

**[ सहस्रकृत्वोऽधीते ]** सहस्रं वारा अस्य = सहस्रकृत्वोऽधीते ।

**[ बहुकृत्वः ]** बहवो वारा अस्य = बहुकृत्वः ।

**[ गणकृत्वः ]** गणो वारा अस्य = गणकृत्वः ।

**[ कतिकृत्वः ]** कति वारा अस्य = कतिकृत्वः ।

**[ तावत्कृत्वः ]** तावत् वारा अस्य = तावत्कृत्वः । अनेन सर्वत्र कृत्वसूप्र० ।

भुज्यर्थो वारवानिति भुज्यर्थस्येदं विशेषणम् ॥छ॥

## द्वि-त्रि-चतुरः सुच् ॥ ७।२।११० ॥

**[ द्वित्रिचतुरः ]** द्विश्च त्रिश्च चतुरश्च(चतुश्च) = द्वित्रिचतुर, तस्मात् ।

**[ सुच् ]** सुच् प्रथमा सि ।

**[ द्विर्भुङ्क्ते ]** द्वौ वारावस्य = द्विर्भुङ्क्ते ।

**[ त्रिर्भुङ्क्ते ]** त्रयो वारा अस्य = त्रिर्भुङ्क्ते ।

**[ चतुर्भुङ्क्ते ]** चत्वारो वारा अस्य = चतुर्भुङ्क्ते । अनेन सुच्प्र० → स० । 'रात् सः' (२।१।९०) इति सलोपः सर्वत्र । 'क्रियाविशेषणात्' (२।२।४१) अम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इह तु [ **द्विस्तावान् प्रासादः, द्विस्तावान् भवति** ] भवत्यर्थो गम्यः । द्वौ वारौ भवनस्य = द्विः । अनेन सुच्प्र० → स् --ति अयमभिप्रायो वारप्रतिपादको धातुप्रयोगो नास्ति, कथं प्रत्ययो भवतीत्याह - गम्यमानेऽपि वारे भवति ।

**चकारः 'सुचो वा' ( २।३।१० ) इत्यत्र विशेषणार्थः** ॥छ॥

## एकात् सकृच्चास्य ॥ ७।२।१११ ॥

[ **एकात्** ] एक पञ्चमी ङसि ।

[ **सकृत्** ] सकृत् प्रथमा सि ।

[ **च** ] च प्रथमा सि ।

[ **अस्य** ] इदम् षष्ठी ङस् । 'आ द्वेरः' (२।१।४१) म० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् । 'अनक्' (२।१।३६) इद० → अ । 'टा-ङसोरिन-स्यौ' (१।४।५) "स्य"देशः ।

[ **सकृद् भुङ्क्ते** ] एक मण्ड्यते । एकवारं भुङ्क्ते = सकृत् । अनेन सुच्प्र० → स्-एकस्य "सकृत्" देशश्च । 'पदस्य' (२।१।८९) इति सुचो लोपः । एको वारो यथा भवत्येवं भुङ्क्ते इत्यर्थः । 'क्रियाविशेषणात्' (२।२।४१) अम् ।

## बहोर्धाऽऽसन्ने ॥ ७।२।११२ ॥

[ **बहोः** ] बहु पञ्चमी ङसि ।

[ **धा** ] धा प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

[ **आसन्ने** ] आ 'षद्लृं विशरण-गत्यवसादनेषु' (९६६) षद् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सद् । आसीदति स्म = आसन्नः । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० → त । 'रदादमू०' (४।२।६९) द्-त० → न०, तस्मिन् ।

[ **बहुधा भुङ्क्ते** ] बहव आसन्ना वारा अस्य = बहुधा भुङ्क्ते । अनेन धाप्र० ।

[ **बहुधा पिबति** ] बहव आसन्ना वारा अस्य = बहुधा पिबति । अनेन धाप्र० ।

[ **बहुकृत्वो मासस्य भुङ्क्ते** ] बहवो वारा अस्य । 'वारे कृत्वस्' (७।२।१०९) कृत्वसुप्र० । मासस्य इत्यत्र 'नवा सुजर्थैः काले' (२।२।९६) इति सप्तमी वा भवतीति द्वितीयपक्षे 'शेषे' (२।२।८१) षष्ठी । भुङ्क्ते ।

आसन्नवारेऽपि वारमात्रे द्योत्ये कृत्वस् प्रत्ययो भवत्येव ।

[ **बहुकृत्वोऽह्नो भुङ्क्ते** ] बहवो वारा अस्य = बहुकृत्व(ः) । 'वारे कृत्वस्' (७।२।१०९) कृत्वसुप्र० । अह्नो भुङ्क्ते । 'नवा सुजर्थैः काले' (२।२।९६) वा सप्तमी ।

आसन्नता तु प्रकरणादिना गम्यते ।

[ **गणधा भुङ्क्ते** ] गणस्य आसन्ना वारा अस्य = गणधा भुङ्क्ते । मतान्तरे धाप्र० ।

[ **तावद्धा भुङ्क्ते** ] तावत आसन्ना वारा अस्य = तावद्धा भुङ्क्ते । मतान्तरे धाप्र० ॥छ॥

## दिक्शब्दाद् दिग्-देश-कालेषु प्रथमा-पञ्चमी-सप्तम्याः ॥ ७।२।११३ ॥

[ **दिक्शब्दात्** ] दिशि प्रसिद्धः शब्दः, यद्वा दिशि दृष्टः शब्दः = दिक्शब्दस्तस्मात् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ दिग्देशकालेषु ]** दिक् च देशश्च कालश्च = दिग्देशकालाः, तेषु ।

**[ प्रथमापञ्चमीसप्तम्याः ]** प्रथमा च पञ्चमी च सप्तमी च, तस्य ।

**[ प्राग्रमणीयम् ]** प्र 'अञ्चूग् गतौ च' (८९०) अञ्च् । प्राञ्चतीति क्विप् । 'अञ्चोऽनर्चायाम्' (४।२।४६) नलुक् । 'अञ्चः' (२।४।३) ङी । 'अच्च् प्राग् दीर्घश्च' (२।१।१०४) अच् → च्-पूर्वस्वरस्य दीर्घः । प्राची दिग् रमणीया = प्राग् । अनेन धाप्र० । 'लुबञ्चेः' (७।२।१२३) धाप्रत्ययस्य लुप् । 'ङ्यादेर्गौणस्याक्विपस्तद्धितलुक्यगोणी-सूच्योः' (२।४।९५) ङीनिवृत्तिः । एवं स्त्रीलिङ्गेऽपि अग्रेतनेऽपि । प्राग्देशो रमणीयः = प्राग्रमणीयम् । प्राक्काले रमणीयः = प्राग्रमणीयम् । अनेन धाप्र० । 'लुबञ्चेः' (७।२।१२३) धालुप् ।

**[ प्रागागतः ]** प्राच्या दिश आगतः, प्राचो देशादागतः, प्राचः कालादागतः = प्रागागतः । अनेन सर्वत्र धाप्र० । 'लुबञ्चेः' (७।२।१२३) धालुप् । 'ङ्यादेर्गौणस्या०' (२।४।९५) ङीनिवृत्तिः ।

**[ प्राग्वसति ]** प्राच्यां दिशि वसति, प्राचि देशे वसति, प्राचि काले वसति = प्राग्वसति । सर्वत्र अनेन धाप्र० । 'लुबञ्चेः' (७।२।१२३) धालुप् । 'ङ्यादेर्गौणस्या०' (२।४।९५) ङीनिवृत्तिः ।

**[ ऐन्द्री दिक् ]** इन्द्रो देवता अस्य = ऐन्द्री दिक् । 'देवता' (६।२।१०१) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्-नञ्०' (२।४।२०) ङी ।

दिग्-देश-कालेषु त्रिष्वेव वर्त्तमाना दिक्शब्दा गृह्यन्ते, तेन केवलायां दिशि ककुभ्प्रभृतिभ्यो न भवति ।।छ।।

## ऊर्ध्वाद् रि-रिष्टातौ उपश्चास्य ॥ ७।२।११४ ॥

**[ ऊर्ध्वात् ]** ऊर्ध्व पञ्चमी ङसि ।

**[ रिरिष्टातौ ]** रिश्च रिष्टाच्च = रिरिष्टातौ ।

**[ उपश्च ]** उप प्रथमा सि । च प्रथमा सि ।

**[ अस्य ]** इदम् षष्ठी ङस् । 'आ द्वेरः' (२।१।४१) म० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् । 'अनक्' (२।१।३६) इद० → अ । 'टा-ङसोरिन-स्यौ' (१।४।५) "स्य"देशः ।

**[ उपरि रमणीयम्, उपरिष्टात् रमणीयम् ]** ऊर्ध्वा दिग् देशः कालो वा रमणीयः = उपरि रमणीयम्, उपरिष्टात् रमणीयम् । अनेन रि-रिष्टात्प्र० → ऊर्ध्वशब्दस्य "उप"देशश्च ।

**[ उपर्यागतः, उपरिष्टादागतः ]** ऊर्ध्वायाः दिश आगतः, ऊर्ध्वात् देशात्-कालाद्वा आगतः = उपर्यागतः, उपरिष्टादागतः । अनेन रि-रिष्टात्प्र०-ऊर्ध्वशब्दस्य "उप"आदेशश्च ।

**[ उपरि वसति, उपरिष्टात् वसति ]** ऊर्ध्वायां दिशि वसति, ऊर्ध्वे देशे काले वसति = उपरि वसति, उपरिष्टात् वसति । अनेन रि-रिष्टात्प्र०-ऊर्ध्वशब्दस्य "उप"देशश्च ।।छ।।

## पूर्वा-ऽवरा-ऽधरेभ्योऽसस्तातौ पुरवधश्चैषाम् ॥ ७।२।११५ ॥

**[ पूर्वाऽवराऽधरेभ्यः ]** पूर्वश्च अवरश्च अधरश्च = पूर्वाऽवराऽधराः, तेभ्यः = पूर्वाऽवराऽधरेभ्यः । पञ्चमी भ्यस् ।

**[ असस्तातौ ]** अस् च अस्तात् च = असस्तातौ ।

**[ पुरवधः ]** पुर् च अव् च अध् च = पुरवधः । जस् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ च ]** च प्रथमा सि ।

**[ एषाम् ]** इदम् षष्ठी आम् ।

**[ पुरो रमणीयम्, पुरस्ताद्रमणीयम् ]** पूर्वा दिग्-देशः-कालो वा रमणीयः = पुरः-पुरस्ताद्रमणीयम् । अनेन अस्-अस्तात्प्र०-पूर्वशब्दस्य "पुर्"देशश्च ।

**[ पुर आगतः, पुरस्तादागतः ]** पूर्वस्या दिश आगतः, पूर्वात् देशात् कालाद्वा आगतः = पुरः-पुरस्तादागतः । अनेन अस्-अस्तात्प्र०-पूर्वशब्दस्य "पुर्"देशश्च ।

**[ पुरो वसति, पुरस्ताद्वसति ]** पूर्वस्यां दिशि वसति, पूर्वस्मिन् देशे काले वा वसति = पुरः-पुरस्ताद् वसति । अनेन अस्-अस्तात्प्र०-"पुर्"देशश्च ।

**[ अवो रमणीयम्, अवस्ताद्रमणीयम् ]** अवरा दिग्-देशः-कालो वा रमणीयः = अवः-अवस्ताद्रमणीयम् । अनेन अस्-अस्तात्प्र०-अवरशब्दस्य "अव्"देशश्च ।

**[ अव आगतः, अवस्तादागतः ]** अवरस्या दिश आगतः, अवरस्मात् देशात् कालाद्वा आगतः = अवः-अवस्तादागतः । अनेन अस्-अस्तात्प्र०-अवरशब्दस्य "अव्"देशश्च ।

**[ अवो वसति, अवस्ताद्वसति ]** अवरस्यां दिशि वसति, अवरस्मिन् देशे काले वा वसति = अवः-अवस्ताद्वसति । अनेन अस्-अस्तात्प्र०-अवरशब्दस्य "अव्"देशश्च ।

**[ अधो रमणीयम्, अधस्ताद्रमणीयम् ]** अधरा दिग्-देशः-कालो वा रमणीयः = अधः-अधस्ताद्रमणीयम् । अनेन अस्-अस्तात्प्र०-अधरशब्दस्य "अध्"आदेशश्च ।

**[ अध आगतः, अधस्तादागतः ]** अधरस्या दिश आगतः, अधरात् देशात् कालाद्वा आगतः = अधः-अधस्तादागतः । अनेन अस्-अस्तात्प्र०-अधरशब्दस्य "अध्"आदेशश्च ।

**[ अधो वसति, अधस्ताद्वसति ]** अधरस्यां दिशि वसति, अधरस्मिन् देशे काले वा वसति = अधः-अधस्ताद्वसति । अनेन अस्-अस्तात्प्र०-अधरशब्दस्य "अध्"आदेशश्च ॥छ॥

## परा-ऽवरात् स्तात् ॥ ७।२।११६ ॥

**[ पराऽवरात् ]** परश्च अवरश्च = पराऽवरम्, तस्मात् ।

**[ स्तात् ]** स्तात् प्रथमा सि ।

**[ परस्ताद्रमणीयम् ]** परा दिग्-देशः-कालो वा रमणीयः = परस्ताद्रमणीयम् । अनेन स्तात्प्र० ।

**[ परस्तादागतः ]** परस्या दिश आगतः, परस्तात् देशात् कालाद्वा आगतः = परस्तादागतः । अनेन स्तात्प्र० ।

**[ परस्ताद्वसति ]** परस्यां दिशि वसति, परस्मिन् देशे काले वा वसति = परस्ताद्वसति । अनेन स्तात्प्र० ।

**[ अवरस्ताद्रमणीयम् ]** अवरा दिग्-देशः-कालो वा रमणीयः = अवरस्ताद्रमणीयम् । अनेन स्तात्प्र० ।

**[ अवरस्तादागतः ]** अवरस्याः दिश आगतः, अवरात् देशात् कालाद्वा आगतः = अवरस्तादागतः । अनेन स्तात्प्र० ।

**[ अवरस्ताद्वसति ]** अवरस्यां दिशि वसति, अवरस्मिन् देशे काले वा वसति = अवरस्ताद्वसति । अनेन स्तात्प्र० ॥छ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## दक्षिणोत्तराच्चाऽतस् ॥ ७।२।११७ ॥

**[ दक्षिणोत्तरात् ]** दक्षिणश्च उत्तरश्च = दक्षिणोत्तरम्, तस्मात् ।

**[ च ]** च प्रथमा सि ।

**[ अतस् ]** अतस् प्रथमा सि ।

दक्षिणशब्दः काले न संभवतीति दिग्देशवृत्तिर्गृह्यते ।

**[ दक्षिणतो रमणीयम् ]** दक्षिणा दिग्-देशो वा रमणीयः = दक्षिणतो रमणीयम् । अनेन अतस्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् ।

**[ दक्षिणत आगतः ]** दक्षिणस्या दिश आगतः, दक्षिणस्मात् देशात् आगतः = दक्षिणत आगतः । अनेन अतस्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् ।

**[ दक्षिणतो वसति ]** दक्षिणस्यां दिशि वसति, दक्षिणस्मिन् देशे वसति = दक्षिणतो वसति । अनेन अतस्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् ।

**[ उत्तरतो रमणीयम् ]** उत्तरा दिग्-देशः-कालो वा रमणीयः = उत्तरतो रमणीयम् । अनेन अतस्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् ।

**[ उत्तरत आगतः ]** उत्तरस्या दिश आगतः, उत्तरस्मात् देशात् कालाद्वा आगतः = उत्तरत आगतः । अनेन अतस्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् ।

**[ उत्तरतो वसति ]** उत्तरस्यां दिशि वसति, उत्तरस्मिन् देशे काले वा वसति = उत्तरतो वसति । अनेन अतस्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् ।

**[ परतो रमणीयम् ]** परा दिग्-देशः-कालो वा रमणीयः = परतो रमणीयम् । अनेन अतस्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् ।

**[ परत आगतः ]** परस्या दिश आगतः, परस्मात् देशात् कालाद्वा आगतः = परत आगतः । अनेन अतस्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् ।

**[ परतो वसति ]** परस्यां दिशि वसति, परस्मिन् देशे काले वा वसति = परतो वसति । अनेन अतस्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् ।

**[ अवरतो रमणीयम् ]** अवरा दिग्-देशः-कालो वा रमणीयः = अवरतो रमणीयम् । अनेन अतस्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् ।

**[ अवरत आगतः ]** अवरस्या दिश आगतः, अवरस्मात् देशात् कालाद्वा आगतः = अवरत आगतः । अनेन अतस्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् ।

**[ अवरतो वसति ]** अवरस्यां दिशि वसति, अवरस्मिन् देशे काले वा वसति = अवरतो वसति । अनेन अतस्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् ।

अवः, अवस्तात्, अवरतः, अवरस्तात् एवं चाऽवरशब्दस्य चातूरूप्यं भवति । अकारस्तसोऽस्य अतसो भेदार्थः, तेन *अतः अतस्तात् 'क्वेहा-ऽमा-त्र-तसस्त्यच्'* (६।३।१६) इति त्यच् न भवति ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ पारतम् ]** परतो भवं = पारतम् । 'भवे' (६।३।१२३) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः आ । 'प्रायोऽव्ययस्य' (७।४।६५) अस्लोपः ॥छ॥

## अधरा-ऽपराच्चाऽऽत् ॥ ७।२।११८ ॥

**[ अधराऽपरात् ]** अधरश्च अपरश्च = अधराऽपरम्, तस्मात् ।

**[ च ]** च प्रथमा सि ।

**[ आत् ]** आत् प्रथमा सि ।

**[ अधराद्रमणीयम् ]** अधरा दिग्-देशः-कालो वा रमणीयः = अधराद्रमणीयम् । अनेन आत्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् ।

**[ अधरादागतः ]** अधरस्या दिश आगतः, अधरात् देशात् कालाद्वा आगतः = अधरादागतः । अनेन आत्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् ।

**[ अधराद्वसति ]** अधरस्यां दिशि वसति, अधरस्मिन् देशे काले वा वसति = अधराद्वसति । अनेन आत्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् ।

एवं च अधरशब्दस्य त्रैरूप्यम्, अधः-अधस्तात्-अधरात् ।

**[ पश्चाद्रमणीयम् ]** अपरा दिग्-देशः-कालो वा रमणीयः = पश्चाद्रमणीयम् । अनेन आत्प्र० । 'पश्चोऽपरस्य दिक्पूर्वस्य चाऽऽति' (७।२।१२४) पश्चदेशोऽदन्तः कार्यः, पश्चार्द्धमित्यादि सिद्ध्यर्थं, ततः 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् ।

**[ पश्चादागतः ]** अपरस्या दिश आगतः, अपरस्मात् देशात् कालात् वा आगतः = पश्चादागतः । अनेन आत्प्र० । 'पश्चोऽपरस्य दिक्पूर्वस्य चाऽऽति' (७।२।१२४) पश्चादेशः । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् ।

**[ पश्चाद्वसति ]** अपरस्यां दिशि वसति, अपरस्मिन् देशे काले वा वसति = पश्चाद्वसति । अनेन आत्प्र० । 'पश्चोऽपरस्य दिक्पूर्वस्य चाऽऽति' (७।२।१२४) पश्चादेशः । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् ।

**[ दक्षिणपश्चाद्रमणीयम् ]** दक्षिणा च सा अपरा च = दक्षिणापरा, दक्षिणापरा दिग् रमणीया = दक्षिणपश्चाद्रमणीयम् । अनेन आत्प्र० । 'पश्चोऽपरस्य०' (७।२।१२४) पश्चादेशः ।

**[ दक्षिणपश्चादागतः ]** दक्षिणापरस्या दिश आगतः = दक्षिणपश्चादागतः । अनेन आत्प्र० । 'पश्चोऽपरस्य०' (७।२।१२४) "पश्च"देशः ।

**[ दक्षिणपश्चाद्वसति ]** दक्षिणापरस्यां दिशि वसति = दक्षिणपश्चाद्वसति । अनेन आत्प्र० । 'पश्चोऽपरस्य दिक्पूर्वस्य चाऽऽति' (७।२।१२४) "पश्च"देशः ।

**[ दक्षिणाद्रमणीयम् ]** दक्षिणा दिग्-देशो वा रमणीयः = दक्षिणाद्रमणीयम् ।

**यत्र दक्षिणशब्दस्तत्र काले वाक्यं न कार्यम् ।**

**[ दक्षिणादागतः ]** दक्षिणस्या दिशः, दक्षिणात् देशाद्वा आगतः = दक्षिणादागतः । अनेन आत्प्र० ।

**[ दक्षिणाद्वसति ]** दक्षिणस्यां दिशि, दक्षिणस्मिन् देशे वसति = दक्षिणाद्वसति । अनेन आत्प्र० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ उत्तराद्रमणीयम् ]** उत्तरा दिग्-देशः-कालो वा रमणीयः = उत्तराद्रमणीयम् । अनेन आत्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् ।

**[ उत्तरादागतः ]** उत्तरस्या दिशः, उत्तरस्मात् देशात् कालाद्वा आगतः = उत्तरादागतः । अनेन आत्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् ।

**[ उत्तराद्वसति ]** उत्तरस्यां दिशि, उत्तरस्मिन् देशे काले वा वसति = उत्तराद्वसति । अनेन आत्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् ।।छ।।

**वा दक्षिणात् प्रथमा-सप्तम्या आः ॥ ७।२।११९ ॥**

**[ वा ]** वा प्रथमा सि ।

**[ दक्षिणात् ]** दक्षिण पञ्चमी ङसि ।

**[ प्रथमासप्तम्याः ]** प्रथमा च सप्तमी च = तत्, तस्मात् ।

**[ आः ]** आ प्रथमा सि ।

**[ दक्षिणा रमणीयम्, दक्षिणतो रमणीयम्, दक्षिणाद्रमणीयम् ]** दक्षिणा दिग् देशो वा रमणीयः = दक्षिणा रमणीयः । अनेन आप्र० । पक्षे-'दक्षिणोत्तराच्चाऽतस्' (७।२।११७) अतस्प्र० । 'अधरा-ऽपराच्चाऽऽत्' (७।२।११८) आत्प्र० ।

**[ दक्षिणा वसति, दक्षिणतो वसति, दक्षिणाद्वसति ]** दक्षिणस्यां दिशि, दक्षिणस्मिन् देशे वसति । अनेन आप्र० । पक्षे-'दक्षिणोत्तराच्चाऽतस्' (७।२।११७) अतस्प्र० । 'अधरा-ऽपराच्चाऽऽत्' (७।२।११८) आत्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् ।

**यत्र दक्षिणशब्दस्तत्र काले वाक्यं न कार्यम् । पञ्चम्यां सावकाशावतसातावाकारो बाधेत इति वाग्रहणम् ।**

**[ दक्षिणत आगतः ]** दक्षिणस्या दिशः, दक्षिणाद्देशादागतः = दक्षिणत आगतः । 'दक्षिणोत्तराच्चाऽतस्' (७।२।११७) अतस्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् ।

**[ दक्षिणादागतः ]** दक्षिणस्या दिशः, दक्षिणाद्देशादागतः = दक्षिणादागतः । 'अधरा-ऽपराच्चाऽऽत्' (७।२।११८) आत्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् ।।छ।।

**आ-ऽऽही दूरे ॥ ७।२।१२० ॥**

**[ आऽऽही ]** आश्च आहिश्च = आऽऽही । 'औरीः' (१।४।५६) ई ।

**[ दूरे ]** दूर सप्तमी ङि ।

**[ ग्रामाद्दक्षिणा रमणीयम्, दक्षिणाहि रमणीयम् ]** ग्रामाद्दूरा दक्षिणा दिग्-देशो वा रमणीयः = ग्रामाद्दक्षिणा रमणीयम् । एवम्-दक्षिणाहि । अनेन आ-आहिप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् ।

**[ ग्रामाद्दूरा दक्षिणा वसति, दक्षिणाहि वसति ]** ग्रामाद्दूरा दक्षिणस्यां दिशि, दक्षिणस्मिन् देशे वा वसति = ग्रामाद्दूरा दक्षिणा वसति । एवम्-दक्षिणाहि । अनेन आ-आहिप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ दक्षिणतः, दक्षिणात्, दक्षिणा रमणीयम् ]** दक्षिणतः-'दक्षिणोत्तराच्चाऽतस्' (७।२।११७) अतस्प्र० । दक्षिणात्-'अधरा-ऽपराच्चाऽऽत्' (७।२।११८) आत्प्र० । दक्षिणा रमणीयम् 'वा दक्षिणात् प्रथमा-सप्तम्या आः' (७।२।११९) आप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् ॥छ॥

## वोत्तरात् ॥ ७।२।१२१ ॥

**[ वा ]** वा प्रथमा सि ।

**[ उत्तरात् ]** उत्तर पञ्चमी ङसि ।

**योगविभागाद् दूर इति नानुवर्त्तते ।**

**[ उत्तरा रमणीयम्, उत्तराहि रमणीयम्, उत्तरतः, उत्तरात् ]** उत्तरा दिग्-देशः-कालो वा रमणीयः = उत्तरा रमणीयम्, उत्तराहि रमणीयम् । अनेन आ-आहिप्र० । पक्षे-'दक्षिणोत्तराच्चाऽतस्' (७।२।११७) अतस्प्र० । 'अधरा-ऽपराच्चाऽऽत्' (७।२।११८) आत्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् ।

**[ उत्तरा वसति, उत्तराहि वसति, उत्तरतः, उत्तरात् ]** उत्तरस्यां दिशि, उत्तरस्मिन् देशे काले वा वसति = उत्तरा वसति, उत्तराहि वसति । अनेन आ-आहिप्र० । पक्षे-'दक्षिणोत्तराच्चाऽतस्' (७।२।११७) अतस्प्र० । 'अधरा-ऽपराच्चाऽऽत्' (७।२।११८) आत्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् ॥छ॥

## अदूरे एनः ॥ ७।२।१२२ ॥

**[ अदूरे ]** अदूर सप्तमी ङि ।

**[ एनः ]** एन प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**वोत्तरादिति नानुवर्त्तते । 'द्वितीया-षष्ठ्यावेनेनाऽनञ्चेः' ( २।२।११७ ) इत्यत्र अञ्चेर्वर्जनात्, अत्र पञ्चम्या अग्रहणाद् वा ।**

**[ पूर्वेणास्य रमणीयम् ]** अस्मात् पूर्वा अदूरा दिग् रमणीया, अस्मात् पूर्वो देशः-कालो वा रमणीयः = पूर्वेणास्य रमणीयम् । अनेन एनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् ।

**[ पूर्वेणास्य वसति ]** अस्मात् पूर्वस्यां अदूरायां दिशि वसति, अस्मात् पूर्वस्मिन् अदूरे देशे काले वा वसति = पूर्वेणास्य वसति । अनेन एनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् ।

**[ अपरेणास्य रमणीयम् ]** अस्मात् अपरा अदूरा दिग् रमणीया, अस्मात् अपरो देशः-कालो वा रमणीयः = अपरेण अस्य रमणीयम् । अनेन एनप्र० ।

**[ अपरेणास्य वसति ]** अस्मादपरस्यां अदूरायां दिशि वसति, अस्मात् अपरस्मिन् देशे काले वा वसति = अपरेण । अनेन एनप्र० ।

**[ दक्षिणेन ]** अस्माद्दक्षिणा अदूरा दिग् रमणीया, अस्माद्दक्षिणो अदूरो देशो रमणीयः = दक्षिणेन । अनेन एनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् ।

**[ उत्तरेण ]** अस्मादुत्तरा अदूरा दिग् रमणीया, अस्मादुत्तरो अदूरो देशः-कालो वा रमणीयः = उत्तरेण । अनेन एनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ अधरेण ]** अस्मादधरा अदूरा दिग् रमणीया, अस्मादधरो अदूरो देशः-कालो वा रमणीयः = अधरेण । अनेन एनप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् ।

**[ पुरो रमणीयम् ]** पूर्वा दिग् रमणीया = पुरो रमणीयम् । पूर्वा-ऽवरा-ऽधरेभ्योऽसस्तातौ पुरवधश्चैषाम्' (७।२।११५) अस्प्र०-पूर्वशब्दस्य "पुर्"देशश्च ।

**[ पुरो वसति ]** पूर्वस्यां दिशि वसति = पुरो वसति । 'पूर्वा-ऽवरा-ऽधरेभ्योऽसस्तातौ०' (७।२।११५) अस्प्र०-पूर्वशब्दस्य "पुर्"देशश्च ।

**[ पुर आगतः ]** पूर्वस्या दिश (आ)गतः = पुर (आ)गतः । 'पूर्वा-ऽवरा-ऽधरेभ्योऽसस्तातौ०' (७।२।११५) अस्प्र०-पूर्वशब्दस्य "पुर्"देशश्च ।

दिग्देशकालमात्रे द्योत्ये ये सामान्यप्रत्यया उक्ता अदूरे अपि सामान्यविवक्षायां ते भवन्त्येव, प्रकरणादेश्चाऽदूरता गम्यते इति नाऽर्थो न प्रयोजनं वाग्रहणेन । एवं तर्हि 'आ-ऽऽही दूरे' (७।२।१२०) इत्यत्र कथमुक्तम् ? विशेषविहितेन आहिना बाधो मा भूदित्येवमर्थमिति अनेनैव प्रकारेण सिद्धत्वात्, सत्यम्, सोऽपि प्रकारोऽस्तीति ज्ञापनार्थम् ।।छा।

## लुबञ्चेः ॥ ७।२।१२३ ॥

**[ लुप् ]** लुप् प्रथमा सि ।

**[ अञ्चेः ]** अञ्चि पञ्चमी ङसि । 'ङित्यदिति' (१।४।२३) ए । 'एदोद्भ्यां ङसि-ङसो रः' (१।४।३५) ङसि० → र० ।

**[ प्राग्रमणीयम् ]** प्र 'अञ्चू गतौ च' (१०५) अञ्च् । प्राञ्चतीति क्विप् । 'अञ्चोऽनर्चायाम्' (४।२।४६) नलुक् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 'अञ्चः' (२।४।३) ङी । प्राची दिग् अदूरा दूरा वा रमणीया, प्राग् देशः-कालो वा अदूरो दूरो वा रमणीयः = प्राग्रमणीयम् । 'दिक्शब्दाद् दिग्-देश-कालेषु प्रथमा-पञ्चमी-सप्तम्याः' (७।२।११३) धाप्र० । अथवा 'अदूरे एनः' (७।२।१२२) एनप्र० । अनेन लुप् । 'ङ्यादेर्गौणस्याक्विपस्तद्धितलुक्यगोणी-सूच्योः' (२।४।९५) ङीनिवृत्तिः ।

**[ प्रागागतः ]** प्राच्या दिश अदूराया दूराया वा आगतः = प्रागागतः । प्राचो देशात् कालाद्वा आगतः = प्रागागतः । 'दिक्शब्दाद् दिग्-देश-कालेषु प्रथमा०' (७।२।११३) धाप्र० । अथवा 'अदूरे एनः' (७।२।१२२) एनप्र० । अनेन लुप् । 'ङ्यादेर्गौणस्याक्विप०' (२।४।९५) ङीनिवृत्तिः ।

**[ प्राग्वसति ]** प्राच्यां दिशि अदूरायां दूरायां वा वसति = प्राग्वसति । 'दिक्शब्दाद् दिग्-देश-कालेषु०' (७।२।११३) धाप्र० । अथवा 'अदूरे एनः' (७।२।१२२) एनप्र० । अनेन लुप् । 'ङ्यादेर्गौणस्या०' (२।४।९५) ङीनिवृत्तिः ।

**[ प्रत्यक् रमणीयम् ]** प्रतीची दिग् अदूरा दूरा वा रमणीया, प्रत्यग् देशः-कालो वा अदूरो दूरो वा रमणीयः = प्रत्यक् । 'दिक्शब्दाद्०' (७।२।११३) धाप्र० । अथवा 'अदूरे एनः' (७।२।१२२) एनप्र० । अनेन लुप् । 'ङ्यादेर्गौणस्याक्विप०' (२।४।९५) ङीनिवृत्तिः ।

**[ अवाक् ]** अवाची दिग् अदूरा दूरा वा रमणीया, अवाक् देशः-कालो वा अदूरो दूरो वा रमणीयः = अवाक् । 'दिक्शब्दाद्'० (७।२।११३) धाप्र० । अथवा 'अदूरे एनः' (७।२।१२२) एनप्र० । अनेन लुप् । 'ङ्यादेर्गौणस्याक्विप०' (२।४।९५) ङीनिवृत्तिः ।।छा।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## पश्चोऽपरस्य दिक्पूर्वस्य चाऽऽति ॥ ७।२।१२४ ॥

**[ पश्चः ]** पश्च प्रथमा सि ।

**[ अपरस्य ]** अपर षष्ठी ङस् ।

**[ दिक्पूर्वस्य ]** दिग्वाची शब्दः पूर्वो यस्य सः = दिक्पूर्वस्तस्य ।

**[ च ]** च प्रथमा सि ।

**[ आति ]** आत् सप्तमी ङि ।

**[ पश्चाद्रमणीयम् ]** अपरा दिग्-देशः-कालो वा रमणीयः = पश्चाद्रमणीयम् । 'अधरा-ऽपराच्चाऽऽत्' (७।२।११८) आत्प्र० । अनेन "पश्च"देशः अपरशब्दस्य ।

**[ पश्चादागतः ]** अपरस्या दिशः, अपरस्मात् देशात् कालाद्वा आगतः = पश्चादागतः । 'अधरा-ऽपराच्चाऽऽत्' (७।२।११८) आत्प्र० । अनेन अपरशब्दस्य "पश्च"देशः ।

**[ पश्चाद्वसति ]** अपरस्यां दिशि, अपरस्मिन् देशे काले वा वसति = पश्चाद्वसति । 'अधरा-ऽपराच्चाऽऽत्' (७।२।११८) आत्प्र० । अनेन अपरशब्दस्य "पश्च"देशः ।

दिक्पूर्वात् - **[ दक्षिणपश्चाद्रमणीयम् ]** दक्षिणा च सा अपरा च = दक्षिणापरा । 'सर्वादयोऽस्यादौ' (३।२।६१) पुंवद्भावः । संज्ञायाम्-'दिगधिकं संज्ञा-तद्धितोत्तरपदे' (३।१।९८) इत्यनेन समासः । दक्षिणापरा दिग् देशो वा रमणीयः = दक्षिणपश्चाद्रमणीयम् । 'अधरा-ऽपराच्चाऽऽत्' (७।२।११८) आत्प्र० । अनेन "पश्च"देशः ।

**[ दक्षिणपश्चादागतः ]** दक्षिणाऽपरस्या दिशः, दक्षिणापरात् देशाद्वा आगतः = दक्षिणपश्चादागतः । 'अधरा-ऽपराच्चाऽऽत्' (७।२।११८) आत्प्र० । अनेन "पश्च"देशः ।

**[ दक्षिणपश्चाद्वसति ]** दक्षिणापरस्यां दिशि, दक्षिणापरे देशे वा वसति = दक्षिणपश्चाद्वसति । 'अधरा-ऽपराच्चाऽऽत्' (७।२।११८) आत्प्र० । अनेन "पश्च"देशः ।

**[ उत्तरपश्चाद्रमणीयम् ]** उत्तरा च सा अपरा च = उत्तरापरा । 'सर्वादयोऽस्यादौ' (३।२।६१) पुंवत् । उत्तरापरा दिग्-देशो वा रमणीयः = उत्तरपश्चाद्रमणीयम् । 'अधरा-ऽपराच्चाऽऽत्' (७।२।११८) आत्प्र० । 'अनेन "पश्च"देशः ।

**[ उत्तरपश्चादागतः ]** उत्तरापरस्या दिशः, उत्तरापरस्माद्देशाद् वा आगतः = उत्तरपश्चादागतः । 'अधरा-ऽपराच्चाऽऽत्' (७।२।११८) आत्प्र० । अनेन "पश्च"देशः ।

**[ उत्तरपश्चाद्वसति ]** उत्तरापरस्यां दिशि, उत्तरापरस्मिन् देशे वा वसति = उत्तरपश्चाद्वसति । 'अधरा-ऽपराच्चाऽऽत्' (७।२।११८) आत्प्र० । अनेन "पश्च"देशः ।।छ।।

## वोत्तरपदेऽर्द्धे ॥ ७।२।१२५ ॥

**[ वा ]** वा प्रथमा सि ।

**[ उत्तरपदे ]** उत्तरपद सप्तमी ङि ।

**[ अर्द्धे ]** अर्द्ध सप्तमी ङि ।

**[ पश्चार्द्धम्, अपरार्द्धम् ]** अपरमर्द्धं = पश्चार्द्धम् । अनेन अपरशब्दस्य "पश्च"देशः विकल्पेन ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ दक्षिणपश्चार्द्धः, दक्षिणापरार्द्धः ]** दक्षिणा चासौ अपरा च = दक्षिणापरा । 'सर्वादयोऽस्यादौ' (३।२।६१) पुंवत् । दक्षिणापरस्या अर्द्धः = दक्षिणपश्चार्द्धः । अनेन विकल्पेन अपरशब्दस्य "पश्च"देशः ।

**[ उत्तरपश्चार्द्धः, उत्तरापरार्द्धः ]** उत्तरा चासौ अपरा च = उत्तरापरा । 'सर्वादयोऽस्यादौ' (३।२।६१) पुंवत् । उत्तरापरस्या अर्द्धः = उत्तरपश्चार्द्धः । अनेन विकल्पेन अपरशब्दस्य "पश्च"देशः ।।छ।।

**कृ-भ्वस्तिभ्यां कर्म-कर्तृभ्यां प्रागतत्तत्त्वे च्विः ।। ७।२।१२६ ।।**

**[ कृभ्वस्तिभ्याम् ]** भूश्च अस्तिश्च = भ्वस्ति, काश्च(का च) भ्वस्तिश्च(च) = कृभ्वस्तिनी, ताभ्याम् = कृभ्वस्तिभ्याम् । तृतीया भ्याम् ।

**[ कर्मकतृभ्याम् ]** कर्म च कर्ता च = कर्मकर्तृणी, ताभ्याम् = कर्मकर्तृभ्याम् । पञ्चमी भ्याम् ।

**[ प्रागतत्तत्त्वे ]** न तद् मण्डयते । न सः = असः, अतस्य भावः = अतत्त्वम् । 'भावे त्व-तल्' (७।१।५५) त्वप्र० । प्राक्-पूर्वं अतत्त्वं = प्रागतत्तत्त्वम्, तस्मिन् ।

अभूततद्भाव इत्यर्थः । अविद्यमानस्य विद्यमानत्वे इत्यर्थः ।

**[ च्विः ]** च्वि प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

द्रव्यस्य गुणक्रियाद्रव्यसम्बन्धसमूहविकारयोगे प्रागतत्तत्त्वमुदाहार्यम् ।

**[ शुक्लीकरोति पटम् ]** अशुक्लं शुक्लं करोति = शुक्लीकरोति पटम् । अनेन च्विप्र० । 'ईश्च्वाववर्णस्या-ऽनव्ययस्य' (४।३।१११) अ० → ई० । 'अप्रयोगीत्' (१।१।३७) च्विलोपः । प्रागशुक्लं शुक्लं करोतीत्यर्थः ।

**[ शुक्लीक्रियते पटः ]** अशुक्लः शुक्लः क्रियते = शुक्लीक्रियते पटः । अनेन च्विप्र० । 'ईश्च्वाववर्णस्या०' (४।३।१११) अ० → ई० । 'अप्रयोगीत्' (१।१।३७) च्विलोपः । प्रागशुक्लः शुक्लः क्रियत इत्यर्थः ।

**[ शुक्लीकरणम् ]** अशुक्लस्य शुक्लस्य करणं = शुक्लीकरणम् । अनेन च्विप्र० । 'ईश्च्वाववर्णस्या०' (४।३।१११) अ० → ई० । 'अप्रयोगीत्' (१।१।३७) च्विलोपः ।

**[ शुक्लीभवति पटः ]** अशुक्लः शुक्लः भवति = शुक्लीभवति पटः । अनेन च्विप्र० । 'ईश्च्वाववर्णस्या०' (४।३।१११) अ० → ई० । 'अप्रयोगीत्' (१।१।३७) च्विलोपः । प्रागशुक्लः पट इदानीं शुक्लो भवतीत्यर्थः ।

**[ शुक्लीभवनम् ]** अशुक्लस्य शुक्लस्य भवनं = शुक्लीभवनम् । अनेन च्विप्र० । 'ईश्च्वाववर्णस्या०' (४।३।१११) अ० → ई० । 'अप्रयोगीत्' (१।१।३७) च्विलोपः ।

**[ शुक्लीस्यात् पटः ]** अशुक्लः शुक्लः स्यात् = शुक्लीस्यात् पटः । अनेन च्विप्र० । 'ईश्च्वाववर्णस्या०' (४।३।१११) अ० → ई० । 'अप्रयोगीत्' (१।१।३७) च्विलोपः । प्रागशुक्लः पट इदानीं शुक्लः स्यादित्यर्थः ।

**[ कारकीकरोति चैत्रम् ]** अकारकं कारकं करोति = कारकीकरोति । अनेन च्विप्र० ।

**[ कारकीभवति ]** अकारकः कारको भवति = कारकीभवति ।

**[ कारकीस्याच्चैत्रः ]** अकारकः कारकः स्यात् = कारकीस्याच्चैत्रः । अनेन च्विप्र० ।

**[ दण्डीकरोति चैत्रम् ]** अदण्डिनं दण्डिनं करोति = दण्डीकरोति चैत्रः(त्रम्) ।

**[ दण्डीभवति ]** अदण्डी दण्डी भवति = दण्डीभवति ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ दण्डीस्याच्चैत्रः ]** अदण्डी दण्डी स्यात् = दण्डीस्याच्चैत्रः । अनेन च्विप्र० । असत्पर इत्यधिकारस्य 'रात् सः' (२।१।९०) इत्यत्र स्थितत्वात् 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् । 'दीर्घश्च्वि-यङ्-यक्-क्येषु च' (४।३।१०८) दीर्घः ।

**[ राजपुरुषीकरोति चैत्रम् ]** राज्ञः पुरुषः = राजपुरुषः । अराजपुरुषं राजपुरुषं करोति = राजपुरुषीकरोति चैत्रम् ।

**[ राजपुरुषीभवति ]** अराजपुरुषो राजपुरुषो भवति = राजपुरुषीभवति ।

**[ राजपुरुषीस्याच्चैत्रः ]** अराजपुरुषः राजपुरुषः स्यात् = राजपुरुषीस्याच्चैत्रः ।

**[ सङ्गीकरोति गाः ]** असङ्गं सङ्गं करोति = सङ्गीकरोति । अनेन च्विप्र० । 'ईश्च्वाववर्णस्या-ऽनव्ययस्य' (४।३।१११) अ० → ई० । 'अप्रयोगीत्' (१।१।३७) च्विलोपः ।

**[ सङ्गीभवन्ति ]** असङ्गा सङ्गा भवन्ति = सङ्गीभवन्ति ।

**[ सङ्गीस्युर्गावः ]** असङ्गाः सङ्गाः स्युः = सङ्गीस्युर्गावः । अनेन च्विप्र० । 'ईश्च्वाववर्णस्या०' (४।३।१११) अ० → ई० । 'अप्रयोगीत्' (१।१।३७) च्विलोपः ।

**[ घटीकरोति मृदम् ]** अघटां घटां करोति = घटीकरोति मृदम् ।

**[ घटीभवति ]** अघटा घटा भवति = घटीभवति ।

**[ घटीस्यान्मृत् ]** अघटा घटा स्यात् = घटीस्यान्मृत् । अनेन च्विप्र० । 'ईश्च्वाववर्णस्या०' (४।३।१११) ई० । 'अप्रयोगीत्' (१।१।३७) च्विलोपः ।

**[ पटीकरोति तन्तून् ]** अपटान् अपटान् करोति = पटीकरोति तन्तून् ।

**[ पटीभवन्ति ]** अपटाः पटा भवन्ति = पटीभवन्ति ।

**[ पटीस्युस्तन्तवः ]** अपटाः पटाः स्युः = पटीस्युस्तन्तवः । अनेन च्विप्र० । 'ईश्च्वाववर्णस्या०' (४।३।१११) अ० → ई० । 'अप्रयोगीत्' (१।१।३७) च्विलोपः ।

**[ भस्मीकरोति काष्ठम् ]** अभस्म भस्म करोति = भस्मीकरोति काष्ठम् ।

**[ भस्मीभवति काष्ठम् ]** अभस्म भस्म भवति = भस्मीभवति काष्ठम् ।

**[ भस्मीस्यात् काष्ठम् ]** अभस्म भस्म स्यात् = भस्मीस्यात् काष्ठम् । अनेन च्विप्र० ।

एककालमतत्त्वे न भवति, भवति हि एको भावः कश्चिदेककालं शुक्लोऽशुक्लश्च देशभेदेन चित्रपटीवत् ।

**[ भद्राकरोति शिरः ]** अभद्रं भद्रं करोति = भद्राकरोति । 'मद्र-भद्राद् वपने' (७।२।१४४) डाच्प्र० → आ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् ।

**[ निष्कुलाकरोति दाडिमम् ]** अनिष्कुलं निष्कुलं करोति = निष्कुलाकरोति दाडिमम् । 'निष्कुलान्निष्कोषणे' (७।२।१३९) डाच्प्र० → आ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् ॥छ॥

## अरुर्मनश्चक्षुश्चेतो-रहो-रजसां लुक् च्वौ ॥ ७।२।१२७ ॥

**[ अरुर्मनश्चक्षुश्चेतोरहोरजसाम् ]** अरुश्च मनश्च चक्षुश्च चेतश्च रहश्च रजश्च = अरुर्मनश्चक्षुश्चेतोरहोरजांसि, तेषाम् ।

**[ लुक् ]** लुक् प्रथमा सि ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

[ **च्वौ** ] च्वि सप्तमी ङि ।

[ **अरूकरोति, अरूभवति, अरूस्यात्** ] अनरुः अरुः करोति = अरूकरोति । अनरुः अरुः भवति = अरूभवति। अनरुः अरुः स्यात् = अरूस्यात् । 'कृ-भ्वस्तिभ्यां कर्म-कर्तृभ्यां प्रागतत्तत्त्वे च्विः' (७।२।१२६) च्विप्र० । अनेन लुक् सकारस्य । 'दीर्घश्च्वि-यङ्-यक्-क्येषु च' (४।३।१०८) दीर्घः ।

[ **महारूकरोति, महारूभवति, महारूस्यात्** ] महदरुर्यस्य = महारुः । 'जातीयैकार्थेऽच्वेः' (३।२।७०) डा० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् । अमहारुषं महारुषं करोति = महारूकरोति । अमहारुः महारुर्भवति = महारूभवति । अमहारुः महारुः स्यात् = महारूस्यात् । 'कृ-भ्वस्तिभ्यां कर्म०' (७।२।१२६) च्विप्र० । अनेन सलुक् । 'दीर्घश्च्वि०' (४।३।१०८) दीर्घः ।

[ **मनीकरोति, मनीभवति, मनीस्यात्** ] अमनो मनः करोति = मनीकरोति । अमनो मनोभवति = मनीभवति । अमनो मनः स्यात् = मनीस्यात् । 'कृ-भ्वस्तिभ्यां कर्म०' (७।२।१२६) च्विप्र० । अनेन सलुक् । 'ईश्च्वाववर्णस्या०' (४।३।१११) अ० → ई० ।

[ **उन्मनीकरोति, उन्मनीभवति, उन्मनीस्यात्** ] उद्गतं मनो यस्य स = उन्मनाः । अनुन्मनसं उन्मनसं करोति = उन्मनीकरोति । अनुन्मना उन्मना भवति = उन्मनीभवति । अनुन्मना उन्मनाः स्यात् = उन्मनीस्यात् । 'कृ-भ्वस्तिभ्यां०' (७।२।१२६) च्विप्र० । अनेन सलुक् । 'ईश्च्वाववर्णस्या०' (४।३।१११) अ० → ई० ।

[ **चक्षूकरोति, चक्षूभवति, चक्षूस्यात्** ] अचक्षुः चक्षुः करोति = चक्षूकरोति । अचक्षुः चक्षुर्भवति = चक्षूभवति । अचक्षुः चक्षुः स्यात् = चक्षूस्यात् । 'कृ-भ्वस्तिभ्यां कर्म०' (७।२।१२६) च्विप्र० । अनेन सलुक् । 'दीर्घश्च्वि०' (४।३।१०८) दीर्घः ।

[ **उच्चक्षूकरोति, उच्चक्षूभवति, उच्चक्षूस्यात्** ] उद्गतं चक्षुर्यस्य । अनुच्चक्षुषं उच्चक्षुषं करोति = उच्चक्षूकरोति । अनुच्चक्षुः उच्चक्षुर्भवति = उच्चक्षूभवति । अनुच्चक्षुरुच्चक्षुः स्यात् = उच्चक्षूस्यात् । 'कृ-भ्वस्तिभ्यां कर्म०' (७।२।१२६) च्विप्र० । अनेन सलुक् । 'दीर्घश्च्वि०' (४।३।१०८) दीर्घः । 'अप्रयोगीत्' (१।१।३७) च्विलोपः ।

[ **चेतीकरोति, चेतीभवति, चेतीस्यात्** ] चेतस् । अचेतश्चेतः करोति = चेतीकरोति । अचेतश्चेतोभवति = चेतीभवति । अचेतश्चेतः स्यात् = चेतीस्यात् । 'कृ-भ्वस्तिभ्यां कर्म-कर्तृभ्यां०' (७।२।१२६) च्विप्र० । अनेन सलुक् । 'ईश्च्वाववर्णस्या०' (४।३।१११) अ० → ई० । 'अप्रयोगीत्' (१।१।३७) च्विलोपः ।

[ **विचेतीकरोति, विचेतीभवति, विचेतीस्यात्** ] विशिष्टं चेतो यस्य सः = विचेताः । अविचेतसं विचेतसं करोति = विचेतीकरोति । अविचेतो विचेतोभवति = विचेतीभवति । अविचेतो विचेतः स्यात् = विचेतीस्यात् । 'कृ-भ्वस्तिभ्यां कर्म०' (७।२।१२६) च्विप्र० । अनेन सलुक् । 'ईश्च्वाववर्णस्या०' (४।३।१११) अ० → ई० । 'अप्रयोगीत्' (१।१।३७) च्विलोपः ।

[ **रहीकरोति, रहीभवति, रहीस्यात्** ] अरहो रहः करोति = रहीकरोति । अरहो रहोभवति = रहीभवति । अरहः रहः स्यात् = रहीस्यात् । 'कृ-भ्वस्तिभ्यां कर्म-कर्तृभ्यां०' (७।२।१२६) च्विप्र० । अनेन सलुक् । 'ईश्च्वाववर्णस्या०' (४।३।१११) अ० → ई० । 'अप्रयोगीत्' (१।१।३७) च्विलोपः ।

[ **विरहीकरोति, विरहीभवति, विरहीस्यात्** ] विगतं रहः-एकान्तं यस्य । अविरहसं विरहसं करोति = विरहीकरोति । अविरहो विरहोभवति = विरहीभवति । अविरहो विरहः स्यात् = विरहीस्यात् । 'कृ-भ्वस्तिभ्यां कर्म-कर्तृभ्यां०' (७।२।१२६) च्विप्र० । अनेन सलुक् । 'ईश्च्वाववर्णस्या०' (४।३।१११) अ० → ई० । 'अप्रयोगीत्' (१।१।३७) च्विलोपः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ रजीकरोति, रजीभवति, रजीस्यात् ]** अरजो रजः करोति = रजीकरोति । अरजो रजोभवति = रजीभवति । अरजो रजः स्यात् = रजीस्यात् । 'कृ-भ्वस्तिभ्यां कर्म-कर्तृभ्यां०' (७।२।१२६) च्विप्र० । अनेन सलुक् । 'ईश्च्वाववर्णस्या०' (४।३।१११) अ० → ई० । 'अप्रयोगीत्' (१।१।३७) च्विलोपः ।

**[ विरजीकरोति, विरजीभवति, विरजीस्यात् ]** विगतं रजो यस्य । अविरजसं विरजसं करोति = विरजीकरोति । अविरजो विरजोभवति = विरजीभवति । अविरजाः विरजाः स्यात् = विरजीस्यात् । 'कृ-भ्वस्तिभ्यां कर्म०' (७।२।१२६) च्विप्र० । अनेन सलुक् । 'ईश्च्वाववर्णस्या०' (४।३।१११) अ० → ई० । 'अप्रयोगीत्' (१।१।३७) च्विलोपः ।

**बहुवचनं तदन्तानामपि परिग्रहार्थम्** ॥छ॥

## इसुसोर्बहुलम् ॥ ७।२।१२८ ॥

**[ इसुसोः ]** इस् च उस् च = इसुसौ, तयोः = इसुसोः । षष्ठी ओस् ।

**[ बहुलम् ]** बहुल प्रथमा सि ।

**[ सर्पीकरोति नवनीतम् ]** असर्पिः सर्पिः करोति = सर्पीकरोति नवनीतम् । 'कृ-भ्वस्तिभ्यां कर्म-कर्तृभ्यां प्रागतत्तत्त्वे च्विः' (७।२।१२६) च्विप्र० । अनेन सलुक् । 'दीर्घश्च्वि-यङ्-यक्-क्येषु च' (४।३।१०८) दीर्घः । 'अप्रयोगीत्' (१।१।३७) च्विलोपः ।

**[ धनूभवति वंशः ]** अधनुर्धनुर्भवति = धनूभवति । 'कृ-भ्वस्तिभ्यां०' (७।२।१२६) च्विप्र० । अनेन सलुक् । 'दीर्घश्च्वि-यङ्-यक्-क्येषु च' (४।३।१०८) दीर्घः । 'अप्रयोगीत्' (१।१।३७) च्विलोपः ।

बहुलाधिकारादग्रेतनयोरुदाहरणयोः (सर्पिर्भवति, धनुर्भवति) अनेन सलुक् न भवति ॥छ॥

## व्यञ्जनस्यान्त ईः ॥ ७।२।१२९ ॥

**[ व्यञ्जनस्य ]** व्यञ्जन षष्ठी ङस् ।

**[ अन्तः ]** अन्त प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ ईः ]** ई प्रथमा सि ।

**[ दृषदीभवति शिला, दृषद्भवति ]** अदृषद् दृषद्भवति = दृषदीभवति शिला । 'कृ-भ्वस्तिभ्यां कर्म०' (७।२।१२६) च्विप्र० । अनेन ई प्रायः । प्रथमा सि । 'अव्ययस्य' (१।१।३७) सिलुप् । दृषद्भवति ।

**[ समिधीभवति काष्ठम्, समिद्भवति ]** असमित् समिद्भवति = समिधीभवति । 'कृ-भ्वस्तिभ्यां कर्म०' (७।२।१२६) च्विप्र० । अनेन ई प्रायः । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । समिद्भवति ॥छ॥

## व्याप्तौ स्सात् ॥ ७।२।१३० ॥

**[ व्याप्तौ ]** व्याप्ति सप्तमी ङि ।

**[ स्सात् ]** सकारादिः सात् = स्सात् । प्रथमा सि ।

कृ-भ्वस्तिभ्यां कर्म-कर्तृभ्यां प्रागतत्तत्त्व इति वर्त्तते । प्रागतत्तत्वस्य कर्म चेद् व्याप्तिः सर्वात्मना द्रव्येणाभिसम्बन्धो भवति । **द्विसकारपाठः षत्वनिषेधार्थः** ।

**[ अग्निसात् करोति काष्ठम्, अग्निसाद्भवति, अग्निसात् स्यात् ]** सर्वं काष्ठं प्रागनग्निमग्निं करोति = अग्निसात् करोति । अनग्निरग्निर्भवति = अग्निसाद्भवति । अनग्निरग्निः स्यात् = अग्निसात् स्यात् । अनेन सात्प्र० । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ उदकसात् करोति लवणम्, उदकसाद्भवति, उदकसात् स्यात् ]** सर्वं लवणं प्रागनुदकमुदकं करोति = उदकसात् करोति । अनुदकमुदकं भवति = उदकसाद्भवति । अनुदकमुदकं स्यात् = उदकसात् स्यात् । अनेन सात्प्र० । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।।छ।।

## जातेः सम्पदा च ।। ७।२।१३१ ।।

**[ जातेः ]** जाति षष्ठी ङस् ।

**[ सम्पदा ]** सम्पद् तृतीया टा ।

**[ च ]** च प्रथमा सि ।

**[ अस्यां सेनायां सर्वं शस्त्रमग्निसात् करोति दैवम्, अग्निसाद्भवति, अग्निसात् स्यात् ]** अस्यां सेनायां सर्वं शस्त्रमनग्निमग्निं करोति = अग्निसात् करोति । अस्यां सेनायां सर्वं शस्त्रमनग्निरग्निर्भवति = अग्निसाद्भवति । अस्यां सेनायां सर्वं शस्त्रमनग्निरग्निः स्यात् = अग्निसात् स्यात् । अनेन सात्प्र० ।

**[ अस्यां सेनायां सर्वं शस्त्रमग्निसात् संपद्यते ]** अस्यां सेनायां सर्वं शस्त्रमनग्निरग्निः संपद्यते = अग्निसात् संपद्यते । अनेन सात्प्र० ।

**[ वर्षासु सर्वं लवणमुदकसात् करोति मेघः, उदकसाद्भवति, उदकसात् स्यात्, उदकसात् संपद्यते ]** वर्षासु सर्वं लवणमनुदकमुदकं करोति = उदकसात् करोति मेघः । अनेन सात्प्र० । अनुदकः उदको भवति = उदकसाद्भवति । अनुदकः उदकः स्यात् = उदकसात् स्यात् । अनुदकः उदकः संपद्यते = उदकसात् संपद्यते । अनेन सात्प्र० । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

अनेकव्यक्त्याधारा हि जातिः, तीरीतोमरादयो हि जातेरवयवाः, तेषां प्रागतत्तत्त्वेन सम्बन्धे जातेरपि व्याप्तिर्भवतीति अन्यथा जातेरेकत्वात् व्याप्तिर्न स्यादिति चकार उत्तरत्रोभयोः कृभ्वस्तिसम्पद्योः समुच्चयार्थः ।।छ।।

## तत्राऽधीने ।। ७।२।१३२ ।।

**[ तत्र ]** तत्र प्रथमा सि ।

**[ अधीने ]** अधि इनो यत्तदधीनम्, तस्मिन् ।

कृभ्वस्तिभ्यां संपदा चेत्यनुवर्तते । कर्मकर्तृभ्यां प्रागतत्तत्त्वे इति च निवृत्तम् ।

**[ राजसात् करोति, राजसाद्भवति, राजसात् स्यात्, राजसात् संपद्यते ]** राजन् । राजन्यधीनं करोति = राजसात् करोति । अनेन सात्प्र० । राजस्वामिकं करोतीत्यर्थः । राजन्यधीनं भवति = राजसाद्भवति । राजन्यधीनं स्यात् = राजसात् स्यात् । राजन्यधीनं संपद्यते = राजसात् संपद्यते । अनेन सात्प्र० । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ आचार्यसात् करोति, आचार्यसाद्भवति, आचार्यसात् स्यात्, आचार्यसात् संपद्यते ]** आचार्येऽधीनं करोति = आचार्यसात् करोति । आचार्येऽधीनं भवति = आचार्यसाद्भवति । आचार्येऽधीनं स्यात् = आचार्यसात् स्यात् । आचार्येऽधीनं संपद्यते = आचार्यसात् संपद्यते । अनेन सात्प्र० ।।छ।।

## देये त्रा च ।। ७।२।१३३ ।।

**[ देये ]** देय सप्तमी ङि ।

**[ त्रा ]** त्रा प्रथमा सि ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

[ च ] च प्रथमा सि ।

चकारो न स्सातोऽनुकर्षणार्थः, तस्याधीनतामात्रविवक्षायां पूर्वेणैव सिद्धत्वात्, किन्तु कृभ्वस्तिभ्यां संपदा चेत्यस्यानुकर्षणार्थः, तेनोत्तरत्र नानुवर्त्तते ।

**[ देवत्रा करोति द्रव्यम्, देवत्रा भवति, देवत्रा स्यात्, देवत्रा संपद्यते ]** देव । देवेऽधीनं देयं करोति = देवत्रा करोति द्रव्यम् । अनेन त्राप्र० । देवाय दातव्यमिति यत् स्थापितं तदिदानीं देवाय ददातीत्यर्थः । देवेऽधीनं देयं भवति = देवत्रा भवति । देवेऽधीनं देयं स्यात् = देवत्रा स्यात् । देवेऽधीनं देयं संपद्यते = देवत्रा संपद्यते । अनेन त्राप्र० ।

**[ गुरुत्रा करोति, गुरुत्रा भवति, गुरुत्रा स्यात्, गुरुत्रा संपद्यते ]** गुरुषु अधीनं देयं करोति = गुरुत्रा करोति । गुरुषु अधीनं देयं भवति = गुरुत्रा भवति । गुरुषु अधीनं देयं स्यात् = गुरुत्रा स्यात् । गुरुषु अधीनं देयं संपद्यते = गुरुत्रा संपद्यते । अनेन त्राप्र० ।

**[ राजसाद्भवति राष्ट्रम् ]** राजन्यधीनं भवति = राजसाद्भवति राष्ट्रम् । 'तत्राऽधीने' (७।२।१३२) सात्प्र० ।।छा।

## सप्तमी-द्वितीयाद् देवादिभ्यः ॥ ७।२।१३४ ॥

**[ सप्तमीद्वितीयात् ]** सप्तमी च द्वितीया च = सप्तमीद्वितीयम्, तस्मात् ।

**[ देवादिभ्यः ]** देव आदिर्येषां ते = देवादयः, तेभ्यः = देवादिभ्यः । पञ्चमी भ्यस् ।

**[ देवत्रा वसति ]** देवेषु वसति = देवत्रा वसति ।

**[ देवत्रा भवति ]** देवेषु भवति = देवत्रा भवति ।

**[ देवत्रा स्यात् ]** देवेषु स्यात् = देवत्रा स्यात् ।

**[ देवत्रा करोति ]** देवान् करोति = देवत्रा करोति ।

**[ देवत्रा गच्छति ]** देवान् गच्छति = देवत्रा गच्छति ।

**[ मनुष्यत्रा वसति ]** मनुष्येषु वसति = मनुष्यत्रा वसति ।

**[ मनुष्यत्रा गच्छति ]** मनुष्यान् गच्छति = मनुष्यत्रा गच्छति ।

**[ मर्त्यत्रा वसति ]** मर्त्येषु वसति = मर्त्यत्रा वसति ।

**[ मर्त्यत्रा गच्छति ]** मर्त्यान् गच्छति = मर्त्यत्रा गच्छति ।

**[ पुरुषत्रा वसति ]** पुरुषेषु वसति = पुरुषत्रा वसति ।

**[ पुरुषत्रा गच्छति ]** पुरुषान् गच्छति = पुरुषत्रा गच्छति ।

**[ बहुत्रा वसति ]** बहुषु वसति = बहुत्रा वसति ।

**[ बहुत्रा गच्छति ]** बहून् गच्छति = बहुत्रा गच्छति । सर्वत्र अनेन त्राप्र० । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।।छा।

## तीय-शम्ब-बीजात् कृगा कृषौ डाच् ॥ ७।२।१३५ ॥

**[ तीयशम्बबीजात् ]** तीयश्च शम्बश्च बीजश्च = तीयशम्बबीजम्, तस्मात् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ कृगा ]** कृग् तृतीया टा ।

**[ कृषौ ]** कृषि सप्तमी ङि ।

**[ डाच् ]** डाच् प्रथमा सि ।

**[ द्वितीयाकरोति क्षेत्रम् ]** द्वितीयं वारं करोति क्षेत्रं = द्वितीयाकरोति । अनेन डाच्प्र० → आ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् । द्वितीयं वारं कृषतीत्यर्थः ।

**[ तृतीयाकरोति क्षेत्रम् ]** तृतीयं वारं करोति क्षेत्रं = तृतीयाकरोति क्षेत्रम् । अनेन डाच्प्र० → आ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् । तृतीयं वारं कृषतीत्यर्थः ।

**[ शम्बाकरोति क्षेत्रम् ]** शम्बशब्दस्तिर्यगर्थः । शम्बं करोति क्षेत्रं = शम्बाकरोति । अनेन डाच्प्र० । अनुलोमकृष्टं प्राञ्जलकृष्टमित्यर्थः । पुनस्तिर्यग् कृषतीत्यर्थः ।

अन्ये तु शम्बं लोहकण्ठी वर्ध्रकुण्डलिका वा तत् साधनं कारकं यस्य शम्बसाधनः कृषिरिति शम्बेन कृषतीत्यर्थः । एके तु-

**[ शम्बाकरोति कुलिवम् ]** शम्बं करोति कुलिवं = शम्बाकरोति कुलिवम् । मतान्तरेण अनेन डाच्प्र० । शम्बपूर्वोक्तं तत् कुलिवस्य करोतीत्यर्थः ।

**[ बीजाकरोति क्षेत्रम् ]** बीजं करोति-खोटयति क्षेत्रं = बीजाकरोति क्षेत्रम् । अनेन डाच्प्र० → आ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् । उप्ते पश्चाद् बीजैः सह कृषतीत्यर्थः ।

ननु प्रथमं क्षेत्रस्य उत्पन्ने कथं द्वितीयेत्याशङ्का यदाप्येवं विग्रहः क्षेत्रस्य द्वितीयां कृषिं, कर्षं, कर्षणं करोति । शम्बं करोति क्षेत्रस्य कुलिवस्य वा बीजं करोति क्षेत्रस्येति तदापि द्वितीयाकरोति क्षेत्रमित्यादौ क्षेत्रात् द्वितीया भवति । द्वितीयाकरोतीत्यादयो हि मुण्डयतीत्यादिवत् क्रिया शब्दाः तेषां च क्षेत्रादि कर्म भवति ।

**चकारो 'डाच्यादौ' ( ७।२।१४९ ) इत्यत्र विशेषणार्थः ॥छा॥**

### संख्यादेर्गुणात् ॥ ७।२।१३६ ॥

**[ संख्यादेः ]** संख्या चासावादिश्च = संख्यादिस्तस्मात् ।

**[ गुणात् ]** गुण पञ्चमी ङसि ।

**[ द्विगुणाकरोति क्षेत्रम् ]** द्विगुणं कर्षणं करोति क्षेत्रस्य = द्विगुणाकरोति क्षेत्रम् । अनेन डाच्प्र० → आ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् । क्षेत्रस्य द्विगुणं विलेखनं करोतीत्यर्थः ।

**[ त्रिगुणाकरोति क्षेत्रम् ]** त्रिगुणं कर्षणं करोति क्षेत्रस्य = त्रिगुणाकरोति क्षेत्रम् । अनेन डाच्प्र० → आ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् । क्षेत्रस्य त्रिगुणं विलेखनं करोतीत्यर्थः ॥छा॥

### समयाद् यापनायाम् ॥ ७।२।१३७ ॥

**[ समयात् ]** समय पञ्चमी ङसि ।

**[ यापनायाम् ]** यापना सप्तमी ङि ।

**[ समयाकरोति तन्तुवायः ]** समयं करोति = समयाकरोति तन्तुवायः । कुविन्दः कालिक इत्यर्थः । अनेन डाच्प्र० → आ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् । अद्य श्वस्ते (श्वो वा) पटं दास्यामीति कालक्षेपं करोतीत्यर्थः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ समयं करोति ]** समयं करोति । सङ्केतमित्यर्थः ॥छ॥

## सपत्र-निष्पत्रादतिव्यथने ॥ ७।२।१३८ ॥

**[ सपत्रनिष्पत्रात् ]** सपत्रश्च निष्पत्रश्च = सपत्रनिष्पत्रम्, तस्मात् ।

**[ अतिव्यथने ]** अतीव व्यथनम् = अतिव्यथनम्, तस्मिन् ।

**[ सपत्राकरोति मृगम् ]** पत्रं-शरः । सह पत्रमनेनेति सपत्रः । 'एकार्थं चाऽनेकं च' (३।१।२२) इति समासः । तं करोति = सपत्राकरोति मृगम् । अनेन डाच्प्र० → आ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् । शरमस्य शरीरे प्रवेशयतीत्यर्थः ।

**[ निष्पत्राकरोति ]** निर्गतं पत्रमस्मादिति निष्पत्रम्, तं करोति = निष्पत्राकरोति । अनेन डाच्प्र० → आ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् । शरमस्यापरपार्श्वेन निष्क्रमयतीत्यर्थः ।

**[ सपत्राकरोति वृक्षं वायुः ]** सपत्रं करोति = सपत्राकरोति वृक्षं वायुः ।

**[ निष्पत्राकरोति वृक्षं वायुः ]** निष्पत्रं करोति = निष्पत्राकरोति वृक्षं वायुः । अत्र पत्रशातनमेवातिव्यथनम् । सपत्राकरोतीत्यपि मङ्गलाभिप्रायेण वृक्षस्य निष्पत्राकरणमेवोच्यते । यथा दीपो नन्दतीति विध्वंसः ॥छ॥

## निष्कुलान्निष्कोषणे ॥ ७।२।१३९ ॥

**[ निष्कुलात् ]** निष्कुल पञ्चमी ङसि ।

**[ निष्कोषणे ]** निष्कोषण सप्तमी ङि ।

**निष्कृष्टं कुलमवयवसङ्घातोऽस्मादिति निष्कुलम् । अन्तरवयवानां बहिर्निष्कासनं = निष्कोषणम् ।**

**[ निष्कुलाकरोति दाडिमम् ]** निष्कुलं करोति = निष्कुलाकरोति दाडिमम् । अनेन डाच्प्र० → आ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् । निष्कुष्णातीत्यर्थः ।

**[ निष्कुलाकरोति पशुं चण्डालः ]** निष्कुलं करोति = निष्कुलाकरोति पशुं चण्डालः । अनेन डाच्प्र० ॥छ॥

## प्रिय-सुखादानुकूल्ये ॥ ७।२।१४० ॥

**[ प्रियसुखात् ]** प्रियश्च सुखं च = प्रियसुखम्, तस्मात् ।

**[ आनुकूल्ये ]** परचित्ताराधनमानुकूल्यम् । अनुकूलस्य भावः = आनुकूल्यम्, तस्मिन् ।

**[ प्रियाकरोति गुरुम् ]** प्रियं करोति = प्रियाकरोति । अनेन डाच्प्र० → आ ।

**[ सुखाकरोति गुरुम् ]** सुखं करोति = सुखाकरोति । अनेन डाच्प्र० → आ । गुरुमाराधयतीत्यर्थः ॥छ॥

## दुःखात् प्रातिकूल्ये ॥ ७।२।१४१ ॥

**[ दुःखात् ]** दुःख पञ्चमी ङसि ।

**[ प्रातिकूल्ये ]** कूलं प्रतिगतः = प्रतिकूलम् । प्रतिकूलस्य भावः = प्रातिकूल्यम्, तस्मिन् । 'पतिराजान्तगुणाङ्गराजादिभ्यः कर्मणि च' (७।१।६०) ट्यण्प्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । विपरीतकरणमित्यर्थः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ दुःखाकरोति शत्रुम् ]** दुःखं करोति = दुःखाकरोति शत्रुम् । अनेन डाच्प्र० । शत्रोः प्रातिकूल्यं करोति । प्रतिकूलमाचरति । अनभिमतानुष्ठानेन तं पीडयतीत्यर्थः ॥छ॥

## शूलात् पाके ॥ ७।२।१४२ ॥

**[ शूलात् ]** शूल पञ्चमी ङसि ।

**[ पाके ]** पाक सप्तमी ङि ।

**[ शूलाकरोति मांसम् ]** शूलं करोति = शूलाकरोति मांसम् । अनेन डाच्प्र० । शूले पचतीत्यर्थः ।

**[ शूलं करोति कदन्नम् ]** शूल द्वितीया अम् । करोति । कुत्सितमन्नं = कदन्नम् । 'कोः कत् तत्पुरुषे' (३।२।१३०) कु० → कत्‌देशः ॥छ॥

## सत्यादशपथे ॥ ७।२।१४३ ॥

**[ सत्यात् ]** सत्य पञ्चमी ङसि ।

**[ अशपथे ]** न शपथः = अशपथस्तस्मिन् ।

**[ सत्याकरोति वणिग् भाण्डम् ]** सत्यं करोति = सत्याकरोति वणिग् भाण्डम् । अनेन डाच्प्र० । कार्षापणादिदानेन मयावश्यमेवैतत् क्रेतव्यमिति विक्रेतारं प्रत्याययति-प्रत्ययमुत्पादयतीत्यर्थः ॥छ॥

## मद्र-भद्राद् वपने ॥ ७।२।१४४ ॥

**[ मद्रभद्रात् ]** मद्रं च भद्रं च = मद्रभद्रम्, तस्मात् ।

**[ वपने ]** वपन सप्तमी ङि ।

**[ मद्राकरोति ]** मद्रं वपनं करोति = मद्राकरोति । अनेन डाच्प्र० → आ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् ।

**[ भद्राकरोति नापितः ]** भद्रं करोति = भद्राकरोति नापितः । अनेन डाच्प्र० → आ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् । शिशोर्मङ्गल्यं केशच्छेदनं करोतीत्यर्थः ।

**मद्र-भद्रशब्दौ मङ्गल्यवचनौ** ॥छ॥

## अव्यक्तानुकरणादनेकस्वरात् कृ-भ्वस्तिनाऽनितौ द्विश्च ॥ ७।२।१४५ ॥

**[ अव्यक्तानुकरणात् ]** अव्यक्तस्य अनुकरणम् = अव्यक्तानुकरणम्, तस्मात् ।

**[ अनेकस्वरात् ]** न विद्यते एकः स्वरो यस्य तत् = अनेकस्वरम्, तस्मात् ।

**[ कृभ्वस्तिना ]** कृश्च(का च) भूश्च अस्तिश्च = कृभ्वस्ति, तेन ।

**[ अनितौ ]** न इति = अनिति, तस्मिन् ।

**[ द्विः ]** द्वौ वारावस्य = द्विः । 'द्वि-त्रि-चतुरः सुच्' (७।२।११०) सुच्प्र० → स् । 'अव्ययस्य' (३।२।७) लुप् ।

**[ च ]** च प्रथमा सि ।

यस्मिन् ध्वनावकारादयो वर्णा विशेषरूपेण नाभिव्यज्यन्ते सोऽव्यक्तः, तस्यानुकरणमव्यक्तानुकरणम्, तस्मात् ।

द्विश्चास्य डाच्प्रत्ययस्य प्रकृतिरुच्यते । प्रत्ययस्य द्विर्वचनानर्थक्यात् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ पटपटा करोति ]** पटत् मण्ड्यते । पटत् करोति = पटपटा करोति । अनेन डाच्प्र० → आ-द्विर्वचनम् । 'डाच्यादौ' (७।२।१४९) इति द्विर्वचनतकारलोपः ।

**[ पटपटा भवति ]** पटत् भवति = पटपटा भवति । अनेन डाच्प्र०-द्विर्वचनम् । 'डाच्यादौ' (७।२।१४९) द्विर्वचनतकारलोपः ।

**[ पटपटा स्यात् ]** पटत् स्यात् = पटपटा स्यात् । अनेन डाच्प्र०-द्विर्वचनम् । शेषं पूर्ववत् ।

**[ दमदमा करोति ]** दमत् करोति = दमदमा करोति ।

**[ दमदमा भवति ]** दमत् भवति = दमदमा भवति ।

**[ दमदमा स्यात् ]** दमत् स्यात् = दमदमा स्यात् । अनेन डाच्प्र०-द्विर्वचनम् । 'डाच्यादौ' (७।२।१४९) द्विर्वचनतकारलोपः ।

**卐[ असअसा करोति ]** असत् करोति = असअसा करोति । अनेन डाच्प्र०-द्विर्वचनम् । 'डाच्यादौ' (७।२।१४९) तलुक् ।

**卐卐[ खटखटा करोति ]** खटत् करोति = खटखटा करोति । अनेन डाच्प्र०-द्विवर्चनम् । 'डाच्यादौ' (७।२।१४९) तलुक् ।

अव्यक्तवर्णस्यापि कथञ्चिद् ध्वनिमात्रसादृश्यात् व्यक्तवर्णमनुकरणं भवति ।

**[ पटिति करोति ]** पटत् इति । द्वितीया अम् । 'अव्ययस्य' (३।२।७) अम्लुप् । 'इतावतो लुक्' (७।२।१४६) अलुक् ।।छ।।

## इतावतो लुक् ॥ ७।२।१४६ ॥

**[ इतौ ]** इति सप्तमी ङि ।

**[ अतः ]** अत् षष्ठी ङस् ।

**[ लुक् ]** लुक् प्रथमा सि ।

**[ पटिति ]** पटत् इति मण्ड्यते । अनेन अत्लुक् ।

**[ झटिति ]** झटत् इति मण्ड्यते । अनेन अत्लुक् ।

**[ छमिति ]** छमत् इति मण्ड्यते । अनेन अत्लुक् ।

**[ घटिति ]** घटत् इति मण्ड्यते । अनेन अत्लुक् ।

'असिद्धं बहिरङ्गमन्तरङ्गे' (न्या० सं० वक्ष०(१)/सूत्र(२०)) इति लुकि सति तृतीयत्वं न भवति ।

**[ जगदिति ]** अम (३९२)-द्रम (३९३)-हम्म (३९४)-मीमृ (३९५)-'गम्लृं गतौ' (३९६) गम् । गच्छतीत्येवंशीलम् । 'दिद्युद्-ददृद्-जगज्जुहू-वाक्-प्राट्-धी-श्री-द्रू-स्रू-ज्वायतस्तू-कटप्रू-परिव्राट्-भ्राजादयः क्विप्' (५।२।८३) क्विप्प्र० । निपातनात् द्वित्वम् । 'गमां क्वौ' (४।२।५८) मलोपः । 'ह्रस्वस्य तः पित्कृति' (४।४।११३)

---

卐 मध्यमवृत्तौ-बृहद्वृत्तौ-मसमसा करोति ।

卐卐 मध्यमवृत्तौ-बृहद्वृत्तौ-खरटखरटा करोति ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तोऽन्तः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । अथवा गच्छति वृद्धिक्षयमिति जगत् । 'गमेर्डिद् द्वे च' (उणा० ८८५) डित् कतृप्र०-द्विश्च ॥छ॥

## न द्वित्वे ॥ ७।२।१४७ ॥

**[ न ]** न प्रथमा सि ।

**[ द्वित्वे ]** द्वित्व सप्तमी ङि ।

**[ पटत्पटदिति ]** पटत् मांडणीयइ-अग्रे इति । 'वीप्सायाम्' (७।४।८०) द्विर्वचनम् ।

**[ घटत्घटदिति ]** घटत् मांडणीयइ-अग्रे इति । वीप्सायाम्' (७।४।८०) द्विर्वचनम् ।

**[ झटत्झटदिति ]** झटत् मांडणीयइ-अग्रे इति । 'वीप्सायाम्' (७।४।८०) द्विर्वचनम् ॥छ॥

## तो वा ॥ ७।२।१४८ ॥

**[ तः ]** त् षष्ठी ङस् ।

**[ वा ]** वा प्रथमा सि ।

**[ पटत्पटेति करोति, पटत्पटदिति करोति ]** पटत् इति । 'वीप्सायाम्' (७।४।८०) द्विर्वचने सति अनेन मूलप्रकृतितलोपः ।

**[ घटत्घटेति करोति, घटत्घटदिति करोति ]** घटत् इति । 'वीप्सायाम्' (७।४।८०) द्विर्वचने सति अनेन मूलप्रकृतितलोपः ॥छ॥

## डाच्यादौ ॥ ७।२।१४९ ॥

**[ डाचि ]** डाच् सप्तमी ङि ।

**[ आदौ ]** आदि सप्तमी ङि ।

**[ पटपटा करोति ]** पटत् करोति = पटपटा करोति । 'अव्यक्तानुकरणादनेकस्वरात् कृभ्वस्तिनाऽनितौ द्विश्च' (७।२।१४५) डाच्प्र०-द्विर्वचनं च । अनेन त्लुक् प्रकृतिसम्बन्धिनोऽतः । 'डित्यन्त्यस्वरादेः' (२।१।११४) अत्लुक् ।

**[ दमदमा करोति ]** दमत् करोति = दमदमा करोति । 'अव्यक्तानुकरणादनेकस्वरात्०' (७।२।१४५) डाच्प्र०-द्विर्वचनं च । अनेन त्लुक् प्रकृतिसम्बन्धिनोऽतः । 'डित्यन्त्यस्वरादेः' (२।१।११४) अत्लुक् ।

**[ पतपता करोति ]** पतं करोति = पतपता करोति । 'अव्यक्तानुकरणादनेकस्वरात्०' (७।२।१४५) डाच्प्र०-द्विर्वचनं च । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् ॥छ॥

## बह्वल्पार्थात् कारकादिष्टा-ऽनिष्टे प्शस् ॥ ७।२।१५० ॥

**[ बह्वल्पार्थात् ]** बहुश्च अल्पश्च = बह्वल्पौ, बह्वल्पौ अर्थौ यस्य सः = बह्वल्पार्थः, तस्मात् ।

**[ कारकात् ]** कारक पञ्चमी ङसि ।

**[ इष्टानिष्टे ]** इष्टं च अनिष्टं च, तस्मिन् ।

**[ प्शस् ]** पित् शस् = प्शस् । प्रथमा सि ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**इष्टं-प्राशित्रादि बोटतकम् । अनिष्टं-श्राद्धादि ।**

[ **ग्रामे बहवो ददति, बहुशो ददति** ] ग्रामे बहवो ददति = बहुशो ददति । अनेन प्शस्प्र० → शस् । सर्वेषु उदाहरणेषु शस्प्रत्यये 'क्रियाविशेषणात्' (२।२।४१) अम् । 'अव्ययस्य' (३।२।७) लुप् । 'अधण्तस्वाद्या शसः' (१।१।३२) इत्यनेन अव्ययसंज्ञा ।

[ **बहु धनं ददाति, बहुशो धनं ददाति** ] बहु धनं ददाति = बहुशो धनं ददाति ।

[ **विवाहे बहून् कार्षापणान्, बहुशः कार्षापणान् ददाति** ] विवाहे बहून् कार्षापणान् ददाति = बहुशः कार्षापणान् ददाति ।

[ **विवाहे बहुभिर्भुक्तमतिथिभिः, बहुशो भुक्तमतिथिभिः** ] विवाहे बहुभिर्भुक्तमतिथिभिः = बहुशो भुक्तम् ।

[ **बहुभ्योऽतिथिभ्यो ददाति, बहुशोऽतिथिभ्यो ददाति** ] बहुभ्योऽतिथिभ्यो ददाति = बहुशोऽतिथिभ्यो ददाति ।

[ **बहुभ्यो ग्रामेभ्य आगच्छति, बहुशो ग्रामेभ्य आगच्छति** ] बहुभ्यो ग्रामेभ्य आगच्छति = बहुशः ।

[ **बहुषु ग्रामेषु वसति, बहुशो ग्रामेषु वसति** ] बहुषु ग्रामेषु वसति = बहुशः ।

[ **भूरिशः** ] भूरिभ्यो ग्रामेभ्य आगच्छति = भूरिशः । अनेन प्शस्प्र० → शस् ।

[ **प्रभूतशः** ] प्रभूतेभ्यो ग्रामेभ्य आगच्छति = प्रभूतशः । अनेन प्शस्प्र० → शस् ।

[ **गणशः** ] गणेषु ग्रामेषु वसति = गणशः । अनेन प्शस्प्र० → शस् ।

अल्पार्थे - [ **अल्प आगच्छति, अल्पश आगच्छति** ] अल्प आगच्छति = अल्पशः ।

[ **अल्पं धनं ददाति, अल्पशो धनं ददाति** ] अल्पं धनं ददाति = अल्पशो धनं ददाति ।

[ **श्राद्धे अल्पैर्भुक्तम्, अल्पशो भुक्तम्** ] श्राद्धे अल्पैर्भुक्तम् = अल्पशः ।

[ **अल्पेभ्यो ददाति, अल्पशो ददाति** ] अल्पेभ्यो ददाति = अल्पशो ददाति ।

[ **अल्पेभ्य आगतम्, अल्पश आगतम्** ] अल्पेभ्य आगतः(तम्) = अल्पशः ।

[ **अल्पेषु वसति, अल्पशो वसति** ] अल्पेषु वसति = अल्पशः । अनेन प्शस्प्र० → शस् ।

[ **स्तोकशः** ] स्तोकं ददाति = स्तोकशः ।

[ **कतिपयशः** ] कतिपयं ददाति = कतिपयशः । अनेन प्शस्प्र० → शस् ।

**पकारः पित्कार्यार्थः** ।।छ।।

### संख्यैकार्थाद् वीप्सायां शस् ॥ ७।२।१५१ ॥

[ **संख्यैकार्थात्** ] संख्या च एकार्थश्च = संख्यैकार्थम्, तस्मात् ।

[ **वीप्सायाम्** ] वीप्सा सप्तमी ङि ।

[ **शस्** ] शस् प्रथमा सि ।

[ **एकशो ददाति** ] एकैकं ददाति = एकशो ददाति ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

[ **द्विशः** ] द्वौ द्वौ ददाति = द्विशः ।

[ **त्रिशः** ] त्रीणि (२) ददाति = त्रिशः ।

[ **तावच्छः** ] तावत् (२) ददाति = तावच्छः ।

[ **कतिशः** ] कति (२) ददाति = कतिशः ।

[ **गणशः** ] गणं (२) ददाति = गणशः । अनेन सर्वत्र शस्प्र० ।

[ **एकशो दीयते** ] एकैकेन दीयते = एकशो दीयते ।

[ **द्विशः** ] द्वाभ्यां (२) दीयते = द्विशः ।

[ **त्रिशः** ] त्रिभिः (२) दीयते = त्रिशः । अनेन शस्प्र० । 'प्लुप् चादावेकस्य स्यादेः' (७।४।८१) इति द्विर्वचनं-आदिविभक्तेश्च लुक् । एवमग्रेऽपि कार्यम् ।

[ **तावच्छः** ] तावता (२) दीयते = तावच्छः ।

[ **कतिशः** ] कतिभिः (२) दीयते = कतिशः ।

[ **गणशः** ] गणेनासौ दीयते = गणशः । अनेन शस्प्र० ।

एकार्थम् - [ **माषशो देहि** ] माषं माषं देहि = माषशो देहि ।

[ **कार्षापणशः** ] कार्षापणं (२) देहि = कार्षापणशः ।

[ **पणशः** ] पणं (२) देहि = पणशः ।

[ **पादशः** ] पादं (२) देहि = पादशः ।

[ **पलशः** ] पलं (२) देहि = पलशः ।

[ **प्रस्थशः** ] प्रस्थं (२) देहि = प्रस्थशः ।

[ **अर्द्धशः** ] अर्द्धं (२) देहि = अर्द्धशः ।

[ **पर्वशः** ] पर्वणि (२) देहि = पर्वशः ।

[ **तिलशः** ] तिलान् (२) देहि = तिलशः ।

[ **सङ्घशः** ] सङ्घाय (२) देहि = सङ्घशः ।

[ **पूगशः** ] पूगं (२) देहि = पूगशः ।

[ **वृन्दशः** ] वृन्दे (२) प्रविशति = वृन्दशः ।

[ **पङ्क्तिशः** ] पङ्क्तौ (२) प्रविशति = पङ्क्तिशः ।

[ **वनशः** ] वने (२) प्रविशति = वनशः ।

[ **कूपीशः खनति** ] कूप । 'गौरादिभ्यो मुख्यान्ङीः' (२।४।१९) ङी । कूपीं(२) खनति = कूपीशः ।

[ **कुम्भीशो ददाति** ] कुम्भ । 'गौरादिभ्यो मुख्यान्ङीः' (२।४।१९) ङी । कुम्भीं(२) ददाति = कुम्भीशः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ कलशीशो ददाति ]** कलश । 'गौरादिभ्यो मुख्यान्ङीः' (२।४।१९) ङी । कलशीं(२) ददाति = कलशीशो ददाति । अनेन शस्प्र० सर्वत्र ।

**[ क्रमशः ]** क्रमेण(२) ददाति = क्रमशः । अनेन शस्प्र० । यद्यपि क्रमं एकस्तथापि क्रमवतां भेदात् क्रमेण क्रमेणेति वीप्सा भवति ।

**[ तानेकैकशः पृच्छेत् ]** एकैकं पृच्छेत् = एकैकशः पृच्छेत् । 'बह्वल्पार्थात्०' (७।२।१५०) प्शस्प्र० → शस् ।

**[ एकैकशोऽपि निघ्नन्ति ]** एकैकं निघ्नन्ति = एकैकशोऽपि निघ्नन्ति । 'बह्वल्पार्थात् कारकादिष्टा-ऽनिष्टे प्शस्' (७।२।१५०) प्शस्प्र० → शस् ।

**[ एकैकशो ददाति ]** एकैकं ददाति = एकैकशो ददाति । 'बह्वल्पार्थात्-कारकादिष्टा०' (७।२।१५०) प्शस्प्र० → शस् ॥छा॥

## संख्याऽऽदेः पादादिभ्यो दान-दण्डे चाऽकल् लुक् च ॥ ७।२।१५२ ॥

**[ संख्याऽऽदेः ]** संख्या चासावादिश्च = संख्यादिः, तस्मात् ।

**[ पादादिभ्यः ]** पाद आदिर्येषां ते = पादादयः, तेभ्यः = पादादिभ्यः । पञ्चमी भ्यस् ।

**[ दानदण्डे ]** दानं च दण्डं च = दानदण्डम्, तस्मिन् ।

**[ च ]** च प्रथमा सि ।

**[ अकल् ]** अकल् प्रथमा सि । 'दीर्घङ्याब्-व्यञ्जनात् सेः' (१।४।४५) सिलुक् ।

**[ लुक् ]** लुक् प्रथमा सि ।

**[ च ]** च प्रथमा सि ।

**[ द्विपदिकां ददाति ]** द्वौ पादौ ददाति = द्विपदिकां ददाति । अनेन अकल्प्र० अक-अन्त्योऽकारस्य लुक् । 'य-स्वरे पादः पदणि-क्य-घुटि' (२।१।१०२) पाद्० → पद्देशः । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्-तत्-क्षिपकादीनाम्' (२।४।१११) इ । अम् ।

**[ त्रिपदिकां ददाति ]** त्रीन् पादान् ददाति = त्रिपदिकां ददाति । अनेन अकल्प्र० → अक - अकारलुक् । 'य-स्वरे पादः०' (२।१।१०२) पाद्० → पद्देशः । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्०' (२।४।१११) इ । अम् ।

**[ द्विशतिकां व्यवसृजति ]** द्वे शते व्यवसृजति = द्विशतिकां व्यवसृजति । अनेन अकल्प्र० → अक-अन्त्योऽकारस्य लुक् । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्०' (२।४।१११) इ । अम् ।

**[ द्विमोदकिकां त्यजति ]** द्वौ मोदकौ त्यजति = द्विमोदकिकां त्यजति । अनेन अकल्प्र० → अक-अन्त्योऽकारस्य लुक् । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्०' (२।४।१११) इ । अम् ।

**[ त्रिमोदकिकां त्यजति ]** त्रीन् मोदकान् त्यजति = त्रिमोदकिकां त्यजति । अनेन अकल्प्र० → अक-अन्त्योऽकारस्य लुक् । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्०' (२।४।१११) इ । अम् ।

दण्डे - **[ द्विपदिकां दण्डितः ]** द्वौ पादौ दण्डितः = द्विपदिकाम् । अनेन अकल्प्र० → अक-अकारलुक् । 'य-स्वरे पादः पदणि-क्य-घुटि' (२।१।१०२) पाद्० → पद्भावः । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्०' (२।४।१११) इ । अम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ त्रिपदिकाम् ]** 'दण्डण् दण्डनिपातने' (१८६८) दण्ड् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच् । द्विकर्मकोऽयम् । दण्ड्यते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । इट् । 'सेट्क्तयोः' (४।३।८४) णिच्लुक् । त्रीन् पादान् दण्डितः = त्रिपदिकाम् । अनेन अकल्प्र० → अक-अकारलुक् । 'य-स्वरे०' (२।१।१०२) पाद्० → पद्भावः । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्०' (२।४।१११) इ । अम् ।

**[ द्विशतिकाम् ]** द्वे शते दण्डितः = द्विशतिकाम् । अनेन अकल्प्र० → अक-अकारलुक् च । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्०' (२।४।१११) इ । अम् ।

**[ द्विमोदकिकाम् ]** द्वौ मोदकौ दण्डितः = द्विमोदकिकाम् । अनेन अकल्प्र० → अक-अकारलुक् च । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्०' (२।४।१११) इ । अम् ।

**[ त्रिमोदकिकाम् ]** त्रीन् मोदकान् दण्डितः = त्रिमोदकिकाम् । अनेन अकल्प्र० → अक-अकारलुक् च । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्०' (२।४।१११) इ । अम् ।

वीप्सायाम् - **[ द्विपदिकां भुङ्क्ते ]** द्वौ द्वौ पादौ भुङ्क्ते = द्विपदिकाम् । अनेन अकल्प्र० → अक-अन्त्योऽकारस्य लुक् । 'य-स्वरे पादः०' (२।१।१०२) पाद्० → पद्भावः । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्०' (२।४।१११) इ ।

**[ त्रिपदिकाम् ]** त्रीन् २ पादान् भुङ्क्ते = त्रिपदिकाम् । अनेन अकल्प्र० → अक-अन्त्योऽकारस्य लुक् । 'य-स्वरे पादः०' (२।१।१०२) पाद्० → पद्भावः । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्०' (२।४।१११) इ ।

**[ द्विशतिकाम् ]** द्वे (२) शते भुङ्क्ते = द्विशतिकाम् । अनेन अकल्प्र० → अक-अन्त्योऽकारस्य लुक् । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्०' (२।४।१११) इ ।

**[ त्रिशतिकाम् ]** त्रीणि (२) शतानि भुङ्क्ते = त्रिशतिकाम् । अनेन अकल्प्र० → अक-अन्त्योऽकारस्य लुक् । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्०' (२।४।१११) इ ।

**[ द्विमोदकिकाम् ]** द्वौ (२) मोदकौ भुङ्क्ते = द्विमोदकिकाम् । अनेन अकल्प्र० → अक-अन्त्योऽकारस्य लुक् । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्०' (२।४।१११) इ ।

**[ त्रिमोदकिकाम् ]** त्रीन् (२) मोदकान् भुङ्क्ते = त्रिमोदकिकाम् । अनेन अकल्प्र० → अक-अन्त्योऽकारस्य लुक् । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्०' (२।४।१११) इ ।

**[ द्वौ द्वौ माषौ ददाति ]** द्वौ द्वौ माषौ ददाति । दान-वीप्सयोर्द्वयोः सद्भावे पुनराप्राप्ति परं पदादयो नाम सन्ति अतोऽकल्प्रत्ययो न भवति ।

**चकारो वीप्साया अनुकर्षणार्थः ।**

ननु अकलि प्रत्यये 'अवर्णेवर्णस्य' (७।४।६८) इति प्रकृत्यन्तस्य लुग्भवति किमर्थं लुग्वचनमित्याशङ्का-लुग्वचनं अनिमित्तलुगर्थम्, तेन पादः पद्भावो भवति । परनिमित्तायां तु लुचि 'स्वरस्य परे०' (७।४।११०) इति परिभाषया स्थानिवद्भावात्र स्यात् ॥छ॥

## तीयाट्टीकण् न विद्या चेत् ॥ ७।२।१५३ ॥

**[ तीयात् ]** तीय पञ्चमी ङसि ।

**[ टीकण् ]** टीकण् प्रथमा सि ।

**[ न ]** न प्रथमा सि । प्रसज्य प्रकटनार्थम्, एवं निर्देशः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ विद्या ]** विद्या प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् ।

**[ चेत् ]** चेत् प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[ द्वितीयम्, द्वैतीयीकम्, द्वैतीयीकी शाटी ]** द्वितीयमेव = द्वैतीयीकम्, द्वितीयम् । अनेन विकल्पेन टीकण्प्र० → ईक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । टकारो ङ्यर्थः । 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

**[ तृतीयम्, तार्तीयीकम्, तार्तीयीकी शाटी ]** तृतीयमेव = तार्तीयीकम् । अनेन टीकण्प्र० → ईक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आर् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

**[ मुखतीयः ]** मुखे = मुखतः । 'आद्यादिभ्यः' (७।२।८४) तसुप्र० → तस् । मुखतो भवः = मुखतीयः । 'गहादिभ्यः' (६।३।६३) ईयप्र० । 'प्रायोऽव्ययस्य' (७।४।६५) अस्लुक् ।

**[ पार्श्वतीयः ]** पार्श्वे = पार्श्वतः । 'आद्यादिभ्यः' (७।२।८४) तसुप्र० → तस् । पार्श्वतो भवः = पार्श्वतीयः । 'गहादिभ्यः' (६।३।६३) ईयप्र० । 'प्रायोऽव्ययस्य' (७।४।६५) अस्लुक् । इति तीयस्यानर्थकत्वात्र भवति ।।छ।।

## निष्फले तिलात् पिञ्ज-पेजौ ॥ ७।२।१५४ ॥

**[ निष्फले ]** निष्फल सप्तमी ङि ।

**[ तिलात् ]** तिल पञ्चमी ङसि ।

**[ पिञ्जपेजौ ]** पिञ्जश्च पेजश्च = पिञ्जपेजौ ।

**[ तिलपिञ्जः, तिलपेजः ]** निष्फलस्तिलः = तिलपिञ्जः, तिलपेजः । अनेन पिञ्ज-पेजप्र० ।।छ।।

## प्रायोऽतोर्द्वयसट्-मात्रट् ॥ ७।२।१५५ ॥

**[ प्रायः ]** प्रायस् प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[ अतोः ]** अतु पञ्चमी ङसि ।

**[ द्वयसट्मात्रट् ]** द्वयसट् च मात्रट् च = द्वयसट्मात्रट् । प्रथमा सि ।

**[ यावद्द्वयसम्, यावन्मात्रम् ]** यावत् मण्ड्यते । यावदेव = यावद्द्वयसम्, यावन्मात्रम् । अनेन द्वयसट्प्र० → द्वयस-मात्रट्प्र० → मात्र । 'धुटस्तृतीयः' (२।१।७६) त० → द० । 'प्रत्यये च' (१।३।२) द० → न० ।

**[ तावद्द्वयसम्, तावन्मात्रम् ]** तावदेव = तावद्द्वयसम्, तावन्मात्रम् । अनेन द्वयसट्प्र० → द्वयस-मात्रट्प्र० → मात्र । 'धुटस्तृतीयः' (२।१।७६) त० → द० । 'प्रत्यये च' (१।३।२) द० → न० ।

**[ एतावद्द्वयसम्, एतावन्मात्रम् ]** एतावदेव = एतावद्द्वयसम्, एतावन्मात्रम् । अनेन द्वयसट्प्र० → द्वयस-मात्रट्प्र० → मात्र । 'धुटस्तृतीयः' (२।१।७६) त० → द० । 'प्रत्यये च' (१।३।२) द० → न० ।

**[ कियद्द्वयसम्, कियन्मात्रम् ]** कियदेव = कियद्द्वयसम्, कियन्मात्रम् । अनेन द्वयसट्प्र० → द्वयस-मात्रट्प्र० → मात्र । 'धुटस्तृतीयः' (२।१।७६) त० → द० । 'प्रत्यये च' (१।३।२) द० → न० ।

**[ यावतीद्वयसी, यावद्द्वयसी ]** स्त्रियां यावतीद्वयसी । सामान्यविवक्षायां प्रत्यये पश्चात् स्त्रीत्वे यावद्द्वयसी । 'अणञेयेकण्०' (२।४।२०) ङी ।।छ।।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## वर्णा-ऽव्ययात् स्वरूपे कारः ॥ ७।२।१५६ ॥

[ **वर्णाऽव्ययात्** ] वर्णश्च अव्ययं च = वर्णाऽव्ययम्, तस्मात् ।

[ **स्वरूपे** ] स्वरूप सप्तमी ङि ।

[ **कारः** ] कार प्रथमा सि ।

[ **अकारः** ] अ एव = अकारः । अनेन कारप्र० ।

[ **इकारः** ] इरेव = इकारः । अनेन कारप्र० ।

[ **ककारः** ] क एव = ककारः । अनेन कारप्र० ।

[ **खकारः** ] ख एव = खकारः । अनेन कारप्र० ।

अव्यय - [ **ओंकारः** ] ओमेव = ओंकारः । अनेन कारप्र० ।

[ **स्वाहाकारः** ] स्वाहैव = स्वाहाकारः । अनेन कारप्र० ।

[ **स्वधाकारः** ] स्वधैव = स्वधाकारः । अनेन कारप्र० ।

[ **वषट्कारः** ] वषडेव = वषट्कारः । अनेन कारप्र० ।

[ **हन्तकारः** ] हन्तैव = हन्तकारः । अनेन कारप्र० ।

[ **नमस्कारः** ] नमस् एव = नमस्कारः । अनेन कारप्र० । 'सो रुः' (२।१।७२) स० → र० । 'भ्रातुष्पुत्र-कस्कादयः' (२।३।१४) र० → स० ।

[ **चकारः** ] च एव = चकारः । अनेन कारप्र० ।

[ **इतिकारः** ] इत्येव = इतिकारः । अनेन कारप्र० ।

[ **एवकारः** ] एवैव = एवकारः । अनेन कारप्र० ।

[ **हुंकारः** ] हुमेव = हुंकारः । अनेन कारप्र० ।

[ **पूत्कारः** ] पूदेव = पूत्कारः । अनेन कारप्र० ।

[ **सीत्कारः** ] सीदेव = सीत्कारः । अनेन कारप्र० ।

[ **सूत्कारः** ] सूदेव = सूत्कारः । अनेन कारप्र० ।

अः विष्णुः, इः कामः, कः ब्रह्मा, खमाकाशम्, ओं ब्रह्म, वषडिन्द्राय, स्वाहाग्नये, स्वधा पितृभ्य इत्यर्थपरतायां न भवति ।

[ **मनस्कारः** ] मन एव = मनस्कारः । अनेन कारप्र० । 'सो रुः' (२।१।७२) स० → र० । मनस्शब्दः स्वरादित्वात् अयमव्ययः चित्ताभोगे वर्त्तते । 'भ्रातुष्पुत्र-कस्कादयः' (२।३।१४) इत्यनेन स० ।

[ **अहङ्कारः** ] अहमेव = अहङ्कारः । अनेन कारप्र० ॥छा॥

## रादेफः ॥ ७।२।१५७ ॥

[ **रात्** ] र पञ्चमी ङसि ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ एफः ]** एफ प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ रेफः ]** र एव = रेफः । अनेन एफप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रायोवचनात् र एव = रकारः । 'वर्णा-ऽव्ययात् स्वरूपे कारः' (७।२।१५६) कारप्र० ॥छ॥

**नाम-रूप-भागाद् धेयः ॥ ७।२।१५८ ॥**

**[ नामरूपभागात् ]** नाम च रूपं च भागश्च = नामरूपभागम्, तस्मात् ।

**[ धेयः ]** धेय प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ नामधेयम् ]** नामैव = नामधेयम् । अनेन धेयप्र० । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् । सि-अम् ।

**[ रूपधेयम् ]** रूपमेव = रूपधेयम् । अनेन धेयप्र० । सि-अम् ।

**[ भागधेयम् ]** भाग एव = भागधेयम् । अनेन धेयप्र० । सि-अम् ॥छ॥

**मर्त्तादिभ्यो यः ॥ ७।२।१५९ ॥**

**[ मर्त्तादिभ्यः ]** मर्त्त आदिर्येषां ते = मर्त्तादयः, तेभ्यः = मर्त्तादिभ्यः । पञ्चमी भ्यस् ।

**[ यः ]** य प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ मर्त्त्यः ]** मर्त्त एव = मर्त्त्यः । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ सूर्यः ]** सूर एव = सूर्यः । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ क्षेम्यः ]** क्षेम एव = क्षेम्यः । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ यविष्यः ]** यविष एव = यविष्यः । अनेन यप्र० । 'नाम्यन्तस्था-कवर्गात्०' (२।३।१५) स० → ष० ।

**[ भाग्यम् ]** भाग एव = भाग्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ अपराध्यम् ]** अपराध एव = अपराध्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ रव्यम् ]** रव एवं = रव्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ लव्यम् ]** लव एव = लव्यम् । अनेन यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छ॥

**नवादीन-तन-त्नं च नू चास्य ॥ ७।२।१६० ॥**

**[ नवात् ]** नव पञ्चमी ङसि ।

**[ ईनतनत्नम् ]** ईनश्च तनश्च त्नश्च = ईनतनत्नम् ।

**[ च ]** च प्रथमा सि ।

**[ नू ]** नू प्रथमा सि । सूत्रत्वात् (लोपः) ।

**[ च ]** च प्रथमा सि ।

**[ अस्य ]** इदम् षष्ठी ङस् ।

**[ नवीनम्, नूतनम्, नूत्नम्, नव्यम् ]** नव । नवमेव = नवीनम्, नूतनम्, नूत्नम्, नव्यम् । अनेन ईन-तन-त्न-यप्र० ॥छ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## प्रात् पुराणे नश्च ॥ ७।२।१६१ ॥

**[ प्रात् ]** प्र पञ्चमी ङसि ।

**[ पुराणे ]** पुराण सप्तमी ङि ।

**[ नश्च ]** न प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । च प्रथमा सि ।

**[ प्रणम्, प्रीणम्, प्रतनम्, प्रत्नम् ]** प्रगतं कालेनेति वाक्यम् । प्रशब्देन पुराणमुच्यते । प्रणम्, प्रीणम्, प्रतनम्, प्रत्नम् । अनेन न-ईन-तन-त्नप्र० । सि-अम् ।।छ।।

## देवात् तल् ॥ ७।२।१६२ ॥

**[ देवात् ]** देव पञ्चमी ङसि ।

**[ तल् ]** तल् प्रथमा सि ।

**[ देवता ]** देव एव = देवता । अनेन तल्प्र० → त० । 'आत्' (२।४।१८) आप्प्र० → आ ।

**लित्करणं स्त्र्यर्थम्** ।।छ।।

## होत्राया ईयः ॥ ७।२।१६३ ॥

**[ होत्रायाः ]** होत्रा पञ्चमी ङसि । 'आपो ङितां यै-यास्-यास्-याम्' (१।४।१७) ङसि० → यास्० ।

**[ ईयः ]** ईय प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ होत्रीयम् ]** होत्रैव = होत्रीयम् । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।।छ।।

## भेषजादिभ्यष्ट्यण् ॥ ७।२।१६४ ॥

**[ भेषजादिभ्यः ]** भेषज आदिर्येषां ते = भेषजादयः, तेभ्यः = भेषजादिभ्यः । पञ्चमी भ्यस् ।

**[ ट्यण् ]** ट्यण् प्रथमा सि ।

**[ भैषज्यम् ]** भेषजमेव = भैषज्यम् । अनेन ट्यण्प्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ आनन्त्यम् ]** अनन्त एव = आनन्त्यम् । अनेन ट्यण्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ आवसथ्यम् ]** आवसथ एव = आवसथ्यम् । अनेन ट्यण्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ ऐतिह्यम् ]** इतिह इत्येव = ऐतिह्यम् । अनेन ट्यण्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

इतिहेति निपातसमुदाय उपदेशपारम्पर्ये वर्त्तते ।

**[ चातुर्वर्ण्यम् ]** चत्वार एव वर्णाश्चातुर्वर्ण्यम् । अनेन ट्यण्प्र० → य । 'अनुशतिकादीनाम्' (७।४।२७) उभयपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ चातुराश्रम्यम् ]** चत्वार एव आश्रमाः = चातुराश्रम्यम् । अनेन ट्यण्प्र० → य । 'अनुशतिकादीनाम्' (७।४।२७) उभयपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ चातुर्वैद्यम् ]** चत्वारो वेदाः = चातुर्वैद्यम् । चतस्रो विद्या वा = चातुर्वि(वैं)द्यम् । अनेन ट्यण्प्र० → य । 'अनुशतिकादीनाम्' (७।४।२७) उभयपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् । 'व्यञ्जनात् पञ्चमाऽन्तस्थायाः सरूपे वा' (१।३।४७) यलोपः । एवमग्रेऽपि ज्ञेयम् ।

**[ त्रैवैद्यम् ]** त्रयो वेदाः-तिस्रो विद्या वा = त्रैवैद्यम् । अनेन ट्यण्प्र० → य । शेषं पूर्ववत् ।

**[ त्रैलोक्यम् ]** त्रि-लोक उदाहरण मांडणी । त्रयाणां लोकानां समाहारः = त्रिलोकी । 'द्विगोः समाहारात्' (२।४।२२) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक्, इति वाक्यनिष्पत्तिः । त्रिलोक(की) एव = त्रैलोक्यम् । अनेन ट्यण्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् ।

**[ ऐकभाव्यम् ]** एकेन भवनम् = एकभावः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । एकभाव एव = ऐकभाव्यम् । अनेन ट्यण्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एकत्वम् ।

**[ द्वैभाव्यम् ]** द्वयोर्भवनं = द्विभावः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । द्विभाव एव = द्वैभाव्यम् । अनेन ट्यण्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । द्वित्वम् ।

**[ त्रैभाव्यम् ]** त्रयाणां भवनं = त्रिभावः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । त्रिभाव एव = त्रैभाव्यम् । अनेन ट्यण्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । त्रित्वम् ।

**[ आन्यभाव्यम् ]** अन्यभाव एव = आन्यभाव्यम् । अनेन ट्यण्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ सार्ववैद्यम् ]** सर्वविद्यैव = सार्ववैद्यम् । अनेन ट्यण्प्र० → य । 'अनुशतिकादीनाम्' (७।४।२७) उभयपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । 'व्यञ्जनात् पञ्चमाऽन्तस्थायाः सरूपे वा' (१।३।४७) यलोपः । सि-अम् ।

**[ सार्वलौक्यम् ]** सर्वलोक एव = सार्वलौक्यम् । अनेन ट्यण्प्र० → य । 'अनुशतिकादीनाम्' (७।४।२७) उभयपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ षाड्गुण्यम् ]** षष्-गुण मण्ड्यते । षट् च ते गुणाः = षड्गुणाः । 'धुटस्तृतीयः' (२।१।७६) ष० → ड० । षड्गुणा एव = षाड्गुण्यम् । अनेन ट्यण्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ शैलीयमाचार्यस्य ]** शीलमेव = शैली । अनेन ट्यण्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङी । 'व्यञ्जनात् तद्धितस्य' (२।४।८८) यलुक् । इदम् प्रथमा सि । 'अयमियम् पुंस्त्रियोः सौ' (२।१।३८) इदमिसंडं इयम् देशः । आचार्यस्य ।

भैषज्या आनन्त्या आवसथ्या ऐतिह्यशब्दा यदि स्त्रियां स्युस्तदा अजादिषु द्रष्टव्याः । 'अजादेः' (२।४।१६) इत्यनेन आप् भवतीत्यर्थः, अन्यथा ट्यणन्तत्वात् 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङी स्यात् ॥छा॥

## प्रज्ञादिभ्योऽण् ॥ ७।२।१६५ ॥

**[ प्रज्ञादिभ्यः ]** प्रज्ञा(ज्ञ) आदिर्येषां ते = प्रज्ञादयः, तेभ्यः = प्रज्ञादिभ्यः । पञ्चमी भ्यस् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ अण् ]** अण् प्रथमा सि ।

**[ प्राज्ञः, प्राज्ञी कन्या ]** प्र 'ज्ञांश् अवबोधने' (१५४०) ज्ञा । प्रजानातीति प्रज्ञः । 'नाम्युपान्त्य-प्री-कृ-गृ-ज्ञः कः' (५।१।५४) कप्र० → अ । 'इडेत्-पुसि चाऽऽतो लुक्' (४।३।९४) आलुक् । प्रज्ञ एव = प्राज्ञः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । स्त्रियां तु 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । कन्या ।

**[ प्राज्ञा कन्या ]** प्रज्ञा अस्यास्तीति प्राज्ञा कन्या । प्रज्ञा-श्रद्धा-ऽर्चा-वृत्तेर्णः' (७।२।३३) णप्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ वाणिजः ]** वणिगेव = वाणिजः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ ।

**[ विदत् ]** विशिष्टा दन्ता यस्य = विदत् । 'वयसि दन्तस्य दतृः' (७।३।१५१) दन्तशब्दस्य दतृदेशः → दत् ।

**[ षोडत् ]** षोडत् इति 'एकादश-षोडश-षोडन्-षोडा-षड्ढा' (३।२।९१) इत्यनेन निपात्यते ।

**[ सत्वस् ]** सत्व 'अंसण् दृष्टिसमाहारे' ( ) अंस् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । सत्वमंसयति सत्व उणादयः निपातः ।

**[ वरिवस्कृत ]** वरिवस्शब्दस्य वत्सकषभाभ्यामव्ययत्वप्रतिपादनात् कस्कादित्वम्, तस्य फलमिदम् । 'भ्रातुष्पुत्र-कस्कादयः' (२।३।१४) सत्वम् ।

**[ आग्नीध्री आग्नीध्रा वा शाला ]** अग्नि 'ञिइन्धैपि दीप्तौ' (१४९८) इन्ध् । 'अग्निमिन्द्धे = अग्नीध् । क्विप्प्र० । 'नो व्यञ्जनस्याऽनुदितः' (४।२।४५) नलुक् । 'अप्रयोगीत्' (१।१।३७) क्विप्लुक् । अग्नीध इयम् । 'गृहेऽग्नीधो रण् धश्च' (६।३।१७४) रण्प्र० → र । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः आ । 'आत्' (२।४।१८) आप्प्र० → आ । आग्नीध्रा एव = आग्नीध्री । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । आग्नीध्रा वा शाला ।

**[ साधारणी साधारणा वा भूमिः ]** साधारणं करोति । 'णिज्बहुलं नाम्नः कृगादिषु' (३।४।४२) णिच्प्र० । 'त्रन्त्यस्वरादेः' (७।४।४३) अन्त्यस्वरादिलोपः । साधारयतीति साधारणः । 'नन्द्यादिभ्योऽनः' (५।१।५२) अनप्र० । 'णेरनिटि' (४।३।८३) णिच्लोपः । साधारण एव = साधारणी-साधारणा वा । अनेन अण्प्र० → अ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । द्वितीये 'आत्' (२।४।१८) आप्प्र० → आ ॥छा॥

## श्रोत्रौषधि-कृष्णाच्छरीर-भेषज-मृगे ॥ ७।२।१६६ ॥

**[ श्रोत्रौषधिकृष्णात् ]** श्रोत्रश्च ओषधिश्च कृष्णश्च = श्रोत्रौषधिकृष्णम्, तस्मात् ।

**[ शरीरभेषजमृगे ]** शरीरं च भेषजं च मृगश्च = शरीरभेषजमृगम्, तस्मिन् ।

**[ श्रौत्रं शरीरम्, श्रोत्रमेवान्यत् ]** श्रोत्रमेव = श्रौत्रं शरीरम् । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । श्रोत्रमेवान्यत् ।

**[ औषधं भेषजम्, ओषधिरेवान्यत् ]** ओषधिरेव = औषधं भेषजम् । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । ओषधिरेवान्यत् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ कार्ष्णो मृगः, कृष्ण एवान्यः ]** कृष्ण एव = कार्ष्णो मृगः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आर् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । कृष्ण एवान्यः ॥छ॥

## कर्मणः सन्दिष्टे ॥ ७।२।१६७ ॥

**[ कर्मणः ]** कर्मन् पञ्चमी ङसि ।

**[ सन्दिष्टे ]** सन्दिष्ट सप्तमी ङि ।

**अन्येनान्योऽन्यस्मै यदाह त्वयेदं कर्तव्यमिति तत् सन्दिष्टं कर्म ।**

**[ कार्मणं करोति ]** कर्मैव = कार्मणं करोति । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः आ । सन्दिष्टं कर्म करोतीत्यर्थः । वशीकरणमपि वृद्धपरम्परोपदेशात् क्रियते इति कार्मणमुच्यते ॥छ॥

## वाच इकण् ॥ ७।२।१६८ ॥

**[ वाचः ]** वाच् पञ्चमी ङसि ।

**[ इकण् ]** इकण् प्रथमा सि ।

**अन्येनान्योऽन्यस्मै यां वाचमाह सा सन्दिष्टा वाक् ।**

**[ वाचिकं कथयति ]** वागेव = वाचिकम् । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः आ । सन्दिष्टं वाचं कथयतीत्यर्थः ॥छ॥

## विनयादिभ्यः ॥ ७।२।१६९ ॥

**[ विनयादिभ्यः ]** विनय आदिर्येषां ते = विनयादयः, तेभ्यः = विनयादिभ्यः । पञ्चमी भ्यस् ।

**[ वैनयिकम् ]** विनय एव = वैनयिकम् । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ सामयिकम् ]** समय एव = सामयिकम् । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छ॥

## उपायाद्ध्रस्वश्च ॥ ७।२।१७० ॥

**[ उपायात् ]** उपाय पञ्चमी ङसि ।

**[ ह्रस्वश्च ]** ह्रस्व प्रथमा सि । च प्रथमा सि ।

**[ औपयिकम् ]** उपाय = एव औपयिकम् । अनेन इकण्प्र० → इक-ह्रस्वश्च । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छ॥

## मृदस्तिकः ॥ ७।२।१७१ ॥

**[ मृदः ]** मृद् पञ्चमी ङसि ।

**[ तिकः ]** तिक प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ मृत्तिका ]** मृद् मण्ड्यते । मृदेव = मृत्तिका । अनेन तिकप्र० । 'आत्' (२।४।१८) आप्प्र० → आ ॥छ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## स-स्नौ प्रशस्ते ॥ ७।२।१७२ ॥

**[ सस्नौ ]** सश्च स्नश्च = सस्नौ ।

**[ प्रशस्ते ]** प्रशस्त सप्तमी ङि ।

**[ मृत्सा, मृत्स्ना ]** प्रशस्ता मृत् = मृत्सा, मृत्स्ना । रूपप्रत्ययापवादः । अनेन स-स्नप्र० । 'आत्' (२।४।१८) आप्प्र० → आ । 'अघोषे प्रथमोऽशिटः' (१।३।५०) द० → त० ।

**[ मृद्रूपा ]** प्रशस्ता मृत् = मृद्रूपा । मतान्तरे "त्यादेश्च प्रशस्ते रूपप्" (७।३।१०) रूपप्प्र० → रूप० । 'आत्' (२।४।१८) आप्प्र० → आ ।।छ।।

**इत्याचार्यश्रीहेमचन्द्रविरचितायां बृहद्वृत्तौ तद्धितस्य षष्ठः पादः समाप्तः ।।छ।।**

**उत्साहसाहसवता भवता नरेन्द्र !, धाराव्रतं किमपि तद्विषमं सिषेवे ।**
**यस्मात् फलं न खलु मालवमात्रमेव, श्रीपर्वतोऽपि तव कन्दुककेलिपात्रम् ।।१।।**

**यदेकशय्यां गतापि नारी नोपभुज्यते तद्धाराव्रतमुच्यते ।।**

❖ ❖ ❖

Jain Education International For Personal & Private Use Only www.jainelibrary.org

॥ अर्हम् ॥

# ॥ अथ सप्तमाध्यायस्य तृतीयः पादः ॥

## प्रकृते मयट् ॥ ७।३।१ ॥

**[ प्रकृते ]** प्रकृत सप्तमी ङि ।

**[ मयट् ]** मयट् प्रथमा सि ।

**प्राचुर्येण प्राधान्येन वा कृतं = प्रकृतम्, तस्मिन् ।**

**[ अन्नमयम् ]** अन्नं प्रकृतम् = अन्नमयम् । अनेन मयट्प्र० → मय ।

**[ घृतमयम् ]** घृतं प्रकृतं = घृतमयम् । अनेन मयट्प्र० → मय ।

**[ दधिमयम् ]** दधि प्रकृतं = दधिमयम् । अनेन मयट्प्र० → मय ।

**[ यवागूमयी ]** यवागूः प्रकृता = यवागूमयी । अनेन मयट्प्र० → मय । 'अणञेयेकण्-नञ्०' (२।४।२०) ङी ।

**[ यवागूमयम् ]** अतिवर्त्तन्ते त्यजन्ति स्वार्थिकाः प्रकृत(ति)लिङ्गवचनानीति यवागूः प्रकृता = यवागूमयम् । अनेन मयट्प्र० → मय ।

**[ आपूपिकम्, अपूपमयम् ]** अपूपाः प्रकृताः = आपूपिकम् । 'कवचि-हस्त्यचित्ताच्चेकण्' (६।२।१४) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम्-अपूपमयम् । अनेन मयट्प्र० → मय ।

**[ शाष्कुलिकम्, शष्कुलीमयम् ]** शष्कुल्यः प्रकृताः = शाष्कुलिकम् । 'कवचि-हस्त्यचित्ताच्चेकण्' (६।२।१४) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम्-शष्कुलीमयम् । अनेन मयट्प्र० → मय ॥छ॥

## अस्मिन् ॥ ७।३।२ ॥

**[ अस्मिन् ]** अस्मिन् सप्तमी ङि । सूत्रत्वात् (लोपः) ।

**[ अन्नमयं भोजनम् ]** अन्नं प्रकृतमस्मिन् = अन्नमयं भोजनम् । अनेन मयट्प्र० → मय ।

**[ अपूपमयं पर्व ]** अपूपाः प्रकृता अस्मिन् = अपूपमयं पर्व । अनेन मयट्प्र० → मय ।

**[ वटकमयी यात्रा ]** वटका प्रकृता अस्यां सा = वटकमयी यात्रा । अनेन मयट्प्र० → मय । 'अणञेयेकण्०' (२।४।२०) ङी ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ यवागूमयी इष्टिः ]** यवागूः प्रकृता अस्यां सा = यवागूमयी इष्टिः । अनेन मयट्प्र० → मय । 'अणञेयेकण्०' (२।४।२०) ङी । **यवागूशब्देन खीरिरुच्यते** ॥छ॥

## तयोः समूहवच्च बहुषु ॥ ७।३।३ ॥

**[ तयोः ]** तद् सप्तमी ओस् ।

**[ समूहवत् ]** समूहे इव = समूहवत् । 'तत्र' (७।१।५३) वत्प्र० ।

**[ च ]** च प्रथमा सि ।

**[ बहुषु ]** बहु सप्तमी सुप् ।

**[ आपूपिकम्, अपूपमयम् ]** अपूपाः प्रकृताः = आपूपिकम् । अनेन विहितः 'कवचि-हस्त्यचित्ताच्चेकण्' (६।२।१४) इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम्-अपूपमयम् । अनेन मयट्प्र० → मय ।

**[ मौदकिकम्, मोदकमयम् ]** मोदकाः प्रकृताः = मौदकिकम् । 'कवचि-हस्त्यचित्ताच्चेकण्' (६।२।१४) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम्-मोदकमयम् । अनेन मयट्प्र० → मय ।

**[ शाष्कुलिकम्, शष्कुलीमयम् ]** शष्कुल्यः प्रकृताः = शाष्कुलिकम् । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । एवम्-शष्कुलीमयम् । अनेन मयट्प्र० → मय ।

**[ धैनुकम्, धेनुमयम् ]** धेनु । धेनवः प्रकृताः = धैनुकम् । 'धेनोरनञः' (६।२।१५) इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः ऐ । 'ऋवर्णोवर्ण-दोसिसुसशश्वदकस्मात्त इकस्येतो लुक्' (७।४।७१) इकारलुक् । एवम्-धेनुमयम् । अनेन मयट्प्र० → मय ।

**[ आपूपिकम्, अपूपमयं पर्व ]** अपूपाः प्रकृता अस्मिन् = आपूपिकम् । 'कवचि-हस्त्यचित्ताच्चेकण्' (६।२।१४) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम्-अपूपमयम् । अनेन मयट्प्र० → मय ।

**[ मौदकिकी, मोदकमयी पूजा ]** मोदकाः प्रकृता अस्मिन् = मौदकिकी । अनेन इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । एवम्-मोदकमयी पूजा । अनेन मयट्प्र० → मय । 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ गाणिक्या, गणिकामयी यात्रा ]** गणिकाः प्रकृता अस्यां यात्रायां = गाणिक्या । 'गणिकाया ण्यः' (६।२।१७) ण्यप्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । एवम्-गणिकामयी यात्रा । अनेन मयट्प्र० → मय । 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ अश्वीया, अश्वमयी यात्रा ]** अश्वाः प्रकृता अस्यां यात्रायाम् = अश्वीया । 'वाऽश्वादीयः' (६।२।१९) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम्-अश्वमयी यात्रा । अनेन मयट्प्र० → मय । 'अणञेयेकण्०' (२।४।२०) ङी ॥छ॥

## निन्द्ये पाशप् ॥ ७।३।४ ॥

**[ निन्द्ये ]** 'णिदु कुत्सायाम्' (३११) णिद् । 'पाठे धात्वादेर्णो नः' (२।३।९७) निद् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) नोऽन्तः । निन्द्यत इति । 'ऋवर्ण-व्यञ्जनाद् घ्यण्' (५।१।१७) घ्यण्प्र० → य, तस्मिन् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ पाशप् ]** पाशप् प्रथमा सि ।

**[ वैयाकरणपाशः ]** वैयाकरण मांडणीयइ । निन्द्यो वैयाकरणः = वैयाकरणपाशः । अनेन पाशप्प्र० → पाश ।

**[ छान्दसपाशः ]** छन्दस् । छन्दोऽधीते = छान्दसः । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । निन्द्यः छान्दसः = छान्दसपाशः । अनेन पाशप्प्र० → पाश ।

**पकारः पुंवद्भावार्थः-**

**[ कुमारपाशा ]** कुमार 'वयस्यनन्त्ये' (२।४।२१) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । कुत्सिता कुमारी = कुमारपाशा । अनेन पाशप्प्र० → पाश । 'क्यङ्-मानि-पित्तद्धिते' (३।२।५०) पुंवद्भावः-ङीगतेत्यर्थः । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ किशोरपाशा ]** किशोर 'वयस्यनन्त्ये' (२।४।२१) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । कुत्सिता किशोरी = किशोरपाशा । अनेन पाशप्प्र० → पाश । 'क्यङ्-मानि-पित्तद्धिते' (३।२।५०) पुंवद्भावः-ङीगतेत्यर्थः । 'आत्' (२।४।१८) आप्प्र० → आ ॥छ॥

## प्रकृष्टे तमप् ॥ ७।३।५ ॥

**[ प्रकृष्टे ]** प्र 'कृषींत् विलेखने' (१३१९) कृष् । प्रकर्षणं = प्रकृष्टम् । 'क्लीबे क्तः' (५।३।१२३) क्तप्र० → त । 'तवर्गस्य श्चवर्ग-ष्टवर्गाभ्यां योगे च-टवर्गौ' (१।३।६०) त० → ट० । प्रकृष्टमस्यास्ति । 'अभ्रादिभ्यः' (७।२।४६) अप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक्, तस्मिन् ।

**[ तमप् ]** तमप् प्रथमा सि ।

प्रकृष्टः प्रकर्षोऽतिशयः एक एव त्रीणि नामानि, स च गुणक्रिययोरेव, न जातिद्रव्ययोः ।

**[ शुक्लतमः ]** सर्वे इमे शुक्लाः । अयमेषां प्रकृष्टः शुक्लः = शुक्लतमः । अनेन तमप्प्र० → तम । सि ।

**[ शुक्लतमौ ]** सर्वे इमे शुक्लाः । इमावेषां प्रकृष्टौ शुक्लौ = शुक्लतमौ । अनेन तमप्प्र० → तम । औ ।

**[ शुक्लतमाः ]** सर्वे इमे शुक्लाः । इमे एषां प्रकृष्टाः शुक्लाः = शुक्लतमाः । अनेन तमप्प्र० → तम । जस् ।

**[ आढ्यतमः ]** सर्वे इमे आढ्याः । अयमेषां प्रकृष्टः आढ्यः = आढ्यतमः । अनेन तमप्प्र० → तम ।

**[ सुकुमारतमः ]** सु 'कुमारण् क्रीडायाम्' (१९११) कुमार । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । सुखेन कुमारयतीति सुकुमारः । 'अच्' (५।१।४९) अच्प्र० → अ । 'णेरनिटि' (४।३।८३) णिच्लोपः । सर्वे इमे सुकुमाराः । अयमेषां प्रकृष्टः सुकुमारः = सुकुमारतमः । अनेन तमप्प्र० → तम ।

**[ कारकतमः ]** सर्वे इमे कारकाः । अयमेषां प्रकृष्टः कारकः = कारकतमः । अनेन तमप्प्र० → तम ।

**[ साधकतमः ]** सर्वे इमे साधकाः । अयमेषां प्रकृष्टः साधकः = साधकतमः । अनेन तमप्प्र० → तम ।

**[ प्रकृष्टतमः ]** सर्वे इमे प्रकृष्टाः । अयमेषां प्रकृष्टः प्रकृष्टः = प्रकृष्टतमः । अनेन तमप्प्र० → तम ।

गौरयं यः सुसन्नहनः शकटं वहति-सुसम्बद्धः । एतत्प्रयोगापेक्षया अग्रेतनप्रयोगे प्रकर्षप्रतीति गोतम इति-

**[ गोतमोऽयं यः सुलक्षणः शकटं सीरं च वहति ]** प्रकृष्टो गौः = गोतमोऽयं यः सुलक्षणः शकटं सीरं च वहति।

प्रकृष्टगुणं च द्रव्यवतश्चैत्रादेः परमार्थतस्तमप् न प्राप्नोति बाहुलकात्तु भवतीति-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ गोतमेयं या समां समां विजायते स्त्रीवत्सा च ]** प्रकृष्टा गौः = गोतमा इयं या समां समां विजायते । चैत्ररूपस्य द्रव्यस्यापेक्षया द्रव्यान्तरवस्त्रादि तत्समवायिना सूक्ष्मत्वादिना प्रकृष्टगुणं च द्रव्यवतश्चैत्रादेः परमार्थतस्तमप् न प्राप्नोति बाहुलकात्तु भवतीति स्त्रीवत्सा चेति स्त्री वत्सा यस्याः सा, तथा सवत्सेत्युक्ते सह वत्सेन वत्सया वा वर्त्तते इति संशयः स्यात् ।

द्रव्यान्तरसमवायिना च प्रकृष्टेन गुणेन कृत्वा प्रकृष्टे द्रव्ये तद्वतः प्रत्ययो भवति ।

**[ सूक्ष्मवस्त्रतमः ]** अतिशयेन सूक्ष्माणि वस्त्राण्यस्य = सूक्ष्मवस्त्रतमः । अनेन तमप्प्र० → तम ।

प्रकर्षप्रत्ययान्ताच्च प्रकर्षस्यापि प्रकर्षविवक्षायां प्रत्ययो भवति । यथा–

**[ युधिष्ठिरः श्रेष्ठतमः कुरूणाम् ]** युधिष्ठिरः । 'शंसू स्तुतौ च' (५५०) शंसू, प्रपूर्व० । प्रशस्यत इति प्रशस्यम् । 'शकि-तकि-चकि-चति-यति-शसि-सहि-यजि-भजि-पवर्गात्' (५।१।२९) यप्र० । 'नो व्यञ्जनस्याऽनुदितः' (४।२।४५) नलुक् । इदं प्रशस्यं(२), इदमनयोर्मध्येऽतिशयेन प्रशस्यं = श्रेष्ठः । 'गुणाङ्गाद् वेष्ठेयसू' (७।३।९) इष्ठप्र० । 'प्रशस्यस्य श्रः' (७।४।३४) प्रशस्यस्थाने "श्र"देशः । 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) ए । प्रकृष्टः श्रेष्ठः = श्रेष्ठतमः । अनेन तमप्प्र० → तम । कुरु । कुरोरपत्यानि । 'दु-नादि-कुर्वित्-कोशला-ऽजादाञ्ञ्यः' (६।१।११८) ञ्यप्र० । 'बहुष्वस्त्रियाम्' (६।१।१२४) लुप् । तेषां = कुरूणाम् ।

**[ सूक्ष्मतमवस्त्रः ]** प्रकृष्टं सूक्ष्मं = सूक्ष्मतमम् । अनेन तमप्प्र० → तम । सूक्ष्मतमं वस्त्रं यस्य सः = सूक्ष्मतमवस्त्रः ।

**[ सूक्ष्मवस्त्रतमः ]** प्रकृष्टः सूक्ष्मवस्त्रः = सूक्ष्मवस्त्रतमः । अनेन तमप्प्र० → तम ।

**[ बह्वाढ्यतमकः ]** प्रकृष्टा आढ्याः = आढ्यतमाः । अनेन तमप्प्र० → तम । बहव आढ्यतमा यत्र सः = बह्वाढ्यतमः । बह्वाढ्यतम एव = बह्वाढ्यतमकः । स्वार्थे कप्र० । द्वयोः प्रकर्षे तरपो विधानात् बहूनां प्रकर्षेऽयं विधिः ।

**[ प्रधानतमोऽयं ग्रामे ]** प्रकृष्टः प्रधानं = प्रधानतमोऽयं ग्रामे । अनेन तमप्प्र० → तम ।

**[ आढ्यतमोऽयं नगरे ]** प्रकृष्टः आढ्यः = आढ्यतमः । अनेन तमप्प्र० → तम ।

ग्रामपुरुषयोर्द्वयोः प्रकर्षे न प्राप्नोतीति कथमर्थः ? एकस्मिन्नपि नगरे ग्रामे वा निर्दिष्टे समुदाये तदन्तर्गतावयवान्तरापेक्षया प्रकर्षे भविष्यति ।

**[ महत्सर्षपं महान् हिमवानिति ]** महत्सर्षपमित्यत्र प्राधान्यनामत्वात् पुंस्त्वे प्राप्ते बाहुलकान्नपुंसकत्वम्, शुक्लापेक्षया च कृष्णे मा भूत् तरप् ।

अदूरविप्रकर्षे समानगुणक्रिययोश्च स्पर्धा भवति, न हि निष्कधनः शतनिष्कधनेन स्पर्धते । आढ्याभिरुपौ वा गन्तृपाचकौ वा । तथा च तन्निमित्तः प्रकर्षोऽपि नास्ति ।

**[ अहिंसकः श्रेयान् पापीयान् प्राणिनां हन्ता ]** प्रशस्यस्य साधना पूर्वलिखिता ज्ञेया । अयं प्रशस्यः(२), अयमनयोर्मध्येऽतिशयेन प्रशस्यः = श्रेयान्, अहिंसक(:) । 'गुणाङ्गाद् वेष्ठेयसू' (७।३।९) ईयसुप्र० । 'प्रशस्यस्य श्रः' (७।४।३४) "श्र"देशः । 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) ए । प्रथमा सि । पापिन् मण्डयते । प्रकृष्टः पापी = पापीयान् । 'गुणाङ्गाद्०' (७।३।९) । ईयसुप्र० । 'नोऽपदस्य तद्धिते' (७।४।६१) इन्लुक् । प्राणिनां हन्तेत्यत्र तरबर्थे ईयस् । नैतयोः परस्परं स्पर्धा, किं तर्हि ? अन्यापेक्षा । श्रेयः पापीयसोर्विषमगुणत्वात् स्पर्धाभावे प्रकर्षाभावादित्याशयः ।

**पकारः पुंवद्भावार्थः –**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ शुक्लतमा शाटी ]** शुक्ला । प्रकृष्टा शुक्ला = शुक्लतमा शाटी । अनेन तमपूप्र० → तम । 'क्यङ्-मानि-पित्तद्धिते' (३।२।५०) पुंवद्भावः । 'आत्' (२।४।१८) आप्प्र० → आ ॥छा॥

## द्वयोर्विभज्ये च तरप् ॥ ७।३।६ ॥

**[ द्वयोः ]** द्वि सप्तमी ओस् ।

**[ विभज्ये ]** 'भजीं सेवायाम्' (८९५) भज्, विपूर्व० । विभज्यते = विभज्यम् । 'शकि-तकि-चति-यति-शसि-सहि-यजि-भजि-पवर्गात्' (५।१।२९) यप्र०, तस्मिन् ।

**[ च ]** च प्रथमा सि ।

**[ तरप् ]** तरप् प्रथमा सि ।

**[ पटुतरः ]** द्वाविमौ पटू, अयमनयोर्मध्ये प्रकृष्टः पटुः = पटुतरः । अनेन तरपूप्र० → तर ।

**[ सुकुमारतरः ]** द्वाविमौ सुकुमारौ, अयमनयोर्मध्ये प्रकृष्टः सुकुमारः = सुकुमारतरः । अनेन तरपूप्र० → तर ।

**[ पाचकतरः ]** द्वाविमौ पाचकौ, अयमनयोर्मध्ये प्रकृष्टः पाचकः = पाचकतरः । अनेन तरपूप्र० → तर ।

**[ गोतरो यः शकटं वहति सीरं च ]** द्वाविमौ गावौ, अयमनयोर्मध्ये प्रकृष्टो गौः = गोतरो यः शकटं शी(सी)रं च वहति । अनेन तरपूप्र० → तर ।

**[ गोतरा या समां समां विजायते स्त्रीवत्सा च ]** द्वे इमे गावौ, इयमनयोर्मध्ये प्रकृष्टा गौः = गोतरा । अनेन तरपूप्र० → तर । 'आत्' (२।४।१८) आपूप्र० → आ । स्त्रीवत्सा च ।

**[ दन्ताः स्निग्धतराः ]** दन्ताश्च ओष्ठौ च = दन्तौष्ठम् । 'प्राणि-तूर्याङ्गाणाम्' (३।१।१३७) इत्यनेन एकत्वम् । दन्तौष्ठस्य मध्ये स्निग्धतराः । मध्ये इति अर्थकथनकारणे भणितोऽस्ति. मूलवाक्ये न ।

**[ पाणी सुकुमारतरौ ]** पाणी च पादौ च = पाणिपादम् । 'प्राणि-तूर्याङ्गाणाम्' (३।१।१३७) एकत्वम् । पाणिपादस्य मध्ये = पाणी सुकुमारतरौ ।

अभेदैकत्वसंख्या इति शब्दा व्याख्यायते । न विद्यते भेदो यस्याः सा = अभेदा, सा चासावेकत्वसंख्या च = अभेदैकत्वसंख्या ।

**यथौषधिरसाः सर्वे, मधुन्याहितशक्तयः ।**
**अविभागेन वर्त्तन्ते, तां संख्यां तादृशीं विदुः ॥१॥**

चैत्रेण चैत्राभ्यां चैत्रैर्वा भूयते इत्यत्र या संख्या सा अभेदैकत्वसंख्येति । यदा इतरेतरयोगस्तदा बह्वर्थप्रकर्ष इति तमबेव भवति ।

**[ परुद्भवान् पटुरासीत् पटुतर ऐषमः ]** परुद्भवान् पटुरासीत् पटुतरः ऐषमः । अनेन तरपूप्र० → तर ।

**विभज्ये - [ सांकाश्यकेभ्यः पाटलिपुत्रका आढ्यतराः, अभिरूपतराः, सुकुमारतराः ]** सांकाश्यकेभ्यः पाटलिपुत्रकाः, इमे आढ्याः, इमे आढ्याः, अमी अमीभ्यः अतिशयेन आढ्याः = आढ्यतराः । अनेन तरपूप्र० → तर । जस् । इमे अभिरूपाः, इमे अभिरूपाः, अमी अमीभ्यः अतिशयेन अभिरूपाः = अभिरूपतराः । अनेन तरपूप्र० → तर । जस् । इमे सुकुमाराः(२), अमी अमीभ्यः अतिशयेन सुकुमाराः = सुकुमारतराः । अनेन तरपूप्र० → तर । जस् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सांकाश्यकादिषु पाटलिपुत्रकादीनामप्रवेशात् विभागः पृथग्भावः विभज्यस्य च विशेषणमप्याढ्याद्यर्थः प्रकृष्टं विभज्यं भवति विशेषणात् ततः प्रत्ययः ।

**[ गवां कृष्णाः [ गौः ] संपन्नक्षीरतमा( : ) ]** गवां कृष्णाः प्रकृष्टाः संपन्नक्षीराः = संपन्नक्षीरतमाः । 'प्रकृष्टे तमप्' (७।३।५) तमप्प्र० → तम । विभज्यश्च भेदरूपमापन्नानां भवति, अत्र तु गोत्वेन सर्वा अपि कृष्णा गावोऽभिन्नाः ।

**[ सांकाश्यकानां पाटलिपुत्रकाणां च पाटलिपुत्रका आढ्यतमाः ]** सांकाश्यकानां पाटलिपुत्रकाणां च पाटलिपुत्रकाः प्रकृष्टाः आढ्याः = आढ्यतमाः । 'प्रकृष्टे तमप्' (७।३।५) तमप्प्र० → तम । जस् ।

विभज्यग्रहणमद्वित्वार्थम् ।

**[ शुक्लतरा शाटी ]** शुक्ला इयमनयोर्मध्ये प्रकृष्टा शुक्ला = शुक्लतरा शाटी । अनेन तरप्प्र० → तर । 'आत्' (२।४।१८) आप्प्र० → आ । ।।छ।।

## क्वचित् स्वार्थे ॥ ७।३।७ ॥

**[ क्वचित् ]** क्वचित् प्रथमा सि । 'अनतो लुप्' (१।४।५९) लुप् । ('अव्ययस्य' (३।२।७) सिलुप्) ।

**[ स्वार्थे ]** स्वार्थ सप्तमी ङि ।

**[ अभिन्नतरकम् ]** अभिन्नमेव = अभिन्नतरकम् । अनेन तरप्प्र० → तर । 卐अनत्यन्तं अभिन्नतरमभिन्नतरकम् । 'क्तात् तमबादेश्चानत्यन्ते' (७।३।५६) कप्प्र० → क ।

**[ उपपन्नतरकम् ]** उपपन्नमेव = उपपन्नतरकम् । अनेन तरप्प्र० → तर । उपपन्न(तर)मेव = उपपन्नतरकम् । 'क्तात् तमबादेश्चानत्यन्ते' (७।३।५६) कप्प्र० → क ।

**[ उच्चैस्तराम् ]** उच्चैरेव = उच्चैस्तराम् । अनेन तरप्प्र० → तर । सि-अम् ।।छ।।

## किं-त्याद्येऽव्ययादसत्त्वे तयोरन्तस्याऽऽम् ॥ ७।३।८ ॥

**[ किंत्याद्येऽव्ययात् ]** किञ्च त्यादिश्च एश्च अव्ययं च = किंत्याद्येऽव्ययम्, तस्मात् ।

**[ असत्त्वे ]** सीदतो लिङ्गं(ङ्ग)-संख्येऽस्मिन्निति सत्त्वम् । न सत्त्वम् = असत्त्वम्, तस्मिन् ।

**[ तयोः ]** तद् सप्तमी ओस् ।

**[ अन्तस्य ]** अन्त षष्ठी ङस् ।

**[ आम् ]** आम् प्रथमा सि ।

**[ किंतरां पचति ]** इदमनयोरतिशयेन किं पचति = किंतरां पचति । 'द्वयोर्विभज्ये च तरप्' (७।३।६) तरप्प्र० → तर । अनेन अन्तस्य आम् ।

**[ किंतमां पचति ]** इदमेषामतिशयेन किं पचति = किंतमां पचति । 'प्रकृष्टे तमप्' (७।३।५) तमप्प्र० → तम् । अनेन अन्तस्य आम् । प्रथमा सि । 'अव्ययस्य' (७।२।७) । सिलुप् ।

**[ पचतितराम् ]** द्वाविमौ पचतः, अयमनयोरतिशयेन पचति = पचतितराम् । 'द्वयोर्विभज्ये च तरप्' (७।३।६) तरप्प्र० → तर । अनेन अन्तस्य आम् ।

**[ पचतितमाम् ]** सर्वे इमे पचन्ति, अयमेषां प्रकृष्टं पचति = पचतितमाम् । 'प्रकृष्टे तमप्' (७।३।५) तमप्प्र० → तम । अनेन अन्तस्य आम् ।

---

卐 म० वृत्तौ-अभिन्नमेव अभिन्नतरकम् । 'यावादिभ्यः कः' (७।३।१५) क प्र० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ पूर्वाह्णेतरां भुङ्क्ते ]** पूर्वमह्नः = पूर्वाह्णः । 'सर्वांऽश-संख्या-ऽव्ययात्' (७।३।११८) अट्समासान्तः - "अह्न"देशश्च, तस्मिन् । द्वयोर्मध्ये प्रकृष्टं पूर्वाह्णे = पूर्वाह्णेतराम् । 'द्वयोर्विभज्ये च तरप्' (७।३।६) तरप्प्र० → तर । अनेन अन्तस्य आम् । 'कालात् तन-तर-तम-काले' (३।२।२४) इत्यादिना सप्तम्या अलुप्समासः ।

**[ पूर्वाह्णेतमां भुङ्क्ते ]** पूर्वमह्नः = पूर्वाह्णः । 'सर्वांऽश-संख्या-ऽव्ययात् (७।३।११८) अट्समासान्तः - "अह्न"देशश्च, तस्मिन् । एषां मध्ये प्रकृष्टं पूर्वाह्णे = पूर्वाह्णेतमाम् । 'प्रकृष्टे तमप्' (७।३।५) तमप्प्र० → तम । अनेन अन्तस्य आम् । ' कालात् तन-तर-तम-काले' (३।२।२४) इत्यादिना सप्तम्या अलुप्समासः ।

**[ अपराह्णेतराम् ]** द्वयोर्मध्ये प्रकृष्टं अपराह्णे = अपराह्णेतराम् । 'द्वयोर्विभज्ये च तरप्' (७।३।६) तरप्प्र० → तर । अनेन अन्तस्य आम् । 'कालात् तन-तर-तम-काले' (३।२।२४) इत्यादिना सप्तम्या अलुप्समासः ।

**[ अपराह्णेतमाम् ]** एषां मध्ये प्रकृष्टं अपराह्णे = अपराह्णेतमाम् । 'प्रकृष्टे तमप्' (७।४।५) तमप्प्र० → तम । अनेन अन्तस्य आम् । 'कालात् तन-तर-तम-काले' (३।२।२४) इत्यादिना सप्तम्या अलुप्समासः ।

**[ प्राह्णेतराम् ]** प्रकृष्टमह्नः = प्राह्णः । 'सर्वांऽश-संख्या-ऽव्ययात्' (७।३।११८) अट्समासान्तः - "अह्न"देशश्च, तस्मिन् । द्वयोर्मध्ये प्रकृष्टं प्राह्णे = प्राह्णेतराम् । 'द्वयोर्विभज्ये च तरप्' (७।३।६) तरप्प्र० → तर । अनेन अन्तस्य आम् । 'कालात् तन०' (३।२।२४) इत्यादिना सप्तम्या अलुप्समासः ।

**[ प्राह्णेतमाम् ]** प्रकृष्टमह्नः = प्राह्णः । 'सर्वांऽश-संख्या-ऽव्ययात्' (७।३।११८) अट्समासान्तः - "अह्न"देशश्च, तस्मिन् । एषां मध्ये प्रकृष्टं प्राह्णे = प्राह्णेतमाम् । 'प्रकृष्टे तमप्' (७।३।५) तमप्प्र० → तम । अनेन अन्तस्य आम् । 'कालात् तन०' (३।२।२४) इत्यादिना सप्तम्या अलुप्समासः ।

**[ प्रगेतराम् ]** द्वयोर्मध्ये प्रकृष्टं प्रगे = प्रगेतराम् । 'द्वयोर्विभज्ये च तरप्' (७।३।६) तरप्प्र० → तर । अनेन अन्तस्य आम् । 'कालात् तन०' (३।२।२४) इत्यादिना सप्तम्या अलुप्समासः ।

**[ प्रगेतमाम् ]** एषां मध्ये प्रकृष्टं प्रगे = प्रगेतमाम् । 'प्रकृष्टे तमप्' (७।३।५) तमप्प्र० → तम । अनेन अन्तस्य आम् । 'कालात् तन०' (३।२।२४) इत्यादिना सप्तम्या अलुप्समासः ।

**[ अग्रेतराम् ]** द्वयोर्मध्ये प्रकृष्टं अग्रे = अग्रेतराम् । 'द्वयोर्विभज्ये च तरप्' (७।३।२४) इत्यादिना सप्तम्या अलुप्समासः ।

**[ अग्रेतमाम् ]** एषां मध्ये प्रकृष्टं अग्रे = अग्रेतमाम् । 'प्रकृष्टे तमप्' (७।३।५) तमप्प्र० → तम् । अनेन अन्तस्य आम् । 'कालात् तन-तर०' (३।२।२४) इत्यादिना सप्तम्या अलुप्समासः ।

अग्रेशब्दोऽपि कालवाची, अथवा विभक्त्यर्थो न द्रष्टव्यम्, तत्प्रकर्षेऽत्र तरप्-तमपौ ।

**[ जेतरः ]** 'जिं अभिभवे' (८) जि । जयतीति जे । 'मन्-वन्-क्वनिप्-विच् क्वचित्' (५।१।१४७) विच्प्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'अप्रयोगीत्' (१।१।३७) विच्लोपः । द्वयोर्मध्ये प्रकृष्टे जे = जेतरः । 'द्वयोर्विभज्ये च तरप्' (७।३।६) तरप्प्र० → तर ।

**अव्यय - [ नितराम् ]** नि एव = नितराम् । 'क्वचित् स्वार्थे' (७।३।७) तरप्प्र० → तर । अनेन अन्तस्य आम् ।

**[ सुतराम् ]** सु एव = सुतराम् । 'क्वचित् स्वार्थे' (७।३।७) तरप्प्र० → तर । अनेन अन्तस्य आम् ।

**[ अतितमाम् ]** बहूनां मध्ये प्रकृष्टाऽति = अतितमाम् । 'प्रकृष्टे तमप्' (७।३।५) तमप्प्र० → तम । अनेन अन्तस्य आम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

[ अतीवतराम् ] अतीव एव = अतीवतराम् । 'क्वचित् स्वार्थे' (७।३।७) तरप्प्र० → तर । अनेन अन्तस्य आम् ।

[ नतराम् ] न एव = नतराम् । 'क्वचित् स्वार्थे' (७।३।७) तरप्प्र० → तर । अनेन अन्तस्य आम् ।

[ उच्चैस्तराम् ] उच्चैरेव = उच्चैस्तराम् । 'क्वचित् स्वार्थे' (७।३।७) तरप्प्र० → तर । अनेन अन्तस्य आम् ।

[ उच्चैस्तमाम् ] बहूनां मध्ये उच्चैरुच्चैस्तमाम् । 'प्रकृष्टे तमप्' (७।३।५) तमप्प्र० → तम । अनेन अन्तस्य आम् ।

[ शीघ्रतरं गच्छति ] द्वयोर्मध्ये प्रकृष्टं शीघ्रं = शीघ्रतरम् । 'द्वयोर्विभज्ये च तरप्' (७।३।६) तरप्प्र० → तर । 'क्रियाविशेषणात्' (२।२।४१) अम् । गच्छति ।

[ किंतरं दारु ] द्वयोर्मध्ये प्रकृष्टं किं = किंतरम् । 'द्वयोर्विभज्ये च तरप्' (७।३।६) तरप्प्र० → तर ।

[ उच्चैस्तरः, उच्चैस्तमो वृक्षः ] उच्चैस्तरः पूर्ववत् । अग्रेतने पूर्ववत् ।

[ उत्तरः ] उत् मण्ड्यते । अयमनयोर्मध्ये प्रकृष्ट उत्कृष्ट ऊर्ध्वो वा = उत्तरः ।

[ उत्तमः ] एषां मध्ये प्रकृष्ट उत्कृष्ट ऊर्ध्वो वा = उत्तमः । 'प्रकृष्टे तमप्' (७।३।५) तमप्प्र० → तम ॥छ॥

## गुणाङ्गाद् वेष्ठेयसू ॥ ७।३।९ ॥

[ गुणाङ्गात् ] गुणोऽङ्गं-प्रवृत्तिनिमित्तं यस्य सः = गुणाङ्गस्तस्मात् ।

[ वा ] वा प्रथमा सि ।

[ इष्ठेयसू ] इष्ठश्च ईयसु च = इष्ठेयसू । औ । 'इदुतोऽस्त्रेरीदूत्' (१।४।२१) ऊ ।

**यः शब्दो गुणमभिधाय द्रव्ये वर्त्तते स गुणाङ्गः । तमबर्थे इष्ठः ।**

[ पटिष्ठः, पटुतमः ] अयमेषामतिशयेन पटुः = पटिष्ठः । अनेन इष्ठप्र० । 'त्र्यन्त्यस्वरादेः' (७।४।४३) उलुक् । एवम्-पटुतमः । 'प्रकृष्टे तमप्' (७।३।५) तमप्प्र० → तम ।

[ पटिष्ठौ, पटुतमौ ] इमावेषामतिशयेन पटू = पटिष्ठौ । एवम्-पटुतमौ ।

[ पटिष्ठाः, पटुतमाः ] इमे एषामतिशयेन पटवः = पटिष्ठाः, पटुतमाः । अनेन इष्ठप्र० । 'त्र्यन्त्यस्वरादेः' (७।४।४३) उलुक् । 'प्रकृष्टे तमप्' (७।३।५) तमप्प्र० → तम ।

[ लघिष्ठः, लघुतमः ] अयमेषामतिशयेन लघुः = लघिष्ठः, लघुतमः । अनेन इष्ठप्र० । 'त्र्यन्त्यस्वरादेः' (७।४।४३) उलुक् । 'प्रकृष्टे तमप्' (७।३।५) तमप्प्र० → तम ।

[ गरिष्ठः, गुरुतमः ] अयमेषामतिशयेन गुरुः = गरिष्ठः । अनेन इष्ठप्र० । प्रिय-स्थिर-स्फिरोरु-गुरु-बहुल-तृप्र-दीर्घ-वृद्ध-वृन्दारकस्येमनि च प्रा-स्था-स्फ्र-वर-गर-बंह-त्रप-द्राघ-वर्ष-वृन्दम्' (७।४।३८) इत्यादिना गुरोः "गर"देशः । एवम्-गुरुतमः । 'प्रकृष्टे तमप्' (७।३।५) तमप्प्र० → तम ।

[ म्रदिष्ठः, मृदुतमः ] अयमेषामतिशयेन मृदुः = म्रदिष्ठः । अनेन इष्ठप्र० । 'पृथु-मृदु-भृश-कृश-द्रढ-परिवृढस्य ऋतो रः' (७।४।३९) रत्वम् । 'त्र्यन्त्यस्वरादेः' (७।४।४३) उलुक् । एवम्-मृदुतमः ।

**तरबर्थे ईयसुः-**

[ पटीयान्, पटुतरः ] अयमनयोर्मध्येऽतिशयेन पटुः = पटीयान् । अनेन ईयसुप्र० → ईयस् । 'त्र्यन्त्यस्वरादेः' (७।४।४३) उलुक् । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'न्स्महतोः' (१।४।८६) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । एवम्-पटुतरः । 'द्वयोर्विभज्ये च तरप्' (७।३।६) तरप्प्र० → तर ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ गरीयान्, गुरुतरः ]** अयमनयोर्मध्येऽतिशयेन गुरुः = गरीयान् । अनेन ईयसुप्र० → ईयस् । 'प्रिय-स्थिर-स्फिरोरु-गुरु-बहुल-तृप्र-दीर्घ-वृद्ध-वृन्दारकस्येमनि च प्रा-स्था-स्फा-वर-गर-०' (७।४।३८) इत्यादिना गुरोः "गर"देश । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'न्स्महतोः' (१।४।८६) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । एवम्-गुरुतरः । 'द्वयोर्विभज्ये च तरप्' (७।३।६) तरप्प्र० → तर ।

**[ लघीयान्, लघुतरः ]** अयमनयोर्मध्येऽतिशयेन लघुः = लघीयान् । अनेन ईयसुप्र० → ईयस् । 'त्रन्त्यस्वरादेः' (७।४।४३) उलोपः । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'न्स्महतोः' (१।४।८६) दीर्घः । 'दीर्घङ्याब्०' (१।४।७०) सिलुक् । एवम्-लघुतरः । 'द्वयोर्विभज्ये च तरप्' (७।३।६) तरप्प्र० → तर ।

**[ म्रदीयान्, मृदुतरः ]** अयमनयोर्मध्येऽतिशयेन मृदुः = म्रदीयान् । अनेन ईयसुप्र० → ईयस् । 'पृथु-मृदु-भृश-कृश-द्रढ-परिवृढस्य ऋतो रः' (७।४।३९) रत्वम् । 'त्रन्त्यस्वरादेः' (७।४।४३) उलोपः । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'न्स्महतोः' (१।४।८६) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । एवम्-मृदुतरः । 'द्वयोर्विभज्ये च तरप्' (७।३।६) तरप्प्र० → तर ।

**[ परुद्भवान् पटुरासीत् पटीयानैषमः, पटुतरः ]** परुद्भवान् पटुरासीत्, द्वयोर्मध्ये पटुः = पटीयानैषमः । अनेन ईयसुप्र० → ईयस् । 'त्रन्त्यस्वरादेः' (७।४।४३) उलोपः । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'न्स्महतोः' (१।४।८६) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । एवम्-पटुतरः । 'द्वयोर्विभज्ये च तरप्' (७।३।६) तरप्प्र० → तर ।

**[ माथुरेभ्यः पाटलिपुत्रकाः पटीयांसः, पटुतराः ]** माथुरेभ्यः पाटलिपुत्रकाः, इमे एषामतिशयेन पटवः = पटीयांसः । अनेन ईयसुप्र० → ईयस् । 'त्रन्त्यस्वरादेः' (७।४।४३) उलोपः । प्रथमा जस् । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'न्स्महतोः' (१।४।८६) दीर्घः । एवम्-पटुतराः । 'द्वयोर्विभज्ये च तरप्' (७।३।६) तरप्प्र० → तर । जस् ।

**[ गोतमः ]** पूर्ववत् साध्यः ।

**[ गोतरः ]** पूर्ववत् साध्यः ।

**[ पाचकतरः ]** पूर्ववत् साध्यः ।

**[ पाचकतमः ]** पूर्ववत् साध्यः ।

**[ दन्ताः स्निग्धतराः ]** पूर्ववत् साध्यः ।

**[ परुद्भवान् विद्वानासीत् ऐषमो विद्वत्तरः ]** परुद्भवान् 'विदक् ज्ञाने' (१०९९) विद् । वेत्तीति विद्वान् । 'वा वेत्तेः क्वसुः' (५।२।२२) क्वसुप्र० → वस् । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'न्स्महतोः' (१।४।८६) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'पदस्य' (२।१।८९) सलुक् । आसीत् । द्वयोर्मध्ये विद्वान् = विद्वत्तरः । 'द्वयोर्विभज्ये च तरप्' (७।३।६) तरप्प्र० → तर । 'स्रंस्-ध्वंस्-क्वस्सनडुहो दः' (२।१।६८) स० → द० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) द० → त० । अत्र जातिक्रियाङ्गत्वान्न भवति ।

**[ शुक्लतमम्, शुक्लतरं रूपम् ]** प्रकृष्टं शुक्लं = शुक्लतमं रूपम् । 'प्रकृष्टे तमप्' (७।३।५) तमप्प्र० → तम । अत्र हि गुण एव वृत्तिर्न तदुपसर्जने द्रव्य इति न भवति ।

**ईयसोरुकार उदित्कार्यार्थः-**

**[ पटीयसी ]** पटु । स्वरादुतो गुणादखरोः' (२।४।३५) ङी । इयमनयोर्मध्ये पट्वी = पटीयसी । अनेन ईयसुप्र० → ईयस् । 'जातिश्च णि-तद्धितय-स्वरे' (३।२।५१) पुंवद्भावः । 'त्रन्त्यस्वरादेः' (७।४।४३) उलुक् । 'अधातूदृदितः' (२।४।२) ङी ॥छ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## त्यादेश्च प्रशस्ते रूपप् ॥ ७।३।१० ॥

**[ त्यादेश्च ]** तिरादिर्यस्य सः = त्यादिः, तस्मात् । च प्रथमा सि ।

**[ प्रशस्ते ]** प्रशस्त सप्तमी ङि ।

**[ रूपप् ]** रूपप् प्रथमा सि ।

**[ पचतिरूपम् ]** प्रशस्तं पचति = पचतिरूपम् । अनेन रूपप्प्र० → रूप ।

**[ पचतोरूपम् ]** प्रशस्तं पचतः = पचतोरूपम् । अनेन रूपप्प्र० → रूप ।

त्याद्यन्तानां क्रियाप्रधानत्वात्तस्याश्च साध्यत्वेन लिङ्गसंख्याभ्यामयोगात् रूपबन्तस्यौत्सर्गिकमेकवचनं नपुंसकलिङ्गं च भवति ।

**[ वैयाकरणरूपः ]** प्रशस्तो वैयाकरणः = वैयाकरणरूपः । अनेन रूपप्प्र० → रूप ।

**[ पण्डितरूपः ]** प्रशस्तः पण्डितः = पण्डितरूपः । अनेन रूपप्प्र० → रूप ।

**[ वृषलरूपोऽयमपि पलाण्डुना सुरां पिबेत् ]** प्रशस्तो वृषलः = वृषलरूपः । अनेन रूपप्प्र० → रूप । अयमपि पलाण्डुना सुरां पिबेत् । 'सम्भावनेऽलमर्थे तदर्थानुक्तौ' (५।४।२२) इत्यादिना सप्तमी ।

**[ दस्युरूपोऽयमप्यक्ष्णोरञ्जनं हरेत् ]** पशस्तो दस्युः = दस्युरूपः । अनेन रूपप्प्र० → रूप । अयमप्यक्ष्णोरञ्जनं हरेत् ।

**[ पटुतमरूपः ]** प्रशस्तः पटुतमः = पटुतमरूपः । अनेन रूपप्प्र० → रूप ।

**[ पटुतररूपः ]** प्रशस्तः पटुतरः = पटुतररूपः । अनेन रूपप्प्र० → रूप ।

**[ शोभनरूपाः ]** शोभन 'आत्' (२।४।१८) आप्प्र० → आ । प्रशस्ताः शोभनाः = शोभनरूपाः । अनेन रूपप्प्र० → रूप । जस् । 'क्यङ्-मानि-पित्तद्धिते' (३।२।५०) पुंवद्भावः ।

**[ दर्शनीयरूपा ]** दर्शनीय 'आत्' (२।४।१८) आप्प्र० → आ । प्रशस्ता दर्शनीया = दर्शनीयरूपा । अनेन रूपप्प्र० → रूप । 'क्यङ्-मानि-पित्तद्धिते' (३।२।५०) पुंवद्भावः ॥छ॥

## अतमबादेरीषदसमाप्ते कल्पप्-देश्यप्-देशीयर् ॥ ७।३।११ ॥

**[ अतमबादेः ]** तमप् आदिर्यस्य सः = तमबादिः, न तमबादिरतमबादिस्तस्मात् ।

**[ ईषदसमाप्ते ]** ईषदसमाप्तः = ईषदसमाप्तस्तस्मिन् ।

**[ कल्पप्देश्यप्देशीयर् ]** कल्पप् च देश्यप् च देशीयर् च = कल्पप्देश्यप्देशीयर् ।

**त्यादेश्चेति वर्त्तते । पदार्थानां पूर्णता समाप्तिः, सा किञ्चिदूना ईषदसमाप्तिः ।**

**[ पचतिकल्पम्, पचतिदेश्यम्, पचतिदेशीयम् ]** ईषदसमाप्तं पचति = पचतिकल्पम्, पचतिदेश्यम्, पचतिदेशीयम् । अनेन कल्पप्-देश्यप्-देशीयर्प्र० → कल्प-देश्य-देशीय । सि-अम् ।

**[ पचतःकल्पम्, पचतोदेश्यम्, पचतोदेशीयम् ]** ईषदपरिसमाप्तं पचतः = पचतःकल्पम्, पचतोदेश्यम्, पचतोदेशीयम् । अनेन कल्पप्-देश्यप्-देशीयर्प्र० → कल्प-देश्य-देशीय । सि-अम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ पचन्तिकल्पम्, पचन्तिदेश्यम्, पचन्तिदेशीयम् ]** ईषदपरिसमाप्तं पचन्ति = पचन्तिकल्पम्, पचन्तिदेश्यम्, पचन्तिदेशीयम् । सि-अम् ।

**[ पक्ष्यतिकल्पम् ]** ईषदपरिसमाप्तं पक्ष्यति = पक्ष्यतिकल्पम् । अनेन कल्पप्प्र० → कल्प ।

**[ अपाक्षीत्कल्पम् ]** ईषदपरिसमाप्तं अपाक्षीत् = अपाक्षीत्कल्पम् । अनेन कल्पप्प्र० → कल्प । पूर्ववन्नपुंसकत्वमेकवचनं च ।

**इदमेव त्यादिग्रहणं ज्ञापकम्-शेषस्तद्धितो नाम्न एव भवति ।**

**[ पटुकल्पः, पटुदेश्यः, पटुदेशीयः ]** ईषदसमाप्तः पटुः = पटुकल्पः, पटुदेश्यः, पटुदेशीयः । अनेन कल्पप्-देश्यप्-देशीयर्प्र० → कल्प-देश्य-देशीय ।

**[ कारककल्पः, कारकदेश्यः, कारकदेशीयः ]** ईषदपरिसमाप्तः कारकः = कारककल्पः, कारकदेश्यः, कारकदेशीयः । अनेन कल्पप्-देश्यप्-देशीयर्प्र० → कल्प-देश्य-देशीयप्र० ।

**[ कृतकल्पम् ]** ईषदपरिसमाप्तं कृतं = कृतकल्पम् । अनेन कल्पप्प्र० → कल्प । सि-अम् ।

**[ भुक्तदेश्यम् ]** ईषदपरिसमाप्तं भुक्तं = भुक्तदेश्यम् । अनेन देश्यप्प्र० → देश्य । सि-अम् ।

**[ गुडकल्पा द्राक्षा, गुडदेश्या, गुडदेशीया ]** ईषदसमाप्तो गुडः = गुडकल्पा द्राक्षा । एवम्-गुडदेश्या, गुडदेशीया । अनेन कल्पप्-देश्यप्-देशीयर्प्र० → कल्प-देश्य-देशीय । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ पयस्कल्पा यवागूः ]** पयस् मण्ड्यते । ईषदपरिसमाप्तं पयः = पयस्कल्पा यवागूः । अनेन कल्पप्प्र० → कल्प । 'सो रुः' (२।१।७२) स० → र० । 'प्रत्यये' (२।३।६) इत्यनेन र० → स० । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ चन्द्रकल्पं मुखम् ]** ईषदपरिसमाप्तः(प्तं) चन्द्रं = चन्द्रकल्पं मुखम् । अनेन कल्पप्प्र० → कल्प ।

**[ तैलकल्पा प्रसन्ना ]** ईषदपरिसमाप्तं तैलं = तैलकल्पा प्रसन्ना । अनेन कल्पप्प्र० → कल्प । 'आत्' (२।४।१८) आप्प्र० → आ ।

यदुतः स्वार्थिकाः प्रत्ययाः केचित् प्रकृतिलिङ्गान्यतिवर्त्तन्ते-त्यजन्तीत्यर्थः । यथा-

**[ कुटीरः ]** ह्रस्वा कुटी = कुटीरः । 'कुटी-शुण्डाद् रः' (७।३।४७) रप्र० ।

**[ शुण्डारः ]** ह्रस्वा शुण्डा = शुण्डारः । 'कुटी-शुण्डाद् रः' (७।३।४७) रप्र० ।

**[ शमीरुः, शमीरः ]** ह्रस्वा शमी = शमीरुः, शमीरः । 'शम्या रु-रौ' (७।३।४८) रु-रप्र० ।

**[ दैवतम् ]** देवस्य भावः कर्म वा = देवता । 'भावे त्व-तल्' (७।१।५५) तल्प्र० → त । 'आत्' (२।४।१८) आप्प्र० → आ । देवतैव = दैवतम् । 'प्रज्ञादिभ्योऽण्' (७।२।१६५) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ औपयिकम् ]** उपाय एव = औपयिकम् । 'उपायाद्ध्रस्वश्च' (७।२।१७०) इकण्प्र० → इक - पकारस्याकारस्य ह्रस्वः । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ औषधम् ]** ओषधिरेव = औषधम् । 'श्रोत्रौषधि-कृष्णाच्छरीर-भेषज-मृगे' (७।२।१६६) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ वाचिकम् ]** वाच् । सन्दिष्टा वाक् = वाचिकम् । 'वाच इकण्' (७।२।१६८) इकण्प्र० → इक ।

केचित्तु नातिवर्त्तन्ते-न त्यजन्तीत्यर्थः-

**[ यावकः ]** 'युक् मिश्रणे' (१०८०) यु । यवनं = यवः । 'युवर्ण-वृ-दृ-वश-रण-गमृद्-ग्रहः' (५।३।२८) अल्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । यवानां विकारः = यावः । 'विकारे' (६।२।३०) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । याव एव = यावकः । 'यावादिभ्यः कः' (७।३।१५) कप्र० ।

**[ मणिकः ]** मणिरेव = मणिकः । 'यावादिभ्यः कः' (७।३।१५) कप्र० ।

**[ बृहतिका ]** बृहती । बृहत्येव = बृहतिका । 'तनु-पुत्रा-ऽणु-बृहती-शून्यात् सूत्र-कृत्रिम-निपुणा-ऽऽच्छादन-रिक्ते' (७।३।२३) कप्र० । 'ङ्यादीदूतः के' (२।४।१०४) ह्रस्वः । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ मृत्तिका ]** मृदेव = मृत्तिका । 'मृदस्तिकः' (७।२।१७१) तिकप्र० । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ कासूतरी ]** ह्रस्वा कासू = कासूतरी । 'कासू-गोणीभ्यां तरट्' (७।३।५०) तरट्प्र० → तर । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

**[ गोणीतरी ]** ह्रस्वा गोणी = गोणीतरी । 'कासू-गोणीभ्यां तरट्' (७।३।५०) तरट्प्र० → तर । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

**[ व्यावक्रोशी ]** वि-अव 'क्रुशं आह्वान-रोदनयोः' (९८६) क्रुश् । व्यवक्रोशनं = व्यवक्रोशः । 'व्यतिहारेऽनीहादिभ्यो ञः' (५।३।११६) ञप्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । व्यवक्रोश एव = व्यावक्रोशी । 'नित्यं ञ-ञिनोऽण्' (७।३।५८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ व्यावहासी ]** वि-अव 'हसे हसने' (५४५) हस् । व्यवहसनं = व्यवहासः । 'व्यतिहारेऽनीहादिभ्यो ञः' (५।३।११६) ञप्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । व्यवहास एव = व्यावहासी । 'नित्यं ञ-ञिनोऽण्' (७।३।५८) अण्प्र० → अ । 'वृद्धिः स्वरे' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ पटुकल्पतमः ]** ईषदपरिसमाप्तः पटुः = पटुकल्पः । अनेन कल्पप्प्र० → कल्प । प्रकृष्टः पटुकल्पः = पटुकल्पतमः । 'प्रकृष्टे तमप्' (७।३।५) तमप्प्र० → तम ।

**[ पटुकल्पतरः ]** ईषदपरिसमाप्तः पटुः = पटुकल्पः । अनेन कल्पप्प्र० → कल्प । द्वयोर्मध्ये प्रकृष्टः पटुकल्पः = पटुकल्पतरः । 'द्वयोर्विभज्ये च तरप्' (७।३।६) तरप्प्र० → तर ।

**[ पटुदेश्यतमः ]** ईषदपरिसमाप्तः पटुः = पटुदेश्यः । अनेन देश्यप्प्र० → देश्य । प्रकृष्टः पटुदेश्यः = पटुदेश्यतमः । 'प्रकृष्टे तमप्' (७।३।५) तमप्प्र० → तम ।

**[ पटुदेश्यतरः ]** ईषदपरिसमाप्तः पटुः = पटुदेश्यः । अनेन देश्यप्प्र० → देश्य । द्वयोर्मध्ये प्रकृष्टः पटुदेश्यः = पटुदेश्यतरः । 'द्वयोर्विभज्ये च तरप्' (७।३।६) तरप्प्र० → तर ।

**[ पटुकल्परूपः ]** ईषदपरिसमाप्तः पटुः = पटुकल्पः । अनेन कल्पप्प्र० → कल्प । प्रशस्तः पटुकल्पः = पटुकल्परूपः । 'त्यादेश्च प्रशस्ते रूपप्' (७।३।१०) रूपप्प्र० → रूप ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ पटुदेश्यरूपः ]** ईषदपरिसमाप्तः पटुः = पटुदेश्यः । अनेन देश्यप्प्र० → देश्य । प्रशस्तः पटुदेश्यः = पटुदेश्यरूपः । 'त्यादेश्च प्रशस्ते रूपप्' (७।३।१०) रूपप्प्र० → रूप ।

**पकारौ पुंवद्भावार्थौ ।**

**[ दर्शनीयकल्पा ]** दर्शनीया मण्ड्यते । ईषदपरिसमाप्ता दर्शनीया = दर्शनीयकल्पा । अनेन कल्पप्प्र० → कल्प । 'क्यङ्-मानि-पित्तद्धिते' (३।२।५०) पुंवद्भावः । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ दर्शनीयदेश्या ]** दर्शनीया मण्ड्यते । ईषदपरिसमाप्ता दर्शनीया = दर्शनीयदेश्या । अनेन देश्यप्प्र० → देश्य । 'क्यङ्-मानि-पित्तद्धिते' (३।२।५०) पुंवद्भावः । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ स्रौघ्नदेशीया, पञ्चमदेशीया ]** स्रुघ्नो देवता अस्या सा = स्रौघ्नी । 'देवता' (६।२।१०१) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । अत्रापि पुंवदर्थः पकारः क्रियताम् । किं करणेन ? सत्यम्, 'तद्धिताऽककोपान्त्य-पूरण्याख्याः' (३।२।५४) इति पूरणीप्रत्ययान्तत्वात् पञ्चमदेशीयेत्यत्र पुंवद्भावस्य निषेधः प्राप्नोति स मा भूदिति करणम् । पञ्चन् । पञ्चानां पूरणी = पञ्चमी । 'नो मट्' (७।१।१५९) मट्प्र० → म । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् । ईषदसमाप्ता स्रौघ्नी = स्रौघ्नदेशीया । ईषदसमाप्ता पञ्चमी = पञ्चमीदेशीया । अनेन देशीयर्प्र० → देशीय । अनयोः 'तद्धितः स्वरवृद्धिहेतुररक्त-विकारे' (३।२।५५) -'तद्धिताऽककोपान्त्य-पूरण्यारव्याः' (३।२।५४) इत्याभ्यां निषिद्धोऽपि 'रिति' (३।२।५८) इत्यनेन पुंवद्भावः । 'आत्' (२।४।१८) आप्प्र० → आ ॥छा॥

## नाम्नः प्राग्बहुर्वा ॥ ७।३।१२ ॥

**[ नाम्नः ]** नामन् पञ्चमी ङसि । 'अनोऽस्य' (२।१।१०८) अलुक् ।

**[ प्राग् ]** प्राग् प्रथमा सि ।

**[ बहुः ]** बहु प्रथमा सि ।

**[ वा ]** वा प्रथमा सि ।

पञ्चम्यर्थद्वितीयमानत्वात् अस्य बहोः प्रत्ययत्वात् 'परः' (७।४।११८) इति तु परिभाषा अत्र प्राग्ग्रहणेन बाध्यते । एवं सर्वादिरित्यत्रापि ।

**[ बहुपटुः ]** ईषदसमाप्तः पटुः = बहुपटुः । अनेन पूर्वं बहुप्रत्ययः ।

**[ बहुमृदुः ]** ईषदसमाप्तो मृदुः = बहुमृदुः । अनेन बहुप्र० ।

**[ बहुभुक्तम् ]** ईषदसमाप्तं भुक्तं = बहुभुक्तम् । अनेन बहुप्र० ।

**[ बहुपीतम् ]** ईषदसमाप्तं पीतं = बहुपीतम् । अनेन बहुप्र० ।

**[ बहुगुडो द्राक्षा ]** ईषदसमाप्तः गुडः = बहुगुडो द्राक्षा । अनेन पूर्वं बहुप्र० ।

**[ बहुतैलं प्रसन्ना ]** ईषदसमाप्तं तैलं = बहुतैलं प्रसन्ना-वारुणी सुरा । अनेन पूर्वं बहुप्र० ।

**[ बहुपयो यवागूः ]** ईषदसमाप्तं पयः = बहुपयो यवागूः । अनेन पूर्वं बहुप्र० ।

**[ बहुचन्द्रो मुखम् ]** ईषदसमाप्तश्चन्द्रः = बहुचन्द्रो मुखम् । अनेन पूर्वं बहुप्र० ।

**नामग्रहणं त्याद्यन्तनिवृत्त्यर्थम्** ॥छा॥

## न तमबादिः कपोऽच्छिन्नादिभ्यः ॥ ७।३।१३ ॥

**[ न ]** न प्रथमा सि ।

**[ तमबादिः ]** तमप् आदिर्यस्य सः = तमबादिः । 'धुटस्तृतीयः' (२।१।७६) प० → ब० ।

**[ कपः ]** कप् पञ्चमी ङसि ।

**[ अच्छिन्नादिभ्यः ]** छिन्न आदिर्येषां ते = छिन्नादयः । न छिन्नादयः = अच्छिन्नादयः, तेभ्यः = अच्छिन्नादिभ्यः । पञ्चमी भ्यस् ।

**[ पटुकः ]** अयमेषां प्रकृष्टः-कुत्सितो-ऽल्पो-ऽज्ञातो वा पटुकः । 'कुत्सिता-ऽल्पा-ऽज्ञाते' (७।३।३३) कप्प्र० → क ।

**[ पटुकः ]** अयमनयोर्मध्ये प्रकृष्टः पटुकः ।

**[ पटुतमकः ]** प्रकृष्टः पटुः = पटुतमः । 'प्रकृष्टे तमप्' (७।३।५) तमप्प्र० → तम । अयमेषामतिशयेन कुत्सितः पटुतमः = पटुतमकः । 'कुत्सिता-ऽल्पा-ऽज्ञाते' (७।३।३३) कप्प्र० → क ।

**[ पटुतरकः ]** अयमनयोर्मध्येऽतिशयेन पटुः = पटुतरः । 'द्वयोर्विभज्ये च तरप्' (७।३।६) तरप्प्र० → तर । कुत्सितः पटुतरः = पटुतरकः । 'कुत्सिता-ऽल्पा०' (७।३।३३) कप्प्र० → क ।

**[ पटुरूपकः ]** प्रशस्तः पटुः = पटुरूपः । 'त्यादेश्च प्रशस्ते रूपप्' (७।३।१०) रूपप्प्र० → रूप । कुत्सितः पटुरूपः = पटुरूपकः । 'कुत्सिता-ऽल्पा-ऽज्ञाते' (७।३।३३) कप्प्र० → क । अयमेषां अयमनयोर्वा मध्ये प्रकृष्टः पटुः = पटुरूपकः । न कश्चित् प्रत्ययः सर्वत्र ।

**[ पटुकल्पकः, पटुदेश्यकः, पटुदेशीयकः ]** ईषदसमाप्तः पटुः = पटुकल्पः, पटुदेश्यः, पटुदेशीयः । 'अतमबादेरीषदसमाप्ते कल्पप्-देश्यप्-देशीयर्' (७।३।११) कल्पप्-देश्यप्-देशीयर्प्र० → कल्प-देश्य-देशीय । कुत्सितो-ऽल्पो-ऽज्ञातो वा पटुकल्पः पटुदेश्यः पटुदेशीयो वा = पटुकल्पकः, पटुदेश्यकः, पटुदेशीयकः । 'कुत्सिता-ऽल्पा-ऽज्ञाते' (७।३।३३) कप्प्र० → क । अयमेषां अयमनयोर्वा मध्ये प्रकृष्टः पटुः = पटुकल्पकः, पटुदेशीयकः । न कश्चित् प्रत्ययः ।

**[ कुटीरतमः ]** ह्रस्वा कुटी = कुटीरः । 'कुटी-शुण्डाद् रः' (७।३।४७) रप्र० । अयमेषां मध्ये प्रकृष्टः कुटीरः = कुटीरतमः । 'प्रकृष्टे तमप्' (७।३।५) तमप्प्र० → तम ।

**[ लोहितकतमो मणिः ]** लोहित एव = लोहितकः । 'लोहितान्मणौ' (७।३।१७) कप्र० । प्रकृष्टो लोहितकः = लोहितकतमो मणिः । 'प्रकृष्टे तमप् (७।३।५) तमप्प्र० → तम ।

**[ लोहितकतममक्षि कोपेन ]** लोहितमेव = लोहितकम् । 'रक्ता-ऽनित्यवर्णयोः' (७।३।१८) कप्र० । प्रकृष्टं लोहितकं = लोहितकतममक्षि कोपेन । 'प्रकृष्टे तमप्' (७।३।५) तमप्प्र० → तम । सि-अम् ।

**[ छिन्नकतमः ]** कुत्सितो-ऽल्पो-ऽज्ञातो वा छिन्नः = छिन्नकः । 'कुत्सिता-ऽल्पा-ऽज्ञाते' (७।३।३३) कप्प्र० → क । अयमेषामतिशयेन छिन्नकः = छिन्नकतमः । 'प्रकृष्टे तमप्' (७।३।५) तमप्प्र० → तम ।

**[ छिन्नकतरः ]** द्वयोर्मध्ये प्रकृष्टः छिन्नकः = छिन्नकतरः । 'द्वयोर्विभज्ये च तरप्' (७।३।६) तरप्प्र० → तर ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ छिन्नकरूपः ]** प्रशस्तः छिन्नकः = छिन्नकरूपः । 'त्यादेश्च प्रशस्ते रूपप्' (७।३।१०) रूपप्प्र० → रूप ।

**[ छिन्नककल्पः ]** ईषदपरिसमाप्तः छिन्नकः = छिन्नककल्पः । 'अतमबादेरीषदसमाप्ते०' (७।३।११) कल्पप्प्र० → कल्प ॥छा॥

## अनत्यन्ते ॥ ७।३।१४ ॥

**[ अनत्यन्ते ]** न अत्यन्तम् = अनत्यन्तम्, तस्मिन् ।

**[ छिन्नकम् ]** अनत्यन्तं छिन्नं = छिन्नकम् । इदमेषां प्रकृष्टं छिन्नं = छिन्नकम् । इदमनयोः प्रकृष्टं छिन्नं = छिन्नकम् । 'क्तात् तमबादेश्चानत्यन्ते' (७।३।५६) कप्प्र० → क ।

**[ भिन्नकम् ]** अनत्यन्तं भिन्नं = भिन्नकम् । इदमेषां प्रकृष्टं भिन्नं = भिन्नकम् । इदमनयोः प्रकृष्टं भिन्नं = भिन्नकम् । 'क्तात् तमबादेश्चानत्यन्ते' (७।३।५६) कप्प्र० → क ।

**[ छिन्नतमकम् ]** प्रकृष्टं छिन्नं = छिन्नतमम् । 'प्रकृष्टे तमप्' (७।३।५) तमप्प्र० → तम । अनत्यन्तं छिन्नतमं = छिन्नतमकम् । 'क्तात् तमबादेश्चानत्यन्ते' (७।३।५६) कप्प्र० → क । सि-अम् ।

**[ छिन्नतरकम् ]** द्वयोर्मध्ये प्रकृष्टं छिन्नं = छिन्नतरम् । 'द्वयोर्विभज्ये च तरप्' (७।३।६) तरप्प्र० → तर । अनत्यन्तं छिन्नतरं = छिन्नतरकम् । 'क्तात् तमबादेश्चानत्यन्ते' (७।३।५६) कप्प्र० → क । सि-अम् ।

**[ भिन्नतमकम् ]** प्रकृष्टं भिन्नं = भिन्नतमम् । 'प्रकृष्टे तमप्' (७।३।५) तमप्प्र० → तम । अनत्यन्तं भिन्नतमं = भिन्नतमकम् । 'क्तात् तमबादेश्चानत्यन्ते' (७।३।५६) कप्प्र० → क । सि-अम् ।

**[ भिन्नतरकम् ]** द्वयोर्मध्ये प्रकृष्टं भिन्नं = भिन्नतरम् । 'द्वयोर्विभज्ये च तरप्' (७।३।६) तरप्प्र० → तर । अनत्यन्तं भिन्नतरं = भिन्नतरकम् । 'क्तात् तमबादेश्चानत्यन्ते' (७।३।५६) कप्प्र० → क । सि-अम् ॥छा॥

## यावादिभ्यः कः ॥ ७।३।१५ ॥

**[ यावादिभ्यः ]** याव आदिर्येषां ते = यावादयः, तेभ्यः = यावादिभ्यः । पञ्चमी भ्यस् ।

**[ कः ]** क प्रथमा सि ।

**[ यावकः ]** याव एव = यावकः । अनेन कप्र० ।

**[ मणिकः ]** मणिरेव = मणिकः । अनेन कप्र० ।

**[ अविकः ]** अविरेव = अविकः । अनेन कप्र० ।

गणोऽत्र ।

**[ लात्र ]** लातुर्धर्म्यं = लात्र । 'ऋत्रादेरण्' (६।४।५१) अण्प्र० → अ । 'ऋतो रस्तद्धिते' (१।२।२६) तृ० → त्र० ।

**[ भिन्नतरकम् ]** भिन्नतरमेव = भिन्नतरकम् । अनेन कप्र० ।

**[ बहुतरकम् ]** द्वयोर्मध्ये बहु = बहुतरम् । 'द्वयोर्विभज्ये च तरप्' (७।३।६) तरप्प्र० → तर । बहुतरमेव = बहुतरकम् । अनेन कप्र० ॥छा॥

## कुमारीक्रीडनेयसोः ॥ ७।३।१६ ॥

**[ कुमारीक्रीडनेयसोः ]** कुमारीणां क्रीडनं = कुमारीक्रीडनम् । कुमारीक्रीडनं च ईयसु च = कुमारीक्रीडनेयसु, तस्मात् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ कन्दुकः ]** कन्दुरेव = कन्दुकः । अनेन कप्र० ।

**[ उत्कण्ठकः ]** उत्-ऊर्ध्वः कण्ठः = उत्कण्ठः । उत्कण्ठ एव = उत्कण्ठकः । अनेन कप्र० । घटादिकण्ठः ।

**[ गिरिकः ]** गिरिरेव = गिरिकः । अनेन कप्र० । दडउ भण्यते ।

**[ समुद्गकः ]** समुद्ग एव = समुद्गकः । अनेन कप्र० ।

**[ दोलिका ]** दोला । दोलैव = दोलिका । अनेन कप्र० । 'आत्' (२।४।१८) आप्प्र० → आ । 'इच्चाऽपुंसोऽनित्क्याप्परे' (२।४।१०७) आ० → ई० ।

**[ भ्रमरकः ]** भ्रमर एव = भ्रमरकः । अनेन कप्र० ।

**[ शृङ्गकम् ]** शृङ्गमेव = शृङ्गकम् । अनेन कप्र० ।

**[ श्रेयस्कः ]** श्रेयस् मण्ड्यते । श्रेय एव = श्रेयस्कः । अनेन कप्र० । 'सो रुः' (२।१।७२) स० → र० । 'प्रत्यये' (२।३।६) र० → स० ।

**[ ज्यायस्कः ]** वृद्ध मण्ड्यते । द्वयोर्मध्ये प्रकृष्टो वृद्धः प्रशस्यो वा । 'गुणाङ्गाद् वेष्ठेयसौ(सू)' (७।३।९) ईयसुप्र० → ईयस् । 'वृद्धस्य च ज्यः' (७।४।३५) वृद्धशब्दस्य ज्यदेशः = ईयसुप्रत्ययस्य ईकारस्य आकारश्च । ज्यायानेव = ज्यायस्कः । अनेन कप्र० । 'सो रु' (२।१।७२) स० → र० । 'प्रत्यये' (२।३।६) र० → स० ।

**[ भूयस्कः ]** बहु मण्ड्यते । द्वयोर्मध्ये प्रकृष्टो बहुः = भूयान् । 'गुणाङ्गाद् वेष्ठेयसू' (७।३।९) ईयसुप्र० → ईयस् । 'भूर्लुक् चेवर्णस्य' (७।४।४१) बहुस्थाने "भू"देशः - ईयस ईलोपश्च । भूयानेव = भूयस्कः । अनेन कप्र० । 'सो रुः' (२।१।७२) स० → र० । 'प्रत्यये' (२।३।६) र० → स० ।।छ।।

## लोहितान्मणौ ।। ७।३।१७ ।।

**[ लोहितात् ]** लोहित पञ्चमी ङसि ।

**[ मणौ ]** मणि सप्तमी ङि ।

**[ लोहितको मणिः ]** लोहित एव = लोहितको मणिः । अनेन कप्र० । "प्रश्निस्तिथ्यशनी मणिः" इत्यादिना पुं-स्त्रीलिङ्ग इत्युक्तं लिङ्गानुशासने । 'नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्' (न्या० सं० वक्ष० (१)/सूत्र१६)) इति न्यायात् ।

**[ लोहिनिका मणिः ]** लोहित । श्येतैत-हरित-भरत-रोहिताद् वर्णात् तो नश्च' (२।४।३६) ङी-त० → "न"देशश्च । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । लोहिन्येव = लोहिनिका मणिः । अनेन कप्र० । 'ङ्यादीदूतः के' (२।४।१०४) ह्रस्वः ।

**[ लोहितिका मणिः ]** लोहिता । लोहितैव = लोहितिका । अनेन कप्र० । 'इच्चाऽपुंसोऽनित्क्याप्परे' (२।४।१०७) इ । 'आत्' (२।४।१८) आप्प्र० → आ ।

'वा-ऽऽद्यात्' (६।१।११) इत्यनेन विहितमहावाधिकारात् विकल्पाधिकारान्न भवति अग्रेतने ।।छ।।

## रक्ता-ऽनित्यवर्णयोः ।। ७।३।१८ ।।

**[ रक्ताऽनित्यवर्णयोः ]** नित्यश्चासौ वर्णश्च = नित्यवर्णः, न नित्यवर्णः = अनित्यवर्णः, रक्तश्च अनित्यवर्णश्च = रक्ताऽनित्यवर्णौ, तयोः = रक्ताऽनित्यवर्णयोः ।

**[ लोहितकः पटः ]** लोहित एव = लोहितको मणिः(पटः) । अनेन कप्र० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

लिङ्गविशिष्टस्यापि ग्रहणात् -

**[ लोहिनिका शाटी ]** लोहित । 'श्येतैत-हरित-भरत०' (२।४।३६) ङी-त० → न० देशश्च । 'अस्य ङ्यां लुक्' (२।४।८६) अलोपः । लोहिन्येव = लोहिनिका शाटी । अनेन कप्र० । 'ङ्यादीदूतः के' (२।४।१०४) ह्रस्वः । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ लोहितिका पटी ]** लोहिता । लोहितैव = लोहितिका । अनेन कप्र० । 'इच्चापुंसोऽनित्क्याप्परे' (२।४।१०७) आ० → इ० । 'आत्' (२।४।१८) आप्प्र० → आ ।

अनित्यवर्णे - **[ लोहितकमक्ष्णो रूपं कोपेन ]** लोहितमेव = लोहितकम् । अनेन कप्र० । अक्ष्णो रूपं कोपेन ।

**[ लोहिनिका, लोहितिका कन्या कोपेन ]** लोहिन्येव = लोहिनिका । अनेन कप्र० । 'ङ्यादीदूतः के' (२।४।१०४) ह्रस्वः । 'आत्' (२।४।१८) आप्प्र० → आ । लोहितैव = लोहितिका । अनेन कप्र० । 'इच्चाऽपुंसोऽनित्क्याप्परे' (२।४।१०७) आ० → इ० । 'आत्' (२।४।१८) आप्प्र० → आ ।

वाऽधिकारान्न भवति । अग्रेतने उदाहरणे वाक्यो ज्ञेयः । नित्योऽपि रक्तो वर्णोऽस्ति । यथा-कृमिरागादि रक्ते(:) पट इति रक्तग्रहणम् । रक्तेऽनित्येऽपि भवतीत्यर्थः । सत्येवाश्रयद्रव्येऽपयन्निह्नानित्य उच्यते । वर्णग्रहणं द्रव्यनिवृत्त्यर्थम् । असति वर्णग्रहणे स्त्रीणामार्त्तवे द्रव्ये स्यात् । ऋतौ(तौ) भवम् = आर्त्तवं रुधिरम् । तद्धि सत्यं(त्ये)वाश्रये स्त्रियां कदाचिन्न भवति लोहितशब्दवाच्यं च ॥छा॥

## कालात् ॥ ७।३।१९ ॥

**[ कालात् ]** काल पञ्चमी ङसि ।

**[ कालकः पटः ]** काल एव = कालकः पटः । अनेन कप्र० ।

**अनित्यवर्णे** - **[ कालकं मुखं वैलक्ष्येण ]** कालमेव = कालकं मुखं । अनेन कप्र० । वैलक्ष्येण ।

वाऽधिकारान्न भवत्यपि ॥छा॥

## शीतोष्णादृतौ ॥ ७।३।२० ॥

**[ शीतोष्णात् ]** शीतश्च उष्णश्च = शीतोष्णम्, तस्मात् ।

**[ ऋतौ ]** ऋतु सप्तमी ङि ।

**[ शीतक ऋतुः ]** शीत एव = शीतक ऋतुः । अनेन कप्र० ।

**[ उष्णक ऋतुः ]** उष्ण एव = उष्णक ऋतुः । अनेन कप्र० ॥छा॥

## लून-वियातात् पशौ ॥ ७।३।२१ ॥

**[ लूनवियातात् ]** लूनश्च वियातश्च = लूनवियातम्, तस्मात् ।

**[ पशौ ]** पशु सप्तमी ङि ।

**[ लूनकः ]** लून एव = लूनकः । अनेन कप्र० ।

**[ वियातकः पशुः ]** वियात एव = वियातकः । अनेन कप्र० । पशुः ।

**[ विहानकः पशुः ]** विगतं हानं-गमनमस्य = विहानः । विहान एव = विहानकः पशुः, क्षीणरेता इत्यर्थः । अनेन कप्र० ॥छा॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## स्नाताद् वेदसमाप्तौ ॥ ७।३।२२ ॥

**[ स्नातात् ]** स्नात पञ्चमी ङसि ।

**[ वेदसमाप्तौ ]** वेदस्य समाप्तिः = वेदसमाप्तिस्तस्याम् ।

**[ स्नातकः ]** वेदं समाप्य स्नातः = स्नातकः । अनेन कप्र० ।।छ।।

## तनु-पुत्रा-ऽणु-बृहती-शून्यात् सूत्र-कृत्रिम-निपुणा-ऽऽच्छादन-रिक्ते ॥ ७।३।२३ ॥

**[ तनुपुत्राऽणुबृहतीशून्यात् ]** तनुश्च पुत्रश्च अणुश्च बृहती च शून्यं च = तनुपुत्राऽणुबृहतीशून्यम्, तस्मात् ।

**[ सूत्रकृत्रिमनिपुणाऽऽच्छादनरिक्ते ]** सूत्रं च कृत्रिमश्च निपुणश्च आच्छादनं च रिक्तश्च = सूत्रकृत्रिमनिपुणाऽऽच्छादनरिक्तम्, तस्मिन् ।

**[ तनुकं भङ्गादिमयं कल्पादि च ]** तनोः सूत्रे । तनु सूत्रं = तनुकम् । अनेन कप्र० । भङ्गादिमयं कल्पादि च ।

**[ पुत्रकः ]** पुत्रात् कृत्रिमे । कृत्रिमस्तक्षादिव्यापारनिष्पादितः । कृत्रिमः पुत्रः = पुत्रकः । अनेन कप्र० ।

**[ औरसः पुत्रः ]** उरस् । उरसा कृतः = औरसः । 'उरसो या-ऽणौ' (६।३।१९६) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः औ ।

**[ अणुकः ]** अणोर्निपुणे । निपुणो निष्णातोऽणुः = अणुकः । अनेन कप्र० ।

**[ बृहतिका आच्छादनविशेषः ]** बृहत्या आच्छादने । आच्छादनविशेषो बृहती = बृहतिका । अनेन कप्र० । 'ङ्यादीदूतः के' (२।४।१०४) ह्रस्वः । बृहती शब्देन रिंगणी उच्यते ।

**[ शून्यकः रिक्तश्चेत् ]** शून्याद्रिक्ते । रिक्तो धनप्रज्ञादिना । शून्य एव = शून्यकः । अनेन कप्र० ।

**[ शून्यम् ]** श्वन् मांडणीयइ । शुने हितं = शून्यम् । 'शुनो वश्चोदूत्' (७।१।३३) यप्र०-व० → ऊकारश्च ।।छ।।

## भागेऽष्टमाज्ञः ॥ ७।३।२४ ॥

**[ भागे ]** भाग सप्तमी ङि ।

**[ अष्टमात् ]** अष्टम पञ्चमी ङसि ।

**[ ञः ]** ञ प्रथमा सि ।

**[ आष्टमो भागः ]** अष्टम एव = आष्टमो भागः । अनेन ञप्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ अष्टमो जिनः चन्द्रप्रभः ]** अष्टन् मण्ड्यते । अष्टानां पूरणः = अष्टमो जिनश्चन्द्रप्रभः । 'नो मट्' (७।१।१५९) मट्प्र० → म । 'नोऽपदस्य तद्धिते' (७।४।६१) नलुक् ।।छ।।

## षष्ठात् ॥ ७।३।२५ ॥

**[ षष्ठात् ]** षष्ठ पञ्चमी ङसि ।

**[ षाष्ठो भागः ]** षष्ठ एव = षाष्ठो भागः । अनेन ञप्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।।छ।।

## माने कश्च ॥ ७।३।२६ ॥

**[ माने ]** मान सप्तमी ङि ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ कश्च ]** क प्रथमा सि । च प्रथमा सि ।

मीयते येन तन्मानम्, तस्मिन् ।

**[ षष्ठकः, षाष्ठो भागः मानं चेत् ]** षष्ठ एव = षष्ठकः, षाष्ठो भागः । अनेन क-ञप्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ षाष्ठो भागोऽन्यः ]** षष्ठ एव = षाष्ठः । 'षष्ठात्' (७।३।२५) ञप्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छ॥

## एकादाकिन् चासहाये ॥ ७।३।२७ ॥

**[ एकात् ]** एक पञ्चमी ङसि ।

**[ आकिन् ]** आकिन् प्रथमा सि ।

**[ च ]** च प्रथमा सि ।

**[ असहाये ]** न सहायः = असहायस्तस्मिन् ।

**[ एकाकी, एककः ]** एक एव = एकाकी, एककः । अनेन आकिन्प्र०-कप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'इन्-हन्-पूषाऽर्यम्णः शिस्योः' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ॥छ॥

## प्राग्नित्यात् कप् ॥ ७।३।२८ ॥

**[ प्राक् ]** प्राक् प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[ नित्यात् ]** नित्य पञ्चमी ङसि ।

**[ कप् ]** कप् प्रथमा सि ।

'नित्यं ञ-ञिनोऽण्' (७।३।५८) इत्यधिकारो वेदितव्यो ज्ञेयः ।

**[ अश्वकः ]** कुत्सितो-ऽल्पो-ऽज्ञातो वा अश्वः = अश्वकः । अनेन कप्प्र० → क ।

**पकारः पुंवद्भावार्थः ।**

**[ दारदिका ]** दरद् । दरदां राज्ञी । 'पुरु-मगध-कलिङ्ग०' (६।१।११६) अण्प्र० → अ । 'द्रेरञणोऽप्राच्य-भर्गादेः' (६।१।१२३) अणलुप्, ततः कुत्सिता दरद् = दारदिका । अनेन कप्प्र० → क । 'क्यङ्-मानि-पित्तद्धिते' (३।२।५०) इत्यनेन अण्लोपनिवृत्तिरूपे पुंवद्भावे 'आत्' (२।४।१८) इत्याप् । 'अस्याऽयत्-तत्-०' (२।४।१११) इत्यादिना इत्वम् । यदा त्वपत्ये अण् तदा गोत्रं च चरणैः सहेति जातित्वे 'स्वाङ्गान्ङीर्जातिश्चाऽमानिनि' (३।२।५६) पुंवन्निषेधः स्यात् ।

**प्राग नित्यादित्यवध्यर्थम् । अन्यथा अपवादबाधितो नोत्तरत्रानुवर्त्तेत, परतोऽपि अनुवर्तेत** ॥छ॥

## त्यादि-सर्वादेः स्वरेष्वन्त्यात् पूर्वोऽक् ॥ ७।३।२९ ॥

**[ त्यादिसर्वादेः ]** त्यादिश्च सर्वादिश्च = त्यादिसर्वादि, तस्य ।

**[ स्वरेषु ]** स्वर सप्तमी सुप् ।

**[ अन्त्यात् ]** अन्ते भवोऽन्त्यः, तस्मात् ।

**[ पूर्वः ]** पूर्व प्रथमा सि ।

**[ अक् ]** अक् प्रथमा सि ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**प्राग् नित्यात् कपोऽपवादः ।**

[ **पचतकि** ] कुत्सितमल्पमज्ञातं वा पचति = पचतकि ।

सा सर्वत्र नपुंसकमिति भावार्थः ज्ञेयः । 'लोकात्' (१।१।३) "इ"अग्रे विश्लेषियइ । अनेन अक्प्र० ।

[ **पचतकः** ] कुत्सितमल्पमज्ञातं वा पचतः = पचतकः । 'लोकात्' (१।१।३) अस् अग्रे विश्लेषियइ । अनेन अक्प्र० ।

[ **पचन्तकि** ] कुत्सितमल्पमज्ञातं वा पचन्ति = पचन्तकि । 'लोकात्' (१।१।३) "इ" अग्रे विश्लेषियइ । अनेन अक्प्र० ।

**सर्वादि-[ सर्वके ]** कुत्सिता अल्पा अज्ञाता वा सर्वे = सर्वके । 'लोकात्' (१।१।३) "अ"अग्रे विश्लेषियइ । अनेन अक्प्र० । जस् । 'जस इः' (१।४।९) जस्स्थाने इ । 'अवर्णस्येवर्णादि०' (१।२।६) ए ।

[ **विश्वके** ] कुत्सिता अल्पा अज्ञाता वा विश्वे = विश्वके । 'लोकात्' (१।१।३) "अ" अग्रे विश्लेषियइ । अनेन अक्प्र० । जस् । 'जस इः' (१।४।९) जस्० → इ० । 'अवर्णस्ये०' (१।२।६।) ए ।

[ **सर्वकस्मै** ] कुत्सितो-ऽल्पो-ऽज्ञातो वा सर्वः = सर्वकः, तस्मै । 'लोकात्' (१।१।३) "अ"अग्रे विश्लेषियइ । अनेन अक्प्र० । 'सर्वादेः स्मै-स्मातौ' (१।४।७) ङेस्थाने स्मै ।

[ **विश्वकस्मै** ] कुत्सितो-ऽल्पो-ऽज्ञातो वा विश्वः = विश्वकः, तस्मै । 'लोकात्' (१।१।३) "अ" अग्रे विश्लेषियइ। अनेन अक्प्र० । 'सर्वादेः स्मै०' (१।४।७) ङे० → स्मै० ।

[ **यकत्पिता** ] कुत्सितो-ऽल्पो-ऽज्ञातो वा यः = यकः । 'लोकात्' (१।१।३) "अद्"विश्लेषियइ । अनेन अक्प्र० । यकत् चासौ पिता च = यकत्पिता । प्रथमा सि । 'ऋदुशनस्०' (१।४।८४) सि० → डा० । 'डित्यन्त्यस्वरादेः' (२।१।११४) ऋलोपः ।

[ **तकत्पिता** ] कुत्सितो-ऽल्पो-ऽज्ञातो वा सः = सकः । 'लोकात्' (१।१।३) "अद्" विश्लेषियइ । अनेन अक्प्र० । तकश्चासौ (तकत् चासौ) पिता च = तकत्पिता । प्रथमा सि ।

[ **त्वकत्पिता** ] युष्मद् मण्ड्यते । कुत्सितो-ऽल्पो-ऽज्ञातो वा त्वम् = त्वकम् । 'लोकात्' (१।१।३) "अद्"विश्लेषियइ । अनेन अक्प्र० । 'त्व-मौ प्रत्ययोत्तरपदे चैकस्मिन्' (२।१।११) "त्व"देशः । त्वकत् चासौ पिता च = त्वकत्पिता ।

[ **मकत्पिता** ] अस्मद् मण्ड्यते । कुत्सितो-ऽल्पो-ऽज्ञातो वा अहम् = अहकम् । 'लोकात्' (१।१।३) "अद्"विश्लेषियइ । अनेन अक्प्र० । त्व-मौ प्रत्ययोत्तरपदे०' (२।१।११) "म"देशः । मकत् चासौ पिता च = मकत्पिता ।

[ **परमसर्वके** ] परमाश्च ते सर्वे च = परमसर्वे । कुत्सिताः परमसर्वे = परमसर्वके । 'लोकात्' (१।१।३) "अ"अग्रे विश्लेषियइ । अनेन अक्प्र० । जस् । 'जस इः' (१।४।९) इ । 'अवर्णस्ये०' (१।२।६) ए । तदन्तस्यापि सर्वादित्वमस्तीत्यत्राप्यक् ।

[ **परमविश्वके** ] परमाश्च ते विश्वे च = परमविश्वे । कुत्सिताः परमविश्वे = परमविश्वके । 'लोकात्' (१।१।३। "अ"अग्रे विश्लेषियइ । अनेन अक्प्र० । जस् । 'जस इः' (१।४।९) इ । 'अवर्णस्ये०' (१।२।६) ए । तदन्तस्यापि सर्वादित्वमस्तीत्यत्राप्यक् ॥छ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## युष्मदस्मदोऽसोभादिस्यादेः ॥ ७।३।३० ॥

**[ युष्मदस्मदः ]** युष्मच्च अस्मच्च = युष्मदस्मद्, तस्य ।

**[ असोभादिस्यादेः ]** स् च ओ च भश्च = सोभा(ः) । सोभा आदिर्यस्यासौ सोभादिः । न सोभादिरसोभादिः । असोभादिश्चासौ स्यादिश्च = असोभादिस्यादिस्तस्य । 'ङित्यदिति' (१।४।२३) ए । 'एदोद्भ्यां ङसि-ङसो रः' (१।४।३५) ङस्० → र० ।

युष्मदस्मदोः स्वरेष्वन्त्यात् पूर्वस्यापवादः ।

**[ त्वयका ]** कुत्सितेन त्वया = त्वयका । 'त्व-मौ प्रत्ययोत्तरपदे चैकस्मिन्' (२।१।११) युष्म्स्थाने "त्व"देशः । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'टा-ङ्योसि यः' (२।१।७) दस्य "य"देशः । अनेन स्यादिपूर्वं अक् ।

**[ मयका ]** कुत्सितेन मया = मयका । 'त्व-मौ प्रत्ययोत्तरपदे चैकस्मिन्' (२।१।११) अस्म्स्थाने "म"देशः । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'टा-ङ्योसि यः' (२।१।७) दस्य "य"देशः । अनेन स्यादिपूर्वं अक् ।

**[ त्वयकि ]** कुत्सिते त्वयि = त्वयकि ।

**[ मयकि ]** कुत्सिते मयि = मयकि ।

**[ युष्माककम् ]** कुत्सितानां युष्माकं = युष्माककम् । षष्ठी आम् । ' लोकात्' (१।१।३) "अद्"विश्लेषियइ । 'आम आकम्' (२।१।२०) "आकम्" देशः । 'शेषे लुक्' (२।१।८) दलुक् । अनेन अक्प्र० ।

**[ अस्माककम् ]** कुत्सितानां अस्माकम् = अस्माककम् । षष्ठी आम् । 'लोकात्' (१।१।३) "अद्" विश्लेषियइ । 'आम अकम्' (२।१।२०) "आकम्"देशः । 'शेषे लुक्' (२।१।८) दलुक् । अनेन अक्प्र० ।

**[ परमत्वयका ]** परमश्चासौ त्वं च = परमत्वम्, तेन = परमत्वया । कुत्सितेन परमत्वया = परमत्वयका । तृतीया टा । 'त्व-मौ प्रत्ययोत्तरपदे०' (२।१।११) "त्व"देशः । 'टा-ङ्योसि यः' (२।१।७) द० → य० । अनेन अक्प्र० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[ परममयका ]** परमश्चासौ अहं च = परमाहम्, तेन = परममया । कुत्सितेन परममया = परममयका । तृतीया टा । 'त्व-मौ प्रत्ययोत्तरपदे०' (२।१।११) "म"देशः । 'टा-ङ्योसि यः' (२।१।७) द० → य० । अनेन अक्प्र० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[ तकया ]** कुत्सितया अल्पया अज्ञातया वा तया = तकया । तृतीया टा । 'लोकात्' (१।१।३) "अद्"विश्लेषियइ । 'त्यादि-सर्वादेः स्वरेष्वन्त्यात् पूर्वोऽक्' (७।३।२९) अक्प्र० । 'आ द्वेरः' (२।१।४१) द० → अ० । 'आत्' (२।४।१८) आप्प्र० → आ । 'टौस्येत्' (१।४।१९) ए । 'एदैतोऽयाय्' (१।१।२३) अय् ।

**[ याकया ]** कुत्सितया अल्पया अज्ञातया वा यया = यकया । तृतीया टा । 'लोकात्' (१।१।३) "अद्"विश्लेषियइ । 'त्यादि-सर्वादेः०' (७।३।२९) अक्प्र० । 'आ द्वेरः' (२।१।४१) द० → अ० । 'आत्' (२।४।१८) आप्प्र० → आ । 'टौस्येत्' (१।४।१९) ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ सर्वकेण ]** कुत्सितः सर्वः = सर्वकस्तेन = सर्वकेण । 'लोकात्' (१।१।३) "अ"विश्लेषियइ । 'त्यादि-सर्वादेः०' (७।३।२९) अक्प्र० ।

**[ विश्वकेन ]** कुत्सितेन विश्वेन = विश्वकेन । 'लोकात्' (१।१।३) "अ"विश्लेषियइ । 'त्यादि-सर्वादेः०' (७।३।२९) अक्प्र० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ इमकेन ]** इदम् । कुत्सितेन अल्पेन अज्ञातेन वा अनेन = इमकेन । 'लोकात्' (१।१।३) "अम्"विश्लेषियइ । 'त्यादि-सर्वादेः०' (७।३।२९) अक् । 'दो मः स्यादौ' (२।१।३९) द० → म० । 'आ द्वेरः' (२।१।४१) म० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । तृतीया टा । 'टा-ङसोरिन-स्यौ' (१।४।५) इन । 'अवर्णस्येव०' (१।२।६) ए ।

**[ अमुकेन ]** अदस् । कुत्सितेन अल्पेन अज्ञातेन वा अमुना = अमुकेन । 'लोकात्' (१।१।३) "अस्"विश्लेषियइ । 'त्यादि-सर्वादेः०' (७।३।२९) अक् । 'आ द्वेरः' (२।१।४१) स० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'मोऽवर्णस्य' (२।१।४५) द० → म० । 'मादुवर्णोऽनु' (२।१।४७) उ । तृतीया टा । 'टा-ङसोरिन-स्यौ' (१।४।५) इन । 'अवर्णस्येव०' (१।२।६) ए ।

**[ इमकैः ]** इदम् । कुत्सितैः अल्पैः अज्ञातैर्वा एभिः = इमकैः । तृतीया भिस् । 'लोकात्' (१।१।३) "अम्"विश्लेषियइ । 'त्यादि-सर्वादेः०' (७।३।२९) अक् । 'दो मः स्यादौ' (२।१।३९) द० → म० । 'आ द्वेरः' (२।१।४१) म० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् । 'इदमदसोऽक्येव' (१।४।३) ऐस् । 'ऐदौत् सन्ध्यक्षरैः' (१।२।१२) ऐ ।

**[ अमुकैः ]** अदस् । कुत्सितैरल्पैरज्ञातैर्वा अमीभिः = अमुकैः । तृतीया भिस् । 'लोकात्' (१।१।३) "अस्"विश्लेषियइ । 'त्यादि-सर्वादेः स्वरेष्व०' (७।३।२९) अक् । 'आ द्वेरः' (२।१।४१) स० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'मोऽवर्णस्य' (२।१।४५) द० → म० । 'मादुवर्णोऽनु' (२।१।४७) उ । 'इदमदसोऽक्येव' (१।४।३) ऐस् । 'ऐदौत् सन्ध्यक्षरैः' (१।२।१२) ऐ ।

**[ भवकन्तौ ]** कुत्सितौ भवन्तौ = भवकन्तौ । 'लोकात्' (१।१।३) "अत्"विश्लेषियइ । 'त्यादि-सर्वादेः०' (७।३।२९) अक् । औ । 'ऋदुदितः' (१।४।७०) नोऽन्तः ।

**[ भवकन्तः ]** कुत्सिता भवन्ताः = भवकन्तः । 'लोकात्' (१।१।३) "अत्"विश्लेषियइ । 'त्यादि-सर्वादेः०' (७।३।२९) अक् । जस् । 'ऋदुदितः' (१।४।७०) नोऽन्तः ।

**[ भवतका ]** कुत्सितेन भवता = भवतका । तृतीया टा । मतान्तरे अनेन अक् ।

**[ भवतके ]** कुत्सिताय भवते = भवतके । चतुर्थी ङे । मतान्तरे अनेन अक् ।

**[ भवतकः ]** कुत्सितात् भवतः = भवतकः । पञ्चमी ङसि । मतान्तरे अनेन अक् ।

**[ भवतकि ]** कुत्सिते भवति = भवतकि । सप्तमी ङि । मतान्तरे अनेन अक् ।

**[ युष्मकासु ]** कुत्सितेषु युष्मासु = युष्मकासु । 'लोकात्' (१।१।३) "अद्"विश्लेषियइ । 'त्यादि-सर्वादेः स्वरेष्वन्त्यात् पूर्वोऽक्' (७।३।२९) अक् । सप्तमी सुप् । 'युष्मदस्मदोः' (२।१।६) द० → आ० ।

**[ अस्मकासु ]** कुत्सितेषु अस्मासु = अस्मकासु । 'लोकात्' (१।१।३) "अद्"विश्लेषियइ । 'त्यादि-सर्वादेः०' (७।३।२९) अक् । सप्तमी सुप् । 'युष्मदस्मदोः' (२।१।६) द० → आ० ।

**[ युवकयोः ]** कुत्सितयोः युवयोः = युवकयोः । 'लोकात्' (१।१।३) "अद्"विश्लेषियइ । 'त्यादि-सर्वादेः०' (७।३।२९) अक् । ओस् । 'मन्तस्य युवाऽऽवौ द्वयोः' (२।१।१०) युव० । 'टा-ङ्योसि यः' (२।१।७) द० → य० ।

**[ आवकयोः ]** कुत्सितयोरावयोः = आवकयोः । 'लोकात्' (१।१।३) "अद्"विश्लेषियइ । 'त्यादि-सर्वादेः०' (७।३।२९) अक् । ओस् । 'मन्तस्य युवाऽऽवौ द्वयोः' (२।१।१०) आव० । 'टा-ङ्योसि यः' (२।१।७) द० → य० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ युवकाभ्याम् ]** कुत्सिताभ्यां युवाभ्यां = युवकाभ्याम् । 'लोकात्' (१।१।३) "अद्"विश्लेषियइ । 'त्यादि-सर्वादेः स्वरे०' (७।३।२९) अक् । भ्याम् । 'मन्तस्य युवाऽऽवौ द्वयोः' (२।१।१०) युव० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'युष्मदस्मदोः' (२।१।६) द० → आ० ।

**[ आवकाभ्याम् ]** कुत्सिताभ्यामावाभ्याम् = आवकाभ्याम् । 'लोकात्' (१।१।३) "अद्"विश्लेषियइ । 'त्यादि-सर्वादेः स्वरे०' (७।३।२९) अक् । भ्याम् । 'मन्तस्य०' (२।१।१०) आव० । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । 'युष्मदस्मदोः' (२।१।६) द० → आ० ।

**[ युष्मकाभिः ]** कुत्सितैर्युष्माभिः = युष्मकाभिः । 'लोकात्' (१।१।३) "अद्"विश्लेषियइ । 'त्यादि-सर्वादेः०' (७।३।२९) अक् । तृतीया भिस् । 'युष्मदस्मदोः' (२।१।६) द० → आ ।

**[ अस्मकाभिः ]** कुत्सितैरस्माभिः = अस्मकाभिः । 'लोकात्' (१।१।३) "अद्"विश्लेषियइ । 'त्यादि-सर्वादेः०' (७।३।२९) अक् । तृतीया भिस् । 'युष्मदस्मदोः' (२।१।६) द० → आ० ॥छ॥

## अव्ययस्य को द् च ॥ ७।३।३१ ॥

**[ अव्ययस्य ]** अव्यय षष्ठी ङस् ।

**[ कः ]** क् षष्ठी ङस् ।

**[ द् ]** द् प्रथमा सि ।

**[ च ]** च प्रथमा सि ।

**[ उच्चकैः ]** कुत्सितमल्पमज्ञातं वा उच्चैः = उच्चकैः । क्रियाविशेषणं अव्ययविशेषणं नपुंसकमित्युक्ते लिङ्गानुशासने । 'लोकात्' (१।१।३) "ऐस्"विश्लेषियइ । अनेन अक् । सि । 'अव्ययस्य' (३।२।७) लुप् । 'सो रुः' (२।१।७२) स० → र० । विसर्गः ।

**[ नीचकैः ]** नीचैस् । कुत्सितं नीचैः = नीचकैः । 'लोकात्' (१।१।३) "ऐस्"विश्लेषियइ । अनेन अक् । सि । 'अव्ययस्य' (३।२।७) लुप् । 'सो रुः' (२।१।७२) स० → र० । विसर्गः ।

**[ धकिद् ]** कुत्सितं धिक् = धकिद् । "लोकात्" (१।१।३) "इक्" विश्लेषियइ । अनेन अक्-क्० → द्० ।

**[ हिरकुद् ]** कुत्सितं हिरुक् = हिरकुद् । 'लोकात्' (१।१।३) "उक्" विश्लेषियइ । अनेन अक्-क्० → द्० ।

**[ पृथकद् ]** कुत्सितं पृथक् = पृथकद् । 'लोकात्' (१।१।३) "अक्" विश्लेषियइ । अनेन अक्-क्० → द्० ।

**चकारो अन्वाचये, तेन सर्वस्याव्ययस्याक् भवति, ककारान्तस्य तु अक्-द् अन्तादेशश्च ।**

**[ अशाशकक् ]** 'शक्लृंट् शक्तौ' (१३००) शक् । भृशं पुनः पुनर्वा अशक्नोत् । 'व्यञ्जनादेरेकस्वराद् भृशाऽऽभीक्ष्ण्ये यङ् वा' (३।४।९) यङ् प्र० → य । 'बहुलं लुप्' (३।४।१४) लुप् । 'सन्-यङश्च' (४।१।३) "शक्"द्वित्वम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'आ-गुणावन्यादेः' (४।१।४८) आ । ह्यस्तनी दिव् । 'अड् धातोरादि०' (४।४।२९) अट् । 'व्यञ्जनाद् देः सश्च दः' (४।३।७८) द्लुक् । 'लोकात्' (१।१।३) "अक्"विश्लेषियइ । 'त्यादि-सर्वादेः०' (७।३।२९) अक् ॥छ॥

## तूष्णीकाम् ॥ ७।३।३२ ॥

**[ तूष्णीकाम् ]** तूष्णीकाम् सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**अव्ययविशेषणं नपुंसकम् ।**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ तूष्णीकामास्ते-तिष्ठति ]** कुत्सितमल्पमज्ञातं वा तूष्णीम् = तूष्णीकाम् । अनेन म्पूर्वं का नीयते । सि । 'अव्ययस्य' (३।२।७) सिलुप् ॥छा।

## कुत्सिता-ऽल्पा-ऽज्ञाते ॥ ७।३।३३ ॥

**[ कुत्सिताऽल्पाऽज्ञाते ]** कुत्सितश्च अल्पश्च अज्ञातश्च = कुत्सिताऽल्पाऽज्ञातम् तस्मिन् ।

कुत्सितं निन्दितम् । अल्पं महत्प्रतियोगि-प्रतिपक्षमित्यर्थः । अज्ञातं प्रकृत्युपात्तधर्मव्यतिरेकेण केनचित् स्वत्वादिना धर्मेणानिश्चितम्, सर्वथा त्वज्ञाते प्रयोगाऽयोगात् ।

**[ अश्वकः ]** कुत्सितो-ऽल्पो-ऽज्ञातो वा अश्वः = अश्वकः । अनेन 'प्रागिनत्यात् कप्' (७।३।२८) कप्प्र० → क ।

**[ गर्दभकः ]** कुत्सितो-ऽल्पो-ऽज्ञातो वा गर्दभः = गर्दभकः । अनेन 'प्रागिनत्यात् कप्' (७।३।२८) कप्प्र० → क ।

**[ घृतकम् ]** कुत्सितमल्पमज्ञातं वा घृतं = घृतकम् । अनेन 'प्रागिनत्यात् कप्' (७।३।२८) कप्प्र० → क ।

**[ तैलकम् ]** कुत्सितमल्पमज्ञातं वा तैलं = तैलकम् । अनेन 'प्रागिनत्यात् कप्' (७।३।२८) कप्प्र० → क ।

**[ पचतकि ]** कुत्सितं पचति = पचतकि । 'लोकात्' (१।१।३) "इ"विश्लेषियइ । अनेन 'त्यादि-सर्वादेः स्वरेष्वन्त्यात् पूर्वोऽक्' (७।३।२९) अक् ।

**[ भिन्द्धकि ]** कुत्सितं भिन्द्धि = भिन्द्धकि । 'लोकात्' (१।१।३) "इ"विश्लेषियइ । अनेन 'त्यादि-सर्वादेः०' (७।३।२९) अक् ।

**[ सर्वके ]** कुत्सिताः सर्वे = सर्वके । 'लोकात्' (१।१।३) "अ" अग्रे विश्लेषियइ । अनेन 'त्यादि-सर्वादेः स्वरे०' (७।३।२९) अक् । जस् । 'जस इः' (१।४।९) जस्० → इ० । 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) ए ।

**[ विश्वके ]** कुत्सिता विश्वे = विश्वके । 'लोकात्' (१।१।३) "अ"अग्रे विश्लेषियइ । अनेन 'त्यादि-सर्वादेः०' (७।३।२९) अक् । जस् । 'जस इः' (१।४।९) जस्० → इ० । 'अवर्णस्ये०' (१।२।६) ए ।

**[ उच्चकैः ]** कुत्सितमुच्चैरुच्चकैः । अव्ययविशेषणं नपुंसकम् । 'लोकात्' (१।१।३) "ऐस्"विश्लेषियइ । अनेन 'अव्ययस्य को द् च' (७।३।३१) अक् । सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[ नीचकैः ]** कुत्सितं नीचैः = नीचकैः । 'लोकात्' (१।१।३) "ऐस्"विश्लेषियइ । अनेन 'अव्ययस्य को द् च' (७।३।३१) अक् । सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[ तूष्णीकाम् ]** कुत्सितमल्पमज्ञातं वा तूष्णीम् = तूष्णीकाम् । अनेन 'तूष्णीकाम् (७।३।३२) म्पूर्वं का ।

**[ कुत्सितकः ]** कुत्सितः = कुत्सितकः । अनेन कप्र० ।

**[ अल्पकः ]** अल्पः = अल्पकः । अनेन कप्र० ।

**[ अज्ञातकः ]** अज्ञातः = अज्ञातकः । अनेन कप्र० ।

**[ राधकः ]** कुत्सितो राधः = राधकः । अनेन कप्प्र० → क ।

**[ पूर्णकः ]** कुत्सितः पूर्णः = पूर्णकः । अनेन कप्प्र० → क ।

**[ शूद्रकः ]** कुत्सितः शूद्रः = शूद्रकः । अनेन कप्प्र० → क ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तेनान्यैरिव-'अज्ञाते कुत्सिते चैव, संज्ञायामनुकम्पने ।
तद्युक्तनीतावल्पेऽर्थे, वाच्ये ह्रस्वे च कः स्मृतः' ॥१॥

अनेकार्थ ग्रन्थे पूर्णकस्वर्णरूवके पूर्णका नासिका स्थित्याम् ।

[ **व्याकरणकेन नाम त्वं गर्वितः** ] कुत्सितो व्याकरणः = व्याकरणकस्तेन नाम त्वं गर्वितः । अनेन कप्प्र० → क ।

[ **याज्ञिक्यकेन नाम त्वं विकत्थसे** ] याज्ञिक । याज्ञिकानां धर्म आम्नायः । 'छन्दोगौक्थिक-याज्ञिक-बह्वृचाच्च धर्मा-ऽऽम्नाय-सङ्घे' (६।३।१६६) इत्यनेन ज्यप्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । कुत्सितो याज्ञिक्यः = याज्ञिक्यकम् । अनेन कप्प्र० → क, तेन = याज्ञिक्यकेन नाम त्वं विकत्थसे इत्यादौ अवक्षेपणमपि कुत्सितमेव । व्याकरणं कुत्सनं वैयाकरणस्तु कुत्सित इति व्याकरणात् कथं प्रत्यय इत्याह-न **ह्यकुत्सितेनावक्षिप्यते** ॥छ॥

## अनुकम्पा-तद्युक्तनीत्योः ॥ ७।३।३४ ॥

[ **अनुकम्पातद्युक्तनीत्योः** ] अनुकम्पा च तद्युक्तनीतिश्च = अनुकम्पातद्युक्तनीती, तयोः = अनुकम्पातद्युक्तनीत्योः । सप्तमी ओस् ।

अनुकम्पा कारुण्येन परस्यानुग्रहः, तया अनुकम्पया युक्ता नीतिस्तद्युक्तनीतिः । नीतिः सामादिप्रयोगः । तत्रानुकम्पायां सामोपप्रदाने एव न भेददण्डौ, तयोः = भेददण्डयोः अनुकम्पाया अप्रयोगात् ।

[ **पुत्रकः** ] अनुकम्प्यः अनुकम्पितो वा पुत्रः = पुत्रकः । अनेन कप्प्र० → क ।

[ **वत्सकः** ] अनुकम्प्यो वत्सः = वत्सकः । अनेन कप्प्र० → क ।

[ **बालकः** ] अनुकम्प्यो बालः = बालकः । अनेन कप्प्र० → क ।

[ **बुभुक्षितकः** ] अनुकम्प्यो बुभुक्षितः = बुभुक्षितकः । अनेन कप्प्र० → क ।

[ **ज्वरितकः** ] अनुकम्प्यो ज्वरितः = ज्वरितकः । अनेन कप्प्र० → क ।

[ **शनकैः** ] अनुकम्प्यः शनैः = शनकैः । अनेन परं येन प्राप्यते तेन नीयते । 'अव्ययस्य को द् च' (७।३।३१) अक् । 'लोकात्' (१।१।३) "ऐस्"विश्लेषियइ ।

[ **तूष्णीकाम्** ] अनुकम्प्यं तूष्णीम् = तूष्णीकाम् । अनेन 'तूष्णीकाम्' (७।३।३२) म् पूर्वं का निपात्यते ।

[ **स्वपितकि** ] अनुकम्प्यं स्वपिति = स्वपितकि । अनेन 'त्यादि-सर्वादेः०' (७।३।२९) इ प्राक् अक् ।

[ **स्वपिषकि** ] अनुकम्प्यं स्वपिषि = स्वपिषकि । अनेन 'त्यादि-सर्वादेः०' (७।३।२९) इ प्राक् अक् ।

[ **जल्पतकि** ] अनुकम्प्यं जल्पति = जल्पतकि । अनेन 'त्यादि-सर्वादेः०' (७।३।२९) इ प्राक् अक् ।

[ **एहकि** ] अनुकम्प्यं एहि = एहकि । अनेन 'त्यादि-सर्वादेः०' (७।३।२९) इ प्राक् अक् ।

अनुकम्पमान एवं प्रयुङ्क्ते विहित इति सर्वत्र ज्ञेयः ।

[ **एहकि** ] अनुकम्प्यं एहि = एहकि । अनेन कप्प्र० → क ।

[ **उत्सङ्गके उपविश** ] अनुकम्प्य उत्सङ्गः = उत्सङ्गकः, तस्मिन् । अनेन कप्प्र० → क ।

[ **कर्दमकेनासि** ] अनुकम्प्यः कर्दमः = कर्दमकः, तेन । अनेन कप्प्र० → क ।

[ **दिग्धकः** ] अनुकम्प्यो दिग्धः = दिग्धकः । अनेन कप्प्र० → क ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ कण्टकस्ते लग्नकः ]** अनुकम्प्यः कण्टकः = कण्टककः । अनेन कप्प्र० → क । अनुकम्प्यो लग्नः = लग्नकः । अनेन कप्प्र० → क ।

**[ वत्सकः ]** अनुकम्प्यो वत्सः = वत्सकः । अनेन कप्प्र० → क ।

**[ तूष्णीकां तिष्ठ ओदनं भोक्ष्यसे ]** तूष्णीकां पूर्ववत् ।

**[ हन्त ते गुडका हन्त ते धानका अद्धकि ]** हन्त ते गुडेन मिश्रा धानाः = गुडाः, अनुकम्प्या गुडाः = गुडकाः । अनेन कप्प्र० → क - धानाशब्दलुक् । द्वितीये उदाहरणे 'ते लुग्वा' (३।२।१०८) गुडशब्दलुक् । अनेन अक् । 'इच्चाऽपुंसोऽनित्क्याप्परे' (२।४।१०७) इति नवा इत्-ह्रस्वौ । जस् । 'अदं भक्षणे' (१०५९) अद् । पञ्चमी हि । 'हु-धुटो हेर्धिः' (४।२।८३) हि० → धि० । अनुकम्प्यमद्धि = अद्धकि । 'त्यादि-सर्वादेः स्वरे०' (७।३।२९) इ पूर्वमक् ।

**[ नक ]** कुत्सितो न = नक । 'अव्ययस्य को द् च' (७।३।३१) अक् ।

**[ त्वकम् ]** कुत्सितस्त्वं = त्वकम् । 'युष्मदस्मदोऽसोभादिस्यादेः' (७।३।३०) अम्पूर्वमक् ।

**[ पुत्रकः ]** कुत्सितः पुत्रः = पुत्रकः । 'कुत्सिता-ऽल्पा-ऽज्ञाते' (७।३।३३) कप्प्र० → क । आमन्त्र्ये सि । 'अदेतः स्यमोर्लुक्' (१।४।४४) सिलुक् ।

**[ असकौ ]** अदस् । कुत्सितोऽसौ = असकौ । 'लोकात्' (१।१।३) अस् अग्रे विश्लेषियइ । 'त्यादि-सर्वादेः स्वरेष्वन्त्यात् पूर्वोऽक्' (७।३।२९) अक् । 'आ द्वेरः' (२।१।४१) स० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् । 'अदसो दः सेस्तु डौ' (२।१।४३) दस्य सः - सि० → डौ० → औ० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् ।

**[ काकको वृक्षके ]** अनुकम्प्य काकः = काककः । अनेन कप्र० । अनुकम्प्यः वृक्षः = वृक्षकः । अनेन कप्र०, तस्मिन् ।

**[ उच्चकैः प्रणिलीयते ]** कुत्सितमुच्चैरुच्चकैः । 'लोकात्' (१।१।३) "ऐस्" अग्रे विश्लेषियइ । 'अव्ययस्य को द् च' (७।३।३१) अक् । 'लींङ्च् श्लेषणे' (१२४८) ली, प्र-निपूर्व० । वर्त्तमाना ते । 'दिवादेः श्यः' (३।४।७२) श्यप्र० → य । 'अक-खाद्यषान्ते पाठे वा' (२।३।८०) णत्वम् ।

अनुकम्पायां प्रत्यासत्तेरनुकम्प्यमानादेव स्यात्, नान्यस्मात्, उत्सङ्गादेस्ततोऽपि यथा स्यादिति तद्युक्तनीतिग्रहणम् ।।छा।

## अजातेर्नृनाम्नो बहुस्वरादियेकेलं वा ।। ७।३।३५ ।।

**[ अजातेः ]** 'जनैचि प्रादुर्भावे' (१२६५) जन् । जायतेऽभिधानप्रत्ययोऽस्यामिति जातिः । 'श्वादिभ्यः' (५।३।९२) क्तिप्र० → ति । 'आः खनि-सनि-जनः' (४।२।६०) न० → आ० । 'समानानां तेन दीर्घः' (१।२।१) दीर्घः । न जातिरजातिस्तस्मात् ।

**[ नृनाम्नः ]** नुर्नाम = नृनाम, तस्मात् ।

**[ बहुस्वरात् ]** बहवः स्वरा यस्य सः = बहुस्वरस्तस्मात् ।

**[ इयेकेलम् ]** इयश्च इकश्च इलश्च = इयेकेलम् ।

**[ वा ]** वा प्रथमा सि ।

**तद्युक्तनीताविति न वर्त्तते, अनुकम्प्यादेव प्रत्ययविधानात् । नृनाम्न इत्युक्ते नृनाम्नो हि अनुकम्पैव घटते, न तन्नीतिः।**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ देवियः, देविकः, देविलः, देवदत्तकः ]** अनुकम्पितो देवदत्तः = देवियः, देविकः, देविलः । अनेन इय-इक-इलप्र० । 'द्वितीयात् स्वरादूर्ध्वम्' (७।३।४१) दत्तशब्दलोपः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम्-देवदत्तकः । 'अनुकम्पा-तद्युक्तनीत्योः' (७।३।३४) कप्प्र० → क ।

**[ जिनियः, जिनिकः, जिनिलः, जिनदत्तकः ]** अनुकम्पितो जिनदत्तः = जिनियः, जिनिकः, जिनिलः । अनेन इय-इक-इलप्र० । 'द्वितीयात् स्वरादूर्ध्वम्' (७।३।४१) दत्तशब्दलोपः । एवम्-जिनदत्तकः । 'अनुकम्पा-तद्युक्तनीत्योः' (७।३।३४) कप्प्र० → क ।

**[ महिषकः ]** अनुकम्पितो महिषः = महिषकः । जातिः प्रवृत्तिनिमित्तं नाम च । 'अनुकम्पा-तद्युक्तनीत्योः' (७।३।३४) कप्प्र० → क ।

**[ वराहकः ]** अनुकम्पितो वराहः = वराहकः । 'अनुकम्पा०' (७।३।३४) कप्प्र० → क ।

**[ शूकरकः ]** अनुकम्पितः शूकरः = शूकरकः । 'अनुकम्पा०' (७।३।३४) कप्प्र० → क ।

**[ गर्दभकः ]** अनुकम्पितो गर्दभः = गर्दभकः । 'अनुकम्पा०' (७।३।३४) कप्प्र० → क ।

एते जातिशब्दा मनुष्यनामानि च ।

**[ व्याघ्रिलः ]** अनुकम्पितो व्याघ्रः = व्याघ्रिलः ।

**[ सिंहिलः ]** अनुकम्पितः सिंहः = सिंहिलः । मतान्तरे अनेनैव इलप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । अन्यथा व्याघ्र सिंह इत्येवंविधा द्विस्वरैव प्रकृतिः, न तु व्याघ्रदत्त सिंहदत्त इत्यनेकस्वराः, द्विस्वरयोरेवानयोर्जातिवाचित्वात् बहुस्वरादित्यपि प्रायिकमित्यस्यासङ्गतार्थत्वापत्तेश्च । मतान्तरे अनेनैव इलप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ सुसीमकः सीमा स्फुटा ]** अनुकम्पितः सुसीमा = सुसीमकः । 'अनुकम्पा-तद्युक्तनीत्योः' (७।३।३४) कप्प्र० → क । सीमा स्फुटा-सीमन् शब्दः ।

**[ अनुकम्पितो देवदत्तो हस्ती देवदत्तकः ]** अनुकम्पितो देवदत्तो हस्ती देवदत्तकः । कस्यचित् हस्तिनो देवदत्त इति नाम । 'अनुकम्पा-तद्युक्तनीत्योः' (७।३।३४) कप्प्र० → क ।

**[ मद्रबाहुकः ]** मद्रौ बाहू यस्य सः = मद्रबाहुः । अनुकम्पितो मद्रबाहुः = मद्रबाहुकः । 'अनुकम्पा०' (७।३।३४) कप्प्र० → क । विशेषणमेतन्नाम ।

**[ रामकः ]** अनुकम्पितो रामः = रामकः । 'अनुकम्पा-तद्युक्तनीत्योः' (७।३।३४) कप्प्र० → क ।

**[ गुप्तकः ]** अनुकम्पितो गुप्तः = गुप्तकः । 'अनुकम्पा०' (७।३।३४) कप्प्र० → क ॥छा॥

## वोपादेरडाकौ च ॥ ७।३।३६ ॥

**[ वा ]** वा प्रथमा सि ।

**[ उपादेः ]** उप आदिर्यस्य सः = उपादिस्तस्मात् ।

**[ अडाकौ ]** अडश्च अकश्च = अडाकौ ।

**[ च ]** च प्रथमा सि ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ उपडः, उपकः, उपियः, उपिकः, उपिलः, उपेन्द्रदत्तकः ]** अनुकम्पित उपेन्द्रदत्तः = उपडः, उपकः, उपियः, उपिकः, उपिलः । अनेन अड-अक-इय-इक-इलप्र० । 'आतो नेन्द्र-वरुणस्य' (७।४।२९) इति ज्ञापकात् अकृतसन्धिरेव। 'द्वितीयात् स्वरादूर्ध्वम्' (७।३।४१) इति इन्द्रदत्तस्य लुक् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम्-उपेन्द्रदत्तकः । 'अनुकम्पा-तद्युक्तनीत्योः' (७।३।३४) इत्यादिना कप्प्र० → क ॥छा।

## ऋवर्णोवर्णात् स्वरादेरादेर्लुक् प्रकृत्या च ॥ ७।३।३७ ॥

**[ ऋवर्णोवर्णात् ]** ऋवर्णश्च उवर्णश्च = ऋवर्णोवर्णम्, तस्मात् ।

**[ स्वरादेः ]** स्वरादि षष्ठी ङस् ।

**[ आदेः ]** आदि षष्ठी ङस् ।

**[ लुक् ]** लुक् प्रथमा सि ।

**[ प्रकृत्या ]** प्रकृति तृतीया टा ।

**[ च ]** च प्रथमा सि ।

**[ मातृयः, मातृकः, मातृलः ]** अनुकम्पितो मातृदत्तः = मातृयः, मातृकः, मातृलः । 'अजातेर्नृनाम्नो बहुस्वरादियेकेलं वा' (७।३।३५) इय-इक-इलप्र० । 'द्वितीयात् स्वरादूर्ध्वम्' (७।३।४१) दत्तशब्दस्य लोपः । अनेन इय-इक-इलानामादिलोपः ।

**[ पितृयः, पितृकः, पितृलः ]** अनुकम्पितः पितृदत्तः = पितृयः, पितृकः, पितृलः । 'अजातेर्नृनाम्नो०' (७।३।३५) इय-इक-इलप्र० । 'द्वितीयात् स्वरादूर्ध्वम्' (७।३।४१) दत्तशब्दस्य लोपः । अनेन इय-इक-इलानामादिलोपः ।

**[ वायुयः, वायुकः, वायुलः ]** अनुकम्पितो वायुदत्तः = वायुयः, वायुकः, वायुलः । 'अजातेर्नृनाम्नो०' (७।३।३५) इय-इक-इलप्र० । 'द्वितीयात्०' (७।३।४१) दत्तशब्दस्य लोपः । अनेन इय-इक-इलानामादिलोपः ।

**[ भानुयः, भानुकः, भानुलः ]** अनुकम्पितो भानुदत्तः = भानुयः, भानुकः, भानुलः । 'अजातेर्नृनाम्नो०' (७।३।३५) इय-इक-इलप्र० । 'द्वितीयात्०' (७।३।४१) दत्तशब्दस्य लोपः । अनेन इय-इक-इलानामादिलोपः ।

**[ देवियः, देविकः, देविलः ]** अनुकम्पितो देवदत्तः = देवियः, देविकः, देविलः । 'अजातेर्नृनाम्नो०' (७।३।३५) इय-इक-इलप्र० । 'द्वितीयात्०' (७।३।४१) दत्तशब्दस्य लोपः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ वाचियः, वाचिकः, वाचिलः ]** वाच्-आशिष । अनुकम्पितो वागाशीः = वाचियः, वाचिकः, वाचिलः । 'अजातेर्नृनाम्नो०' (७।३।३५) इय-इक-इलप्र० । 'षड्वर्जैकस्वरपूर्वपदस्य स्वरे' (७।३।४०) इत्येकस्वरादूर्ध्वं लुग्भवति ।

**[ मद्रबाहुकः ]** मद्रौ बाहू यस्य सः = मद्रबाहुः । अनुकम्पितो मद्रबाहुः = मद्रबाहुकः । 'अनुकम्पा०' (७।३।३४) कप्प्र० → क ॥छा।

## लुक्युत्तरपदस्य कपन् ॥ ७।३।३८ ॥

**[ लुकि ]** लुक् सप्तमी ङि ।

**[ उत्तरपदस्य ]** उत्तरं च तत् पदं च = उत्तरपदम्, तस्य ।

**[ कपन् ]** कपन् प्रथमा सि ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ देवकः ]** देवदत्तः = देवः । 'ते लुग्वा' (३।२।१०८) इत्युत्तरपदलोपः । अनुकम्पितो देवः = देवकः । अनेन कप्न्प्र० → क ।

**[ यज्ञकः ]** यज्ञदत्तः = यज्ञः । 'ते लुग्वा' (३।२।१०८) इत्युत्तरपदलोपः । अनुकम्पितो यज्ञः = यज्ञकः । अनेन कप्न्प्र० → क ।

**पकारः पुंवद्भावार्थः । नकारः 'इच्चापुंसोऽनित्क्याप्परे' ( २।४।१०७ ) इत्यत्र पर्युदासार्थः । परि-समन्तात् उदासो निषेधार्थः इति यावत् ।**

**[ देवका ]** अत्र देवदत्ता प्रकृतेः । 'ते लुग्वा' (३।२।१०८) इत्यनेन दत्तालोपः । 'गौरादिभ्यो मुख्यान्ङीः' (२।४।१९) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । अनुकम्पिता देवी = देवका । अनेन कप्न्प्र० → क । 'क्यङ्-मानि-पित्तद्धिते' (३।२।५०) पुंवद्भावः । अत्र कप्नि सति पित्त्वात्पुंवद्भावे नित्त्वादाप्परेऽपि ककारे 'अस्याऽयत्-तत्-क्षिपकादीनाम्' (२।४।१११) इत्यादिना इत्वं न भवति ।

**[ दत्तिका ]** देवदत्ता प्रकृतिः । 'ते लुग्वा' (३।२।१०८) पूर्वपदस्य लुक् । अनुकम्पिता दत्ता = दत्तिका । 'अनुकम्पा-तद्युक्तनीत्योः' (७।३।३४) इत्यादिना कप्प्र० → क । 'आत्' (२।४।१८) आप्प्र० → आ । 'इच्चापुंसोऽनित्क्याप्परे' (२।४।१०७) इत्यादिना अकारस्य इकारः ॥छ॥

## लुक् चाजिनान्तात् ॥ ७।३।३९ ॥

**[ लुक् ]** लुक् प्रथमा सि । 'दीर्घङ्याब्-व्यञ्जनात् सेः' (१।४।४५) सिलुक् ।

**[ च ]** च प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[ अजिनान्तात् ]** अजिनमन्ते यस्य तद् = अजिनान्तम्, तस्मात् ।

**[ व्याघ्रकः ]** व्याघ्राजिनो व्याघ्रमहाजिनो वा नाम मनुष्यः । अनुकम्पितो व्याघ्राजिनः - व्याघ्रमहाजिनो वा = व्याघ्रकः । अनेन कप्न्प्र० → क - उत्तरपदस्य अजिन-महाजिनस्य लुक् च ।

**[ सिंहकः ]** सिंहस्येव अजिनं - चर्म यस्य सः = सिंहाजिनः । अनुकम्पितः सिंहाजिनः = सिंहकः । अनेन कप्न्प्र० → क - उत्तरपदस्य लुक् च ।

**[ शरभकः ]** शरभस्येव अजिनं यस्य सः = शरभाजिनः । अनुकम्पितः शरभाजिनः = शरभकः । अनेन कप्न्प्र० → क - उत्तरपदस्य लुक् च ।

**[ वृषकः ]** वृषस्येव अजिनं यस्य सः = वृषाजिनः । अनुकम्पितो वृषाजिनः = वृषकः । अनेन कप्न्प्र० → क - उत्तरपदस्य लुक् च ।

**[ कृष्णकः ]** कृष्णमजिनं यस्य सः = कृष्णाजिनः । अनुकम्पितः कृष्णाजिनः = कृष्णकः । अनेन कप्न्प्र० → क - उत्तरपदस्य लुक् च ।

**[ उलकः ]** अनुकम्पितः उलाजिनः = उलकः । अनेन कप्न्प्र० → क - उत्तरपदस्य लुक् च ।

**[ व्याघ्रका: ]** अनुकम्पिता व्याघ्राजिना व्याघ्रमहाजिना वा = व्याघ्रका: । अनेन कप्न्प्र० → क - उत्तरपदस्य लुक् च । 'आत्' (२।४।१८) आप्प्र० → आ ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ सिंहकाः ]** अनुकम्पिताः सिंहाजिनाः = सिंहकाः । अनेन कप्नुप्र० → क - उत्तरपदस्य लुक् च । 'आत्' (२।४।१८) आप्प्र० → आ ।

'आतो नेन्द्र-वरुणस्य' (७।४।२९) इत्येव ज्ञापनादकृतसन्धिरेव । उत्तरपदस्य लुक् 'ते लुग्वा' (३।२।१०८) इति लुकि सिद्धे लुग्वचनमनुकम्पायां 'प्राग्नित्यात् कप्' (७।३।२८) इत्यनेन कपि व्याघ्रजिनक इति निवृत्त्यर्थं वचनम् ॥छ॥

## षड्वर्जैकस्वरपूर्वपदस्य स्वरे ॥ ७।३।४० ॥

**[ षड्वर्जैकस्वरपूर्वपदस्य ]** षड्वर्जं एकस्वरं पूर्वपदं यस्य तत् = षड्वर्जैकस्वरपूर्वपदम्, तस्य ।

**[ स्वरे ]** स्वर सप्तमी ङि ।

**[ वाचियः, वाचिकः, वाचिलः ]** वागाशीः वागाशीर्दत्तो वा प्रकृतिः । अनुकम्पितो वागाशीः वागाशीर्दत्तो वा = वाचियः, वाचिकः, वाचिलः । 'अजातेर्नृनाम्नो बहुस्वरादियेकेलं वा' (७।३।३५) इय-इक-इलप्र० । अनेन उत्तरपद आशिष्(स्) आशीदर्त्तस्य वा लुक् ।

**[ त्वचियः, त्वचिकः, त्वचिलः ]** अनुकम्पिता(तः) त्वग्दत्तः = त्वचियः, त्वचिकः, त्वचिलः । 'अजातेर्नृनाम्नो०' (७।३।३५) इय-इक-इलप्र० । अनेन उत्तरपदस्य लुक् ।

**[ स्रुचियः, स्रुचिकः, स्रुचिलः ]** अनुकम्पिता(तः) स्रुग्दत्तः = स्रुचियः, स्रुचिकः, स्रुचिलः । 'अजातेर्नृनाम्नो०' (७।३।३५) इय-इक-इलप्र० । अनेन उत्तरपदस्य लुक् ।

**[ उपडः, उपकः, उपियः, उपिकः, उपिलः ]** उपेन्द्रेण दत्तः = उपेन्द्रदत्तः । अनुकम्पित उपेन्द्रदत्तः = उपडः, उपकः, उपियः, उपिकः, उपिलः । 'वोपादेरडाकौ च' (७।३।३६) अड-अक-इय-इक-इलप्र० । 'द्वितीयात् स्वरादूर्ध्वम्' (७।३।४१) इन्द्रदत्तस्य लोपः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ षडियः, षडिकः, षडिलः ]** षडङ्गुलि प्रकृतिः । षड् अङ्गुलयो यस्य सः = षडङ्गुलिः । अनुकम्पितः षडङ्गुलिः = षडियः, षडिकः, षडिलः । 'अजातेर्नृनाम्नो०' (७।३।३५) इय-इक-इलप्र० । 'द्वितीयात् स्वरादूर्ध्वम्' (७।३।४१) अङ्गुलिशब्दस्य लुक् ।

**[ वागाशीष्कः ]** अनुकम्पिता वागाशीः = वागाशीष्कः । 'अनुकम्पा०' (७।३।३४) कप्प्र० → क । 'सो रुः' (२।१।७२) र० । 'नामिनस्तयोः षः' (२।३।८) र० → ष० ।

**[ वागाशीर्दत्तकः ]** अनुकम्पितो वागाशीर्दत्तः = वागाशीर्दत्तकः । 'अनुकम्पा-तद्युक्तनीत्योः' (७।३।३४) कप्प्र० → क ॥छ॥

## द्वितीयात् स्वरादूर्ध्वम् ॥ ७।३।४१ ॥

**[ द्वितीयात् ]** द्वितीय पञ्चमी ङसि ।

**[ स्वरात् ]** स्वर पञ्चमी ङसि ।

**[ ऊर्ध्वम् ]** यदा ऊर्ध्वे देशे वर्त्तमानस्य तदा 'कालाध्व-भाव-देशं वाऽकर्म-चाऽकर्मणाम्' (२।२।२३) इत्यम् । यदि वा ऊर्ध्वस्थितस्य तदा क्रियाविशेषणं शब्दरूपं लुग्भवति तदा प्रथमैकवचनम् ।

**[ देवियः, देविकः, देविलः ]** अनुकम्पितो देवदत्तः = देवियः, देविकः, देविलः । 'अजातेर्नृनाम्नो बहुस्वरादियेकेलं वा' (७।३।३५) इय-इक-इलप्र० । अनेन उत्तरपदस्य लुक् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[उपडः, उपकः, उपियः, उपिकः, उपिलः]** अनुकम्पित उपेन्द्रदत्तः = उपडः, उपकः, उपियः, उपिकः, उपिलः । 'वोपादेरडाकौ च' (७।३।३६) अड-अक-इय-इक-इलप्र० । अनेन इन्द्रदत्तस्य लुक् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[पितृयः, पितृकः, पितृलः]** अनुकम्पितः पितृदत्तः = पितृयः, पितृकः, पितृलः । 'अजातेर्नृनाम्नो०' (७।३।३५) इय-इक-इलप्र० । अनेन उत्तरपददत्तरूपस्य लुक् । 'ऋवर्णोवर्णात् स्वरादेरादेर्लुक् प्रकृत्या च' (७।३।३७) इकारलुक् ।

**[वायुयः, वायुकः, वायुलः]** अनुकम्पितो वायुदत्तः = वायुयः, वायुकः, वायुलः । 'अजातेर्नृनाम्नो०' (७।३।३५) इय-इक-इलप्र० । अनेन उत्तरपदलुक् । 'ऋवर्णोवर्णात् स्वरादे०' (७।३।३७) इकारलुक् ।

**ऊर्ध्वग्रहणं सर्वलोपार्थम्** ।।छ।।

## सन्ध्यक्षरात् तेन ॥ ७।३।४२ ॥

**[सन्ध्यक्षरात्]** सन्ध्यक्षर पञ्चमी ङसि ।

**[तेन]** तद् तृतीया टा ।

**[कुबियः, कुबिकः, कुबिलः]** अनुकम्पितः कुबेरदत्तः = कुबियः, कुबिकः, कुबिलः । 'अजातेर्नृनाम्नो बहुस्वरादियेकेलं वा' (७।३।३५) इय-इक-इलप्र० । अनेन एरदत्तरूपपदस्य लुक् ।

**[कहियः, कहिकः, कहिलः]** अनुकम्पितः कहोडः = कहियः, कहिकः, कहिलः । 'अजातेर्नृनाम्नो०' (७।३।३५) इय-इक-इलप्र० । अनेन ओडरूपपदस्य लुक् ।

**[लहियः, लहिकः, लहिलः]** अनुकम्पितो लहोडः = लहियः, लहिकः, लहिलः । 'अजातेर्नृनाम्नो०' (७।३।३५) इय-इक-इलप्र० । अनेन ओडशब्दस्य लुक् ।

**[कपियः, कपिकः, कपिलः]** अनुकम्पितः कपोतरोमा = कपियः, कपिकः, कपिकः । 'अजातेर्नृनाम्नो०' (७।३।३५) इय-इक-इलप्र० । अनेन ओतरोमन् शब्दस्य लुक् ।

**[अमियः, अमिकः, अमिलः]** अनुकम्पितोऽमोघः अमोघदत्तो वा अमोघजिह्वो वा = अमियः, अमिकः, अमिलः । 'अजातेर्नृनाम्नो०' (७।३।३५) इय-इक-इलप्र० । अनेन ओघ-ओघदत्त-ओघजिह्वरूपं उत्तरस्य लुक् ।

**[गुरुयः, गुरुकः, गुरुलः]** अनुकम्पितो गुरुदत्तः = गुरुयः, गुरुकः, गुरुलः । 'अजातेर्नृनाम्नो०' (७।३।३५) इय-इक-इलप्र० । 'द्वितीयात् स्वरादूर्ध्वम्' (७।३।४१) दत्तरूप उत्तरपदस्य लुक् । 'ऋवर्णोवर्णात् स्वरादेरादेर्लुक् प्रकृत्या च' (७।३।३७) इकारस्य लुक् ।।छ।।

## शेवलाद्यादेस्तृतीयात् ॥ ७।३।४३ ॥

**[शेवलाद्यादेः]** शेवल आदिर्यस्य सः = शेवलादिः । शेवलादिरादिर्यस्य तत् = शेवलाद्यादि, तस्य ।

**[तृतीयात्]** तृतीय पञ्चमी ङसि ।

'द्वितीयात् स्वरादूर्ध्वम्' (७।३।४१) इत्यस्यापवादः ।

**[शेवलियः, शेवलिकः, शेवलिलः]** अनुकम्पितः शेवलदत्तः = शेवलियः, शेवलिकः, शेवलिलः । 'अजातेर्नृनाम्नो बहुस्वरादियेकेलं वा' (७।३।३५) इय-इक-इलप्र० । अनेन दत्तस्य लुक् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ सुपरियः, सुपरिकः, सुपरिलः ]** अनुकम्पितः सुपरिदत्तः = सुपरियः, सुपरिकः, सुपरिलः । 'अजातेर्नृनाम्नो०' (७।३।३५) इय-इक-इलप्र० । अनेन दत्तस्य लुक् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ विशालियः, विशालिकः, विशालिलः ]** अनुकम्पितो विशालदत्तः = विशालियः, विशालिकः, विशालिलः । 'अजातेर्नृनाम्नो०' (७।३।३५) इय-इक-इलप्र० । अनेन दत्तशब्दस्य लुक् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ वरुणियः, वरुणिकः, वरुणिलः ]** अनुकम्पितो वरुणदत्तः = वरुणियः, वरुणिकः, वरुणिलः । 'अजातेर्नृनाम्नो०' (७।३।३५) इय-इक-इलप्र० । अनेन दत्तशब्दस्य लुक् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ अर्यमियः, अर्यमिकः, अर्यमिलः ]** अनुकम्पितः अर्यमदत्तः = अर्यमियः, अर्यमिकः, अर्यमिलः । 'अजातेर्नृनाम्नो०' (७।३।३५) इय-इक-इलप्र० । अनेन दत्तशब्दस्य लुक् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**अत्राप्यकृतसन्धिरेव लोपः ।**

**[ शेवलिकः ]** शेवलेन्द्रदत्तोऽनुकम्पितः = शेवलिकः । 'अजातेर्नृनाम्नो०' (७।३।३५) इकप्र० । अनेन इन्द्रदत्तलुक् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक्, इति यथा स्यात् ।

**[ सुपरिकः ]** सुपर्याशीर्दत्तोऽनुकम्पितः = सुपरिकः । 'अजातेर्नृनाम्नो०' (७।३।३५) इकप्र० । अनेन आशीर्दत्तलुक् । 'ऋवर्णोवर्णात् स्वरादेरादेर्लुक् प्रकृत्या च' (७।३।३७) इकारलुक् ।

**[ विशाखिलः ]** अनुकम्पितो विशाखदत्तः = विशाखिलः । 'अजातेर्नृनाम्नो०' (७।३।३५) इलप्र० । मतान्तरे अनेन दत्तलुक् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ कुमारिलः ]** अनुकम्पितः कुमारदत्तः = कुमारिलः । 'अजातेर्नृनाम्नो०' (७।३।३५) इलप्र० । मतान्तरे अनेन दत्तलुक् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।।छ।।

## क्वचित् तुर्यात् ।। ७।३।४४ ।।

**[ क्वचित् ]** क्वचित् प्रथमा सि ।

**[ तुर्यात् ]** तुर्य पञ्चमी ङसि ।

**[ बृहस्पतियः, बृहस्पतिकः, बृहस्पतिलः ]** अनुकम्पितो बृहस्पतिदत्तः बृहस्पतिशर्म वा = बृहस्पतियः, बृहस्पतिकः, बृहस्पतिलः । 'अजातेर्नृनाम्नो०' (७।३।३५) इय-इक-इलप्र० । अनेन दत्त-शर्मन् शब्दलुक् । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ प्रजापतियः, प्रजापतिकः, प्रजापतिलः ]** अनुकम्पितः प्रजापतिदत्तः = प्रजापतियः, प्रजापतिकः, प्रजापतिलः । 'अजातेर्नृनाम्नो बहुस्वरादियेकेलं वा' (७।३।३५) इय-इक-इलप्र० । अनेन दत्तलुक् । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**अकृतसन्धिरित्येव पूर्ववत् ।**

**[ प्रजापतिकः ]** प्रजापत्याशीर्दत्तोऽनुकम्पितः = प्रजापतिकः इति यथा स्यात् । 'अजातेर्नृनाम्नो०' (७।३।३५) इकप्र० । अनेन आशीर्दत्तलुक् । प्रजापत्यिक इति मा भूत् ।

क्वचिद्ग्रहणादिह न भवति -

**[ उपडः, उपकः, उपियः, उपिकः, उपिलः ]** अनुकम्पित उपेन्द्रदत्तः = उपडः, उपकः, । शेषं पूर्ववत् ।।छ।।

## पूर्वपदस्य वा ।। ७।३।४५ ।।

**[ पूर्वपदस्य ]** पूर्वपद षष्ठी ङस् ।

**[ वा ]** वा प्रथमा सि ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ दत्तियः, दतिकः, दत्तिलः, देवियः, देविकः, देविलः ]** अनुकम्पितो देवदत्तः = दत्तियः, दत्तिकः, दत्तिलः । 'अजातेर्नृनाम्नो बहुस्वरादियेकेलं वा' (७।३।३५) इय-इक-इलप्र० । अनेन पूर्वपद''देव''लुक् । वावचनात् पक्षे-एवम्-देवियः, देविकः, देविलः । 'द्वितीयात् स्वरादूर्ध्वम्' (७।३।४१) दत्तलुक् ।।छा।

## ह्रस्वे ॥ ७।३।४६ ॥

**[ ह्रस्वे ]** ह्रस्व सप्तमी ङि ।

**दीर्घप्रतियोगि प्रतिपक्षं ह्रस्वम्** ।

**[ पटकः ]** ह्रस्वः पटः = पटकः । अनेन कप्प्र० → क ।

**[ शाटकः ]** ह्रस्वः शाटः = शाटकः । अनेन कप्प्र० → क ।

**[ पचतकि ]** ह्रस्वं-स्तोकं पचति = पचतकि । अनेन ''इ''पूर्वात् अक् ।

**[ सर्वके ]** ह्रस्वाः सर्वे = सर्वके । अनेन कप्प्र० → क । जस् । 'जस इः' (१।४।९) जस्० → इ० ।

**[ विश्वके ]** ह्रस्वा विश्वे = विश्वके । अनेन कप्प्र० → क । जस् । 'जस इः' (१।४।९) जस्० → इ० ।

**[ उच्चकैः ]** ह्रस्वं उच्चैः = उच्चकैः । 'लोकात्' (१।१।३) ''ऐस्'' अग्रे विश्लेषियइ । अनेन अक्प्र० ।

**[ नीचकैः ]** ह्रस्वं नीचैः = नीचकैः । 'लोकात्' (१।१।३) ''ऐस्'' अग्रे विश्लेषियइ । अनेन अक्प्र० ।

**[ तूष्णीकाम् ]** ह्रस्वं तूष्णीम् = तूष्णीकाम् । अनेन 'तूष्णीकाम्' (७।३।२२) म् प्राक् का ।

**[ वंशकः ]** ह्रस्वो वंशः = वंशकः । अनेन कप्प्र० → क ।

**[ वेणुकः ]** ह्रस्वो वेणुर्वेणुकः । अनेन कप्प्र० → क ।

**[ नडकः ]** ह्रस्वो नडः = नडकः । अनेन कप्प्र० → क ।

**[ लवकः ]** ह्रस्वो लवः = लवकः । अनेन कप्प्र० → क ।

**[ चरकः ]** ह्रस्वश्चरः = चरकः । अनेन कप्प्र० → क ।।छा।

## कुटी-शुण्डाद् रः ॥ ७।३।४७ ॥

**[ कुटीशुण्डात् ]** कुटी च शुण्डा च = कुटीशुण्डम्, तस्मात् । 'क्लीबे' (२।४।९७) ह्रस्वः ।

**[ रः ]** र प्रथमा सि ।

**कपोऽपवादः** ।

**[ कुटीरः ]** ह्रस्वा कुटी = कुटीरः । अनेन रप्र० ।

**[ शुण्डारः ]** ह्रस्वा शुण्डा = शुण्डारः । अनेन रप्र० ।।छा।

## शम्या रु-रौ ॥ ७।३।४८ ॥

**[ शम्याः ]** शमी पञ्चमी ङसि ।

**[ रुरौ ]** रुश्च रश्च = रुरौ ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ शमीरुः, शमीरः ]** ह्रस्वा शमी = शमीरुः, शमीरः । अनेन रु-रप्र० ॥छा।

## कुत्वा डुपः ॥ ७।३।४९ ॥

**[ कुत्वाः ]** कुतू पञ्चमी ङसि ।

**[ डुपः ]** डुप प्रथमा सि ।

**[ कुतुपः ]** ह्रस्वा कुतूः = कुतुपः । अनेन डुपप्र० → उप । 'डित्यन्त्यस्वरादेः' (२।१।११४) ऊलुक् ।

कुतूरिति चर्ममयं तैलाद्यावपनमुच्यते ॥छा।

## कासू-गोणीभ्यां तरट् ॥ ७।३।५० ॥

**[ कासूगोणीभ्याम् ]** कासू च गोणी च = कासूगोण्यौ, ताभ्याम् = कासूगोणीभ्याम् । पञ्चमी भ्याम् ।

**[ तरट् ]** तरट् प्रथमा सि ।

**[ कासूतरी ]** 'कस गतौ' (९८७) कस् । कसतीति कासूः । कसि-पद्यर्त्यादिभ्यो णित् (उणा० ८३५) णिद् ऊप्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । ह्रस्वा कासूः = कासूतरी । अनेन तरट्प्र० → तर । 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । **कासूः शक्तिर्नामायुधम् ।**

**[ गोणीतरी ]** ह्रस्वा गोणी = गोणीतरी । अनेन तरट्प्र० → तर० । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । **गोणी धान्यावपनम् ।**॥छा।

## वत्सोक्षा-ऽश्वर्षभाद्ध्रासे पित् ॥ ७।३।५१ ॥

**[ वत्सोक्षाऽश्वर्षभात् ]** वत्सश्च उक्षा च अश्वश्च ऋषभश्च = वत्सोक्षाऽश्वर्षभम्, तस्मात् ।

**[ ह्रासे ]** ह्रास सप्तमी ङि ।

**[ पित् ]** प् इदनुबन्धो यस्य सः = पित् ।

**[ वत्सतरः ]** ह्रसितो वत्सः = वत्सतरः । अनेन तरट्प्र० → तर । वत्सः प्रथमवयस्को गौः, तस्य ह्रासो द्वितीयवयःप्राप्तिः ।

**[ उक्षतरः ]** ह्रसित उक्षा = उक्षतरः । अनेन तरट्प्र० → तर । उक्षा द्वितीयवयास्तरुणस्तस्य ह्रासस्तृतीयवयःप्राप्तिः ।

**[ अश्वतरः ]** ह्रसितोऽश्वोऽश्वतरः । अनेन तरट्प्र० → तर । अश्वेनाश्वायां जातोऽश्वस्तस्य ह्रासो गर्दभपितृकता । आशुगमनाद्वाश्वस्तस्य ह्रासो गमने मन्दता । सर्वथाश्वतरशब्दो जातिशब्दः ।

**[ ऋषभतरः ]** ह्रसित ऋषभः = ऋषभतरः । अनेन तरट्प्र० → तर । ऋषभोऽनड्वान् बलीयान्, तस्य ह्रासो भारवहने मन्दशक्तिताविष्करणम् ।

**पित्करणं पुंवद्भावार्थम् ।**

**[ वत्सतरी ]** ह्रसिता वत्सा = वत्सतरी । अनेन तरट्प्र० → तर । 'क्यङ्-मानि-पित्तद्धिते' (३।२।५०) पुंवद्भावः । 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङी ।

**[ अश्वतरी ]** ह्रसिताश्वा = अश्वतरी । अनेन तरट्प्र० → तर । 'क्यङ्-मानि-पित्तद्धिते' (३।२।५०) पुंवद्भावः । 'अणञेयेकण्०' (२।४।२०) ङी ॥छा।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## वैकाद् द्वयोर्निर्धार्ये डतरः ॥ ७।३।५२ ॥

**[वा]** वा प्रथमा सि ।

**[एकात्]** एक पञ्चमी ङसि ।

**[द्वयोः]** द्वि सप्तमी ओस् । 'आ द्वेरः' (२।१।४१) इ० → अ० । 'एद् बहुस्भोसि' (१।४।४) ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[निर्धार्ये]** निर् 'धृङ्त् स्थाने' (१४६७) धृ । ध्रियमाणं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० → इ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् । निर्धार्यते = निर्धार्यः । 'य एच्चातः' (५।१।२८) यप्र० । 'णेरनिटि' (४।३।८३) णिग्लुक्, तस्मिन् ।

**[डतरः]** डतर प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**समुदायादेकदेशो जातिगुणक्रियासंज्ञाद्रव्यैर्निष्कृष्य बुद्ध्या पृथक्क्रियमाणो निर्धार्यः ।**

**[एकतरो भवतोः कठः पटुर्गन्ता देवदत्तो दण्डी वा, एकको भवतोः कठः पटुर्वा, एको भवतोः पटुः]** द्वयोर्मध्ये एकः = एकतरः । अनेन डतरप्र० → अतर । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलोपः । भवतोः कठः पटुर्गन्ता देवदत्तो दण्डी वा । महावाधिकारेणैव सिद्धे किमर्थं वावचनमित्याशङ्काया उत्तरमाह-वावचनमगर्थम् । यथा एककः, वाक्यं पूर्ववत् । 'लोकात्' (१।१।३) "अ"अग्रे विश्लेषियइ । 'त्यादि-सर्वादेः०' (७।३।२९) अक्प्र० । महावाधिकारात्र भवत्यपि अग्रेतने उदाहरणे ॥छा।

## यत्-तत्-किमन्यात् ॥ ७।३।५३ ॥

**[यत्तत्किमन्यात्]** यच्च तच्च किम् च अन्यच्च = यत्तत्किमन्यत्, तस्मात् ।

**[यतरो भवतोः कठः पटुर्गन्ता देवदत्तो दण्डी वा ततर आगच्छतु]** द्वयोर्मध्ये यः = यतरः । अनेन डतरप्र० → अतर । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । द्वयोर्मध्ये सः = ततरः । अनेन डतरप्र० → अतर । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

**[कतरो भवतोः कठः पटुर्गन्ता देवदत्तो दण्डी वा]** द्वयोर्मध्ये कः = कतरः । अनेन डतरप्र० → अतर । 'डित्यन्त्यस्वरादेः' (२।१।११४) "इम्"लुक् ।

**[अन्यतरो भवतोः कठः पटुर्गन्ता देवदत्तो दण्डी वा]** द्वयोर्मध्येऽन्यः = अन्यतरः । अनेन डतरप्र० → अतर । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् ।

महावाधिकारात् प्रत्ययो न भवति अग्रेतने उदाहरणे ॥छा।

## बहूनां प्रश्ने डतमश्च वा ॥ ७।३।५४ ॥

**[बहूनाम्]** बहु षष्ठी आम् ।

**[प्रश्ने]** प्रश्न सप्तमी ङि ।

**[डतमश्च]** डतम प्रथमा सि । च प्रथमा सि ।

**[वा]** वा प्रथमा सि ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ यतमो यतरो वा भवतां कठस्ततमस्ततरो वा आगच्छतु ]** बहूनां एषां वा मध्ये यः = यतमः, यतरः । अनेन डतमप्र० → अतम० - डतरप्र० → अतर । 'डित्यन्त्यस्वरादेः' (२।१।११४) अद्लुक् । बहूनां मध्ये सः = ततमः, ततरो वा । अनेन डतमप्र० → अतम - डतरप्र० → अतर । 'डित्यन्त्यस्वरादेः' (२।१।११४) अद्लुक् ।

**[ कतमः कतरो वा भवतां कठः ]** बहूनां मध्ये कः = कतमः, कतरः । अनेन डतमप्र० → अतम - डतरप्र० → अतर । 'डित्यन्त्यस्वरादेः' (२।१।११४) "इम्" लुक् ।

**[ अन्यतमोऽन्यतरो वा ]** बहूनां मध्येऽन्योऽन्यतमः, अन्यतरो वा भवतां कठः । अनेन डतमप्र० → अतम - डतरप्र० → अतर । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् ।

**[ शुचिवल्कवीतवपुरन्यतमस्तिमिरच्छिदामिव गिरौ भवतः - किराते ]** तिमिर 'छिदृंपी द्वैधीकरणे' (१४७८) छिद् । तिमिरं छिन्दन्ति । क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लुक्, तेषाम् = तिमिरच्छिदाम् ।

**वावचनमगर्थम्-**

**[ यको भवतां कठः सक आगच्छतु ]** बहूनां मध्ये यः = यको भवतां कठः । 'लोकात्' (१।१।३) "अद्"अग्रे विश्लेषियइ । 'त्यादि-सर्वादेः स्वरेष्वन्त्यात् पूर्वोऽक्' (७।३।२९) अक्प्र० । प्रथमा सि । 'आ द्वेरः' (२।१।४१) द० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् । बहूनां मध्ये सः = सकः । 'लोकात्' (१।१।३) "अद्" अग्रे विश्लेषियइ । 'त्यादि-सर्वादेः०' (७।३।२९) अक्प्र० ।

**[ अन्यक एषां कालापः ]** बहूनां मध्येऽन्यः = अन्यकः । 'त्यादि-सर्वादेः०' (७।३।२९) "अ"पूर्वमक् । बहूनां मध्ये कः क आलापः । 'त्यादि-सर्वादेः०' (७।३।२९) इम् प्राक् अक् । 'किमः कस्तसादौ च' (२।१।४०) "क"देशः ।

महावाधिकारात् प्रत्ययो न भवत्यपि । एवं य इत्यत्र न किमपि प्रत्ययः, मतत्रयेऽप्यभिधानमेव श्रेय इति भावार्थः ॥छा॥

## वैकात् ॥ ७।३।५५ ॥

**[ वा ]** वा प्रथमा सि ।

**[ एकात् ]** एक पञ्चमी ङसि ।

**[ एकतमो भवतां कठः पटुर्गन्ता देवदत्तो दण्डी वा, एककः, एको भवतां कठः ]** एषां मध्ये एकः = एकतमः । अनेन डतमप्र० → अतम । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् । भवतां कठः पटुर्गन्ता देवदत्तो दण्डी वा । एवम्-एककः । 'त्यादि-सर्वादेः०' (७।३।२९) अक् । महावाधिकारान्न भवति । एवम्-एकः इत्यत्र न किमपि ।

**पृथग्योगो डतरनिवृत्त्यर्थः** ॥छा॥

## क्तात् तमबादेश्चानत्यन्ते ॥ ७।३।५६ ॥

**[ क्तात् ]** क्त पञ्चमी ङसि ।

**[ तमबादेश्च ]** तमप् आदिर्यस्य सः = तमबादिः, तस्मात् । च प्रथमा सि ।

**[ अनत्यन्ते ]** न अत्यन्तम् = अनत्यन्तम्, तस्मिन् ।

क्रियायाः स्वेनाश्रयेण 'सहार्थे' (२।२।४५) तृतीया । साकल्येन करणे तृतीया । **अनभिसम्बन्धोऽनत्यन्तता** ।

**[ भिन्नकम् ]** अनत्यन्तं भिन्नं = भिन्नकम् । अनेन कप्प्र० → क । सि-अम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ छिन्नकम् ]** अनत्यन्तं छिन्नं = छिन्नकम् । अनेन कप्प्र० → क । सि-अम् ।

**[ भिन्निका घटी ]** अनत्यन्तं भिन्ना = भिन्निका । अनेन कप्प्र० → क । 'आत्' (२।४।१८) आप्प्र० → आ । 'क्यङ्-मानि-पित्तद्धिते' (३।२।५०) इत्यादिना पुंवद्भावः । 'अस्याऽयत्-तत्-क्षिपकादीनाम्' (२।४।१११) इ ।

**[ छिन्निका रज्जुः ]** अनत्यन्तं छिन्ना = छिन्निका रज्जुः । अनेन कप्प्र० → क । 'आत्' (२।४।१८) आप्प्र० → आ । 'क्यङ्-मानि-पित्तद्धिते' (३।२।५०) पुंवद्भावः । 'अस्याऽयत्०' (२।४।१११) इ ।

तमबाद्यन्तात् क्तात्-

**[ भिन्नतमकम् ]** प्रकृष्टं भिन्नं = भिन्नतमम् । 'प्रकृष्टे तमप्' (७।३।५) तमप्प्र० → तम । अनत्यन्तं भिन्नतमं = भिन्नतमकम् । अनेन कप्प्र० → क ।

**[ भिन्नतरकम् ]** द्वयोर्मध्ये प्रकृष्टं भिन्नं = भिन्नतरम् । 'द्वयोर्विभज्ये च तरप्' (७।३।६) तरप्प्र० → तर । अनत्यन्तं भिन्नतरं = भिन्नतरकम् । अनेन कप्प्र० → क ।

**[ भिन्नकल्पकम् ]** ईषदपरिसमाप्तं भिन्नं = भिन्नकल्पम् । 'अतमबादेरीषदसमाप्ते कल्पप्-देश्यप्-देशीयर्' (७।३।११) कल्पप्प्र० → कल्प । अनत्यन्तं भिन्नकल्पं = भिन्नकल्पकम् । अनेन कप्प्र० → क ।

**[ छिन्नतमकम् ]** प्रकृष्टं छिन्नं = छिन्नतमम् । 'प्रकृष्टे तमप्' (७।३।५) तमप्प्र० → तम । अनत्यन्तं छिन्नतमं = छिन्नतमकम् । अनेन कप्प्र० → क ।

**[ छिन्नतरकम् ]** द्वयोर्मध्ये प्रकृष्टं छिन्नं = छिन्नतरम् । 'द्वयोर्विभज्ये०' (७।३।६) तरप्प्र० → तर । अनत्यन्तं छिन्नतरं = छिन्नतरकम् । अनेन कप्प्र० → क ।

**[ छिन्नकल्पकम् ]** ईषदपरिसमाप्तं छिन्नं = छिन्नकल्पम् । 'अतमबादेरीषदसमाप्ते कल्पप्०' (७।३।११) कल्पप्प्र० → कल्प । अनत्यन्तं छिन्नकल्पं = छिन्नकल्पकम् । अनेन कप्प्र० → क ।

तमबाद्यन्तेषु क्तान्तता नास्तीति तमबादिग्रहणम् । असमासस्तमबादेरित्यत्रापि क्तादित्यस्य सम्बन्धार्थः ॥छ॥

## न सामिवचने ॥ ७।३।५७ ॥

**[ न ]** न प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[ सामिवचने ]** सामिवचन सप्तमी ङि । सामि अर्द्धः, सामि वक्तीति सामिवचनः । 'नन्द्यादिभ्योऽनः' (५।१।५२) अनप्र०, तस्मिन् ।

**[ सामि अनत्यन्तं भिन्नम् ]** सामि अनत्यन्तं भिन्नमिति वाक्यमेव, न कप् ।

**[ कृतम् ]** सामि अनत्यन्तं कृतमिति वाक्यमेव । न कप् ।

**[ भुक्तम् ]** सामि अनत्यन्तं भुक्तमिति वाक्यमेव, न कप् ।

**[ पीतम् ]** सामि अनत्यन्तं पीतमिति वाक्यमेव, न कप् ।

**[ भिन्नतमम् ]** सामि अनत्यन्तं भिन्नतममिति वाक्यमेव, न कप् ।

**[ भिन्नतरम् ]** सामि अनत्यन्तं भिन्नतरमिति वाक्यमेव, न कप् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**वचनग्रहणं पर्यायार्थम्-**

[ **अर्द्धमनत्यन्तं भिन्नम्** ] अर्द्धमनत्यन्तं भिन्नं ।

[ **नेममनत्यन्तं भिन्नम्** ] नेममनत्यन्तं भिन्नम् ।

एवं शकलं-खण्डमित्यादि ।

अन्ये तु समास एवोदाहरणम् -

[ **सामिकृतम्** ] सामि कृतं = सामिकृतम् । 'स्वयं-सामि क्तेन' (३।१।५८) समासः ।

[ **अर्द्धकृतम्** ] अर्द्धं च तत् कृतं च = अर्द्धकृतम् । 'विशेषणं विशेष्येणैकार्थं कर्मधारयश्च' (३।१।९६) इत्यादिना समासः ।

ननु साम्यादिभिरेवानत्यन्तताया अभिहितत्वादुक्तार्थत्वेन कप् न प्राप्नोतीति व्यर्थः प्रतिषेधः ? उच्यते-साम्यादिभिः समुदायविषयक्रियाया एवानत्यन्तता प्रतीयते न स्वविषये । तत्रानत्यन्तविवक्षायां कप् प्राप्नोतीति प्रतिषेधवचनम् ।।छ।।

## नित्यं ञ-ञिनोऽण् ।। ७।३।५८ ।।

[ **नित्यम्** ] नित्य प्रथमा सि ।

[ **ञञिनः** ] ञश्च ञिन् च = ञञिन्, तस्मात् ।

[ **अण्** ] अण् प्रथमा सि ।

**नित्यग्रहणात् महाविभाषा निवृत्ता ।**

[ **व्यावक्रोशी** ] वि-अव 'क्रुशं आह्वान-रोदनयोः' (९८६) क्रुश् । व्यवक्रोशनं = व्यावक्रोशी । 'व्यतिहारेऽनीहादिभ्यो ञः' (५।३।११६) ञप्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । ततोऽनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अणञेयेकण्०' (२।४।२०) ङी । 'न ञ-स्वा(व)ङ्गादेः' (७।४।९) इति वृद्धिरागमनिषेधः ।

[ **व्यावलेखी** ] वि-अव 'लिखत् अक्षरविन्यासे' (१३३६) लिख् । व्यवलेखनं = व्यावलेखी । 'व्यतिहारेऽनीहादिभ्यो ञः' (५।३।११६) ञप्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । ततोऽनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'न ञ-स्वा(व)ङ्गादेः' (७।४।९) इति वृद्धिरागमनिषेधः ।

[ **व्यावहासी वर्त्तते** ] वि-अव 'हसे हसने' (६४५) हस् । व्यवहसनं = व्यावहासी । 'व्यतिहारेऽनीहादिभ्यो ञः' (५।३।११६) ञप्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । ततोऽनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अणञेयेकण्०' (२।४।२०) ङी । 'न ञ-स्वा(व)ङ्गादेः' (७।४।९) इति वृद्धिरागमनिषेधः ।

[ **सांकोटिनम्** ] सम्-कोट । समन्तात् कोटः = सांकोटिनम् । 'अभिव्याप्तौ भावेऽन-ञिन्' (५।३।९०) ञिन्प्र० → इन् । 'अतः' (४।३।८२) अलुप् । ततोऽनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः । 'अनपत्ये' (७।४।५५) अन्त्यस्वरादिलुबभावः ।

[ **सांराविणम्** ] समन्तात् रावः = सांराविणम् । 'अभिव्याप्तौ भावेऽन-ञिन्' (५।३।९०) ञिन्प्र० → इन् । 'अतः' (४।३।८२) अलुप्, ततोऽनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः । 'अनपत्ये' (७।४।५५) अन्त्यस्वरादिलुबभावः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ साम्मार्गिणम्( र्जिनम् ) ]** समन्तात् मार्गः = साम्मार्गिणम्(साम्मार्जिनम्) । 'अभिव्याप्तौ भावेऽन-ञिन्' (५।३।९०) ञिन्प्र० → इन् । 'अतः' (४।३।८२) अलुप्, ततोऽनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेञ्णिति तद्धिते' (७।४।१) वृद्धिः । 'अनपत्ये' (७।४।५५) अन्त्यस्वरादिलुबभावः ॥छा॥

## विसारिणो मत्स्ये ॥ ७।३।५९ ॥

**[ विसारिणः ]** विसारिन् पञ्चमी ङसि ।

**[ मत्स्ये ]** मत्स्य सप्तमी ङि ।

**[ वैसारिणो मत्स्यः ]** वि 'सृं गतौ' (२५) सृ । विसरतीति विसारी, मत्स्यश्चेत् वैसारिणः । 'ग्रहादिभ्यो णिन्' (५।१।५३) णिन्प्र० → इन् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर्, ततोऽनेन अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'र-षृवर्णान्नो ण०' (२।३।६३) णत्वम् ॥छा॥

## पूगादमुख्यकाञ्ज्यो द्रिः ॥ ७।३।६० ॥

**[ पूगात् ]** पूग पञ्चमी ङसि ।

**[ अमुख्यकात् ]** मुख्येऽर्थे कः = मुख्यकः । न मुख्यकः = अमुख्यकः, तस्मात् ।

**[ ञ्यः ]** ञ्य प्रथमा सि ।

**[ द्रिः ]** द्रि प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**नानाजातीया अनियतवृत्तयोऽर्थकामप्रधानाः सङ्घाः पूगाः ।**

**[ लौहध्वज्यः, लौहध्वज्यौ, लोहध्वजाः ]** लोहध्वजा पूगा उच्यन्ते । अलौकिकं वाक्यमन्यथा न प्राप्नोति । लोहध्वज एव = लौहध्वज्यः । लोहध्वजावेव = लौहध्वज्यौ । लोहध्वजा एव = लोहध्वजाः । अनेन ञ्यप्र० द्रिसंज्ञकः → य । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'बहुष्वस्त्रियाम्' (६।१।१२४) ञ्यलुप् । जस् ।

**[ शैब्यः, शैब्यौ, शिबयः ]** शिबयः पूगा उच्यन्ते । 卐शिबिरेव = शैब्यः । शिबी एव = शैब्यौ । शिबय एव = शिबयः । अनेन ञ्यप्र० → य० । 'वृद्धिः स्वरेष्वादेञ्णिति०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । 'बहुष्वस्त्रियाम्' (६।१।१२४) ञ्यलुप् । जस् । 'जस्येदोत्' (१।४।२२) ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ वातक्यः, वातक्यौ, वातकाः ]** वातक । वातकाः पूगा उच्यन्ते । वातक एव = वातक्यः, तौ-ते । अनेन ञ्यप्र० → य । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-औ । 'बहुष्वस्त्रियाम्' (६।१।१२४) ञ्यलुप् । जस् ।

**[ देवदत्तकः ]** देवदत्तो मुख्योऽस्य = देवदत्तकः । 'सोऽस्य मुख्यः' (७।१।१९०) कप्र० ।

**[ इन्द्राग्निगुप्तकः पूगः ]** इन्द्राग्निगुप्तो मुख्योऽस्य सः = इन्द्राग्निगुप्तकः पूगः । 'सोऽस्य मुख्यः' (७।१।१९०) कप्र० ॥छा॥

## व्रातादस्त्रियाम् ॥ ७।३।६१ ॥

**[ व्रातात् ]** व्रात पञ्चमी ङसि ।

**[ अस्त्रियाम् ]** न स्त्री = अस्त्री, तस्याम् ।

---

卐 म० वृत्तौ-शैबिरेव = शैब्यः । शैबी एव = शैब्यौ । शैबय एव = शिबयः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**नानाजातीया अनियतवृत्तयः शरीरायासजीविनः सङ्घा व्राताः ।**

[ **कापोतपाक्यः, कापोतपाक्यौ, कपोतपाकाः** ] कपोतपाको व्राताः । कपोतपाक एव = कापोतपाक्यः, तौ-ते । एवमग्रेऽपि ज्ञेयम् । अनेन ञ्यप्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'बहुष्वस्त्रियाम्' (६।१।१२४) ञ्यलुप् । सि-औ-जस् ।

[ **व्रैहिमत्यः, व्रैहिमत्यौ, व्रीहिमताः** ] व्रीहिमतो व्राताः = व्रैहिमत्यः । व्रीहिमतौ व्राताः = व्रैहिमत्यौ । व्रीहिमता व्राताः = व्रीहिमताः । अनेन ञ्यप्र० → य । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'बहुष्वस्त्रियाम्' (६।१।१२४) ञ्यलुप् । जस् ।

[ **कपोतपाका** ] कपोतपाक एव = कपोतपाका । अत्र प्रत्ययो न कश्चित् । आप् ।

[ **व्रीहिमता स्त्री** ] व्रैहिमतैव = व्रीहिमता । अत्र प्रत्ययो न कश्चित् । आप् ॥छा॥

**शस्त्रजीविसङ्घाञ्ञ्यड् वा ॥ ७।३।६२ ॥**

[ **शस्त्रजीविसङ्घात्** ] शस्त्रजीविनां सङ्घः = शस्त्रजीविसङ्घः, तस्मात् ।

[ **ञ्यट्** ] ञ्यट् प्रथमा सि ।

[ **वा** ] वा प्रथमा सि ।

[ **शाबर्यः, शाबर्यौ, शबराः** ] शबराः शस्त्रजीविसङ्घः । शबर एव = शाबर्यः । शबरौ एव = शाबर्यौ । शबरा एव = शबराः । अनेन ञ्यट्प्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-औ । 'बहुष्वस्त्रियाम्' (६।१।१२४) ञ्यट्लुप् । जस् ।

[ **पौलिन्द्यः, पौलिन्द्यौ, पुलिन्दाः** ] पुलिन्दाः शस्त्रजीविसङ्घः । पुलिन्द एव = पौलिन्द्यः । तौ = पौलिन्द्यौ । ते = पुलिन्दाः । अनेन ञ्यट्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'बहुष्वस्त्रियाम्' (६।१।१२४) ञ्यट्लुप् । जस् ।

[ **कौन्त्यः, कौन्त्यौ, कुन्तयः** ] कुन्तेरपत्यं बहवो माणवकाः = कुन्तयः । 'दु-नादि-कुर्वित्-कोशला-ऽजादाञ्ञ्यः' (५।१।११८) इत्यादिना ञ्यप्र० → य । 'बहुष्वस्त्रियाम्' (६।१।१२४) ञ्यलुप् । ते शस्त्रजीविः । कुन्तिरेव = कौन्त्यः । तौ शस्त्रजीविसङ्घौ । ते शस्त्रजीविसङ्घाः । अनेन ञ्यट्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । सि-औ । 'बहुष्वस्त्रियाम्' (६।१।१२४) ञ्यट्लुप् । जस् । 'जस्येदोत्' (१।४।२२) ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

एवं शबरः पुलिन्द इत्यत्र विकल्पेन प्रत्ययो न भवति ।

[ **मल्लः, मल्लौ, मल्लाः** ] मल्लाः सङ्घः । मल्ल एव = मल्लः, तौ-मल्लौ । ते-मल्लाः । एतेषु प्रत्ययो न भवति । सि-औ-जस् ।

[ **शयण्डः, शयण्डौ, शयण्डाः** ] शयण्डः सङ्घः । शयण्ड एव = शयण्डः । तौ-शयण्डौ । ते-शयण्डाः । एतेषु प्रत्ययो न भवति । सि-औ-जस् ।

[ **सम्राट्** ] सम् 'राजृग् दीप्तौ' (८९३) राज् । सम्राजत इति सम्राट् । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'सम्राट्' (१।३।१६) इत्यनेन मकारस्य मः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 'यज-सृज-मृज-राज-भ्राज-भ्रस्ज-व्रस्च-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

परिव्राजः शः षः' (२।१।८७) ज० → ष० । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'धुटस्तृतीयः' (२।१।७६) ष० → ड० । 'विरामे वा' (१।३।५१) ड० → ट० ।

**[ वागुरः, वागुरौ, वागुराः ]** वागुरा अस्यास्ति = वागुरः । वागुरा अनयोरस्ति = वागुरौ । वागुरा एष्वस्ति = वागुराः । 'अभ्रादिभ्यः' (७।२।४६) अप्र० । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । सि-औ-जस् ।

नैते श्रेणिबद्धा इति न सङ्घाः । टकारो ङ्यर्थः ।

**[ शाबरी ]** अनेन निष्पन्नः शाबर्य मण्ड्यते । 'अणञेयेकण्-नञ्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । 'व्यञ्जनात् तद्धितस्य' (२।४।८८) यलुक् ।

**[ पौलिन्दी ]** अनेन निष्पन्नः पौलिन्द्या मण्ड्यते । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । 'व्यञ्जनात् तद्धितस्य' (२।४।८८) यलुक् ।

**[ कौन्ती ]** कुन्तेरपत्यं बहवो माणवकास्ते शस्त्रजीविसङ्घः स्त्रीत्वविशिष्टो विवक्षितः । 'दु-नादि-कुर्वित्-कोशला-ऽजादाञ्ञ्यः' (६।१।११८) ञ्यप्र० । 'कुन्त्यवन्तेः स्त्रियाम्' (६।१।१२१) लुप् । 'नुर्जातेः' (२।४।७२) ङी, ततः 'शस्त्रजीवि०' (७।३।६२) ञ्यट्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । 'व्यञ्जनात् तद्धितस्य' (२।४।८८) यलुक् । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ ॥छ॥

## वाहीकेष्वब्राह्मण-राजन्येभ्यः ॥ ७।३।६३ ॥

**[ वाहीकेषु ]** वाहीक सप्तमी सुप् ।

**[ अब्राह्मणराजन्येभ्यः ]** ब्राह्मणाश्च राजन्याश्च = ब्राह्मणराजन्याः, न ब्राह्मणराजन्याः = अब्राह्मणराजन्याः, तेभ्यः = अब्राह्मणराजन्येभ्यः । पञ्चमी भ्यस् ।

**[ कौण्डीविश्यः, कौण्डीविश्यौ, कुण्डीविशाः ]** कुण्डी 'विशंत् प्रवेशने' (१४१५) विश् । 卐कुण्डीमपि विशन्ति । 'मूलविभुजादयः' (५।१।१४४) कप्र० → अ । जस् । कुण्डीविशाः शस्त्रजीविसङ्घः = कौण्डीविश्यः । कुण्डीविशाः शस्त्रजीविसङ्घौ = कौण्डीविश्यौ । कुण्डीविशाः शस्त्रजीविसङ्घाः = कुण्डीविशाः । अनेन ञ्यट्प्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् । सि-औ । 'बहुष्वस्त्रियाम्' (६।१।१२४) ञ्यट्लुप् । जस् ।

**[ क्षौद्रक्यः, क्षौद्रक्यौ, क्षुद्रकाः ]** क्षुद्रकाः शस्त्रजीविसङ्घः = क्षौद्रक्यः । क्षुद्रकाः शस्त्रजीविसङ्घौ = क्षौद्रक्यौ । क्षुद्रकाः शस्त्रजीविसङ्घाः = क्षुद्रकाः । अनेन ञ्यट्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् । सि-औ । 'बहुष्वस्त्रियाम्' (६।१।१२४) ञ्यट्लुप् । जस् ।

**[ मालव्यः, मालव्यौ, मालवाः ]** मालवस्यापत्यानि । 'दु-नादि-कुर्वित् कोशला-ऽजादाञ्ञ्यः' (६।१।११८) ञ्यप्र० । 'बहुष्वस्त्रियाम्' (६।१।१२४) ञ्यलुप् । मालवाः शस्त्रजीविसङ्घः = मालव्यः । मालवाः शस्त्रजीविसङ्घौ = मालव्यौ । मालवाः शस्त्रजीविसङ्घाः = मालवाः । अनेन ञ्यट्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् । सि-औ । 'बहुष्वस्त्रियाम्' (६।१।१२४) लुप् । जस् ।

**[ शबरः, शबरौ ]** शबराः शस्त्रजीविसङ्घः = शबर इत्यादि पूर्वसूत्रेणापि विकल्पे ञ्यट् प्रत्ययो न भवति ।

**[ पुलिन्दः, पुलिन्दौ ]** पुलिन्दाः शस्त्रजीविसङ्घः = पुलिन्द इत्यादि पूर्वसूत्रेणापि विकल्पे ञ्यट् प्रत्ययो न भवति ।

卐 म० वृत्तौ-कुण्ड्यां विशन्ति ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ गौपालिः, गौपाली ]** गोपालस्यापत्यानि = गौपालयः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । गौपालयः शस्त्रजीविसङ्घः = गौपालिः । गौपालयः शस्त्रजीविसङ्घौ = गौपाली । सि-औ ।

**[ शालङ्कायनः, शालङ्कायनौ ]** शलङ्कोरपत्यानि । 'क्रोष्टु-शलङ्कोर्लुक् च' (६।१।५६) आयनणप्र० → आयन-उलुक् च । 'वृद्धिः स्वरेष्वा०' (७।४।१) वृद्धिः आ । शालङ्कायनाः शस्त्रजीविसङ्घः = शालङ्कायनः । शालङ्कायनाः शस्त्रजीविसङ्घौ = शालङ्कायनौ सि-औ ।

**[ राजन्यः, राजन्यौ ]** राज्ञोऽपत्यानि = राजन्याः । 'जातौ राज्ञः' (६।१।९२) यप्र० । राजन्याः शस्त्रजीविसङ्घः = राजन्यः । राजन्याः शस्त्रजीविसङ्घौ = राजन्यौ । सि-औ ।

**[ काम्बव्यः, काम्बव्यौ, काम्बव्या ]** कम्बु मण्ड्यते । कम्बोरयं = काम्बवः । 'तस्येदम्' (६।३।१६०) अणप्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । काम्बवानां राजा - काम्बवस्यापत्यं वा । 'दु-नादि-कुर्वित्०' (६।१।११८) ञ्यप्र० । यद्वा कम्बोरपत्यानि । 'दु-नादि-कुर्वित्-कोशला०' (६।१।११८) ञ्यप्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । काम्बव्याः शस्त्रजीविसङ्घः = काम्बव्यः । काम्बव्याः शस्त्रजीविसङ्घौ = काम्बव्यौ । सि-औ । स्त्रियां तु 'आत्' (२।४।१८) आप्प्र० → आ ।

ञ्यटि तु ङीः स्यात् । ब्राह्मणप्रतिषेधे ब्राह्मणविशेषप्रतिषेधः, न हि ब्राह्मणशब्दवाच्यो वाहीकेषु शस्त्रजीविसङ्घोऽस्ति । राजन्ये तु स्वरूपविशेषस्य प्रतिषेधः । तदर्थमेव बहुवचनम् । अग्रेतनानि उदाहरणानि पूर्ववत् ज्ञेयानि ॥छ॥

## वृकाट्टेण्यण् ॥ ७।३।६४ ॥

**[ वृकात् ]** वृक पञ्चमी ङसि ।

**[ टेण्यण् ]** टेण्यण् प्रथमा सि ।

**[ वार्केण्यः, वार्केण्यौ, वृकाः, वार्केणी स्त्री ]** वृकाः शस्त्रजीविसङ्घः = वार्केण्यः । वृकाः शस्त्रजीविसङ्घौ = वार्केण्यौ । वृकाः शस्त्रजीविसङ्घाः = वृकाः । अनेन टेण्यणप्र० → एण्य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आर् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'बहुष्वस्त्रियाम्' (६।१।१२४) लुप् । स्त्रियां तु-'अणञेयेकण्-नञ्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । 'व्यञ्जनात् तद्धितस्य' (२।४।८८) यलुक् । वाहीकत्वे नित्यमवाहीकत्वे तु विकल्पेन ञ्यटि 'शस्त्रजीवि०' (७।३।६२) इत्यादिना प्राप्ते वचनम् । एवमुत्तरसूत्रत्रयमपि ॥छ॥

## यौधेयादेरञ् ॥ ७।३।६५ ॥

**[ यौधेयादेः ]** यौधेय आदिर्यस्य सः = यौधेयादिः, तस्मात् ।

**[ अञ् ]** अञ् प्रथमा सि ।

**[ यौधेयः, यौधेयौ, यौधेयाः ]** युधाया अपत्यं बहवः कुमाराः । 'द्विस्वरादनद्याः' (६।१।७१) एयणप्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् । ते शस्त्रजीविसङ्घः = यौधेयः । तौ = यौधेयौ । ते = यौधेयाः । अनेन अञ्प्र० → अ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-औ-जस् ।

**[ शौभ्रेयः ]** शुभ्रस्य अपत्यं बहवः कुमाराः । 'शुभ्रादिभ्यः' (६।१।७३) एयणप्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । ते शस्त्रजीविसङ्घः = शौभ्रेयः । अनेन अञ्प्र० → अ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ शौक्रेयः ]** शुक्ल(क्र)स्य अपत्यं बहवः कुमाराः । 'शुभ्रादिभ्यः' (६।१।७३) एयण्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । ते शस्त्रजीविसङ्घः = शौक्रेयः । अनेन अञ्प्र० → अ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ घार्त्तेयः ]** घृताया अपत्यं बहवः कुमाराः = घार्त्तेयः । 'द्विस्वरादनद्याः' (६।१।७१) एयण्प्र० → एय । अथवा घृतेरपत्यं = घार्त्तेयः । 'द्विस्वरादनद्याः' (६।१।७१) एयण्प्र० → एय । अथवा घृतेरपत्यं = घार्त्तेयः । 'इतोऽनिञः' (६।१।७२) एयण्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आर् । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य-इवर्णस्य च लुक् । ते शस्त्रजीविसङ्घः = घार्त्तेयः । अनेन अञ्प्र० → अ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ धार्त्तेयः ]** धृताया अपत्यं बहवः कुमाराः = धार्त्तेयः । 'द्विस्वरादनद्याः' (६।१।७१) एयण्प्र० → एय । अथवा धृतेरपत्यं = धार्त्तेयः । 'इतोऽनिञः' (६।१।७२) एयण्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आर् । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य-इवर्णस्य च लुक् । ते शस्त्रजीविसङ्घः = धार्त्तेयः । अनेन अञ्प्र० → अ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ ज्यावानेयः ]** ज्यावानाया अपत्यं बहवः कुमाराः । 'ङ्याप्त्यूङः' (६।१।७०) एयण्प्र० → एय । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् । ते शस्त्रजीविसङ्घः = ज्यावानेयः । अनेन अञ्प्र० → अ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् ।

अञ्वचनं 'सङ्घ-घोषा-ऽङ्क-लक्षणेऽञ्-यञिञः' (६।३।१७२) इत्यणर्थम् । तेन यौधेयस्य सङ्घादिः = यौधेयः । 'सङ्घ-घोषा०' (६।३।१७२) अण्प्र० → अ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् इति भवति, अन्यथा 'गोत्राददण्डमाणव-शिष्ये' (६।३।१६९) इत्यादिना अकञ् स्यात् ।

ननु यौधेयादयः सङ्घवचनाः कथं गोत्रं भवन्ति ? उच्यते-भर्गाद्यन्तर्गणो यौधेयादिस्तत्र येऽपत्यप्रत्ययान्तास्ते गोत्रं भवन्ति औपगवादिवत् । 'प्रकृतिग्रहणे स्वार्थिकप्रत्ययान्तानामपि ग्रहणम्' (न्या० सं० वक्ष० (२)/सूत्र(१)) इति न्यायात् । अपत्यं हि गोत्रमपत्यप्रत्ययान्ताच्च स्वार्थिकोऽप्यपत्यग्रहणेन गृह्यते । अत्र चेदमेव अञ्वचनं लिङ्गं-चिह्नमित्यर्थः ॥छा॥

## पर्श्वादेरण् ॥ ७।३।६६ ॥

**[ पर्श्वादिः ]** पर्शुरादिर्यस्य सः = पर्श्वादिः, तस्मात् ।

**[ अण् ]** अण् प्रथमा सि ।

**[ पार्शवः, पार्शवौ, पर्शवः ]** पर्शोरपत्यं बहवो माणवकाः । 'पुरु-मगध-कलिङ्ग०' (६।१।११६) अण्प्र० । 'शकादिभ्यो द्रेर्लुप्' (६।१।१२०) अण्लुप् । ते शस्त्रजीविसङ्घः-सङ्घौ-सङ्घा वा = पार्शवः, पार्शवौ, पर्शवः । अनेन अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । सि-औ । बहुत्वे 'बहुष्वस्त्रियाम्' (६।१।१२४) अण्लुप् । जस् । 'अस्येदोत्' (१।४।२२) ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

**[ राक्षसः, राक्षसौ, रक्षांसि ]** रक्षस् मण्ड्यते । रक्षसोऽपत्यं । 'पुरु-मगध-कलिङ्ग०' (६।१।११६) अण्प्र० । 'शकादिभ्यो द्रेर्लुप्' (६।१।१२०) अण्लुप् । रक्षांसि शस्त्रजीविसङ्घः-सङ्घौ-सङ्घा वा = राक्षसः, राक्षसौ, रक्षांसि । अनेन अण्प्र० → अ । सि-औ । 'शकादिभ्यो द्रेर्लुप्' (६।१।१२०) इत्यादिना अनेन विहितस्य अणो न लुप् भवत्यप्राकरणिकत्वात् । 'बहुष्वस्त्रियाम्' (६।१।१२४) इति अण्लुप् । 'पुनर्द्रिग्रहणादप्राकरणिकस्यापि तत्र ग्रहणम् । जस् । 'नपुंसकस्य शिः' (१।४।५५) जस्० → शि० → इ० । 'धुटां प्राक्' (१।४।६६) नोऽन्तः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

स्त्रियां तु-

**[ पर्शूः ]** पर्शोरपत्यं बहवो माणवकाः । 'पुरु-मगध-कलिङ्ग०' (६।१।११६) अण्प्र० । 'शकादिभ्यो द्रेर्लुप्' (६।१।१२०) अण्लुप् । ते शस्त्रजीविसङ्घः स्त्रीत्वविशिष्टेऽनेन अण्प्र० । 'द्रेरञणोऽप्राच्य-भर्गादेः' (६।१।१२३) अण्लुप् । 'उतोऽप्राणिनश्चायु-रज्ज्वादिभ्य ऊङ्' (२।४।७३) ऊङ्० → ऊ । 'समानानां तेन दीर्घः' (१।२।१) दीर्घः ।

## दामन्यादेरीयः ॥ ७।३।६७ ॥

**[ दामन्यादेः ]** दामनिरादिर्यस्य सः = दामन्यादिः, तस्मात् ।

**[ ईयः ]** ईय प्रथमा सि ।

**[ दामनीयः, दामनीयौ, दामनयः ]** दमनस्यापत्यं बहवः कुमाराः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । ते शस्त्रजीविसङ्घः-सङ्घौ-सङ्घा वा = दामनीयः, दामनीयौ, दामनयः । अनेन ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-औ । बहुत्वे 'बहुष्वस्त्रियाम्' (६।१।१२४) ईयलुप् ।

**[ औलपीयः, औलपीयौ, औलपयः ]** उपल(लप)स्यापत्यं बहवः कुमाराः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । ते शस्त्रजीविसङ्घः-सङ्घौ-सङ्घा वा = औलपीयः, औलपीयौ, औलपयः । अनेन ईयप्र० । शेषं पूर्ववत् । जस् ।

**[ ककुन्दकि ]** काकुन्दकि प्रकृतिः । पृषोदरादित्वात् ह्रस्वत्वम् । ककुन्दकि ।

गणोऽत्र ॥छ॥

## श्रुमच्छमीवच्छिखावच्छालावदूर्णावद्विदभृदभिजितो गोत्रेऽणो यञ् ॥ ७।३।६८ ॥

**[ श्रुमच्छमीवच्छिखावच्छालावदूर्णावद्विदभृदभिजितः ]** श्रुमांश्च शमीवांश्च शिखावांश्च शालावांश्च ऊर्णावांश्च विदभृच्च अभिजिच्च = श्रुमच्छमीवच्छिखावच्छालावदूर्णावद्विदभृदभिजित्, तस्मात् ।

**[ गोत्रे ]** गोत्र सप्तमी ङि ।

**[ अणः ]** अण् पञ्चमी ङसि ।

**[ यञ् ]** यञ् प्रथमा सि ।

शस्त्रजीविसङ्घादिति निवृत्तम् ।

**[ श्रौमत्यः, श्रौमत्यौ, श्रौमताः ]** श्रुरस्यास्ति = श्रुमान् । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् । श्रुमतोऽपत्यं = श्रौमत्यः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ, ततोऽनेन यञ्प्र० द्रिसंज्ञकः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-औ । 'यञञोऽश्यापर्णान्त-गोपवनादेः' (६।१।१२६) यञ्लुप् । जस् ।

**[ श्रैमत्यः, श्रैमत्यौ, श्रैमताः ]** श्रीमतोऽपत्यं = श्रैमत्यः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ, ततो मतान्तरेऽनेन यञ्प्र० । सि-औ । 'यञञोऽश्यापर्णान्त०' (६।१।१२६) यञ्लुप् ।

**[ शामीवत्यः, शामीवत्यौ, शामीवताः ]** शमी विद्यते यस्य । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् । 'मावर्णान्तोपान्तापञ्चमवर्गान् मतोर्मो वः' (२।१।९४) म० → व० । शमीवतोऽपत्यं - अपत्ये-अपत्यानि वा =

Jain Education International For Personal & Private Use Only www.jainelibrary.org

शामीवत्यः, शामीवत्यौ, शामीवताः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ, ततोऽनेन यञ्प्र० → य । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-औ । बहुत्वे 'बहुष्वस्त्रियाम्' (६।१।१२४) यञ्लुप् । जस् ।

**[ शैखावत्यः, शैखावत्यौ, शैखावताः ]** शिखा विद्यते यस्य । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् । 'मावर्णान्तोपान्तापञ्चम०' (२।१।९४) म० → व० । शिखावतोऽपत्यं - अपत्ये-अपत्यानि वा = शैखावत्यः, शैखावत्यौ, शैखावताः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ, ततोऽनेन यञ्प्र० । शेषं पूर्ववत् ।

**[ शालावत्यः, शालावत्यौ, शालावताः ]** शाला अस्यास्ति । 'तदस्याऽस्त्य०' (७।२।१) मतुप्र० → मत् । 'मावर्णान्तोपान्तापञ्चमवर्गान्०' (२।१।९४) म० → व० । शालावतोऽपत्यं - अपत्ये-अपत्यानि वा = शालावत्यः, शालावत्यौ, शालावताः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः, ततोऽनेन यञ्प्र० । शेषं पूर्ववत् ।

**[ और्णावत्यः, और्णावत्यौ, और्णावताः ]** ऊर्णा अस्यास्ति । 'तदस्याऽस्त्य०' (७।२।१) मतुप्र० → मत् । 'मावर्णान्तोपान्तापञ्चमवर्गान्०' (२।१।९४) म० → व० । ऊर्णावतोऽपत्यं - अपत्ये-अपत्यानि वा = और्णावत्यः, और्णावत्यौ, और्णावताः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः औ, ततोऽनेन यञ्प्र० । शेषं पूर्ववत् ।

**[ वैदभृत्यः, वैदभृत्यौ, वैदभृताः ]** वेद 'डुडुभृंग्क् पोषणे च' (११४०) भृ । वेदं बिभर्ति = वेदभृत् । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । वेदभृतोऽपत्यं - अपत्ये-अपत्यानि वा = वैदभृत्यः, वैदभृत्यौ, वैदभृताः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ, ततोऽनेन यञ्प्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । शेषं पूर्ववत् ।

**[ आभिजित्यः, आभिजित्यौ, आभिजिताः ]** अभि 'जिं अभिभवे' (८) जि । अभिजयतीति अभिजित् । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । अभिजितोऽपत्यं - अपत्ये-अपत्यानि वा = आभिजित्यः, आभिजित्यौ, आभिजिताः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ, ततोऽनेन यञ्प्र० → य । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । शेषं पूर्ववत् ।

**[ श्रौमतम् ]** श्रुमत इदं = श्रौमतम् । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः औ । सि-अम् ।

**[ आभिजितो मुहूर्त्तः ]** अभिजिता चन्द्रयुक्तेन युक्तो मुहूर्त्तः = आभिजितो मुहूर्त्तः । 'चन्द्रयुक्तात् काले०' (६।२।६) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः आ ।

**[ आभिजितः स्थालीपाकः ]** अभिजित् देवताऽस्य = आभिजितः स्थालीपाकः । 'देवता' (६।२।१०१) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ ।

अपत्यप्रत्ययान्तात् स्वार्थिकोऽयं यञ् अपत्ये एव वर्त्तते इति तदाश्रयः प्रत्ययो भवति ।

**[ श्रौमत्यायनः ]** अनेन पदेन निष्पन्नः श्रौमत्य मण्ड्यते । श्रौमत्यस्यापत्यं युवा = श्रौमत्यायनः । 'यञिञः' (६।१।५४) आयनण्प्र० → आयन । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ आभिजित्यायनः ]** अनेन पदेन निष्पन्नः आभिजित्य मण्ड्यते । आभिजित्यस्यापत्यं युवा = आभिजित्यायनः । 'यञिञः' (६।१।५४) आयनण्प्र० → आयन । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ श्रौमतकः ]** श्रौमत्यस्यायं = श्रौमतकः । 'गोत्राददण्डमाणव-शिष्ये' (६।३।१६९) इत्यादिना अकञ्प्र० → अक । वृद्धिः । 'तद्धितयस्वरेऽनाति' (२।४।९२) यलुक् ।

**[ आभिजितकः ]** आभिजित्यस्यायं = आभिजितकः । 'गोत्राददण्डमाणव-शिष्ये' (६।३।१६९) अकञ्प्र० → अक। वृद्धिः । 'तद्धितयस्वरेऽनाति' (२।४।९२) यलुक् ।

**[ श्रौमतकम् ]** अनेन पदेन निष्पन्नः बहुत्वे श्रौमत मण्ड्यते । श्रौमतानां समूहः = श्रौमतकम् । 'गोत्रोक्ष-वत्सोष्ट्र-वृद्धा-ऽजोरभ्र-मनुष्य-राज-राजन्य-राजपुत्रादकञ्' (६।२।१२) अकञ्प्र० → अक । वृद्धिः । 'तद्धितयस्वरेऽनाति' (२।४।९२) यलुक् ।

**[ आभिजितकम् ]** अनेन पदेन निष्पन्नः बहुत्वे आभिजित मण्ड्यते । आभिजितानां समूहः = आभिजितकम् । 'गोत्रोक्ष-वत्सोष्ट्र-वृद्धा-ऽजोरभ्र-मनुष्य-राज-राजन्य-राजपुत्रादकञ्' (६।२।१२) अकञ्प्र० → अक । वृद्धिः । 'तद्धितय०' (२।४।९२) यलुक् ।

**[ श्रौमतम् ]** श्रौमत्यस्य सङ्घादि = श्रौमतम् । 'सङ्घ-घोषा-ऽङ्क-लक्षणेऽञ्-यञिञः' (६।३।१७२) अण्प्र० → अ । वृद्धिः । 'तद्धितय०' (२।४।९२) यलुक् ।

**[ आभिजितम् ]** आभिजित्यस्य सङ्घादि = आभिजितम् । 'सङ्घ-घोषा-ऽङ्क०' (६।३।१७२) अण्प्र० → अ । वृद्धिः । 'तद्धितय०' (२।४।९२) यलुक् ॥छ॥

### समासान्तः ॥ ७।३।६९ ॥

**[ समासान्तः ]** समासस्य अन्तः = समासान्तः । प्रथमा सि ।

अधिकारोऽयमापादपरिसमाप्तेः । ननु समासग्रहणं किमर्थम् ? अत इति सूत्रं क्रियते, यतोऽन्त इत्यधिकारे सति अग्रेतनाः प्रत्ययाः समासाद्विधीयमानाः सर्वेऽपि, अतः स्वयमेव समास इति लब्धम् । उच्यते-समासग्रहणं विस्पष्टार्थम् । कैः समासैः प्रयोजनम् ? बहुव्रीह्यव्ययीभावद्विगुद्वन्द्वसंज्ञाः ।

**[ सुजम्भे सुजम्भानौ स्त्रियौ ]** जम्भ-जम्भु सुपूर्व० । शोभनो जम्भो जम्भवो ययोः ते । 'सु-हरित-तृण-सोमाज्जम्भात्' (७।३।१४२) अन्प्र० । 'ताभ्यां वाऽऽप् डित्' (२।४।१५) डित् आप्प्र० → आ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अ-उलुक् । औ । 'औता' (१।४।२०) ए । जम्भशब्दोऽभ्यवहार्यो दंष्ट्रावचनो वा । शोभनो जम्भा ययोः ते । 'सु-हरित-तृण-सोमाज्जम्भात्' (७।३।१४२) अन्प्र० । 'समानानां०' (१।२।१) दीर्घः । औ स्त्रियौ । अत्रानो बहुव्रीहिग्रहणेन ग्रहणात् डाप् । 'अनो वा' (२।४।११) इत्यनेन ङीविकल्पः सिद्धः ।

**[ उपधुरम् ]** धुरः समीपम् = उपधुरम् । 'धुरोऽनक्षस्य' (७।३।७७) अत्समासान्तः → अ । प्रथमा सि । 'अमव्ययीभावस्याऽतोऽपञ्चम्याः' (३।२।२) सि० → अम्० । 'समानादमोऽतः' (१।४।४६) अलुक् ।

**[ उपशरदम् ]** शरदः समीपम् = उपशरदम् । 'शरदादेः' (७।३।९२) समीपेऽर्थे अत्समासान्तः → अ । प्रथमा सि । 'अमव्ययीभावस्याऽतोऽपञ्चम्याः' (३।२।२) सि० → अम्० । 'समानादमोऽतः' (१।४।४६) अलुक् ।

**[ द्विधुरी ]** द्वयोर्धुरोः समाहारः = द्विधुरी । 'धुरोऽनक्षस्य' (७।३।७७) अत्समासान्तः = अ । 'द्विगोः समाहारात्' (२।४।२२) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ त्रिधुरी ]** त्रयाणां धुरां समाहारः = त्रिधुरी । 'धुरोऽनक्षस्य' (७।३।७७) अत्समासान्तः → अ । 'द्विगोः समाहारात्' (२।४।२२) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

**[ वाग्दृषदिनी ]** वाक् च दृषच्च = वाग्दृषदम् । 'चवर्ग-द-ष-हः समाहारे' (७।३।९८) अत्समासान्तः → अ । वाग्दृषदमस्यास्ति = वाग्दृषदिनी । 'प्राणिस्थादस्वाङ्गाद् द्वन्द्व-रुग्-निन्द्यात्' (७।२।६०) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'स्त्रियां नृतोऽस्वस्रादेर्ङीः' (२।४।१) ङी ।

**[ स्रक्त्वचिनी ]** स्रक् च त्वक् च = स्रक्त्वचम् । 'चवर्ग-द-ष-हः समाहारे' (७।३।९८) अत्समासान्तः → अ । स्रक्त्वचमस्यास्ति = स्रक्त्वचिनी । 'प्राणिस्थादस्वाङ्गाद् द्वन्द्व-रुग्-निन्द्यात्' (७।२।६०) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'स्त्रियां नृतो०' (२।४।१) ङी ॥छा॥

## न किमः क्षेपे ॥ ७।३।७० ॥

**[ न ]** न प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[ किमः ]** किम् पञ्चमी ङसि ।

**[ क्षेपे ]** क्षेप सप्तमी ङि ।

**क्षेपो निन्दा ।**

**[ किंधूर्या न तथा गुर्वी ]** कुत्सिता धूः = किंधूः । 'धुरोऽनक्षस्य' (७।३।७७) इत्यस्य प्राप्तेरनेन निषेधः । प्रथमा सि । 'दीर्घङ्याब्-व्यञ्जनात् सेः' (१।४।४५) सिलुक् । 'पदान्ते' (२।१।६४) दीर्घः ऊ ।

**[ किंराजा यो न रक्षति ]** कुत्सितो राजा = किंराजा । 'राजन्-सखेः' (७।३।१०६) इत्यस्य प्राप्तेरनेन निषेधः । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ स किंसखा योऽभिद्रुह्यति ]** कुत्सितः सखा = किंसखा । 'राजन्-सखेः' (७।३।१०६) इत्यस्य प्राप्तेरनेन निषेधः । प्रथमा सि । 'ऋदुशनस्-पुरुदंशोऽनेहसश्च सेर्डाः' (१।४।८४) सि० → डा० । 'डित्यनत्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

**[ किंगौर्यो न वहति ]** कुत्सितो गौः = किंगौः । 'गोस्तत्पुरुषात्' (७।३।१०५) इत्यस्य प्राप्तेरनेन निषेधः ।

**[ किंधूः शकटम् ]** का-कुत्सिता धूरस्य शकटस्य = किंधूः ।

**[ किमक्षिर्ब्राह्मणः ]** के-कुत्सितेऽक्षिणी यस्य = किमक्षिर्ब्राह्मणः । 'सक्थ्यक्ष्णः स्वाङ्गे' (७।३।१२६) इत्यनेन टो न भवति ।

**[ कुराजः ]** कुत्सितो राजा = कुराजः । 'राजन्-सखेः' (७।३।१०६) अट्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् । 'गति-क्वन्यस्तत्पुरुषः' (३।१।४२) इत्यादिना समासः ।

**[ दुःसखः ]** दुष्टः सखा = दुःसखः । 'राजन्-सखेः' (७।३।१०६) अट्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । 'दुर्निन्दा कृच्छ्रे' (३।१।४३) इत्यादिना समासः ।

**[ किंसखः ]** कस्य सखा = किंसखः । 'राजन्-सखेः' (७।३।१०६) अट्समासान्तः → अ ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ किंगवः ]** कस्य केषां वा गौः = किंगवः । 'गोस्तत्पुरुषात्' (७।३।१०५) अट्समासान्तः → अ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

## नञ्तत्पुरुषात् ॥ ७।३।७१ ॥

**[ नञ्तत्पुरुषात् ]** नञा तत्पुरुषः = नञ्तत्पुरुषस्तस्मात् ।

**[ अनृक् ]** न ऋक् = अनृक् । 'अन् स्वरे' (३।२।१२९) अन् ।

**[ अराजा ]** न राजा = अराजा । 'नञत्' (३।२।१२५) न० → अ० । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः ।

**[ असखा ]** न सखा = असखा । 'नञत्' (३।२।१२५) न० → अ० । सि । 'ऋदुशनस्०' (१।४।८४) सि० → डा० । 'डित्यन्त्यस्वरादेः' (२।१।११४) इलुक् ।

**[ अपन्थाः ]** न पन्थाः = अपन्थाः । 'नञत्' (३।२।१२५) न० → अ० । प्रथमा सि । 'थो न्थ्' (१।४।७८) न्थ्० । 'पथिन्-मथिनृभुक्षः सौ' (१।४।७६) आ । 'रः पदान्ते विसर्गस्तयोः' (१।३।५३) विसर्गः ।

**[ अपथम् ]** न पथः = अपथम् । "पथः संख्याव्ययोत्तरः" इति नपुंसकत्वमित्युक्तं लिङ्गे । न पथमपथम् । सि-अम् ।

**[ कुपथम् ]** कुत्सितः पथः = कुपथम् ।

**[ अधुरं शकटम् ]** न विद्यते धूरस्य = अधुरं शकटम् । 'धुरोऽनक्षस्य' (७।३।७७) अत्समासान्तः → अ । 'एकार्थं चाऽनेकं च' (३।१।२२) इत्यादिना समासः ।

**[ अपथोऽयमुद्देशः ]** न विद्यते पन्था यत्र = अपथः । 'ऋक्-पूः-पथ्यपोऽत्' (७।३।७६) अत्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) इन्लुक, अयमुद्देशः ।

**[ अराजं वर्त्तते ]** राज्ञामभावः = अराजम् । 'राजन्-सखेः' (७।३।१०६) अट्समासान्तः → अ ('अनः' (७।३।८८) अत्समासान्तः) । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् ॥छा॥

## पूजास्वतेः प्राक् टात् ॥ ७।३।७२ ॥

**[ पूजास्वतेः ]** सुश्च अतिश्च = स्वती । पूजायां स्वति(ती) = पूजास्वति(ती), तस्मात् ।

**[ प्राक् ]** प्राक् प्रथमा सि ।

**[ टात् ]** ट पञ्चमी ङसि ।

**[ सुधूः ]** शोभना धूः = सुधूः । प्रथमा सि । 'दीर्घङ्याब्-व्यञ्जनात् सेः' (१।४।४५) सिलुक् । 'पदान्ते' (२।१।६४) दीर्घः ।

**[ अतिधूः ]** अतिशायिनी धूः = अतिधूः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'पदान्ते' (२।१।६४) दीर्घः ।

**[ सुराजा ]** शोभनो राजा = सुराजा । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः ।

**[ अतिराजा ]** अतिशयितो राजा = अतिराजा । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः ।

**[ सुधूः शकटम् ]** शोभनो(ना) धूर्यत्र तत् = सुधूः शकटम् । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'पदान्ते' (२।१।६४) दीर्घः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ अतिधूः शकटम् ]** अतिक्रान्ता धूर्येन तद् = अतिधूः शकटम् । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'पदान्ते' (२।१।६४) दीर्घः ।

**[ सुसखा ]** पूजितः सखा = सुसखा । प्रथमा सि । 'ऋदुशनस्०' (१।४।८४) सि० → डा० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

**[ अतिसखा ]** पूजितः सखा = अतिसखा ।

**[ सुगौः ]** पूजितो गौः = सुगौः ।

**[ अतिगौः ]** पूजितो गौः = अतिगौः ।

**[ अतिराजः ]** अतिक्रान्तो राजानमतिराजः । 'राजन्-सखेः' (७।३।१०६) अट्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् ।

**[ अतिसखः ]** अतिक्रान्तः सखायम् = अतिसखः । 'राजन्-सखेः' (७।३।१०६) अट्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ अतिगवः ]** अतिक्रान्तो गामतिगवः । 'गोस्तत्पुरुषात्' (७।३।१०५) अट्समासान्तः → अ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । 'अतिरतिक्रमे च' (३।१।४५) समासः ।

**[ परमधुरा ]** परमा चासौ धूश्च = परमधुरा । 'धुरोऽनक्षस्य' (७।३।७७) अत्समासान्तः → अ । 'आत्' (२।४।१८) आप्प्र० → आ । 'सन्महत्परमोत्तमोत्कृष्टं पूजायाम्' (३।१।१०७) इत्यादिना समासः ।

**[ परमराजः ]** परमश्चासौ राजा च = परमराजः । 'राजन्-सखेः' (७।३।१०६) अट्समासान्तः → अ । 'सन्महत्परमो०' (३।१।१०७) इत्यादिना समासः ।

**[ परमसखः ]** परमश्चासौ सखा च = परमसखः । 'राजन्-सखेः' (७।३।१०६) अट्समासान्तः → अ । 'सन्महत्परमोत्तमो०' (३।१।१०७) इत्यादिना समासः ।

**[ परमगवः ]** परमश्चासौ गौश्च = परमगवः । 'गोस्तत्पुरुषात्' (७।३।१०५) अट्समासान्तः → अ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । 'सन्महत्परमोत्तमोत्कृष्टं०' (३।१।१०७) इत्यादिना समासः ।

**[ स्वङ्गुलं काष्ठम् ]** शोभना अङ्गुलयो यत्र काष्ठे तत् = स्वङ्गुलं काष्ठम् । 'बहुव्रीहेः काष्ठे टः' (७।३।१२५) टप्र० → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ अत्यङ्गुलं काष्ठम् ]** पूजिता अङ्गुलयो यस्य तद् = अत्यङ्गुलं काष्ठम् । 'बहुव्रीहेः काष्ठे टः' (७।३।१२५) टप्र० → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ सुसक्थः, अतिसक्थः ]** पूजितं सक्थि यस्य सः = सुसक्थः, अतिसक्थः । 'सक्थ्यक्ष्णः स्वाङ्गे' (७।३।१२६) टप्र० → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ स्वक्षः, अत्यक्षः ]** पूजिते अक्षिणी यस्य सः = स्वक्षः, अत्यक्षः । 'सक्थ्यक्ष्णः स्वाङ्गे' (७।३।१२६) टप्र० → अ ॥छा॥

### बहोर्डे ॥ ७।३।७३ ॥

**[ बहोः ]** बहु पञ्चमी ङसि ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ डे ]** ड सप्तमी ङि ।

**[ आसन्नबहव: ]** आसन्ना बहवो येषां ते = आसन्नबहव: । 'आसन्ना-ऽदूरा-ऽधिका-ऽध्यर्द्धा-ऽर्द्धादिपूरणं द्वितीयाद्यन्यार्थे' (३।१।२०) इत्यादिना बहुव्रीहि: समास: । जस् । 'जस्येदोत्' (१।४।२२) ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

**[ उपबहव: ]** उप-समीपे बहवो येषां ते = उपबहव: । 'अव्ययम्' (३।१।२१) इत्यनेन समास: । जस् । 'जस्येदोत्' (१।४।२२) ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

संख्यार्थेन 'प्रमाणी-संख्याड्ड:' (७।३।१२८) इत्यस्य प्राप्तौ 'शेषाद् वा' (७।३।१७५) कचपि न भवति ।

**[ उपदशा: ]** उप-समीपे दश येषां ते = उपदशा: । 'प्रमाणी-संख्याड्ड:' (७।३।१२८) डप्र० → अ । 'डित्यन्त्यस्वरादे:' (२।१।११४) अन्लुक् । जस् ।

**[ प्रियबहुक: ]** प्रिया बहवोऽस्य = प्रियबहुक: । 'एकार्थं चानेकं च' (३।१।२२) इति सामान्यसमास:, तत: 'प्रमाणी-संख्याड्ड:' (७।३।१२८) इत्यत्र प्रतिपदोक्तबहुव्रीहेर्ग्रहणात् बहोर्वैपुल्यर्थत्वेन वा संख्यात्वाभावे ड: समासान्तो न भवति, किन्तु 'शेषाद् वा' (७।३।१७५) कच् भवति ॥छा॥

## इच् युद्धे ॥ ७।३।७४ ॥

**[ इच् ]** इच् प्रथमा सि ।

**[ युद्धे ]** युद्ध सप्तमी ङि ।

**[ केशाकेशि ]** केशेषु च (२) आदाय कृतं युद्धं = केशाकेशि । अनेन इच्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'इच्यस्वरे दीर्घ आच्च' (३।२।७२) दीर्घ: । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । एवमग्रेऽपि ज्ञेयम् ।

**[ दण्डादण्डि ]** दण्डैश्च (२) मिथ: प्रहृत्य कृतं युद्धं = दण्डादण्डि । अनेन इच्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'इच्यस्वरे०' (३।२।७२) दीर्घ: ।

**[ मुसलामुसलि ]** मुसलैश्च (२) मिथ: प्रहृत्य कृतं युद्धं = मुसलामुसलि । अनेन इच्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'इच्यस्वरे०' (३।२।७२) दीर्घ: ।

**[ मुष्टामुष्टि ]** मुष्टिभिश्च (२) प्रहृत्य कृतं युद्धं = मुष्टामुष्टि । अनेन इच्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'इच्यस्वरे०' (३।२।७२) दीर्घ: ।

**[ अस्यसि ]** असिना च असिना च मिथ: प्रहृत्य कृतं युद्धम् = अस्यसि । अनेन इच्प्र० → इ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ॥छा॥

## द्विदण्ड्यादि: ॥ ७।३।७५ ॥

**[ द्विदण्ड्यादि: ]** द्विदण्डि इत्येवमादिर्यस्य स: = द्विदण्ड्यादि: ।

**[ द्विदण्डि प्रहरति ]** द्वौ दण्डावस्मिन् प्रहरणे = द्विदण्डि प्रहरति । अनेन इच्समासान्त: → इ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'क्रियाविशेषणात्' (२।२।४१) इत्यनेन सर्वत्र अम् । 'अनतो लुप्' (३।२।६) लुप् । एवमग्रेऽपि ।

**[ द्विमुसलि ]** द्वौ मुसलावस्मिन् प्रहरणे = द्विमुसलि । अनेन इच्समासान्त: ।

**[ उभादन्ति ]** उभौ दन्तावस्मिन् हनने = उभादन्ति ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ उभयादन्ति ]** उभयौ दन्तावस्मिन् हनने = उभयादन्ति ।

**[ उभाबाहु ]** उभौ बाहू अस्मिन् हनने = उभाबाहु ।

**[ उभयाबाहु ]** उभये बाहवोऽस्मिन् प्रहरणे = उभयाबाहु ।

**[ उभाहस्ति पिबति ]** उभौ हस्तावस्मिन् पाने = उभाहस्ति पिबति ।

**[ उभयाहस्ति ]** उभयौ हस्तौ अस्मिन् पाने = उभयाहस्ति ।

**[ उभापाणि ]** उभौ पाणी अस्मिन् पाने = उभापाणि ।

**[ उभयापाणि ]** उभयौ पाणी अस्मिन् पाने = उभयापाणि ।

**[ उभाञ्जलि ]** उभावञ्जली अस्मिन् = उभाञ्जलि ।

**[ उभयाञ्जलि ]** उभयावञ्जली अस्मिन् = उभयाञ्जलि ।

**[ उभाकर्णि शृणोति ]** उभौ कर्णौ अस्मिन् श्रवणे = उभाकर्णि शृणोति ।

**[ उभयाकर्णि ]** उभयौ कर्णावस्मिन् = उभयाकर्णि । अनेन इच्समासान्तः → इ । यथाप्राप्तं 'इच्यस्वरे दीर्घ आच्च' (३।२।७२) दीर्घः आ । सर्वत्र 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य इवर्णस्य च लुक् । 'तिष्ठद्ग्वित्यादयः' (३।१।३६) इत्यनेन समासः ।

**[ अन्तेवासि तिष्ठति ]** अन्ते वासोऽस्मिन् स्थाने = अन्तेवासि तिष्ठति । अनेन इच्समासान्तः → इ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ अन्तेवासी गुरोः ]** अन्त 'वसं निवासे' (९९९) वस् । अन्ते वसतीत्येवंशीलः = अन्तेवासी गुरोः । 'अजातेः शीले' (५।१।१५४) णिन्प्र० → इन् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । प्रथमा सि । 'इन्-हन्-पूषाऽर्यम्णः शिस्योः' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ संहितपुच्छि धावन्ति ]** संहितानि पुच्छानि अस्मिन् सरणे-गमने = संहितपुच्छि धावन्ति । अनेन इच्समासान्तः → इ ।

**[ एकपदि गच्छति ]** एकः पादोऽस्मिन् गमने = एकपदि गच्छति । अनेन इच्समासान्तः → इ । 'य-स्वरे पादः पदणि-क्य-घुटि' (२।१।१०२) ''पद्''देशः ।

**[ सपदि गच्छति ]** समानौ पादावस्मिन् गमने = सपदि । अनेन इच्समासान्तः → इ । 'य-स्वरे पादः पदणि-क्य-घुटि' (२।१।१०२) ''पद्''देशः ।

**[ आच्यपदि शेते ]** 'अञ्चू गतौ च' (१०५) अञ्च् आङ्पूर्व० । आ अञ्चनं पूर्वं । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । 'अञ्चोऽनर्चायाम्' (४।२।४६) नलुक् । 'अनञः क्त्वो यप्' (३।२।१५४) क्त्वास्थाने यप् → य । कोऽर्थः ? प्रसार्य प्राप्य वा आच्यपदि शेते । अनेन इच्समासान्तः → इ । 'य-स्वरे०' (२।१।१०२) ''पद्''देशः ।

**[ प्रोह्यपदि हस्तिनं वाहयति ]** प्रोह्यपादौ हस्तिनं वाह्यति = प्रोह्यपदि । अनेन इच्समासान्तः → इ । 'य-स्वरे०' (२।१।१०२) ''पद्''देशः ।

**[ निकुच्यकर्णि धावति ]** निकुच्य कर्णौ धावति = निकुच्यकर्णि । अनेन इजन्ताः सर्वेऽपि निपात्यन्ते । 'तिष्ठद्ग्वित्यादयः' (३।१।३६) इत्यादिना अव्ययीभावः समासः सर्वत्र ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

[ उभाबाहु ] उभौ बाहू अस्मिन् = उभाबाहु ।

विभक्त्यलुक्-पादस्य पद्भावः-समानस्य सभावश्चेत्यादि सर्वं निपातनात् सिद्धम् ।

क्रियाविशेषणाच्चान्यत्र न भवति ।

[ **द्विदण्डा** ] द्वौ दण्डावस्यां शालायां = द्विदण्डा । 'आत्' (२।४।१८) आप्प्र० → आ ।

[ **द्विमुसला** ] द्वौ मुसलावस्यां शालायां = द्विमुसला । 'आत्' (२।४।१८) आप्प्र० → आ ।।छ।।

**ऋक्-पूः-पथ्यपोऽत् ।। ७।३।७६ ।।**

[ **ऋक्पूःपथ्यपः** ] ऋक् च पूश्च पन्थाश्च अप् च = ऋक्पूःपथ्यप्, तस्मात् ।

[ **अत्** ] अत् प्रथमा सि ।

[ **अर्द्धर्चः( र्चम् )** ] ऋचोऽर्द्धम् = अर्द्धर्चम् । अनेन अत्समासान्तः → अ । 'समेंऽशेऽर्द्धं नवा' (३।१।५४) समासः । 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) अर् ।

[ **उपर्चम्** ] ऋचः समीपमुपर्चम् । 'विभक्ति-समीप-समृद्धि-व्यृद्ध्यर्थाभावा-ऽत्यया-ऽसंप्रति-पश्चात्-क्रम-ख्याति-युगपत्-सदृक्-सम्पत्-साकल्यान्तेऽव्ययम्' (३।१।३९) इत्यादिना समासः । अनेन अत्समासान्तः → अ । 'अवर्णस्ये०' (१।२।६) अर् ।

[ **सप्तर्चं सूक्तम्** ] सप्त ऋचोऽस्मिन् = सप्तर्चं सूक्तम् । अनेन अत्समासान्तः → अ । 'अवर्णस्ये०' (१।२।६) अर् ।

[ **उच्चारितर्चः** ] उच्चारिता ऋचो यत्र सः = उच्चारितर्चः । अनेन अत्समासान्तः → अ । 'अवर्णस्ये०' (१।२।६) अर् ।

[ **श्रीपुरम्** ] श्रियाः पूः-श्रीश्चासौ पूश्चेति वा = श्रीपुरम् । अनेन अत्समासान्तः → अ ।

[ **पिष्टपुरम्** ] पिष्टपुर् मांडणीयइ । पिष्टस्य पूः, पिष्टा चासौ पूश्च = पिष्टपुरम् । अनेन अत्समासान्तः → अ ।

[ **त्रिपुरम्** ] त्रयाणां पुरां समाहारः = त्रिपुरम् । उत्तरपदस्याकारन्तत्वाभावात् स्त्रीत्वाभावः, किन्तु अन्यस्तु सर्वो नपुंसकः । अनेन अत्समासान्तः → अ ।

[ **स्फीतपुरो देशः** ] स्फीता पूर्यस्मिन् देशे = स्फीतपुरो देशः । अनेन अत्समासान्तः → अ ।

[ **जलपथः** ] जल-पथिन् । जलस्य पन्थाः = जलपथः ।

[ **स्थलपथः** ] स्थले पन्थाः = स्थलपथः ।

[ **उपपथम्** ] पथः समीपमुपपथम् ।

[ **प्रतिपथम्** ] पन्थानं प्रति = प्रतिपथः(थम्) ।

[ **विशालपथं नगरम्** ] विशालः पन्था यस्मिन् = विशालपथः(थं) नगरम् । अनेन सर्वत्र अत्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) इन्लुक् ।

[ **द्वीपम्** ] द्वि-अप् मण्ड्यते । द्विर्गता आपोऽस्मिन् = द्वीपम् । अनेन अत्समासान्तः → अ । 'द्व्यन्तरनवर्णोपसर्गादप ईप्' (३।२।१०९) अप्० → ईप्० । 'समानानां तेन दीर्घः' (१।२।१) दीर्घः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ समीपम् ]** सम्-अप् । सङ्गता आपोऽस्मिन् = समीपम् । अनेन अत्समासान्तः → अ । 'द्व्यन्तरनवर्णोपसर्गादप ईप्' (३।२।१०९) अप्० → ईप् ।

**[ प्रतीपम् ]** प्रतिगता आपोऽस्मिन् = प्रतीपम् । अनेन अत्समासान्तः → अ । 'द्व्यन्तरनवर्णोपसर्गादप ईप्' (३।२।१०९) अप्० → ईप् । 'समानानां०' (१।२।१) दीर्घः ।

**[ बह्वपं तडागम् ]** बह्व्य आपो यस्मिन् तडागे = बह्वपं तडागम् । अनेन अत्समासान्तः → अ ।

पुर्-पथशब्दाभ्यां सिद्धे पुर्-पथिन् इत्येतयोरुपादानमेतद्विषये प्रयोगनिवृत्त्यर्थम् ॥छ॥

## धुरोऽनक्षस्य ॥ ७।३।७७ ॥

**[ धुरः ]** धुर् पञ्चमी ङसि ।

**[ अनक्षस्य ]** न अक्षः = अनक्षस्तस्य = अनक्षस्य । 'अन् स्वरे' (३।२।१२९) अन् ।

**[ राज्यधुरा ]** राज्यस्य धूः = राज्यधुरा । अनेन अत्समासान्तः → अ । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ रणधुरा ]** रणस्य धूः = रणधुरा । अनेन अत्समासान्तः → अ । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ द्विधुरी ]** द्वयोर्धुरोः समाहारः = द्विधुरी ।

**[ त्रिधुरी ]** तिसृणां धुरां समाहारः = त्रिधुरी । अनेन अत्समासान्तः → अ । बा''(ब)हुलमि''ति समासान्तविषये व्यञ्जनान्तायाः प्रयोगो न भवतीत्यर्थः इति स्त्रीत्वे 'द्विगोः समाहारात्' (२।४।२२) ङी ।

**[ उपधुरम् ]** धुरोः(रः) समीपमुपधुरम् । अनेन अत्समासान्तः → अ ।

**[ महाधुरं शकटम् ]** महती धूर्यत्र शकटे तत् = महाधुरं शकटम् । अनेन अत्समासान्तः → अ । 'जातीयैकार्थेऽच्वेः' (३।२।७०) डा० → आ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अत्लुक् ।

**[ अक्षधूः ]** अक्षस्य धूः = अक्षधूः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'पदान्ते' (२।१।६४) दीर्घः ।

**[ दृढधूरक्षः ]** दृढा धूर्यस्य = दृढधूः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'पदान्ते' (२।१।६४) दीर्घः । अक्षः ॥छ॥

## संख्या-पाण्डूदक्-कृष्णाद् भूमेः ॥ ७।३।७८ ॥

**[ संख्यापाण्डूदक्कृष्णात् ]** संख्या च पाण्डुश्च उदक् च कृष्णश्च = संख्यापाण्डूदक्कृष्णम्, तस्मात् ।

**[ भूमेः ]** भूमि पञ्चमी ङसि ।

**[ द्विभूमम् ]** द्वयोर्भूम्योः समाहारः = द्विभूमम् । अनेन अत्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । 'संख्या समाहारे च द्विगुश्चाऽनाम्न्ययम्' (३।१।९९) इत्यादिना समासः ।

**[ त्रिभूमम् ]** तिसृणां भूमीनां समाहारः = त्रिभूमम् । अनेन अत्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । 'संख्या समाहारे०' (३।१।९९) इत्यादिना समासः ।

**[ द्विभूमः ]** द्वे भूमी अस्य = द्विभूमः । अनेन अत्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ त्रिभूमः प्रासादः ]** तिस्रो भूमयोऽस्य = त्रिभूमः प्रासादः । अनेन अत्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ पाण्डुभूमम् ]** पाण्डुर्भूमिः = पाण्डुभूमम् । अनेन अत्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ पाण्डुभूमो देशः ]** 卐पाण्डुर्भूमिर्यस्मिन् देशे सः = पाण्डुभूमो देशः । अनेन अत्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ उदग्भूमम् ]** उदीची भूमिः = उदग्भूमम् । 'पुंवत् कर्मधारये' (३।२।५७) पुंवत्-ङीगता । अनेन अत्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ उदग्भूमो देशः ]** उदीची भूमिर्यस्मिन् देशे सः = उदग्भूमो देशः । अनेन अत्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ कृष्णभूमम् ]** कृष्णा भूमिः = कृष्णभूमम् । अनेन अत्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । 'पुंवत् कर्मधारये' (३।२।५७) पुंवत् ।

**[ कृष्णभूमो देशः ]** कृष्णा भूमिर्यस्मिन् देशे सः = कृष्णभूमो देशः । अनेन अत्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

卐卐"भूमोऽसंख्यात एकार्थे" इति पाण्डुभूमादेर्नपुंसकत्वम् ।

**[ सर्वभूमिः ]** सर्वा चासौ भूमिश्च = सर्वभूमिः । 'पूर्वकालैक-सर्व-जरत्-पुराण-नव-केवलम्' (३।१।९७) इत्यादिना समासः ॥छ॥

## उपसर्गादध्वनः ॥ ७।३।७९ ॥

**[ उपसर्गात् ]** उपसर्ग पञ्चमी ङसि ।

**[ अध्वनः ]** अध्वन् पञ्चमी ङसि ।

**[ प्राध्वं शकटम् ]** प्रगतमध्वानं = प्राध्वं शकटम् । 'प्रात्यव-परि-निरादयो गत-क्रान्त-क्रुष्ट-ग्लान-क्रान्ताद्यर्थाः प्रथमाद्यन्तैः' (३।१।४७) इत्यादिना समासः । अनेन अत्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् । सि-अम् ।

**[ प्राध्वो रथः ]** प्रगतोऽध्वानं = प्राध्वो रथः । 'प्रात्यव-परि-निरादयो०' (३।१।४७) इत्यादिना समासः । अनेन अत्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् ।

**[ उपाध्वम् ]** उपक्रान्तमध्वानमुपाध्वम् । अनेन अत्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् । सि-अम् ।

**[ निरध्वम् ]** निष्क्रान्तोऽध्वानं = निरध्वम् । अनेन अत्समासान्तः → अ । 'नोऽपदस्य०' (७।४।६१) अन्लुक् । सि-अम् ।

**[ अत्यध्वम् ]** अध्वानमतिक्रान्तमत्यध्वम् । अनेन अत्समासान्तः → अ । 'नोऽपदस्य०' (७।४।६१) अन्लुक् । सि-अम् ॥छ॥

## समवा-ऽन्धात् तमसः ॥ ७।३।८० ॥

**[ समवाऽन्धात् ]** सम् च अवश्च अन्धश्च = समवाऽन्धम्, तस्मात् ।

**[ तमसः ]** तमस् पञ्चमी ङसि ।

卐 म० वृत्तौ- पाण्डुर्भूमिरस्य ।

卐卐 हैमलिङ्गानुशासने नपुंसकलिङ्गप्रकरणेऽष्टमश्लोकम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ सन्तमसम् ]** सन्ततं तमः, सन्ततं तमसा । 'प्रात्यव-परि-निरादयो गत-क्रान्त-क्रुष्ट-ग्लान-क्रान्ताद्यर्थाः **प्रथमाद्यन्तैः**' (३।१।४७) इत्यादिना समासः । अनेन अत्समासान्तः → अ । सन्ततं तमोऽस्मिन् वा = सन्तमसम् । अनेन अत्समासान्तः → अ ।

**[ अवतमसम् ]** अवहीनं तमः, अवहीनं तमसा, अवहीनं तमोऽस्मिन् वा = अवतमसम् । अनेन अत्समासान्तः → अ ।

**[ अन्धतमसम् ]** अन्ध । अन्धं करोति । 'णिज्बहुलं नाम्नः कृगादिषु' (३।४।४२) णिच्प्र० → इ । 'त्र्यन्त्यस्वरादेः' (७।४।४३) अन्त्यस्वरादिलोपः । अन्धयतीति । 'अच्' (५।१।४९) अच्प्र० → अ । 'णेरनिटि' (४।३।८३) णिच्लुक् । अन्धं च तत्तमश्च-अन्धं तमोऽस्मिन्निति वा = अन्धतमसम् । अनेन अत्समासान्तः → अ ।

**[ अन्धतमसम्, अन्धतमसे वा ]** अन्धश्च तमश्चेति अन्धतमसम् । अनेन अत्समासान्तः → अ । समाहारे वाक्यम् । अन्धतमस औ । 'औरीः' (१।४।५६) ई । इतरेतरे वाक्यम् ।

### तप्ता-ऽन्ववाद् रहसः ॥ ७।३।८१ ॥

**[ तप्ताऽन्ववात् ]** तप्तश्च अनुश्च अवश्च = तप्ताऽन्ववम्, तस्मात् ।

**[ रहसः ]** रहस् पञ्चमी ङसि ।

**रह इति अप्रकाश्यं विजनं वा ।**

**[ तप्तरहसम् ]** तप्तं तप्ताय इवानधिगम्यं रहः = तप्तरहसम् । अनेन अत्समासान्तः → अ ।

**[ तप्तरहसः ]** तप्तं रहोऽस्येति तप्तरहसः । अनेन अत्समासान्तः → अ ।

**[ अनुरहसम् ]** अनुगतं रहोऽनुगतं रहसा वा = अनुरहसम् । अनेन अत्समासान्तः → अ ।

**[ अनुरहसः ]** अनुगतं रहोऽस्येति अनुरहसः । अनेन अत्समासान्तः → अ ।

**[ अवरहसम् ]** अवहीनं रहोऽवहीनं रहसा वा = अवरहसम् । अनेन अत्समासान्तः → अ ।

**[ अवरहसः ]** अवहीनं रहोऽस्येति वा = अवरहसः । अनेन अत्समासान्तः → अ ।।छ।।

### प्रत्यन्ववात् साम-लोम्नः ॥ ७।३।८२ ॥

**[ प्रत्यन्ववात् ]** प्रतिश्च अनुश्च अवश्च = प्रत्यन्ववम्, तस्मात् ।

**[ सामलोम्नः ]** साम च लोम च = सामलोम, तस्मात् ।

**[ प्रतिसामम् ]** प्रतिगतं साम = प्रतिसामम् । अनेन अत्समासान्तः → अ ।

**[ प्रतिसामः ]** प्रतिगतं सामास्येति प्रतिसामः । अनेन अत्समासान्तः → अ ।

**[ अनुसामम् ]** अनुगतं साम = अनुसामम् । अनेन अत्समासान्तः → अ ।

**[ अनुसामः ]** अनुगतं सामास्य = अनुसामः । अनेन अत्समासान्तः → अ ।

**[ अवसामम् ]** अवगतं साम = अवसामम् । अनेन अत्समासान्तः → अ ।

**[ अवसामः ]** अवगतं सामास्य = अवसामः । अनेन अत्समासान्तः → अ ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ प्रतिलोमम् ]** प्रतिगतानि लोमानि = प्रतिलोमम् । अनेन अत्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् ।

**[ प्रतिलोमः ]** प्रतिगतानि लोमान्यस्य = प्रतिलोमः । अनेन अत्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् ।

**[ अनुलोमम् ]** अनुगतानि लोमानि = अनुलोमम् । अनेन अत्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् ।

**[ अनुलोमः ]** अनुगतानि लोमान्यस्य = अनुलोमः । अनेन अत्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् ।

**[ अवलोमम् ]** अवगतानि लोमानि = अवलोमम् । अनेन अत्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् ।

**[ अवलोमः ]** अवगतानि लोमान्यस्य = अवलोमः । अनेन अत्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् ।

अव्ययीभावे तु परत्वात् 'नपुंसकाद् वा' (७।३।८९) इत्यनेन विकल्पः ।

**[ प्रतिसाम, प्रतिसामम् ]** साम साम प्रति, साम्नोऽभिमुखं वा = प्रतिसाम, प्रतिसामम् । 'योग्यता-वीप्सा-ऽर्थानतिवृत्ति-सादृश्ये' (३।१।४०) इत्यादिना समासः । 'लक्षणेनाऽभि-प्रत्याभिमुख्ये' (३।१।३३) इत्यादिना समासः ।

**[ अनुसाम, अनुसामम् ]** साम । सामानु सामानु, साम्नः समीपं, साम्ना तुल्यायामं वा = अनुसाम, अनुसामम् । 'योग्यता-वीप्सा-ऽर्थानतिवृत्ति-सादृश्ये' (३।१।४०) इत्यादिना समासः । 'समीपे' (३।१।३५) इत्यनेन समासः । 'दैर्घ्येऽनुः' (३।१।३४) इत्यनेन त्रयः समासा ज्ञेयाः ।

**[ अनुलोम, अनुलोमम् ]** अनुलोम २, लोमानि लोमान्यस्तु(नु), लोम्नां समीपं वा = अनुलोम, अनुलोमम् । 'नपुंसकाद् वा' (७।३।८९) इत्यनेन सर्वत्र अत्समासान्तविकल्पः । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् ।

**[ निःषाम वचनम् ]** निर्गतं निःक्रान्तं वा साम्नः = निःषाम । प्रथमा सि । 'अनतो लुप्' (१।४।५९) लुप् ।

**[ निर्लोमा पुरुषः ]** निर्गतानि निःक्रान्तानि वा लोमान्यस्य = निर्लोमा पुरुषः । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ प्रतिकर्म ]** प्रसिद्धं कर्म = प्रतिकर्म ।।छा।

## ब्रह्म-हस्ति-राज-पल्याद् वर्चसः ॥ ७।३।८३ ॥

**[ ब्रह्महस्तिराजपल्यात् ]** ब्रह्म च हस्ती च राजा च पल्यश्च = ब्रह्महस्तिराजपल्यम्, तस्मात् ।

**[ वर्चसः ]** वर्चस् पञ्चमी ङसि ।

**वर्चस्तेजो बलं वा ।**

**[ ब्रह्मवर्चसम् ]** ब्रह्मणो वर्चः = ब्रह्मवर्चसम् । अनेन अत्समासान्तः → अ । सि । 'अमव्ययीभावस्या-ऽतोऽपञ्चम्याः' (३।२।२) सि० → अम् । 'समानादमोऽतः' (१।४।४६) अलुक् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ हस्तिवर्चसम् ]** हस्तिनो वर्चः = हस्तिवर्चसम् । अनेन अत्समासान्तः → अ । सि । 'अमव्ययी०' (३।२।२) सि० → अम् । 'समानादमोऽतः' (१।४।४६) अलुक् ।

**[ राजवर्चसम् ]** राज्ञो वर्चः = राजवर्चसम् । अनेन अत्समासान्तः → अ । सि । 'अमव्ययीभाव०' (३।२।२) सि० → अम्० । 'समानादमोऽतः' (१।४।४६) अलुक् ।

**[ पल्यवर्चसम् ]** पल्यस्य वर्चः = पल्यवर्चसम् । अनेन अत्समासान्तः → अ । सि । 'अमव्ययीभावस्याऽतोऽपञ्चम्याः' (३।२।२) सि० → अम् । 'समानादमोऽतः' (१।४।४६) अलुक् ।

पल्यं कटकृतं पलालवर्त्तिकृतं वा धान्यस्य भाजनम्, हस्तिविधा वा पिण्डः ।

**[ नृपाः सोमार्कवर्चसः ]** नृपाः-प्रथमा जस् । सोमार्कवत् वर्चो येषां ते = सोमार्कवर्चसः ।

**[ कथं त्विषिमान् राजवर्चस्वीति ]** राज्ञो वर्चः = राजवर्चः । राजवर्चोऽस्यास्ति = राजवर्चस्वी । 'अस् तपो-माया-मेधा-स्रजो विन्' (७।२।४७) विन्प्र० । स् इति । समासान्तविधिरनित्यत्वात् एतच्च 'ऋक्-पूः-पथ्यपोऽत्' (७।३।७६) इति निर्देशात् सिद्धम् ॥छ॥

## प्रतेरुरसः सप्तम्याः ॥ ७।३।८४ ॥

**[ प्रतेः ]** प्रति पञ्चमी ङसि ।

**[ उरसः ]** उरस् पञ्चमी ङसि ।

**[ सप्तम्याः ]** सप्तमी पञ्चमी ङसि ।

**[ प्रत्युरसम् ]** उरसि [प्रति]वर्त्तते = प्रत्युरसम् । अनेन अत्समासान्तः → अ । विभक्त्यर्थेऽव्ययीभावः ।

**[ प्रत्युरसम् ]** उरसि प्रतिष्ठितं = प्रत्युरसम् । अनेन अत्समासान्तः → अ । 'प्रात्यव-परि-निरादयो०' (३।१।४७) इत्यादिना तत्पुरुषः ।

**[ प्रत्युरः ]** प्रतिगत उरः, उरः प्रति वा = प्रत्युरः । सि । 'अनतो लुप्' (१।४।५९) लुप् । 'प्रात्यव-परि०' (३।१।४७) इत्यादिना, 'लक्षणेनाऽभि-प्रत्याभिमुख्ये' (३।१।३३) इत्यादिना समासः क्रमेण ज्ञेयः ॥छ॥

## अक्ष्णोऽप्राण्यङ्गे ॥ ७।३।८५ ॥

**[ अक्ष्णः ]** अक्षि पञ्चमी ङसि । 'दध्यस्थिसक्थ्यक्ष्णोऽन्तस्याऽन्' (१।४।६३) अन्तस्य अन् । 'अनोऽस्य' (२।१।१०८) अलुक् ।

**[ अप्राण्यङ्गे ]** प्राणा विद्यन्ते यस्य सः = प्राणी । 'अतोऽनेक०' (७।२।६) इन् । प्राणिनोऽङ्गं = प्राण्यङ्गम् । न प्राण्यङ्गम् = अप्राण्यङ्गम्, तस्मिन् ।

**[ लवणाक्षम् ]** लवणस्याक्षि, लवणमक्षीवेति वा = लवणाक्षम् । अनेन अत्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । 'उपमेयं व्याघ्राद्यैः साम्यानुक्तौ' (३।१।१०२) इत्यनेन समासः ।

**[ पुष्कराक्षम् ]** पुष्करमक्षीव = पुष्कराक्षम् । अनेन अत्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ गवाक्षः ]** गोरक्षीव = गवाक्षः । अनेन अत्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ रुद्राक्षम् ]** रुद्रस्याक्षीव = रुद्राक्षम् । अनेन अत्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ महिषाक्षो गुग्गुलः ]** महिषस्याक्षीव = महिषाक्षो गुग्गुलः । अनेन अत्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ कचराक्षमश्वानां मुखप्रच्छदनं बहुच्छिद्रकम् ]** कचराक्षीव कचराक्षमश्वानां मुखप्रच्छादनमक्षिकाहरणं बहुच्छिद्रकम् ।

**[ अजाक्षि ]** अजाया अक्षि = अजाक्षि । सि । 'अनतो लुप्' (१।४।५९) सिलुप् ।

**[ उपाक्षि ]** अक्ष्णोः समीपम् = उपाक्षि । सि । 'अनतो लुप्' (१।४।५९) सिलुप् ।

**[ वामाक्षि ]** वामं च तदक्षि च = वामाक्षि । सि । 'अनतो लुप्' (१।४।५९) सिलुप् ॥छ॥

## सं-कटाभ्याम् ॥ ७।३।८६ ॥

**[ संकटाभ्याम् ]** सं च कटश्च = संकटौ, ताभ्यां = संकटाभ्याम् । पञ्चमी भ्याम् ।

**[ समक्षम् ]** सङ्गतमक्ष्णा = समक्षम् । अनेन अत्समासान्तः → अ । 'प्रात्यव-परि-निरादयो गत-क्रान्त-क्रुष्ट-ग्लान-क्रान्ताद्यर्थाः प्रथमाद्यन्तैः' (३।१।४७) इत्यादिना समासः । यद्वा समीपमक्ष्णः = समक्षम् । अनेन अत्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ कटाक्षः ]** कटस्याक्षि = कटाक्षः । अनेन अत्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । 'लक्षणेनाऽभि-प्रत्याभिमुख्ये' (३।१।३३) इत्यादिना समासः ।

**प्राण्यङ्गार्थं वचनम्** ॥छ॥

## प्रति-परो-ऽनोरव्ययीभावात् ॥ ७।३।८७ ॥

**[ प्रतिपरोऽनोः ]** प्रतिश्च परश्च अनुश्च = प्रतिपरोऽनु, तस्मात् ।

**[ अव्ययीभावात् ]** 'व्येंग् संवरणे' (९९३) व्ये, नपूर्व० । न व्ययति-न यातीत्यव्ययम् । 'अच्' (५।१।४९) अच्प्र० → अ । 'नञत्' (३।२।१२५) न० → अ० । 'भू सत्तायाम्' (१) भू । अनव्ययोऽव्ययो भवतीति अव्ययीभावः । 'वा ज्वलादि-दु-नी-भू-ग्रहा-ऽऽस्रोर्णः' (५।१।६२) णप्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । 'कृ-भ्वस्तिभ्यां कर्म०' (७।२।१२६) च्विप्र० । 'ईश्च्वावर्णस्या०' (४।३।१११) अ० → ई० । 'अप्रयोगीत्' (१।१।३७) च्विलुक्, तस्मात् ।

**[ प्रत्यक्षम् ]** अक्षिणी प्रति = प्रत्यक्षम् । अनेन अत्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ परोक्षम् ]** परसमानार्थः परस्शब्दोऽव्ययम् । अक्ष्णोः परं = परोक्षम् । 'राजदन्ताऽऽदिषु' (३।१।१४९) इत्यनेन परस्शब्दस्य पूर्वनिपातः । अनेन अत्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । अत्ययेऽव्ययीभावः । 'विभक्ति-समीप-समृद्धि-व्यृद्ध्यर्थाभावा-ऽत्यया०' (३।१।३९) इत्यादिना ज्ञेयः ।

**[ अन्वक्षम् ]** अक्ष्णः समीपमन्वक्षम् । अनेन अत्समासान्तः ।

**[ प्रत्यक्षोऽर्थः ]** प्रत्यक्षमत्रास्ति । 'अभ्रादिभ्यः' (७।२।४६) अप्र० । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

अक्षशब्देनेन्द्रियपर्यायेण सिद्धे प्रत्यादिभ्यः परस्याक्षि(क्ष)शब्दस्याव्ययीभावे प्रयोगो मा भूदिति वचनम् ॥छ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## अनः ॥ ७।३।८८ ॥

[ **अनः** ] अन् पञ्चमी ङसि ।

[ **उपराजम्** ] राज्ञः समीपम् = उपराजम् । अनेन अत्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् ।

[ **उपतक्षम्** ] तक्ष्णः समीपम् = उपतक्षम् । अनेन अत्समासान्तः → अ । 'नोऽपदस्य०' (७।४।६१) अन्लुक् ।

[ **अध्यात्मम्** ] आत्मन्यधि = अध्यात्मम् । अनेन अत्समासान्तः → अ । 'नोऽपदस्य०' (७।४।६१) अन्लुक् ।

[ **प्रत्यात्मम्** ] आत्मानं प्रति = प्रत्यात्मम् । अनेन अत्समासान्तः → अ । 'नोऽपदस्य०' (७।४।६१) अन्लुक् । 'लक्षणेनाऽभि-प्रत्याभिमुख्ये' (३।१।३३) इत्यादिना समासः । सि । 'अमव्ययीभावस्याऽतोऽपञ्चम्याः' (३।२।२) अम् ॥छ॥

## नपुंसकाद् वा ॥ ७।३।८९ ॥

[ **नपुंसकात्** ] नपुंसक पञ्चमी ङसि ।

[ **वा** ] वा प्रथमा सि ।

[ **उपचर्म, उपचर्मम्** ] चर्मणः समीपम् = उपचर्म । प्रथमा सि । 'अनतो लुप्' (३।२।६) सिलुप् । एवम्-उपचर्मम् । अनेन अत्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् । सि । 'अमव्ययीभाव०' (३।२।२) अम् ।

[ **प्रतिकर्म, प्रतिकर्मम्** ] कर्मणः प्रति = प्रतिकर्म । प्रथमा सि । 'अनतो लुप्' (३।२।६) सिलुप् । एवम्-उपचर्मम् । अनेन अत्समासान्तः → अ । 'नोऽपदस्य०' (७।४।६१) अन्लुक् । सि । 'अमव्ययीभाव०' (३।२।२) अम् ।

[ **प्रतिसाम, प्रतिसामम्** ] प्रतिगतं साम्नः = प्रतिसाम । प्रथमा सि । 'अनतो लुप्' (३।२।६) सिलुप् । एवम्-प्रतिसामम् । अनेन अत्समासान्तः → अ । 'नोऽपदस्य०' (७।४।६१) अन्लुक् । सि । 'अमव्ययीभावस्या०' (३।२।२) अम् ।

[ **अनुलोम, अनुलोमम्** ] अनुगतं लोम्नः = अनुलोम । प्रथमा सि । 'अनतो लुप्' (३।२।६) सिलुप् । द्वितीये अनेन अत्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् । सि । 'अमव्ययीभावस्या०' (३।२।२) अम् ।

पूर्वेण नित्ये प्राप्ते विकल्पः ॥छ॥

## गिरि-नदी-पौर्णमास्याग्रहायण्यपञ्चमवर्ग्याद् वा ॥ ७।३।९० ॥

[ **गिरिनदीपौर्णमास्याग्रहायण्यपञ्चमवर्ग्यात्** ] गिरिश्च नदी च पौर्णमासी च आग्रहायणी च अपञ्चमवर्ग्यश्च = गिरिनदीपौर्णमास्याग्रहायण्यपञ्चमवर्ग्यम्, तस्मात् ।

[ **वा** ] वा प्रथमा सि ।

[ **अन्तर्गिरम्, अन्तर्गिरि** ] गिरेरन्तः = अन्तर्गिरम्, अन्तर्गिरि । 'पारे-मध्ये-ऽग्रे-ऽन्तः षष्ठ्या वा' (३।१।३०) इत्यादिना समासः । अनेन प्रथमे अत्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । सि । 'अमव्ययीभावस्याऽतोऽपञ्चम्याः' (३।२।२) अम् । द्वितीये 'अनतो लुप्' (३।२।६) लुप् । एवमग्रेऽपि ज्ञेयम् ।

[ **उपगिरम्, उपगिरि** ] गिरेः समीपम् = उपगिरम्, उपगिरि ।

[ **उपनदम्, उपनदि** ] नद्याः समीपम् = उपनदम्, उपनदि । 'क्लीबे' (२।४।९७) ह्रस्वः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ उपपौर्णमासम्, उपपौर्णमासि ]** पूर्णो माश्चन्द्रोऽस्यां सा = पौर्णमासी । 'पूर्णमासोऽण्' (७।२।५५) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः औ । 'अणञेयेकण्-नञ्०' (२।४।२०) ङी । पौर्णमास्या उप-समीपम् = उपपौर्णमासम्, उपपौर्णमासि ।

**[ उपाग्रहायणम्, उपाग्रहायणि ]** अग्रं हायनस्य = अग्रहायन्:(णः) । अग्रहायने(णे)न मृगशिरसा युक्ता पू(पौ)र्णमासी । 'चन्द्रयुक्तात् काले०' (६।२।६) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । आग्रहायण्या उप-समीपम् = उपाग्रहायणम्, उपाग्रहायणि । शेषं पूर्ववत् ।

अपञ्चमवर्ग्य - **[ उपस्रुचम्, उपस्रुक् ]** स्रुचः समीपम् = उपस्रुचम्, उपस्रुक् ।

**[ अधिस्रजम्, अधिस्रक् ]** अधि स्रजि निधेहि = अधिस्रजम्, अधिस्रक् ।

**[ उपैडविडम्, उपैडविड् ]** इडविडोऽपत्यं स्त्री । 'राष्ट्र-क्षत्रियात् सरूपाद् राजाऽपत्ये द्रिरञ्' (६।१।११४) अञ्प्र० । 'द्रेरञणोऽप्राच्य-भर्गादेः' (६।१।१२३) स्त्रियां लुप् । इडविडः समीपम् = उपैडविडम् । अनेन अत्समासान्ते सति 'जातिश्च णि-तद्धितय-स्वरे' (३।२।५१) इत्यनेन पुंवद्भावे अञो लुप् निवृत्तिः, ततो वर्गान्तत्वाभावान्न भवति पुंवद्भाव एव चास्य फलम् । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । एवम्-उपैडविट् । अत्र न कश्चित् प्रत्ययः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् ।

**[ प्रतिमरुतम्, प्रतिमरुत् ]** मरुतं प्रति = प्रतिमरुतम् । अनेन अत्समासान्तः → अ । 'लक्षणेनाऽभि-प्रत्याभिमुख्ये' (३।१।३३) इत्यादिना समासः । सि । 'अमव्ययीभाव०' (३।२।२) अम् ।

**[ उपदृषदम्, उपदृषद् ]** दृषदः समीपम् = उपदृषदम् । अनेन अत्समासान्तः → अ । सि । 'अमव्ययी०' (३।२।२) अम् ।

**[ उपसमिधम्, उपसमित् ]** समिधः समीपम् = उपसमिधम् । अनेन अत्समासान्तः → अ । सि । 'अमव्ययीभाव०' (३।२।२) अम् ।

**[ उपककुभम्, उपककुब् ]** ककुभः समीपम् = उपककुभम् । अनेन अत्समासान्तः → अ । सि । 'अमव्ययीभावस्याऽतोऽपञ्चम्याः' (३।२।२) अम् ॥छ॥

## संख्याया नदी-गोदावरीभ्याम् ॥ ७।३।९१ ॥

**[ संख्यायाः ]** संख्या पञ्चमी ङसि ।

**[ नदीगोदावरीभ्याम् ]** नदी च गोदावरी च = नदीगोदावर्यौ, ताभ्यां = नदीगोदावरीभ्याम् । पञ्चमी भ्याम् ।

**[ पञ्चनदम् ]** पञ्च नद्यः समाहृताः = पञ्चनदम् । 'संख्या समाहारे' (३।१।२८) इत्यनेन समासः । अनेन अत्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् ।

**[ सप्तनदम् ]** सप्त नद्यः समाहृताः = सप्तनदम् । अनेन अत्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । 'संख्या समाहारे' (३।१।२८) इत्यनेन समासः ।

**[ द्विगोदावरम् ]** गोद 'वृग्ट् वरणे' (१२९४) वृ । गोदा आवृणोतीति गोदावरी । 'लिहादिभ्यः' (५।१।५०) अच्प्र० → अ । 'गौरादिभ्यो मुख्यान्ङीः' (२।४।१९) ङी । द्वे गोदावर्यौ समाहृते = द्विगोदावरम् । अनेन अत्समासान्तः → अ । शेषं पूर्ववत् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ त्रिगोदावरम् ]** तिस्रो गोदावर्यः समाहृताः = त्रिगोदावरम् । अनेन अत्समासान्तः → अ । शेषं पूर्ववत् ।

**[ उपनदि ]** नद्याः समीपम् = उपनदि । 'क्लीबे' (२।४।९७) ह्रस्वः ।

**[ एकनदी ]** एका नदी = एकनदी । 'सर्वादयोऽस्यादौ' (३।२।६१) पुंवद्भावः ।

इह नदीग्रहणं नित्यार्थम् ।।छ।।

## शरदादेः ॥ ७।३।९२ ॥

**[ शरदादेः ]** शरत् आदिर्यस्य सः = शरदादिः, तस्मात् ।

**[ उपशरदम् ]** शरदः समीपम् = उपशरदम् । अनेन अत्समासान्तः → अ । सि । 'अमव्ययीभाव०' (३।२।२) अम् ।

**[ परमशरद्( त् ) ]** परमा चासौ शरच्च = परमशरत् । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् ।।छ।।

## जराया जरस् च ॥ ७।३।९३ ॥

**[ जरायाः ]** जरा पञ्चमी ङसि ।

**[ जरस् ]** जरस् प्रथमा सि ।

**[ च ]** च प्रथमा सि ।

**[ उपजरसम् ]** जरायाः समीपम् = उपजरसम् । अनेन अत्समासान्तः → अ-जराशब्दस्य जरस्आदेशश्च । सि । 'अमव्ययीभाव०' (३।२।२) अम् ।

**[ प्रतिजरसम् ]** जरां(२) प्रति = प्रतिजरसम् । अनेन अत्समासान्तः → अ-जराशब्दस्य जरस्आदेशश्च । सि । 'अमव्ययीभाव०' (३।२।२) अम् ।।छ।।

## सरजसोपशुनानुगवम् ॥ ७।३।९४ ॥

**[ सरजसोपशुनानुगवम् ]** सरजसश्च उपशुनश्च अनुगवश्च = सरजसोपशुनानुगवम् ।

**[ सरजसमभ्यवहरति ]** सह रजसा = सरजसम् । अनेन अत्समासान्तः → अ । सहस्य स० । 'क्रियाविशेषणात्' (२।२।४१) अम् । साकल्येऽव्ययीभावः ।

**[ उपशुनं तिष्ठति ]** शुनः समीपम् = उपशुनम् । अनेन अत्समासान्तः → अ-वस्य उत्वं च निपात्यते । 'विभक्ति-समीप-समृद्धि०' (३।१।३९) इत्यादिना अव्ययीभावः समासः ।

**[ अनुगवम् ]** गोः समीपम्, गामन्वायतम् = अनुगवम् । अनेन अत्समासान्तः → अ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । 'दैर्घ्येऽनुः' (३।१।३४) इत्यव्ययीभावः ।

दैर्घ्यादन्यत्र न भवति ।

**[ अनुगु यानम् ]** गवां पश्चात् = अनुगु ।।छ।।

## जात-महद्-वृद्धादुक्ष्णः कर्मधारयात् ॥ ७।३।९५ ॥

**[ जातमहद्वृद्धात् ]** जातश्च महच्च वृद्धश्च = जातमहद्वृद्धम्, तस्मात् ।

**[ उक्ष्णः ]** उक्षन् पञ्चमी ङसि । 'अनोऽस्य' (२।१।१०८) अलुक् । 'र-षृवर्णान्नो ण एकपदेऽनन्त्यस्या०' (२।३।६३) णत्वम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ कर्मधारयात् ]** कर्मधारय पञ्चमी ङसि ।

**[ जातोक्षः ]** जातश्चासावुक्षा च = जातोक्षः । अनेन अत्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् ।

**[ महोक्षः ]** महांश्चासौ उक्षा च = महोक्षः । अनेन अत्समासान्तः → अ । 'जातीयैकार्थेऽच्वेः' (३।२।७०) डा० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अत्लुक् । 'नोऽपदस्य०' (७।४।६१) अन्लुक् ।

**[ वृद्धोक्षः ]** वृद्धश्चासावुक्षा च = वृद्धोक्षः । अनेन अत्समासान्तः → अ । 'नोऽपदस्य०' (७।४।६१) अन्लुक् । 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) ओ ।

**[ परमोक्षा ]** परमश्चासावुक्षा च = परमोक्षा । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ उत्तमोक्षा ]** उत्तमश्चासावुक्षा च = उत्तमोक्षा । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ महाश्मश्रु ]** महच्च तत् श्मश्रु च = महश्मश्रु । सि । 'अनतो लुप्' (१।४।५९) लुप् ।

**[ जातोक्षा ]** जातस्योक्षा = जातोक्षा । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ महदुक्षा ]** महत् उक्षा = महदुक्षा । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ वृद्धोक्षा ]** वृद्धस्य उक्षा = वृद्धोक्षा । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।।छ।।

### स्त्रियाः पुंसो द्वन्द्वाच्च ।। ७।३।९६ ।।

**[ स्त्रियाः ]** स्त्री पञ्चमी ङसि । 'स्त्रियाः' (२।१।५४) इय् ।

**[ पुंसः ]** पुम्स् पञ्चमी ङसि । 'शिड्-हेऽनुस्वारः' (१।३।४०) अनुस्वारः ।

**[ द्वन्द्वात् ]** द्वन्द्व पञ्चमी ङसि ।

**[ च ]** च प्रथमा सि ।

**[ स्त्रीपुंसम्, स्त्रीपुंसौ, स्त्रीपुंसाः ]** स्त्री च पुमांश्च = स्त्रीपुंसम् । स्त्रियौ च पुमांसौ च = स्त्रीपुंसौ । स्त्रियश्च पुमांसश्च = स्त्रीपुंसाः । अनेन अत्समासान्तः → अ । सि-औ-जस् ।

**[ स्त्रीपुंसः शिखण्डी ]** स्त्री चासौ पुमांश्च = स्त्रीपुंसः । अनेन अत्समासान्तः → अ । शिखण्डी-गाङ्गेयघाती महाभारते इत्युक्तम् ।

अग्रेतने "स्त्रीपुंसं विद्धि राक्षसम्" इत्यत्र साधना पूर्ववत् । अम् ।

**[ स्त्रीपुमान् ]** स्त्रियाः पुमान् । 'पुंसोः पुमन्स्' (१।४।७३) पुमन्स् । 'न्स्महतोः' (१।४।८६) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'पदस्य' (२।१।८९) सलुक् ।।छ।।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## ऋक्सामर्ग्यजुष-धेन्वनडुह-वाङ्मनसा-ऽहोरात्र-रात्रिंदिव-नक्तंदिवा-ऽहर्दिवोर्वष्ठीव-पदष्ठीवा-ऽक्षिभ्रुव-दारगवम् ॥ ७।३।९७ ॥

**[ ऋक्सामर्ग्यजुषधेन्वनडुहवाङ्मनसाऽहोरात्ररात्रिंदिवनक्तंदिवाऽहर्दिवोर्वष्ठीवपदष्ठीवाऽक्षिभ्रुवदारगवम् ]** ऋक्सामश्च ऋग्यजुषश्च धेन्वनडुहश्च वाङ्मनसश्च अहोरात्रश्च रात्रिंदिवश्च नक्तंदिवश्च अहर्दिवश्च उर्वष्ठीवश्च पदष्ठीवश्च अक्षिभ्रुवश्च दारगवश्च = ऋक्सामर्ग्यजुषधेन्वनडुहवाङ्मनसाऽहोरात्ररात्रिंदिवनक्तंदिवाऽहर्दिवोर्वष्ठीवपदष्ठीवाऽक्षिभ्रुवदारगवम् ।

**[ ऋक्सामे ]** ऋक् च साम च = ऋक्सामे । 'न दधिपयआदिः' (३।१।१४५) - संख्याने (३।१।१४६) इत्यनेन समाहारनिषेधः । अनेन अत्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् । 'औरीः' (१।४।५६) ई ।

**[ ऋग्यजुषमधीयानान् ]** ऋक् च यजुश्च = ऋग्यजुषम् । अनेन अत्समासान्तः । अम् । 'इंङ्क् अध्ययने' (११०४) इ, अधिपूर्व० ·। अधीयते । 'शत्रानशावेष्यति तु सस्यौ' (५।२।२०) आनश्प्र० → आन । 'धातोरिवर्णोवर्णस्येयुव्०' (२।१।५०) इय् । द्वितीया शस् ।

**[ धेन्वनडुहौ ]** धेनुश्च अनड्वांश्च = धेन्वनडुहौ । अनेन अत्समासान्तः । औ ।

**[ धेन्वनडुहाः ]** धेनवश्च अनडुहश्च = धेन्वनडुहः । अनेन अत्समासान्तः → अ । जस् ।

असमाहारार्थं धेन्वनडुहग्रहणम् ।

**[ वाङ्मनसे ]** वाक् च मनश्च = वाङ्मनसे । अनेन अत्समासान्तः → अ । 'औरीः' (१।४।५६) ई ।

**[ अहोरात्रः ]** अहश्च रात्रिश्च = अहोरात्रः । अनेन अत्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ रात्रिंदिवम् ]** रात्रिश्च दिवा च = रात्रिंदिवम् । अनेन अत्समासान्तः → अ-मागमश्च । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । अम् ।

**[ रात्रिंदिवानि पश्यति ]** रात्रयश्च दिवा च = रात्रिंदिवानि पश्यति । अनेन अत्समासान्तः → अ-मागमश्च । द्वितीया शस् । 'नपुंसकस्य शिः' (१।४।५५) शस्० → शि० → इ० । 'स्वराच्छौ' (१।४।६५) नोऽन्तः । 'नि दीर्घः' (१।४।८५) दीर्घः ।

**[ नक्तंदिवम् ]** नक्तं च दिवा च = नक्तंदिवम् । अनेन अत्समासान्तः → अ । अत्रापि मोऽन्तः ।

**[ अहर्दिवम् ]** अहश्च दिवा च = अहर्दिवम् । अनेन अत्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

पर्याययोरपि वीप्सायां द्वन्द्वो निपातनात् अहरहरित्यर्थः ।

**[ ऊर्वष्ठीवम् ]** ऊरू च अष्ठीवन्तौ च = ऊर्वष्ठीवम् । अनेन अत्समासान्तः → अ । निपातनादन्त्यस्वरादिलोपः ।

**[ पदष्ठीवम् ]** पादौ च अष्ठीवन्तौ च = पदष्ठीवम् । अनेन अत्समासान्तः → अ । निपातनादन्त्यस्वरादिलोपः-पद्भावश्च ।

**[ अक्षिभ्रुवम् ]** अक्षिणी च भ्रुवौ च = अक्षिभ्रुवम् । अनेन अत्समासान्तः → अ । उव् ।

**[ दारगवम् ]** दाराश्च गावश्च = दारगवम् । अनेन अत्समासान्तः → अ । अत्र निपातनात् भ्रुव उवादेशोऽक्षि-दारशब्दयोश्च पूर्वनिपातः ।

**[ ऋक्सामा मुग्धः ]** ऋक् साम यस्य सः = ऋक्सामा । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ ऋग्यजुः ]** ऋग्यजुर्यस्य सः = ऋग्यजुः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् ।

**[ धेन्वनड्वान् ]** धेनोरनड्वान् = धेन्वनड्वान् । प्रथमा सि । 'अनडुहः सौ' (१।४।७२) नोऽन्तः । 'वाः शेषे' (१।४।८२) वा । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'पदस्य' (२।१।८९) हलुक् ॥छ॥

## चवर्ग-द-ष-हः समाहारे ॥ ७।३।९८ ॥

**[ चवर्गदषहः ]** चवर्गश्च दश्च षश्च ह् च = चवर्गदषह, तस्मात् ।

**[ समाहारे ]** समाहार सप्तमी ङि ।

**[ वाक्त्वचम् ]** वाक् च त्वक् च = वाक्त्वचम् । अनेन अत्समासान्तः → अ ।

**[ वाक्समुच्छम् ]** सम् 'उछैत् विवासे' (१३४) उच्छ् । समुच्छतीति समुच्छ् । 'मन्-वन्-क्वनिप्-विच् क्वचित्' (५।१।१४७) विच्प्र० । 'अप्रयोगीत्' (१।१।३७) विच्लोपः । वाक् च समुच्छ् च = वाक्समुच्छम् । अनेन अत्समासान्तः → अ ।

**[ श्रीस्रजम् ]** श्रीश्च स्रज्(क्) च = श्रीस्रजम् । अनेन अत्समासान्तः → अ ।

**[ समिद्दृषदम् ]** समिच्च दृषच्च = समिद्दृषदम् । अनेन अत्समासान्तः → अ ।

**[ संपद्विपदम् ]** संपच्च विपद् च = संपद्विपदम् । अनेन अत्समासान्तः → अ ।

**[ वाक्त्विषम् ]** वाक् च त्विष्(ट्) च = वाक्त्विषम् । अनेन अत्समासान्तः → अ ।

**[ वाग्विप्रुषम् ]** वाक् च विप्रुष्(ट्) च = वाग्विप्रुषम् । अनेन अत्समासान्तः → अ ।

**[ छत्रोपानहम् ]** छत्रं च उपानह् च = छत्रोपानहम् । अनेन अत्समासान्तः → अ ।

**[ गोगोदुहम् ]** गौश्च गोदुह् च = गोगोदुहम् । अनेन अत्समासान्तः → अ ।

**[ छत्रोपानहिनी ]** छत्रं च उपानह् च । अनेन अत्समासान्तः → अ । छत्रोपानहोऽस्यास्ति = छत्रोपानहिनीति । 'प्राणिस्थादस्वाङ्गाद्०' (७।२।६०) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'स्त्रियां नृतोऽस्वस्रादेर्ङीः' (२।४।१) ङी ।

**[ दृषत्समित् ]** दृषच्च समिच्च । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'धुटस्तृतीयः' (२।१।७६) ध० → द० । 'विरामे वा' (१।३।५१) द० → त० ।

**[ यकृन्मेदः ]** यकृच्च मेदश्च = यकृन्मेदः ।

**[ प्रावृट्शरद्भ्याम् ]** प्रावृट् च शरच्च = प्रावृट्शरदौ, ताभ्याम् ।

**[ अश्वानडुद्भ्याम् ]** अश्वश्च अनड्वांश्च = अश्वानडुहौ, ताभ्याम् = अश्वानडुद्भ्याम् । पञ्चमी भ्याम् ।

**[ पञ्चवाक् ]** पञ्च वाचः समाहृताः = पञ्चवाक् । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । संख्यापूर्वो द्विगुरयम् ॥छ॥

## द्विगोरन्नह्नोऽट् ॥ ७।३।९९ ॥

**[ द्विगोः ]** द्विगु पञ्चमी ङसि ।

**[ अन्नह्नः ]** अन् च अहश्च = अन्नहन्, तस्मात् । 'अनोऽस्य' (२।१।१०८) अलुक् ।

**[ अट् ]** अट् प्रथमा सि ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ पञ्चतक्षी, पञ्चतक्षम् ]** पञ्च तक्षाणः समाहृताः = पञ्चतक्षी । अनेन अट्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् । 卐"द्विगुरन्नाबन्तान्तो वा" इति स्त्रीत्वम् । 'द्विगोः समाहारात्' (२।४।२२) ङी । एवम्-पञ्चतक्षम् ।

**[ दशोक्षी, दशोक्षम् ]** दशोक्षाणः समाहृताः = दशोक्षी । अनेन अट्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् । 'द्विगोः समाहारात्' (२।४।२२) ङी । एवम्-दशोक्षम् ।

**[ शतराजी, शतराजम् ]** शतस्य राज्ञां समाहृताः = शतराजी । अनेन अट्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् । 'द्विगोः समाहारात्' (२।४।२२) ङी । एवम्-शतराजम् ।

**[ द्व्यहः ]** द्वयोरह्नोः समाहारः = द्व्यहः । अनेन अट्समासान्तः → अ । 'नोऽपदस्य०' (७।४।६१) अन्लुक् ।

**[ त्र्यहः ]** त्रयाणामह्नां समाहारः = त्र्यहः । अनेन अट्समासान्तः → अ । 'नोऽपदस्य०' (७।४।६१) अन्लुक् ।

**[ संतक्षाणः ]** समाहृतास्तक्षाणः = संतक्षाणः । जस् । 'नि दीर्घः' (१।४।८५) दीर्घः । 'प्रात्यव-परि-निरादयो गत-क्रान्त-क्रुष्ट-ग्लान-क्रान्ताद्यर्थाः प्रथमाद्यन्तैः' (३।१।४७) इत्यादिना समासः ।

**[ समह्नाः ]** समाहृतान्यहानि = समह्नाः । 'सर्वां-ऽश-संख्या-ऽव्ययात्' (७।३।११८) अट्समासान्तः → अ - "अह्न"च । जस् ।

**[ द्व्युक्षा ]** द्वाभ्यामुक्षभ्यां क्रीतः = द्व्युक्षा । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० → इक । 'अनाम्न्यद्विः प्लुप्' (६।४।१४१) लुप् । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः ।

**[ त्र्युक्षा ]** त्रिभिरुक्षभिः क्रीतः = त्र्युक्षा । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० → इक । 'अनाम्न्यद्विः प्लुप्' (६।४।१४१) लुप् । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः ।

**[ द्व्यह्नः ]** द्वयोरह्नोर्भवः = द्व्यह्नः । 'सर्वां-ऽश-संख्या-ऽव्ययात्' (७।३।११८) अट्समासान्तः → अ - "अह्न"देशश्च ।

**[ त्र्यह्नः ]** त्रिषु अहःसु भवः = त्र्यह्नः । 'सर्वां-ऽश-संख्या-ऽव्ययात्' (७।३।११८) अट्समासान्तः → अ- "अह्न"देशश्च ।

अन्नन्तत्वेनैव सिद्धेऽह्न इदमड्विधानं समाहारे 'सर्वां-ऽश-संख्या-ऽव्ययात्' (७।३।११८) इति परस्याप्यटो बाधनार्थम्, तस्मिन् हि सति अह्नादेशः स्यात् ॥छ॥

## द्वि-त्रेरायुषः ॥ ७।३।१०० ॥

**[ द्वित्रेः ]** द्विश्च त्रिश्च = तत्, तस्मात् ।

**[ आयुषः ]** आयुस् पञ्चमी ङसि ।

**[ द्व्यायुषम् ]** द्वयोरायुषोः समाहारः = द्व्यायुषम् । अनेन अट्समासान्तः → अ । 'नाम्यन्तस्था-कवर्गात् पदान्तः कृतस्य सः शिड्-नान्तरेऽपि' (२।३।१५) षत्वम् ।

**[ त्र्यायुषम् ]** त्रयाणामायुषां समाहारः = त्र्यायुषम् । अनेन अट्समासान्तः → अ । 'नाम्यन्तस्था-कवर्गात्०' (२।३।१५) षत्वम् ।

**[ चतुरायुः ]** चतुर्णामायुषां समाहारः = चतुरायुः ।

---

卐 हैमलिङ्गानुशासने स्त्रीलिङ्गप्रकरणे पञ्चमश्लोकम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

[ **द्व्यायुःप्रियः** ] द्वे आयुषी प्रियेऽस्य = द्व्यायुःप्रियः ।

[ **त्र्यायुःप्रियः** ] त्रीण्यायूंषि प्रियाण्यस्य = त्र्यायुःप्रियः ।

उत्तरपदद्विगुरयम् ॥छ॥

**वाऽञ्जलेरलुकः ॥ ७।३।१०१ ॥**

[ **वा** ] वा प्रथमा सि ।

[ **अञ्जलेः** ] अञ्जलि पञ्चमी ङसि ।

[ **अलुकः** ] न विद्यते लुक् यस्मात् सः = अलुक्, तस्मात् ।

[ **द्व्यञ्जलम्, द्व्यञ्जलि** ] द्वयोरञ्जल्योः समाहारः = द्व्यञ्जलम् । अनेन अट्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । सि-अम् । एवम्-द्व्यञ्जलि । सि । 'अनतो लुप्' (१।४।५९) लुप् ।

[ **त्र्यञ्जलम्, त्र्यञ्जलि** ] त्रयाणामञ्जलीनां समाहारः = त्र्यञ्जलम् । अनेन अट्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । सि-अम् । एवम्-द्व्यञ्जलि । सि । 'अनतो लुप्' (१।४।५९) लुप् ।

[ **द्व्यञ्जलमयम्, द्व्यञ्जलिमयम्** ] द्वाभ्यामञ्जलिभ्यामागतं = द्व्यञ्जलमयम् । अनेन अट्समासान्तः → अ । 'नृ-हेतुभ्यो रूप्य-मयटौ वा' (६।३।१५६) मयट्प्र० → मय । सि-अम् । एवम्-द्व्यञ्जलिमयम् ।

[ **त्र्यञ्जलमयम्, त्र्यञ्जलिमयम्** ] त्रिभ्योऽञ्जलिभ्य आगतं = त्र्यञ्जलमयम् । अनेन अट्समासान्तः → अ । 'नृ-हेतुभ्यो रूप्य-मयटौ वा' (६।३।१५६) मयट्प्र० → मय । एवम्-त्र्यञ्जलिमयम् ।

[ **द्व्यञ्जलरूप्यम्, द्व्यञ्जलिरूप्यम्** ] द्वाभ्यामञ्जलिभ्यामागतं = द्व्यञ्जलरूप्यम् । अनेन अट्समासान्तः → अ । 'नृ-हेतुभ्यो रूप्य-मयटौ वा' (६।३।१५६) रूप्यप्र० । सि-अम् । एवम्-द्व्यञ्जलिरूप्यम् ।

[ **त्र्यञ्जलरूप्यम्, त्र्यञ्जलिरूप्यम्** ] त्रिभ्यः अञ्जलिभ्यः आगतं = त्र्यञ्जलरूप्यम् । अनेन अट्समासान्तः → अ । 'नृ-हेतुभ्यो०' (६।३।१५६) रूप्यप्र० । सि-अम् । एवम्-त्र्यञ्जलिरूप्यम् ।

[ **द्व्यञ्जलप्रियः** ] द्वावञ्जली प्रियौ यस्य = द्व्यञ्जलप्रियः । अनेन अट्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

[ **त्र्यञ्जलप्रियः** ] त्रयोऽञ्जलयः प्रिया अस्य = त्र्यञ्जलिप्रियः । अनेन अट्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

[ **द्व्यञ्जलिर्घटः** ] द्वाभ्यामञ्जलिभ्यां क्रीतः = द्व्यञ्जलिर्घटः । 'मूल्यैः क्रीते' (६।४।१५०) इकणप्र० । 'अनाम्न्यद्विः प्लुप्' (६।४।१४१) इकण्लुप् ।

[ **त्र्यञ्जलिर्घटः** ] त्रिभिरञ्जलिभिः क्रीतः = त्र्यञ्जलिर्घटः । 'मूल्यैः क्रीते' (६।४।१५०) इकणप्र० । 'अनाम्न्यद्विः प्लुप्' (६।४।१४१) इकण्लुप् ।

[ **द्व्यञ्जलिः** ] द्वयोरञ्जलिः = द्व्यञ्जलिः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

[ **त्र्यञ्जलिः** ] त्रयाणामञ्जलिः = त्र्यञ्जलिः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

[ **द्व्यञ्जलिकः** ] द्वावञ्जली अस्य = द्व्यञ्जलिकः । 'शेषाद् वा' (७।३।१७५) कच्० → क ।

[ **त्र्यञ्जलिकः** ] त्रयोऽञ्जलयो अस्य = त्र्यञ्जलिकः । 'शेषाद् वा' (७।३।१७५) कच्० → क ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## खार्या वा ॥ ७३।१०२ ॥

**[ खार्याः ]** खारी पञ्चमी ङसि ।

**[ वा ]** वा प्रथमा सि ।

पृथग्योगाद् द्वि-त्रेरिति निवृत्तम् ।

**[ द्विखारम्, द्विखारि ]** द्वयोः खार्योः समाहारः = द्विखारम् । अनेन अट्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । सि । पक्षे-'क्लीबे' (२।४।९७) ह्रस्वः । द्विखारि स्थिते तु अन्यस्तु सर्वो नपुंसक इति क्लीबत्वमेव ।

**[ पञ्चखारम्, पञ्चखारि ]** पञ्चानां खारीणां समाहारः = पञ्चखारम् । अनेन अट्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । एवम्-पञ्चखारि । 'क्लीबे' (२।४।९७) ह्रस्वः ।

**[ द्विखारमयम्, द्विखारीमयम् ]** द्वाभ्यां खारीभ्यामागतं = द्विखारमयम् । अनेन अट्समासान्तः → अ । 'नृ-हेतुभ्यो रूप्य-मयटौ वा' (६।३।१५६) मयट्प्र० → मय ।

**[ पञ्चखाररूप्यम्, पञ्चखारीरूप्यम् ]** पञ्चभ्यः खारीभ्यः आगतं = पञ्चखाररूप्यम् । अनेन अट्समासान्तः → अ । 'नृ-हेतुभ्यो०' (६।३।१५६) रूप्यप्र० ।

**[ द्विखारप्रियः, द्विखारीप्रियः ]** द्वौ खार्यौ प्रियेऽस्य = द्विखारप्रियः । अनेन अट्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् ।

**[ पञ्चखारधनः, पञ्चखारीधनः ]** पञ्च खार्यो धनमस्य = पञ्चखारधनः । अनेन अट्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् ।

**[ उपखारि ]** खार्याः समीपम् = उपखारि । 'क्लीबे' (२।४।९७) ह्रस्वः ।

**[ अधिखारि ]** खार्यां निधेहि = अधिखारि । 'क्लीबे' (२।४।९७) ह्रस्वः ।

**[ द्विखारः, द्विखारम् ]** द्वाभ्यां खारीभ्यां क्रीतः । 'मूल्यैः क्रीते' (६।४।१५०) इकणप्र० । 'अनाम्न्यद्विः प्लुप्' (६।४।१४१) लुप् । 'ङ्यादेर्गौणस्या०' (२।४।९५) ङीनिवृत्तिः । एवम्-द्विखारम् ।

**[ द्विखारी ]** द्वे खार्यौ मानमस्याः सा = द्विखारी । 'मात्रट्' (७।१।१४५) मात्रट्प्र० । 'द्विगोः संशये च' (७।१।१४४) लुप् । 'परिमाणात् तद्धितलु०' (२।४।२३) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।।छ।।

## वाऽर्धाच्च ॥ ७।३।१०३ ॥

**[ वा ]** वा प्रथमा सि ।

**[ अर्धात् ]** अर्ध पञ्चमी ङसि ।

**[ च ]** च प्रथमा सि ।

**[ अर्धखारम्, अर्धखारी ]** अर्धं खार्याः = अर्धखारम् । अनेन अट्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । सि-अम् । एवम्-अर्धखारी ।।छ।।

## नावः ॥ ७।३।१०४ ॥

**[ नावः ]** नौ पञ्चमी ङसि ।

**[ अर्धनावम्, अर्धनावी ]** अर्धं नावः = अर्धनावम् । अनेन अट्समासान्तः → अ ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

"अर्धपूर्वपदो नावः" इति वचनात् अर्धनावी । अनेन अट्समासान्तः → अ । 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

**[ द्विनावम् ]** द्वयोर्नावोः समाहारः = द्विनावम् । अनेन अट्समासान्तः → अ ।

**[ पञ्चनावम् ]** पञ्चानां नावां समाहारः = पञ्चनावम् । अनेन अट्समासान्तः → अ ।

**[ द्विनावमयम् ]** द्वाभ्यां नौभ्यामागतं = द्विनावमयम् । अनेन अट्समासान्तः → अ । 'नृ-हेतुभ्यो रूप्य-मयटौ वा' (६।३।१५६) मयट्प्र० → मय ।

**[ पञ्चनावमयम् ]** पञ्चभ्यो नौभ्य आगतं = पञ्चनावमयम् । अनेन अट्समासान्तः → अ । 'नृ-हेतुभ्यो०' (६।३।१५६) मयट्प्र० → मय ।

**[ द्विनावरूप्यम् ]** द्वाभ्यां नौभ्यामागतं = द्विनावरूप्यम् । अनेन अट्समासान्तः → अ । 'नृ-हेतुभ्यो०' (६।३।१५६) रूप्यप्र० ।

**[ पञ्चनावरूप्यम् ]** पञ्चभ्यो नौभ्य आगतं = पञ्चनावरूप्यम् । अनेन अट्समासान्तः → अ । 'नृ-हेतुभ्यो०' (६।३।१५६) रूप्यप्र० ।

**[ द्विनावप्रियः ]** द्वौ(द्वे) नावौ प्रियौ अस्य = द्विनावप्रियः । अनेन अट्समासान्तः → अ ।

**[ द्विनावधनः ]** द्वौ(द्वे) नावौ धनमस्य = द्विनावधनः । अनेन अट्समासान्तः → अ ।

**[ द्विनौः ]** द्वाभ्यां नौभ्यां क्रीतः = द्विनौः । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० । 'अनाम्न्यद्विः प्लुप्' (६।४।१४१) लुप् । सि ।

**[ पञ्चनौः ]** पञ्चभिः नौभिः क्रीतः = पञ्चनौः । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० → इक । 'अनाम्न्यद्विः प्लुप्' (६।४।१४१) लुप् । सि ।

**[ द्विनौः ]** द्वयोर्नौः = द्विनौः ।

**[ राजनौः ]** राज्ञो नौः = राजनौः ।

**[ परमनौः ]** परमश्चासौ नौश्च = परमनौः ।

**टकारो ङ्यर्थः-**

**[ अर्धनावम्, अर्धनावी ]** अर्धनावीत्यत्र 'द्विगोः समाहारात्' (२।४।२२) ङी ।।छ।।

## गोस्तत्पुरुषात् ।। ७।३।१०५ ।।

**[ गोस्तत्पुरुषात् ]** गो पञ्चमी ङसि । स चासौ पुरुषश्च = तत्पुरुषस्तस्मात् ।

**[ राजगवः, राजगवी ]** राज्ञो गौः = राजगवः, राजगवी । अनेन अट्समासान्तः → अ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । द्वितीये 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ पुङ्गवः ]** पुंसो गौः = पुङ्गवः । अट्समासान्तः → अ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

**[ स्त्रीगवी ]** स्त्रिया गौः = स्त्रीगवी । अनेन अट्समासान्तः → अ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । 'अणञेयेकण्०' (२।४।२०) ङी ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ अतिगवः ]** गामतिक्रान्तः = अतिगवः । अनेन अट्समासान्तः → अ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

**[ अतिगवी ]** गामतिक्रान्ता = अतिगवी । अनेन अट्समासान्तः → अ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ पञ्चगवम् ]** पञ्च च ते गावश्च = पञ्चगवम् । अनेन अट्समासान्तः → अ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । सि-अम् ।

**[ दशगवम् ]** दश च ते गावश्च = दशगवम् । अनेन अट्समासान्तः → अ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । सि-अम् ।

**[ पञ्चगवमयम् ]** पञ्चभ्यो गोभ्य आगतं = पञ्चगवमयम् । अनेन अट्समासान्तः → अ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । 'नृ-हेतुभ्यो रूप्य-मयटौ वा' (६।३।१५६) मयट्प्र० → मय ।

**[ पञ्चगवरूप्यम् ]** पञ्चभ्यो गोभ्य आगतं = पञ्चगवरूप्यम् । अनेन अट्समासान्तः → अ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । 'नृ-हेतुभ्यो०' (६।३।१५६) रूप्यप्र० ।

**[ पञ्चगवधनः ]** पञ्च गावो धनमस्य = पञ्चगवधनः । अनेन अट्समासान्तः ।

**[ दशगवधनः ]** दश गावो धनमस्य = दशगवधनः । अनेन अट्समासान्तः → अ ।

**[ दशगवप्रियः ]** दश गावः प्रिया अस्य = दशगवप्रियः । अनेन अट्समासान्तः → अ ।

**[ चित्रगुः ]** चित्रा गौर्यस्य सः = चित्रगुः । 'गोश्चान्ते ह्रस्वोऽनंशिसमासेयोबहुव्रीहौ' (२।४।९६) ह्रस्वः ।

**[ पञ्चगुः ]** पञ्चभिर्गोभिः क्रीतः = पञ्चगुः । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० । 'अनाम्न्यद्विः प्लुप्' (६।४।१४१) इकण्लुप् । 'गोश्चान्ते ह्रस्वोऽनंशिसमा०' (२।४।९६) ह्रस्वः ॥छ॥

## राजन्-सखेः ॥ ७।३।१०६ ॥

**[ राजन्सखेः ]** राजा च सखा च = राजन्सखि, तस्मात् ।

**अलुक इति निवृत्तम् ।**

**[ अतिराजः, अतिराजी ]** अतिक्रान्तो राजानमतिराजः, स्त्री चेत् अतिराजी । अनेन अट्समासान्तः → अ । 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङी ।

**[ पञ्चराजी ]** पञ्चानां राज्ञां समाहारः = पञ्चराजी । अनेन अट्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् । 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ दशराजी ]** दशानां राज्ञां समाहारः = दशराजी । अनेन अट्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् । 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ पञ्चराजः, पञ्चराजी ]** पञ्चभी राजभिः क्रीतः = पञ्चराजः । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० । 'अनाम्न्यद्विः प्लुप्' (६।४।१४१) लुप् । अनेन अट्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् । 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ पञ्चराजप्रियः ]** पञ्च राजानः प्रिया अस्य सः = पञ्चराजप्रियः । अनेन अट्समासान्तः → अ ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ राजसखः ]** राज्ञः सखा = राजसखः । अनेन अट्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इवर्णस्य लुक् ।

**[ महासखः ]** महांश्चासौ सखा च = महासखः । अनेन अट्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इवर्णस्य लुक् ।

**[ अतिसखः ]** सखायमतिक्रान्तः = अतिसखः । अनेन अट्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इवर्णस्य लुक् ।

**[ अतिसखी ]** सखायमतिक्रान्ता सा = अतिसखी । अनेन अट्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इवर्णस्य लुक् । 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ पञ्चसखम् ]** पञ्चानां सखीनां समाहारः = पञ्चसखम् । अनेन अट्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इवर्णस्य लुक् । सि-अम् ।

**[ दशसखम् ]** दशानां सखीनां समाहारः = दशसखम् । अनेन अट्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इवर्णस्य लुक् । सि-अम् ।

**[ पञ्चसखः ]** पञ्चभिः सखिभिः क्रीतः = पञ्चसखः । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० । 'अनाम्न्यद्विः प्लुप्' (६।४।१४१) लुप् । अनेन अट्समासान्तः → अ ।

**[ पञ्चसखी ]** पञ्चभिः सखिभिः क्रीता = पञ्चसखी । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० । 'अनाम्न्यद्विः प्लुप्' (६।४।१४१) लुप् । अनेन अट्समासान्तः → अ ।

**[ पञ्चसखप्रियः ]** पञ्च सखायः प्रिया अस्य सः = पञ्चसखप्रियः । अनेन अट्समासान्तः → अ ।

राजन्निति नान्तनिर्देशादनकारान्तान्न भवति-

**[ मद्रराज्ञी ]** मद्र-राजन् । 'स्त्रियां नृतोऽस्वस्रादेर्ङीः' (२।४।१) ङी । 'ई-ङौ वा' (२।१।१०९) अलुक् । मद्राणां राज्ञी = मद्रराज्ञी ।

**[ विद्याराज्ञी ]** विद्यानां राज्ञी = विद्याराज्ञी ।

**[ महाराज्ञी ]** महती चासौ राज्ञी च = महाराज्ञी । 'जातीयैकार्थेऽच्वेः' (३।२।७०) डा० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अत्लुक् ।

सखीशब्दात्त्वटि सत्यसति वा न रूपभेदः । सखीशब्दस्य ईकारन्तस्यापि पञ्चानां सखीनां समाहार इति 'क्लीबे' (२।४।९७) इति ह्रस्वत्वे इदन्तादेवाट् भवति तथा च पञ्चसखमिति । एवमन्यदपि रूपभेदहेतुकमूह्यम् ।।छ।।

## राष्ट्राख्याद् ब्रह्मणः ।। ७।३।१०७ ।।

**[ राष्ट्राख्यात् ]** राष्ट्र 'चक्षिक् व्यक्तायां वाचि' (११२२) चक्ष् । राष्ट्रमाचष्टे = राष्ट्राख्या(ख्य)स्तस्मात् = राष्ट्राख्यात् । 'चक्षो वाचि क्शांग्-ख्यांग्' (४।४।४) ख्यांग्देशः → ख्या । 'आतो डोऽह्वा-वा-मः' (५।१।७६) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलुक् ।

**[ ब्रह्मणः ]** ब्रह्मन् पञ्चमी ङसि ।

**[ सुराष्ट्रब्रह्मः ]** सुराष्ट्रेषु ब्रह्मा = सुराष्ट्रब्रह्मः । अनेन अट्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् । यः सुराष्ट्रेषु वसति स सौराष्ट्रिको ब्राह्मण इत्यर्थः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ अवन्तिब्रह्मः ]** अवन्तिषु ब्रह्मा = अवन्तिब्रह्मः । अनेन अट्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् ।

**[ काशिब्रह्मः ]** काशिषु ब्रह्मा = काशिब्रह्मः । अनेन अट्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् ।

**[ देवब्रह्मा नारदः ]** देवस्य ब्रह्मा = देवब्रह्मा नारदः ।

**आख्याग्रहणं राष्ट्रवाच्यर्थम्** ॥छ॥

## कु-महद्भ्यां वा ॥ ७।३।१०८ ॥

**[ कुमहद्भ्याम् ]** कुश्च महांश्च = कुमहान्तौ, ताभ्याम् = कुमहद्भ्याम् । पञ्चमी भ्याम् ।

**[ वा ]** वा प्रथमा सि ।

**[ कुब्रह्मः, कुब्रह्मा ]** पापो ब्रह्मा = कुब्रह्मः, कुब्रह्मा । अनेन विकल्पेन अट्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ महाब्रह्मः, महाब्रह्मा ]** महान् ब्रह्मा = महाब्रह्मः, महाब्रह्मा । अनेन विकल्पेन अट्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

पापो महांश्च ब्राह्मण एवमुच्यते ॥छ॥

## ग्राम-कौटात् तक्ष्णः ॥ ७।३।१०९ ॥

**[ ग्रामकौटात् ]** ग्रामश्च कौटश्च = ग्रामकौटम्, तस्मात् ।

**[ तक्ष्णः ]** तक्षन् पञ्चमी ङसि ।

**[ ग्रामतक्षः ]** ग्रामस्य तक्षा = ग्रामतक्षः । अनेन अट्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् । ग्रामसाधारण इत्यर्थः ।

**[ कौटतक्षः ]** कुटी-शाला तस्यां भवः = कौटः । 'भवे' (६।३।१२३) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) ईलोपः । 'कौटश्चासौ तक्षा च = कौटतक्षः । अनेन अट्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् । स्वापणशालायां यः कर्म करोति स्वतन्त्रो न कस्यचित्प्रतिबद्ध इत्यर्थः ।

**[ राजतक्षा ]** राज्ञस्तक्षा = राजतक्षा । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ ग्रामतक्षाणौ ]** ग्रामश्च तक्षा च = ग्रामतक्षाणौ । औ ।

**[ कौटतक्षा ]** कौटस्तक्षास्य । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः ॥छ॥

## गोष्ठा-ऽतेः शुनः ॥ ७।३।११० ॥

**[ गोष्ठाऽतेः ]** गोष्ठश्च अतिश्च = गोष्ठाऽति, तस्मात् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ शुनः ]** श्वन् पञ्चमी ङसि । 'श्वन्-युवन्-मघोनो ङी-स्याद्यघुट्स्वरे व उः' (२।१।१०६) व० → उत्वम् ।

**[ गोष्ठश्वः ]** गोष्ठे श्वा = गोष्ठश्वः । अनेन अट्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् ।

**[ अतिश्वो वराहः ]** अतिक्रान्तः श्वानम् = अतिश्वो वराहः । अनेन अट्समासान्तः → अ । 'नोऽपदस्य०' (७।४।६१) अन्लुक् । अतिजवन इत्यर्थः । अति 'जुं गतौ' (१९९०) जु इति सौत्रो धातुः । अतिशयेन जवतीत्येवंशीलोऽतिजवनः । 'भूषा-क्रोधार्थ-जु-सृ-गृधि-ज्वल-शुचश्चाऽनः' (५।२।४२) अनप्र० । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

**[ अतिश्वः सेवकः ]** अतिक्रान्तः श्वानम् = अतिश्वः सेवकः । अनेन अट्समासान्तः । सुष्ठु स्वामिभक्त इत्यर्थः ।

**[ अतिश्वी सेवा ]** श्वानमतिक्रान्ता = अतिश्वी सेवा । अनेन अट्समासान्तः → अ । 'नोऽपदस्य०' (७।४।६१) अन्लुक् । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । अतिनीचेत्यर्थः ।।छा।

## प्राणिन उपमानात् ॥ ७।३।१११ ॥

**[ प्राणिनः ]** प्राणिन् पञ्चमी ङसि ।

**[ उपमानात् ]** उपमान पञ्चमी ङसि ।

**[ व्याघ्रश्वः ]** व्याघ्र इव = व्याघ्रः । व्याघ्रश्चासौ श्वा च = व्याघ्रश्वः । अनेन अट्समासान्तः → अ । 'नोऽपदस्य०' (७।४।६१) अन्लुक् । प्रथमोक्तत्वेन उपमेयस्य पूर्वनिपाते प्राप्ते 'उपमेयं व्याघ्राद्यैः साम्यानुक्तौ' (३।१।१०२) इति समासः । अत एव वचनात् श्वन्शब्दस्य परनिपातः, मयूरव्यंसकादित्वाद्वा समासः ।

**[ सिंहश्वः ]** सिंह इव = सिंहः । स चासौ श्वा च = सिंहश्वः । अनेन अट्समासान्तः → अ । 'नोऽपदस्य०' (७।४।६१) अन्लुक् ।

**[ वृकश्वः ]** वृक इव = वृकः । स चासौ श्वा च = वृकश्वः । अनेन अट्समासान्तः → अ । 'नोऽपदस्य०' (७।४।६१) अन्लुक् ।

प्राणिन उपमानादिति पूर्वपदविज्ञानादिह न भवति-

**[ वानरश्वा ]** वानरः श्वेव = वानरश्वा । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः ।

**[ फलकश्वा ]** फलकमिव श्वा = फलकश्वा । प्रथमा सि ।

**[ देवदत्तश्वा ]** देवदत्तस्य श्वा, देवदत्तश्चासौ श्वा वेति देवदत्तश्वा । प्रथमा सि ।

**[ व्याघ्रश्वः ]** व्याघ्रः श्वेव = व्याघ्रश्वः । मतान्तरे अनेन अट्समासान्तः → अ । 'नोऽपदस्य०' (७।४।६१) अन्लुक् ।

**[ सिंहश्वः ]** सिंहः श्वेव = सिंहश्वः । मतान्तरे अनेन अट्समासान्तः → अ । 'नोऽपदस्य०' (७।४।६१) अन्लुक् ।

**[ वृकश्वः ]** वृकः श्वेव = वृकश्वः । मतान्तरे अनेन अट्समासान्तः → अ । 'नोऽपदस्य०' (७।४।६१) अन्लुक् ।

**[ पुरुषश्वः ]** पुरुषः श्वेव = पुरुषश्वः । मतान्तरे अनेन अट्समासान्तः → अ । 'नोऽपदस्य०' (७।४।६१) अन्लुक् ।

तन्मते वानरश्वेत्यत्र समासान्तविधिरनित्यत्वान्न भवति ।।छा।

## अप्राणिनि ॥ ७।३।११२ ॥

**[ अप्राणिनि ]** न प्राणी = अप्राणी, तस्मिन् ।

पूर्वसूत्रे उपमानादिति पूर्वपदस्य विशेषणम्, इह तु शुनः अप्राणिनि वर्त्तते य उपमानवाची श्वन्शब्दस्तदन्तात्...

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ आकर्षश्वः ]** श्वेव = श्वा । आकर्षश्वासौ श्वा च = आकर्षश्वः । अनेन अट्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् ।

**[ फलकश्वः ]** फलक इव = फलकः । फलकश्वासौ श्वा च = फलकश्वः । अनेन अट्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् ।

**[ वानरश्वा ]** वानरः श्वेव = वानरश्वा । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः ।

**[ आकर्षश्वा ]** आकर्षे सारिफलके श्वा = आकर्षश्वा सारि कथ्यते । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः ।

कुक्कुरवच्छारेऽपि श्वन्शब्दो रूढो नोपमानात्(नम्) ।

**[ आकर्षश्वः ]** आकर्षे श्वा = आकर्षश्वः । मतान्तरे अनेन अट्समासान्तः ।

**[ शकटश्वः ]** शकटे श्वा = शकटश्वः । मतान्तरे अनेन अट्समासान्तः ॥छ॥

## पूर्वोत्तरमृगाच्च सक्थ्नः ॥ ७।३।११३ ॥

**[ पूर्वोत्तरमृगात् ]** पूर्वश्च उत्तरश्च मृगश्च = पूर्वोत्तरमृगम्, तस्मात् ।

**[ च ]** च प्रथमा सि ।

**[ सक्थ्नः ]** सक्थि पञ्चमी ङसि । 'दध्यस्थि-सक्थ्यक्ष्णोऽन्तस्याऽन्' (१।४।६३) अन् । 'अनोऽस्य' (२।१।१०८) अलुक् ।

**[ पूर्वसक्थम् ]** पूर्वं सक्थि = पूर्वसक्थम् । 'पूर्वा-ऽपर-प्रथम-चरम-जघन्य-समान-मध्य-मध्यम-वीरम्' (३।१।१०३) तत्पुरुषः कर्मधारयः । अथवा सक्थ्नः पूर्वं = पूर्वसक्थम् । अनेन अट्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ उत्तरसक्थम् ]** उत्तरं सक्थि = उत्तरसक्थम् । अनेन अट्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ मृगसक्थम् ]** मृगस्य सक्थि = मृगसक्थम् । अनेन अट्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**उपमानात्** - **[ फलकसक्थम् ]** फलकमिव = फलकम् । फलकं च तत् सक्थि च = फलकसक्थम् । अनेन अट्समासान्तः । व्याघ्रश्वादिवत्समासः वचनसामर्थ्यात् मयूरव्यंसकादित्वाद् वेत्यर्थः । एतच्च 'प्राणिन उपमानात्' (७।३।१११) इत्यत्र दर्शितमस्ति ।

**[ कुक्कुटसक्थम् ]** कुक्कुटस्य सक्थि = कुक्कुटसक्थम् । मतान्तरे अनेन अट्समासान्तः ॥छ॥

## उरसोऽग्रे ॥ ७।३।११४ ॥

**[ उरसः ]** उरस् पञ्चमी ङसि ।

**[ अग्रे ]** अग्र सप्तमी ङि ।

**अग्रं मुखं प्रधानं वा ।**

**[ अश्वोरसं दृश्यते ]** अश्वाश्च ते उरसश्च = अश्वोरसं दृश्यते । अनेन अट्समासान्तः । सेनाया अश्वा मुखमित्यर्थः ।

**[ अश्वोरसं वर्जयेत् ]** अश्वानामुरः = अश्वोरसं वर्जयेत् । अनेन अट्समासान्तः । अश्वानां मुखमग्रदेशमित्यर्थः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ अश्वोरसम् ]** अश्वानामुरः = अश्वोरसम् । अनेन अट्समासान्तः → अ । अश्वानां प्रधानमित्यर्थः ।

**[ हस्त्युरसम् ]** हस्तिनामुरः = हस्त्युरसम् । अनेन अट्समासान्तः ।

**[ रथोरसम् ]** रथस्योरः = रथोरसम् । अनेन अट्समासान्तः ।

**[ अश्वोरस्यावर्त्तः ]** अश्वानामुरः = अश्वोरस्तस्मिन् = अश्वोरस्यावर्त्तः ॥छा।

## सरो-ऽनो-ऽश्मा-ऽयसो जाति-नाम्नोः ॥ ७।३।११५ ॥

**[ सरोऽनोऽश्माऽयसः ]** सराश्च अनाश्च अश्मा च अयाश्च = सरोऽनोऽश्माऽयस्, तस्मात् ।

**[ जातिनाम्नोः ]** जातिश्च नाम च = जातिनाम्नी, तयोः = जातिनाम्नोः । सप्तमी ओस् ।

जातौ अभिधेयायां नाम्नि च विषये इदं च विशेषणं यथासम्भवं क्वापि जातौ क्वापि नाम्नि चेत्यर्थः ।

**[ जालसरसम् ]** जालप्रधानं सरः = जालसरसम् । अनेन अट्समासान्तः → अ । अम् ।

**[ मण्डूकसरसम् ]** मण्डूकप्रधानं सरः = मण्डूकसरसम् । अनेन अट्समासान्तः → अ । अम् । एवंनाम्नी सरसी ।

**[ उपानसम् ]** उप अनस् मण्ड्यते । उपगतमनः = उपानसम् । अनेन अट्समासान्तः → अ । अन्नविशेषस्य संज्ञा जातिर्वा ।

**[ महानसम् ]** महच्च तद् अनश्च = महानसम् । अनेन अट्समासान्तः → अ । 'सन्महत्परमोत्तमोत्कृष्टं पूजायाम्' (३।१।१०७) इत्यादिना समासः । 'जातीयैकार्थेऽच्वेः' (३।२।७०) डा० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अत्लुक् । पाकस्थानस्य संज्ञा । राज्ञ उपस्थितं ढौकनिकामित्यर्थः इत्येके ।

**[ गोनसं जातिः ]** गोरन इव = गोनसं जातिः । अनेन अट्समासान्तः → अ । अहिजाति बाहुलकान्नपुंसकः ।

**[ स्थूलाश्मः ]** स्थूलश्चासौ अश्मा च = स्थूलाश्मः । अनेन अट्समासान्तः → अ । 'नोऽपदस्य०' (७।४।६१) अन्लुक् ।

**[ अमृताश्मः ]** अमृतश्चासावश्मा च = अमृताश्मः । अनेन अट्समासान्तः → अ । 'नोऽपदस्य०' (७।४।६१) अन्लुक् ।

**[ कनकाश्मः ]** कनकश्चासावश्मा च = कनकाश्मः । अनेन अट्समासान्तः → अ । 'नोऽपदस्य०' (७।४।६१) अन्लुक् ।

अश्मजातिविशेषा एते ।

**[ पिण्डाश्मः संज्ञा जातिर्वा ]** पिण्डश्चासावश्मा च = पिण्डाश्मः । अनेन अट्समासान्तः → अ । 'नोऽपदस्य०' (७।४।६१) अन्लुक् ।

**[ कालायसम् ]** कालं च तद् अयश्च = कालायसम् । अनेन अट्समासान्तः ।

**[ लोहितायसम् ]** लोहितमयः = लोहितायसम् । अनेन अट्समासान्तः → अ ।

**[ तीक्ष्णायसम् ]** तीक्ष्णं च अयश्च = तीक्ष्णायसम् ।

अयोजातिविशेषा एते ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ परमसरः ]** परमं च तत् सरश्च = परमसरः ।

**[ सदनः ]** संश्चासौ अनश्च = सदनः ।

**[ सदश्मा ]** संश्चासौ अश्मा च = सदश्मा । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः ।

**[ बिन्दुसरः ]** बिन्दूनां सरः = बिन्दुसरः ।

**[ बकसरः ]** बकानां सरः = बकसरः इति नैषा संज्ञा ।

रूढ्या ह्यत्र संज्ञाविधानं शूर्पनखीवत् ।

**[ शूर्पनखीवत् ]** शूर्पाकारा नखा यस्याः सा = शूर्पनखी । 'नख-मुखादनाम्नि' (२।४।४०) ङी ॥छा।

**अह्नः ॥ ७।३।११६ ॥**

**[ अह्नः ]** अहन् पञ्चमी ङसि । 'अनोऽस्य' (२।१।१०८) अलुक् ।

**[ परमाहः ]** परमं च तद् अहश्च = परमाहः । अनेन अट्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् ।

**[उत्तमाहः]** उत्तमं च तद् अहश्च = उत्तमाहः । अनेन अट्समासान्तः → अ । 'नोऽपदस्य०' (७।४।६१) अन्लुक् ।

**[ एकाहम् ]** एकं च तदहश्च = एकाहम् । अनेन अट्समासान्तः → अ । 'नोऽपदस्य०' (७।४।६१) अन्लुक् ।

**[ पुण्याहम् ]** पुण्यं च तदहश्च = पुण्याहम् । अनेन अट्समासान्तः → अ । 'नोऽपदस्य०' (७।४।६१) अन्लुक् ।

**[ सुदिनाहम् ]** सुदिनं च तदहश्च = सुदिनाहम् । अनेन अट्समासान्तः → अ । 'नोऽपदस्य०' (७।४।६१) अन्लुक् ॥छा।

**संख्यातादह्नश्च वा ॥ ७।३।११७ ॥**

**[ संख्यातात् ]** संख्यायते स्म = संख्यातम्, तस्मात् ।

**[ अह्नः ]** अह्न प्रथमा सि ।

**[ च ]** च प्रथमा सि ।

**[ वा ]** वा प्रथमा सि ।

**[ संख्याताह्नः, संख्याताहः ]** संख्यातमहः = संख्याताह्नः, संख्याताहः । अनेन अट्समासान्तः - अह्नदेशश्च । सि । द्वितीये 'अह्नः' (७।३।११६) अट्समासान्तः । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् ।

**अह्नादेशार्थं वचनम्, अट् तु पूर्वेणैव सिद्धः । चकार उत्तरत्राह्नादेशस्याट्संनियोगशिष्टत्वार्थः** ॥छा।

**सर्वां-ऽश-संख्या-ऽव्ययात् ॥ ७।३।११८ ॥**

**[ सर्वांऽशसंख्याऽव्ययात् ]** सर्वश्च अंशश्च संख्या च अव्ययश्च = सर्वांऽशसंख्याऽव्ययम्, तस्मात् ।

**[ सर्वाह्णः ]** सर्वमहः = सर्वाह्णः । अनेन अट्समासान्तः-"अह्न"देशश्च । 'अतोऽह्नस्य' (२।३।७३) णत्वम् ।

**अंश - [ पूर्वाह्णः ]** पूर्वमहः = पूर्वाह्णः । अनेन अट्समासान्तः-"अह्न"देशश्च । 'अतोऽह्नस्य' (२।३।७३) णत्वम् ।

**[ अपराह्णः ]** अपरमहः = अपराह्णः । अनेन अट्समासान्तः-"अह्न"देशश्च । 'अतोऽह्नस्य' (२।३।७३) णत्वम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ मध्याह्नः ]** मध्यमहः = मध्याह्नः । अनेन अट्समासान्तः-"अह्न"देशश्च ।

**[ सायाह्नः ]** सायमहः = सायाह्नः । अनेन अट्समासान्तः-"अह्न"देशश्च । 'सायाह्नादयः' (३।१।५३) इत्यनेन सायंसम्बन्धिनो म्लुक् ।

**[ द्व्यह्नः पटः, द्व्यह्नी अष्टका ]** द्वयोरह्नोर्भवः = द्व्यह्नः पटः । एवम्-द्व्यह्नी अष्टका । अनेन अट्समासान्तः-"अह्न"देशश्च । 'अणञेयेकण्-नञ्०' (२।४।२०) ङी ।

**[ त्र्यह्नः ]** त्रिषु अहःसु भवः = त्र्यह्नः । अनेन अट्समासान्तः-"अह्न"देशश्च ।

**[ त्र्यह्नी ]** त्रिषु अहःसु भवा = त्र्यह्नी । अनेन अट्समासान्तः-"अह्न"देशश्च । 'अणञेयेकण्०' (२।४।२०) ङी ।

चतुर्ष्वपि उदाहरणेषु 'भवे' (६।३।१२३) अण्प्र० । 'द्विगोरनपत्ये०' (६।१।२४) लुप् ।

**[ द्व्यह्नप्रियः ]** द्वे अहनी प्रिये अस्य = द्व्यह्नप्रियः । अनेन अट्समासान्तः-"अह्न"देशश्च ।

**[ त्र्यह्नप्रियः ]** त्रीण्यहानि प्रियाणि यस्य सः = त्र्यह्नप्रियः । अनेन अट्समासान्तः-"अह्न"देशश्च ।

**[ द्व्यह्नजातः ]** द्वे अहनी जातस्य = द्व्यह्नजातः । अनेन अट्समासान्तः-"अह्न"देशश्च ।

**[ त्र्यह्नजातः ]** त्रीण्यहानि जातस्य = त्र्यह्नजातः । अनेन अट्समासान्तः-"अह्न"देशश्च । 'कालो द्विगौ च मेयैः' (३।१।५७) इत्यादिना समासः ।

**अव्यय - [ अत्यह्नः ]** अतिक्रान्तमहः = अत्यह्नः । अनेन अट्समासान्तः-"अह्न"देशश्च ।

**[ अत्यह्नी कथा ]** अहरतिक्रान्ता = अत्यह्नी कथा । अनेन अट्समासान्तः-"अह्न"देशश्च । 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ निरह्नः ]** निःक्रान्तोऽह्नः = निरह्नः । अनेन अट्समासान्तः-"अह्न"देशश्च ।

**[ निरह्नी वेला ]** निःक्रान्ता अह्नः = निरह्नी वेला । अनेन अट्समासान्तः-"अह्न"देशश्च । 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ व्यह्नः ]** विगतमह्नः = व्यह्नः । अनेन अट्समासान्तः-"अह्न"देशश्च ।

**[ व्यह्नी ]** विगता अह्नः = व्यह्नी । अनेन अट्समासान्तः-"अह्न"देशश्च । 'अणञेयेकण्०' (२।४।२०) ङी ॥छ॥

**संख्यातैक-पुण्य-वर्षा-दीर्घाच्च रात्रेरत् ॥ ७।३।११९ ॥**

**[ संख्यातैकपुण्यवर्षादीर्घात् ]** संख्यातश्च एकश्च पुण्यं च वर्षा च दीर्घश्च = संख्यातैकपुण्यवर्षादीर्घम्, तस्मात् ।

**[ च ]** च प्रथमा सि ।

**[ रात्रेरत् ]** रात्रि पञ्चमी ङसि । अत् प्रथमा सि ।

**[ संख्यातरात्रः ]** संख्याता रात्रिः = संख्यातरात्रः ।

**[ एकरात्रः ]** एका रात्रिः = एकरात्रः ।

**[ पुण्यरात्रः ]** पुण्या रात्रिः = पुण्यरात्रः ।

**[ वर्षारात्रः ]** वर्षाणां रात्रिः = वर्षारात्रः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ दीर्घरात्रः ]** दीर्घा रात्रिः = दीर्घरात्रः । अनेन अत्समासान्तः → अ । 'पुंवत् कर्मधारये' (३।२।५७) पुंवत् ।

**[ सर्वरात्रः ]** सर्वा रात्रिः = सर्वरात्रः ।

**[ पूर्वरात्रः ]** पूर्वं रात्रेः = पूर्वरात्रः ।

**[ अपररात्रः ]** अपरं रात्रेः = अपररात्रः ।

**[ अर्धरात्रः ]** अर्धं रात्रेः = अर्धरात्रः ।

**[ द्वितीयरात्रः ]** द्वितीयो रात्रेः = द्वितीयरात्रः ।

**[ द्विरात्रः ]** द्वयो रात्र्योः समाहारः = द्विरात्रः । अनेन अत्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ त्रिरात्रः ]** तिसृणां रात्रीणां समाहारः = त्रिरात्रः । अनेन अत्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ द्विरात्रः ]** द्वयो रात्र्योर्भवः = द्विरात्रः । अनेन अत्समासान्तः । 'भवे' (६।३।१२३) अण्प्र० । 'द्विगोरनपत्ये यस्वराऽऽदेर्लुबद्विः' (६।१।२४) लुप् ।

**[ त्रिरात्रः ]** त्रिषु रात्रिषु भवः = त्रिरात्रः । अनेन अत्समासान्तः । 'भवे' (६।३।१२३) अण्प्र० । 'द्विगोरनपत्ये०' (६।१।२४) लुप् ।

**[ द्विरात्रा ]** द्वयो रात्र्योर्भवा = द्विरात्रा । अनेन अत्समासान्तः । 'भवे' (६।३।१२३) अण्प्र० । 'द्विगोरनपत्ये०' (६।१।२४) लुप् ।

**[ त्रिरात्रा ]** तिसृषु रात्रिषु भवा = त्रिरात्रा । अनेन अत्समासान्तः । 'भवे' (६।३।१२३) अण्प्र० । 'द्विगोरनपत्ये०' (६।१।२४) लुप् ।

**[ द्विरात्रप्रियः ]** द्वे रात्री प्रिये यस्य सः = द्विरात्रप्रियः । अनेन अत्समासान्तः → अ ।

**[ त्रिरात्रप्रियः ]** तिस्रो रात्रयः प्रिया यस्य सः = त्रिरात्रप्रियः । अनेन अत्समासान्तः → अ ।

**[ द्विरात्रजातः ]** द्वे रात्री जातस्य = द्विरात्रजातः । अनेन अत्समासान्तः → अ । 'कालो द्विगौ च मेयैः' (३।१।५७) इत्यनेन समासः ।

**[ त्रिरात्रजातः ]** तिस्रो रात्रयो जातस्य = त्रिरात्रजातः । अनेन अत्समासान्तः → अ । 'कालो द्विगौ च मेयैः' (३।१।५७) इत्यनेन समासः ।

**[ अतिरात्रः, अतिरात्रा ]** रात्रिमतिक्रान्तोऽतिरात्रः, स्त्री चेत् अतिरात्रा । अनेन अत्समासान्तः → अ । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ नीरात्रः, नीरात्रा ]** निर्गता रात्रिः = नीरात्रः । अनेन अत्समासान्तः → अ । 'रो रे लुग् दीर्घश्चाऽदिदुतः' (१।३।४१) रलुक्-पूर्वस्य दीर्घः । एवम् नीरात्रा । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ एकाहम् ]** एकमहः = एकाहम् । 'अह्नः' (७।३।११६) अट्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् ।

**अटि प्रकृतेऽत्विधानं स्त्रियां ङ्यभावार्थम्** ॥छा।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## पुरुषायुष-द्विस्ताव-त्रिस्तावम् ॥ ७।३।१२० ॥

**[ पुरुषायुषद्विस्तावत्रिस्तावम् ]** पुरुषायुषश्च द्विस्तावश्च त्रिस्तावश्च = पुरुषायुषद्विस्तावत्रिस्तावम् ।

**[ पुरुषायुषम् ]** पुरुषस्यायुः = पुरुषायुषम् । अनेन निपातः ।

**[ द्विस्तावा ]** द्विस्तावती = द्विस्तावा । अनेन निपातनात् अतीशब्दलोपम् । 'आत्' (२।४।१८) आप्प्र० → आ । 'अव्ययं प्रवृद्धादिभिः' (३।१।४८) इत्यनेन समासः ।

**[ त्रिस्तावा वेदिः ]** त्रिस्तावती = त्रिस्तावा वेदिः । अनेन निपातनात् अतीशब्दलोपम् । 'आत्' (२।४।१८) आप्प्र० → आ । 'अव्ययं प्रवृद्धादिभिः' (३।१।४८) इत्यनेन समासः ।

वेद्यामनयोः प्रयोगः । प्रकृतौ यावती वेदिस्तावती द्विगुणा त्रिगुणा वा कस्यांचिद्विकृतौ भवति । प्रकृतिविकृती यागविशेषौ । अन्यत्रापि दृश्यते ।

**[ द्विस्तावोऽग्निः ]** द्विस्तावती = द्विस्तावोऽग्निः ।

**[ त्रिस्तावोऽग्निः ]** त्रिस्तावती = त्रिस्तावोऽग्निः ।

कस्मिंश्चिद् व्याकरणे केनापि सूत्रेण निपात्यते द्विस्ताव-त्रिस्ताव ॥छ॥

## श्वसो वसीयसः ॥ ७।३।१२१ ॥

**[ श्वसः ]** श्वस् पञ्चमी ङसि ।

**[ वसीयसः ]** वसीयस् पञ्चमी ङसि ।

**[ श्वोवसीयसं कल्याणम् ]** वसु-द्रव्यं रत्नं वा विद्यतेऽस्य तत् । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् । इदमनयोर्मध्ये प्रकृष्टं वसुमत् = वसीयः । 'गुणाङ्गाद् वेष्ठेयसू' (७।३।९) ईयसुप्र० → ईयस् । 'विन्-मतोर्णीष्ठेयसौ लुप्' (७।४।३२) मतुलुप् । शोभनं वसीयः = श्वोवसीयसम् । अत्समासान्तः → अ । सि-अम् । कल्याणम् ।

श्वोवसीयमित्यपि विश्वदत्तहलायुधौ तदा डप्रत्ययान्तः ॥छ॥

## निसश्च श्रेयसः ॥ ७।३।१२२ ॥

**[ निसः ]** निस् पञ्चमी ङसि ।

**[ च ]** च प्रथमा सि ।

**[ श्रेयसः ]** श्रेयस् पञ्चमी ङसि ।

**[ निःश्रेयसं निर्वाणम् ]** निश्चितं श्रेयः = निःश्रेयसं निर्वाणम् । अनेन अत्समासान्तः → अ । सि-अम् ।

**[ श्वःश्रेयसम् ]** शोभनं श्रेयः = श्वःश्रेयसम् । अनेन अत्समासान्तः → अ । सि-अम् ।

## नञव्ययात् संख्याया डः ॥ ७।३।१२३ ॥

**[ नञव्ययात् ]** नञ् च अव्ययं च = नञव्ययम्, तस्मात् ।

**[ संख्यायाः ]** संख्या पञ्चमी ङसि ।

**[ डः ]** ड प्रथमा सि ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ अदशाः ]** न दश = अदशाः । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्लुक् । न्यूना दश इत्यर्थः ।

**[ अनवाः ]** न नव = अनवाः । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्लुक् । न्यूना दश इत्यर्थः ।

नञ्पूर्वोऽयं वैकल्ये हीनतायां दृश्यते ।

**[ निस्त्रिंशः खड्गः ]** निर्गतस्त्रिंशतोऽङ्गुलिभ्यः = निस्त्रिंशः खड्गः । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अत्लुक् । 'प्रात्यव-परि-निरादयो गत-क्रान्त-क्रुष्ट-ग्लान-क्रान्ताद्यर्थाः प्रथमाद्यन्तैः' (३।१।४७) समासः ।

**[ निस्त्रिंशः खलः ]** निस्त्रिंश इव क्रूरकर्मा = निस्त्रिंशः खलः । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अत्लुक् ।

**[ निस्त्रिंशानि वर्षाणि ]** त्रिंशतो निर्गतानि = निस्त्रिंशानि वर्षाणि । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अत्लुक् । जस् । 'नपुंसकस्य शिः' (१।४।५५) जस्० → शि० → इ० । 'स्वराच्छौ' (१।४।६५) नोऽन्तः । 'नि दीर्घः' (१।४।८५) दीर्घः ।

**[ निस्त्रिंशान्यहानि ]** त्रिंशतो निर्गतानि = निस्त्रिंशान्यहानि । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अत्लुक् । जस् । 'नपुंसकस्य शिः' (१।४।५५) जस्० → शि० → इ० । 'स्वराच्छौ' (१।४।६५) नोऽन्तः । 'नि दीर्घः' (१।४।८५) दीर्घः ।

**[ निश्चत्वारिंशानि ]** चत्वारिंशतो निर्गतानि = निश्चत्वारिंशानि । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अत्लुक् । जस् । 'नपुंसकस्य शिः' (१।४।५५) जस्० → शि० → इ० । 'स्वराच्छौ' (१।४।६५) नोऽन्तः । 'नि दीर्घः' (१।४।८५) दीर्घः ।

**[ निष्पञ्चाशानि ]** पञ्चाशतो निर्गतानि = निष्पञ्चाशानि । अनेन डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अत्लुक् । जस् । 'नपुंसकस्य शिः' (१।४।५५) जस्० → शि० → इ० । 'स्वराच्छौ' (१।४।६५) नोऽन्तः । 'नि दीर्घः' (१।४।८५) दीर्घः ।

**[ गोत्रिंशत् ]** गवां त्रिंशत् = गोत्रिंशत् । प्रथमा सि । 'दीर्घङ्याब्-व्यञ्जनात् सेः' (१।४।४५) सिलुक् ।

**नञ्ग्रहणं 'नञ्तत्पुरुषात्' ( ७।३।७१ ) इति प्रतिषेधे प्राप्ते प्रतिप्रसवार्थम् ।**

**[ निःशकृत् ]** शकृतो निर्गतं = निःशकृत् । प्रथमा सि ।

**[ अत्रिः ]** न विद्यन्ते त्रयो यस्य सोऽत्रिः ।

**[ सुत्रिः ]** शोभनास्त्रयो यस्य = सुत्रिः ।

**[ निस्त्रिंशत् ]** निर्गतास्त्रिंशदस्य = निस्त्रिंशत् । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् ॥छ॥

## संख्या-ऽव्ययादङ्गुलेः ॥ ७।३।१२४ ॥

**[ संख्याऽव्ययात् ]** संख्या च अव्ययं च = संख्याऽव्ययम्, तस्मात् ।

**[ अङ्गुलेः ]** अङ्गुलि पञ्चमी ङसि ।

**[ द्व्यङ्गुलम् ]** द्वयोरङ्गुल्योः समाहारः = द्व्यङ्गुलम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ त्र्यङ्गुलम् ]** तिसृणामङ्गुलीनां समाहारः = त्र्यङ्गुलम् ।

**[ द्व्यङ्गुलम् ]** द्वे अङ्गुली प्रमाणमस्य = द्व्यङ्गुलम् । 'प्रमाणान्मात्रट्' (७।१।१४०) मात्रट्प्र० । 'द्विगोरनपत्ये य-स्वराऽऽदेर्लुबद्विः' (६।१।२४) लुप् । अनेन डः समासान्तः → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) इलुक् ।

**[ त्र्यङ्गुलम् ]** त्रयोऽङ्गुलयः प्रमाणमस्य = त्र्यङ्गुलम् । 'प्रमाणान्मात्रट्' (७।१।१४०) मात्रट्प्र० । 'द्विगोरनपत्ये य-स्वराऽऽदेर्लुबद्विः' (६।१।२४) ('द्विगोः संशये च') (७।१।१४४) लुप् । अनेन डः समासान्तः → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) इलुक् । सि-अम् ।

**[ द्व्यङ्गुलप्रियः ]** द्वे अङ्गुली प्रिये यस्य सः = द्व्यङ्गुलप्रियः । अनेन डः समासान्तः ।

**[ त्र्यङ्गुलप्रियः ]** त्रयोऽङ्गुलयः प्रिया यस्य = त्र्यङ्गुलप्रियः । अनेन डः समासान्तः ।

**[ निरङ्गुलम् ]** निर्गतमङ्गुलेः = निरङ्गुलम् । अनेन डः समासान्तः → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) इलुक् ।

**[ अत्यङ्गुलम् ]** अङ्गुलिमतिक्रान्तः = अत्यङ्गुलम् । अनेन डः समासान्तः → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) इलुक् ।

**[ उपाङ्गुलि ]** अङ्गुलेः समीपम् = उपाङ्गुलि । सि । 'अमव्ययीभावस्याऽतोऽपञ्चम्याः' (३।२।२) अम् । 'अनतो लुप्' (१।४।५९) लुप् ।

**[ पञ्चाङ्गुलिर्हस्तः ]** पञ्च अङ्गुलयो यस्मिन् सः = पञ्चाङ्गुलिर्हस्तः ।

**[ आत्माङ्गुलम् ]** आत्मनोऽङ्गुलमात्माङ्गुलम् ।

**[ प्रमाणाङ्गुलम् ]** प्रमाणेनाङ्गुलं = प्रमाणाङ्गुलम् ।

**[ उत्सेधाङ्गुलम् ]** उत्सेधेनाङ्गुलमुत्सेधाङ्गुलम् ।

अङ्गुलशब्दः प्रमाणवाची प्रकृत्यन्तरम् ॥छ॥

**बहुव्रीहेः काष्ठे टः ॥ ७।३।१२५ ॥**

**[ बहुव्रीहेः ]** बहुव्रीहि पञ्चमी ङसि ।

**[ काष्ठे ]** काष्ठ सप्तमी ङि ।

**[ टः ]** ट प्रथमा सि ।

**[ द्व्यङ्गुलम् ]** द्वे अङ्गुली यस्य तत् = द्व्यङ्गुलम् । अनेन टः समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ त्र्यङ्गुलम् ]** तिस्रो अङ्गुलयो यस्य तत् = त्र्यङ्गुलम् । अनेन टः समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ चतुरङ्गुलम् ]** चतस्रो अङ्गुलयो यस्य तत् = चतुरङ्गुलम् । अनेन टः समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ पञ्चाङ्गुलम् ]** पञ्च अङ्गुलयो यस्य तत् = पञ्चाङ्गुलम् । अनेन टः समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अङ्गुलिसदृशावयवं धान्यकण्टकादीनां विक्षेपणकाष्ठमेवमुच्यते ।

**[ उपाङ्गुलि ]** अङ्गुलेः समीपमुपाङ्गुलि । सि । 'अमव्ययीभावस्याऽतोऽपञ्चम्याः' (३।२।२) अम् । 'अनतो लुप्' (३।२।६) लुप् ।

**[ अत्यङ्गुला यष्टिः ]** अङ्गुलिमतिक्रान्ता = अत्यङ्गुला यष्टिः । 'संख्या-ऽव्ययादङ्गुलेः' (७।३।१२४) डः समासान्तः → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) इलुक् । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ पञ्चाङ्गुलिर्हस्तः ]** पञ्च अङ्गुलयो यस्मिन् सः = पञ्चाङ्गुलिर्हस्तः ।

'नामग्रहणे लिङ्गविशिष्टस्य०' (न्या० वक्ष०(१)/सूत्र(१६) इत्यनङ्गीकारात् अङ्गुलेरिति निर्देश इत्युक्तम् ।

**[ द्व्यङ्गुलीकं दारु ]** द्वावङ्गुलीसदृशाववयवौ यस्य तत् = द्व्यङ्गुलीकं दारु । 'ऋन्नित्यदितः' (७।३।१७१) कच्प्र० → क । 'न कचि' (२।४।१०५) इत्यनेन ह्रस्वत्वाभावः ।

**[ दीर्घाङ्गुली ]** दीर्घा अङ्गुलयो यस्यां सा = दीर्घाङ्गुली । अनेन टप्र० → अ । 'अवर्णेवर्णस्य' (७।४।६८) इवर्णस्य लुक् । 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ तीक्ष्णाङ्गुली यष्टिः ]** तीक्ष्णा अङ्गुली यस्यां सा = तीक्ष्णाङ्गुली यष्टिः । अनेन टप्र० → अ । 'अवर्णेवर्णस्य' (७।४।६८) इवर्णस्य लुक् । 'अणञेयेकण्०' (२।४।२०) ङी । यष्टिः ॥छ॥

### सक्थ्यक्ष्णः स्वाङ्गे ॥ ७।३।१२६ ॥

**[ सक्थ्यक्ष्णः ]** सक्थि च अक्षि च = सक्थ्यक्षि, तस्मात् ।

**[ स्वाङ्गे ]** स्वस्याङ्गं = स्वाङ्गम्, तस्मिन् ।

**[ दीर्घसक्थः, दीर्घसक्थी ]** दीर्घं सक्थि अस्य = दीर्घसक्थः । अनेन टः समासान्तः → अ । एवम्-दीर्घसक्थी । 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ गौरसक्थः, गौरसक्थी ]** गौरं सक्थि अस्य = गौरसक्थः । अनेन टः समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । गौरं सक्थि अस्या = गौरसक्थी । अनेन टः समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ विशालाक्षः, विशालाक्षी ]** विशालमक्षि यस्य यस्या वा = विशालाक्षः, विशालाक्षी । अनेन टः समासान्तः → अ । 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ कमलाक्षः, कमलाक्षी ]** कमलवत् अक्ष्णी(अक्षिणी) यस्य यस्या वा = कमलाक्षः, कमलाक्षी । अनेन टः समासान्तः → अ । 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ स्वक्षः, स्वक्षी ]** शोभने अक्ष्णी(अक्षिणी) यस्य यस्या वा = स्वक्षः, स्वक्षी । अनेन टः समासान्तः → अ । 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ सुबाहुः ]** शोभनौ बाहू अस्य = सुबाहुः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ दीर्घजानुः ]** दीर्घे जानुनी अस्य = दीर्घजानुः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ दीर्घसक्थि शकटम् ]** दीर्घं सक्थि यस्य तत् = दीर्घसक्थि शकटम् । सि । 'अनतो लुप्' (१।४।५९) लुप् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अप्राणिस्थत्वादस्वाङ्गता अत्रोक्ता ।

**[ स्थूलाक्षिरिक्षुः ]** स्थूले अक्ष्णी(अक्षिणी) यस्य सः = स्थूलाक्षिरिक्षुः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'अक्ष्णोऽप्राण्यङ्गे' (७।३।८५) इत्यनेनापि न भवति-समासान्तविधिरनित्यत्वात् न्यासः ।

**[ परमसक्थि ]** परमं च तत् सक्थि च = परमसक्थि । सि । 'अनतो लुप्' (१।४।५९) लुप् ।

**[ सदक्षि ]** सच्च तदक्षि च = सदक्षि । सि । 'अनतो लुप्' (१।४।५९) लुप् ।।छ।।

## द्वि-त्रेर्मूर्ध्नो वा ।। ७।३।१२७ ।।

**[ द्वित्रेः ]** द्विश्च त्रिश्च = द्वित्रि, तस्मात् ।

**[ मूर्ध्नः ]** मूर्धन् पञ्चमी ङसि ।

**[ वा ]** वा प्रथमा सि ।

**[ द्विमूर्धः, द्विमूर्धा ]** द्वौ मूर्धानौ यस्य सः = द्विमूर्धः । अनेन टः समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् । एवम्-द्विमूर्धा । 'नि दीर्घः' (१।४।८५) दीर्घः ।

**[ त्रिमूर्धः, त्रिमूर्धा ]** त्रयो मूर्धानो यस्य सः = त्रिमूर्धः । अनेन टः समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् । एवम्-त्रिमूर्धा । 'नि दीर्घः' (१।४।८५) दीर्घः ।

**[ द्विमूर्धी स्त्री ]** द्वौ मूर्धानौ यस्याः सा = द्विमूर्धी । अनेन टः समासान्तः → अ । 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ द्विमूर्धा ]** द्वयोर्मूर्धा = द्विमूर्धा । 'नि दीर्घः' (१।४।८५) दीर्घः ।।छ।।

## प्रमाणी-संख्याड्डः ।। ७।३।१२८ ।।

**[ प्रमाणीसंख्यात् ]** प्रमीयतेऽनयेति प्रमाणी । 'करणा-ऽऽधारे' (५।३।१२९) अनट्प्र० → अन । 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङी । प्रमाणी च संख्या च = प्रमाणीसंख्यम् । 'क्लीबे' (२।४।९७) ह्रस्वः, तस्मात् ।

**[ डः ]** ड प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ स्त्रीप्रमाणाः कुटुम्बिनः ]** स्त्री प्रमाणी येषां ते = स्त्रीप्रमाणाः । अनेन डः समासान्तः → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) ईलुक् ।

**[ भार्याप्रमाणाः श्रेणयः ]** भार्या प्रमाणा येषां ते = भार्याप्रमाणाः । अनेन डः समासान्तः → अ ।

**[ कल्याणप्रमाणः ]** कल्याणी प्रमाणी अस्य सः = कल्याणप्रमाणः । अनेन डः समासान्तः → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) ईलुक् ।

**[ द्वित्राः ]** द्वौ वा त्रयो वा = द्वित्राः । **'सुज्वार्थे संख्या संख्येये संख्यया बहुव्रीहिः'** (३।१।१९) इत्यादिना समासः ।

**[ पञ्चषाः ]** पञ्च वा षड् वा = पञ्चषाः । अनेन डः समासान्तः → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

**[ द्विदशाः ]** द्वि-दशन् । द्विर्दश = द्विदशाः । अनेन डः समासान्तः → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्लोपः । प्रथमा जस् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ त्रिदशाः ]** त्रि-दशन् । त्रिर्दश = त्रिदशाः । अनेन डः समासान्तः → अ । 'डित्यन्त्य०' (२।१।११४) अन्लोपः । प्रथमा जस् ।

**[ आसन्नदशाः ]** आसन्ना दश येषां ते = आसन्नदशाः । अनेन डः समासान्तः → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्लुक् । जस् । 'आसन्ना-ऽदूरा-ऽधिका-ऽध्यर्द्धा-ऽर्द्धादिपूरणं द्वितीयाद्यन्यार्थे' (३।१।२०) इत्यनेन समासः ।

**[ अदूरदशाः ]** अदूरा दश येषां ते = अदूरदशाः । अनेन डः समासान्तः → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्लुक् । जस् । 'आसन्ना-ऽदूरा०' (३।१।२०) इत्यनेन समासः ।

**[ अधिकदशाः ]** अधिका दश येषां ते = अधिकदशाः । अनेन डः समासान्तः → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्लुक् । जस् । 'आसन्ना-ऽदूरा०' (३।१।२०) इत्यनेन समासः ।

**[ उपदशाः ]** उप-समीपे दश येषां ते = उपदशाः । अनेन डः समासान्तः → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्लुक् । जस् । 'अव्ययम्' (३।१।२१) इत्यनेन समासः ।

**[ उपगणाः ]** उप-समीपे गणा येषां ते = उपगणाः । अनेन डः समासान्तः → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४)-अन्त्यस्वरादिलोपः । जस् । 'अव्ययम्' (३।१।२१) इत्यनेन समासः ।

**प्रमाणशब्देन सिद्धे प्रमाणीशब्दान्तात् कजभावार्थं वचनम् ।**

**[ अत्रिः ]** न विद्यन्ते त्रयो यस्य सोऽत्रिः ।

**[ सुत्रिः ]** शोभना त्रयो यस्य सः = सुत्रिः ।

**[ प्रियपञ्चानः ]** प्रियाः पञ्च येषां ते = प्रियपञ्चानः । जस् ।

**[ प्रियषषः ]** प्रियाः षड् येषां ते = प्रियषषः । जस् ।

**[ द्वादश ]** द्वाभ्यामधिका दश = द्वादश । 'द्वि-त्र्यष्टानां द्वा-त्रयोऽष्टाः प्राक् शतादनशीति-बहुव्रीहौ' (३।२।९२) इत्यादिना द्वादश निपात्यते । जस् । 'डति-ष्णः संख्याया लुप्' (१।४।५४) लुप् ।

**[ त्रयोदश ]** त्रिभिरधिका दश = त्रयोदश । 'द्वि-त्र्यष्टानां द्वा-त्रयोऽष्टाः प्राक्०' (३।२।९२) इत्यादिना त्रयोदश निपात्यते । जस् । 'डति-ष्णः संख्याया लुप्' (१।४।५४) लुप् ॥छ॥

## सुप्रात-सुश्व-सुदिव-शारिकुक्ष-चतुरस्त्रैणीपदा-ऽजपद-प्रोष्ठपद-भद्रपदम् ॥ ७।३।१२९ ॥

**[ सुप्रातसुश्वसुदिवशारिकुक्षचतुरस्त्रैणीपदाऽजपदप्रोष्ठपदभद्रपदम् ]** सुप्रातश्च सुश्वश्च सुदिवश्च शारिकुक्षश्च चतुरस्रश्च एणीपदश्च अजपदश्च प्रोष्ठपदश्च भद्रपदश्च = सुप्रातसुश्वसुदिवशारिकुक्षचतुरस्त्रैणीपदाऽजपदप्रोष्ठपदभद्रपदम् ।

**[ सुप्रातः ]** शोभनं कर्म प्रातरस्य = सुप्रातः । अनेन डः समासान्तः → अ । 'प्रायोऽव्ययस्य' (७।४।६५) अन्त्यस्वरादिलोपः ।

**[ सुश्वः ]** शोभनं कर्म श्वोऽस्य = सुश्वः । अनेन डः समासान्तः → अ ।

**[ सुदिवः ]** शोभनं कर्म दिवाऽस्य = सुदिवः । अनेन डः समासान्तः → अ ।

**[ शारिकुक्षः ]** शारेरिव कुक्षिरस्य = शारिकुक्षः । अनेन डः समासान्तः → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ चतुरस्रः ]** चतस्रोऽस्रयो यस्य = चतुरस्रः । अनेन डः समासान्तो निपात्यते ।

**[ एणीपदः ]** एण्या इव पादावस्य = एणीपदः मृगशिरः । अनेन डः समासान्तः-पद्भावश्च निपात्यते ।

**[ अजपदः ]** अजस्येव पादावस्य = अजपदः मेषशिरः । अनेन डः समासान्तः-पद्भावश्च निपात्यते ।

**[ प्रोष्ठपदः ]** प्रोष्ठो गौस्तस्येव पादावस्य = प्रोष्ठपदः । अनेन डः समासान्तः-पद्भावश्च निपात्यते ।

**[ भद्रपदः ]** भद्रौ पादावस्य = भद्रपदः । अनेन डः समासान्तः-पद्भावश्च निपात्यते ॥छ॥

## पूरणीभ्यस्तत्प्राधान्येऽप् ॥ ७।३।१३० ॥

**[ पूरणीभ्यस्तत्प्राधान्ये ]** 'पूरी(रै)चि आप्यायने' (१२६८) पूर् । पूर्यतेऽनयेति । 'करणा-ऽऽधारे' (५।३।१२९) अनट्प्र० → अन । 'अणञेयेकण्०' (२।४।२०) ङी । 'र-पृवर्णान्नो ण०' (२।३।६३) णत्वम् । पञ्चमी भ्यस् । तस्याः-पूरण्याः प्राधान्यं = तत्प्राधान्यम्, तस्मिन् ।

**[ अप् ]** अप् प्रथमा सि ।

पूरणप्रत्ययान्तः स्त्रीलिङ्गशब्दः पूरणी ।

**[ कल्याणीपञ्चमा रात्रयः ]** कल्याण 'गौरादिभ्यो मुख्यान्ङीः' (२।४।१९) ङी । पञ्चन् । पञ्चानां पूरणी = पञ्चमी । 'नो मट्' (७।१।१५९) मट्प्र० → म । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । कल्याणी पञ्चमी रात्रिर्यासां रात्रीणां ताः = कल्याणीपञ्चमा रात्रयः । अनेन अप्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । 'आत्' (२।४।१८) आप्प्र० → आ । जस् । 'परतः स्त्री०' (३।२।४९) इत्यादिना प्राप्तस्य पुंवद्भावस्य 'नाऽप्-प्रियाऽऽदौ' (३।२।५३) पुंवन्निषेधः । अत्र रात्रयः समासार्थः, तासु पञ्चम्यापि रात्रित्वेनानुप्रविष्टेति प्राधान्यम् ।

**[ कल्याणीदशमाः ]** कल्याणी दशमी रात्रिर्यासां रात्रीणां ताः = कल्याणीदशमाः । शेषं पूर्ववत् । दशानां पूरणी = दशमी । 'नो मट्' (७।१।१५९) मट्प्र० → म । 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ कल्याणीतुर्याः, कल्याणीतुरीयाः ]** चतुर् मण्ड्यते । चतुर्णां पूरणी = तुरीया । 'येयौ चलुक् च' (७।१।१६४) ईयप्र०-चलुक् च । 'आत्' (२।४।१८) आप्प्र० → आ । कल्याणी तुर्या तुरीया वा रात्रिर्यासां रात्रीणां ताः = कल्याणीतुर्याः, कल्याणीतुरीयाः । अनेन अप्समासान्तः । शेषं पूर्ववत् ।

**[ कल्याणीद्वितीयाः ]** द्वयोः पूरणी = द्वितीया । 'द्वेस्तीयः' (७।१।१६५) तीयप्र० । 'आत्' (२।४।१८) आप्प्र० → आ । कल्याणी द्वितीया रात्रिर्यासां रात्रीणां ताः = कल्याणीद्वितीयाः । अनेन अप्समासान्तः । शेषं पूर्ववत् ।

**[ कल्याणीतृतीयाः ]** त्रयाणां पूरणी = तृतीया । 'त्रेस्तृ च' (७।१।१६६) तीयप्र०-त्रिशब्दस्य तृदेशश्च । 'आत्' (२।४।१८) आप्प्र० → आ । कल्याणी तृतीया रात्रिर्यासां रात्रीणां ताः = कल्याणीतृतीयाः । अनेन अप्समासान्तः । शेषं पूर्ववत् ।

**[ द्वितीयाकल्याणीकाः ]** द्वितीया भार्या कल्याणी यासां भार्याणां ताः = द्वितीयाकल्याणीकाः । 'ऋन्नित्यदितः' (७।३।१७१) कच्प्र० । 'आत्' (२।४।१८) आप्प्र० → आ । जस् । 'तद्धिताऽककोपान्त्य-पूरण्याख्याः' (३।२।५४) इत्यादिना पुंवन्निषेधः ।

**[ कल्याणपञ्चमका दिवसाः ]** कल्याणः पञ्चमो येषां ते = कल्याणपञ्चमका दिवसाः । 'शेषाद् वा' (७।३।१७५) कच्प्र० → क । जस् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ कल्याणद्वितीयकान्यहानि ]** कल्याणं द्वितीयमहो येषामह्नां तानि = कल्याणद्वितीयकान्यहानि । 'शेषाद् वा' (७।३।१७५) कच्प्र० → क । जस् । 'नपुंसकस्य शिः' (१।४।५५) जस्० → शि० → इ० । 'स्वराच्छौ' (१।४।६५) नोऽन्तः । 'नि दीर्घः' (१।४।८५) दीर्घः । एवम्-अहानि ।

**[ कल्याणपञ्चमीकः पक्षः ]** कल्याणी पञ्चमी यस्य सः = कल्याणपञ्चमीकः । 'ऋन्नित्यदितः' (७।३।१७१) कच्प्र० → क । 'परतः स्त्री पुम्वत्०' (३।२।४९) इत्यादिना पुंवत् । पक्ष प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

## नञ्-सु-व्युप-त्रेश्चतुरः ॥ ७।३।१३१ ॥

**[ नञ्सुव्युपत्रेः ]** नञ् च सुश्च विश्च उपश्च त्रिश्च = नञ्सुव्युपत्रि, तस्मात् ।

**[ चतुरः ]** चतुर् पञ्चमी ङसि ।

**[ अचतुरः ]** अविद्यमानानि अदृश्यानि वा चत्वारि यस्य सोऽचतुरः । अनेन अप्समासान्तः → अ । अत्र सामान्यो बहुव्रीहिः । प्रतिपदोक्तबहुव्रीहिग्रहणे तु 'एकार्थं चानेकं च' (३।१।२२) इति चकारेण विधीयमाने बहुव्रीहौ अचतुर इत्यादयो न स्युः ।

**[ सुचतुरः ]** सदृश्यानि शोभनानि वा चत्वारि यस्य = सुचतुरः । अनेन अप्समासान्तः → अ । सि ।

**[ विचतुरः ]** विसदृशानि विगतानि वा चत्वारि यस्य = विचतुरः । अनेन अप्अप्समासान्तः → अ । सि ।

**[ उपचतुराः ]** चत्वारः समीपे येषां संख्येयानां ते = उपचतुराः । अनेन अप्समासान्तः → अ । जस् ।

**[ त्रिचतुराः ]** त्रयो वा चत्वारो वा = त्रिचतुराः । अनेन अप्समासान्तः → अ । जस् ।

समासान्तविधेरनित्यत्वादिह न भवति-

**[ त्रिचत्वा उन्मुग्धः ]** त्रयश्चत्वारो वा यस्य सः = त्रिचत्वारुन्मुग्धः । सि । 'वाः शेषे' (१।४।८२) उ० → वा० । 'दीर्घङ्याब्-व्यञ्जनात् सेः' (१।४।४५) सिलुक् ।

**[ उपचत्वाः ]** उपगताश्चत्वारो येन सः = उपचत्वाः । शेषं पूर्ववत् ॥छ॥

## अन्तर्बहिर्भ्यां लोम्नः ॥ ७।३।१३२ ॥

**[ अन्तर्बहिर्भ्याम् ]** अन्तर् च बहिस् च = अन्तर्बहिषौ, ताभ्याम् = अन्तर्बहिर्भ्याम् । पञ्चमी भ्याम् ।

**[ लोम्नः ]** लोमन् पञ्चमी ङसि । 'अनोऽस्य' (२।१।१०८) अलुक् ।

**[ अन्तर्लोमः ]** अन्तर्लोमान्यस्य = अन्तर्लोमः । अनेन अप्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् ।

**[ बाहर्लोमः प्रावारः ]** बहिर्लोमान्यस्य = बहिर्लोमः प्रावारः कम्बल उच्यते । अनेन अप्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् । 'वृग्ट् वरणे' (१२९४) वृ, प्रपूर्व० । प्रवृण्वन्ति तमिति प्रावारः । 'वृगो वस्त्रे' (५।३।५२) इत्यनेन प्राप्तोऽल् विकल्पपक्षे 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् । 'घञ्युपसर्गस्य बहुलम्' (३।२।८६) प्रस्य दीर्घः । प्रावारः कम्बलः स्मृतः ॥छ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

भान्नेतुः ॥ ७।३।१३३ ॥

[ **भात्** ] भ पञ्चमी ङसि ।

[ **नेतुः** ] नेतृ पञ्चमी ङसि । 'ऋतो डुर्' (१।४।३७) ङसि० → डुर्० → उर्० । 'डित्यन्त्यस्वरादेः' (२।१।११४) ऋलोपः ।

[ **मृगनेत्रा रात्रयः** ] मृगो नेता आसां ताः = मृगनेत्रा रात्रयः । अनेन अप्समासान्तः → अ ।

[ **पुष्यनेत्राः** ] पुष्यं नेता आसां ताः = पुष्यनेत्राः । अनेन अप्समासान्तः → अ । शेषं पूर्ववत् ।

[ **देवदत्तनेतृकः** ] देवदत्तो नेता यस्य सः = देवदत्तनेतृकः । 'ऋन्नित्यदितः' (७।३।१७१) कच्प्र० → क ।

**नेत्रशब्देनैव सिद्धे नेतृशब्दात् कच् मा भूदिति वचनम्** ॥छ॥

नाभेर्नाम्नि ॥ ७।३।१३४ ॥

[ **नाभेः** ] नाभि पञ्चमी ङसि ।

[ **नाम्नि** ] नामन् सप्तमी ङि ।

[ **पद्मनाभः** ] पद्मं नाभावस्य = पद्मनाभः । अनेन अप्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

[ **ऊर्णनाभः** ] ऊर्णा नाभावस्य = ऊर्णनाभः । अनेन अप्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । 'ङ्यापो बहुलं नाम्नि' (२।४।९९) इत्यादिना ह्रस्वः ।

[ **हेमनाभः** ] हेमं नाभावस्य = हेमनाभः । अनेन अप्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

[ **वज्रनाभः** ] वज्रं नाभावस्य = वज्रनाभः । अनेन अप्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

[ **हिरण्यनाभः** ] हिरण्यं नाभावस्य = हिरण्यनाभः । अनेन अप्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

[ **विकसितवारिजनाभिः** ] विकसितवारिजं नाभावस्य = विकसितवारिजनाभिः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

[ **अधोनाभं प्रहतवान्** ] अव्ययीभावसमासः । नाभेरधः । अत्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ॥छ॥

नञ्-बहोर्ऋचो माणव-चरणे ॥ ७।३।१३५ ॥

[ **नञ्बहोः** ] नञ् च बहुश्च = नञ्बहु, तस्मात् ।

[ **ऋचः** ] ऋच् पञ्चमी ङसि ।

[ **माणवचरणे** ] माणवश्च चरणं च = माणवचरणम्, तस्मिन् ।

[ **अनृचो माणवः** ] न विद्यन्ते ऋचोऽस्य = अनृचो माणवः । अनेन अप्समासान्तः → अ ।

[ **बह्वृचश्चरणः** ] बहु 'स्वरादुतो गुणादखरोः' (२।४।३५) ङी । बह्व्य ऋचोऽस्मिन् । अनेन अप्समासान्तः → अ । 'परतः स्त्री०' (३।२।४९) पुंवद्भावः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

[ **अनृक्कं साम** ] न विद्यन्ते ऋचोऽस्मिन् तत् = अनृक्कं साम । 'शेषाद् वा' (७।३।१७५) कच्प्र० → क ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ बहवृक्कं सूक्तम् ]** बह्व्य ऋचोऽस्मिन् तत् = बह्वृक्कं सूक्तम् । 'शेषाद् वा' (७।३।१७५) कच्प्र० → क । 'ऋक्-पूः-पथ्यपोऽत्' (७।३।७६) इत्येव सिद्धे नियमार्थं वचनम् ॥छ॥

## नञ्-सु-दुर्भ्यः सक्ति-सक्थि-हलेर्वा ॥ ७।३।१३६ ॥

**[ नञ्सुदुर्भ्यः ]** नञ् च सुश्च दुर् च = नञ्सुदुरः, तेभ्यः = नञ्सुदुर्भ्यः । पञ्चमी भ्यस् ।

**[ सक्तिसक्थिहलेर्वा ]** सक्तिश्च सक्थिश्च हलिश्च = सक्तिसक्थिहलि, तस्मात् । वा प्रथमा सि ।

**[ असक्तः, असक्तिः ]** 'षञ्जं सङ्गे' (१७३) षञ्ज् । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सञ्ज् । सञ्जनं = सक्तिः । 'स्त्रियां क्तिः' (५।३।९१) क्तिप्र० → ति । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) ग० → क० । अविद्यमाना सक्तिरस्य = असक्तः । अनेन विकल्पेन अप्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ सुसक्तः, सुसक्तिः ]** शोभना सक्तिरस्य = सुसक्तः । अनेन वा अप्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ दुसक्तः, दुसक्तिः ]** दुष्टा सक्तिरस्य = दुसक्तः । अनेन वा अप्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ असक्थः, असक्थिः ]** न विद्यते सक्थ्यस्य = असक्थः । अनेन वा अप्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ सुसक्थः, सुसक्थिः ]** शोभनं सक्थ्यस्य = सुसक्थः । अनेन विकल्पेन अप्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ दुसक्थः, दुसक्थिः ]** दुष्टं सक्थ्यस्य = दुसक्थः । अनेन विकल्पेन अप्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ अहलः, अहलिः ]** न विद्यते हलिर्यस्य = अहलः । 'नञत्' (३।२।१२५) न० → अ० । अनेन विकल्पेन अप्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ सुहलः, सुहलिः ]** शोभनो हलिर्यस्य = सुहलः । अनेन विकल्पेन अप्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ दुर्हलः, दुर्हलिः ]** दुष्टो हलिर्यस्य सः = दुर्हलः । अनेन विकल्पेन अप्समासान्तः → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ गौरसक्थी स्त्री ]** गौरं सक्थ्यस्याः = गौरसक्थी स्त्री । 'सक्थ्यक्ष्णः स्वाङ्गे' (७।३।१२६) टः समासान्तः → अ । 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ दीर्घसक्थि शकटम् ]** दीर्घं सक्थ्यस्य तत् = दीर्घसक्थि शकटम् । सि । 'अनतो लुप्' (१।४।५९) लुप् ।

**[ बहुहलिः पुरुषः ]** बहवो हलयो यस्य सः = बहुहलिः पुरुषः ।

**[ अहलकः, असक्तकः ]** न विद्यते हलमस्य = अहलकः असक्तकः । 'शेषाद् वा' (७।३।१७५) कच् → क इत्यादि न भवति । अहलक इत्येव अत्राहल इति साध्यं तच्च हलशब्दस्यापि सिध्यति इति सिद्धौ सत्यां यत् हलिशब्दोपादानं तत् ज्ञापयति हलादपि कच् न भवति । हलिं प्रति तु विचारशङ्कापि न तेन हल्यन्ताद् वैकल्पिकः कच् स्यादेव ॥छ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## प्रजाया अस् ॥ ७।३।१३७ ॥

**[ प्रजायाः ]** प्रजा पञ्चमी ङसि ।

**[ अस् ]** अस् प्रथमा सि ।

**[ अप्रजाः ]** अविद्यमाना प्रजा अस्य सः = अप्रजाः । अनेन अस्समासान्तः । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । सि । 'अभ्वादेरत्वसः सौ' (१।४।९०) दीर्घः । 'दीर्घङ्याब्-व्यञ्जनात् सेः' (१।४।४५) सिलुक् । 'सो रुः' (२।१।७२) स० → र० ।

**[ अप्रजसौ ]** अविद्यमाना प्रजा अनयोः तौ = अप्रजसौ । अनेन अस्समासान्तः । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । औ ।

**[ अप्रजसः ]** अविद्यमाना प्रजा एषां ते = अप्रजसः । अनेन अस्समासान्तः । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । जस् । 'सो रुः' (२।१।७२) स० → र० ।

**[ सुप्रजसौ ]** शोभना प्रजा ययोः तौ = सुप्रजसौ । अनेन अस्समासान्तः । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । औ ।

**[ दुष्प्रजसौ ]** दुष्टा प्रजा ययोः तौ = दुष्प्रजसौ । अनेन अस्समासान्तः । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । औ ॥छ॥

## मन्दा-ऽल्पाच्च मेधायाः ॥ ७।३।१३८ ॥

**[ मन्दाऽल्पात् ]** मन्दश्च अल्पश्च = मन्दाल्पम्, तस्मात् ।

**[ च ]** च प्रथमा सि ।

**[ मेधायाः ]** मेधा पञ्चमी ङसि ।

**[ मन्दमेधाः ]** मन्दा मेधा अस्य = मन्दमेधाः । अनेन अस्समासान्तः । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । सि । 'अभ्वादेरत्वसः सौ' (१।४।९०) दीर्घः । 'दीर्घङ्याब्-व्यञ्जनात् सेः' (१।४।४५) सिलुक् । 'सो रुः' (२।१।७२) स० → र० ।

**[ मन्दमेधसौ ]** मन्दा मेधा अनयोः तौ = मन्दमेधसौ । अनेन अस्समासान्तः । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । औ ।

**[ मन्दमेधसः ]** मन्दा मेधा एषां ते = मन्दमेधसः । अनेन अस्समासान्तः । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । जस् ।

**[ अल्पमेधाः ]** 'मेधृग् सङ्गमे च' (९०९) मेध् । मेधनं = मेधा । 'क्तेटो गुरोर्व्यञ्जनात्' (५।३।१०६) अप्र० । 'आत्' (२।४।१८) आप्प्र० → आ । अल्पा मेधा अस्य = अल्पमेधाः । अनेन अस्समासान्तः । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । सि । 'अभ्वादेरत्वसः सौ' (१।४।९०) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'सो रुः' (२।१।७२) स० → र० ।

**[ अमेधाः ]** न विद्यते मेधा अस्य = अमेधाः । अनेन अस्समासान्तः । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । प्रथमा सि । 'अभ्वादेरत्वसः सौ' (१।४।९०) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'सो रुः' (२।१।७२) स० → र० ।

**[ सुमेधाः ]** शोभना मेधा अस्य = सुमेधाः । अनेन अस्समासान्तः । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । प्रथमा सि । 'अभ्वादेरत्वसः सौ' (१।४।९०) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'सो रुः' (२।१।७२) स० → र० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ दुर्मेधाः ]** दुष्टा मेधा अस्य = दुर्मेधाः । अनेन अस्समासान्तः । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । प्रथमा सि । 'अभ्वादेरत्वसः सौ' (१।४।९०) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

## जातेरीयः सामान्यवति ॥ ७।३।१३९ ॥

**[ जातेः ]** जाति पञ्चमी ङसि ।

**[ ईयः ]** ईय प्रथमा सि ।

**[ सामान्यवति ]** सामान्यं विद्यतेऽस्य = सामान्यवान्, तस्मिन् ।

**[ ब्राह्मणजातीयः ]** ब्राह्मणो जातिरस्य = ब्राह्मणजातीयः । अनेन ईयः समासान्तः । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । अत्र ब्राह्मणशब्देन ब्राह्मणस्था जातिरुच्यते ।

**[ क्षत्रियजातीयः ]** क्षत्रियो जातिरस्य = क्षत्रियजातीयः । अनेन ईयः समासान्तः । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ सुजातीयः ]** शोभना जातिरस्य = सुजातीयः । अनेन ईयः समासान्तः । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ दुर्जातीयः ]** दुष्टा जातिरस्य = दुर्जातीयः । अनेन ईयः समासान्तः । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ नानाजातीयः ]** नाना जातिरस्य = नानाजातीयः । अनेन ईयः समासान्तः । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ किञ्जातीयः ]** का जातिरस्य = किञ्जातीयः । अनेन ईयः समासान्तः । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । किमत्र प्रश्ने न क्षेपे अतो न 'किं क्षेपे' (३।१।११०) [न] निषेधः ।

**[ बहुजातिर्ग्रामः ]** बहवो जातयो यस्मिन् ग्रामे सः = बहुजातिर्ग्रामः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । अत्र ग्रामो न सामान्यवान् किन्तु तत्स्थाः पुरुषाः ।

**[ अजातीयः ]** न विद्यते जातिरस्य = अजातीयः । अनेन ईयः समासान्तः । अत्र तु सामान्यवानेवान्यपदार्थः । प्रतिषेधस्तु नञर्थः ।

**[ दुर्जातेः सूतपुत्रस्य ]** दुष्टा जातिर्जन्म यस्य सः = तस्य-दुजार्तेः सूतपुत्रस्य । सारथिपुत्रस्येत्यर्थः ।

**[ पितृस्थानीयः ]** 'ष्ठां गतिनिवृत्तौ' (५) ष्ठा । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्था । 'निमित्ताभावे०' (न्या० सं० वक्ष०(१)/सूत्र(२९) स्था । स्थीयतेऽस्मिन्निति स्थानीयः । बाहुलकात् अनीयप्र० । पितेव स्थानीयः = पितृस्थानीयः ॥छ॥

## भृतिप्रत्ययान्मासादिकः ॥ ७।३।१४० ॥

**[ भृति ]** भृत् सप्तमी ङि ।

**[ प्रत्ययात् ]** प्रत्यय पञ्चमी ङसि ।

**[ मासात् ]** मास पञ्चमी ङसि ।

**[ इकः ]** इक प्रथमा सि ।

**[ पञ्चकमासिकः ]** पञ्च भृतिरस्य = पञ्चकः । 'सोऽस्य भृति-वस्नांशम्' (६।४।१६८) इत्यनेन विहितः 'संख्या-डतेश्चाऽशत्-ति-ष्टेः कः' (६।४।१३०) कप्र० । पञ्चको मासोऽस्य = पञ्चकमासिकः । अनेन इकः समासान्तः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ सप्तकमासिकः ]** सप्त भृतिरस्य = सप्तकः । 'संख्या-डतेश्चाऽशत्-ति-ष्टेः कः' (६।४।१३०) कप्र० । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् । सप्तको मासोऽस्य = सप्तकमासिकः । अनेन इकः समासान्तः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ विंशकमासिकः ]** विंशति भृतिरस्य = विंशकः । 'त्रिंशद्-विंशतेर्डकोऽसंज्ञायामाऽर्हदर्थे' (६।४।१२९) डकप्र० → अक० । 'विंशतेस्तेर्डिति' (७।४।६७) तिलुक् । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् । विंशको मासोऽस्य = विंशकमासिकः । अनेन इकः समासान्तः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ त्रिंशकमासिकः ]** त्रिंशत् भृतिरस्य = त्रिंशकः । 'त्रिंशद्-विंशतेर्डकोऽसंज्ञायामार्हदर्थे' (६।४।१२९) डकप्र० → अक० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अत्लुक् । त्रिंशको मासोऽस्य = त्रिंशकमासिकः । अनेन इकः समासान्तः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ शत्यमासिकः ]** शतं भृतिरस्य = शत्यः । शतात् केवलादतस्मिन् येकौ (६।४।१३१) यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । शत्यो मासोऽस्य = शत्यमासिकः । अनेन इकः समासान्तः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ शतिकमासिकः कर्मकरः ]** शतं भृतिरस्य = शतिकः । 'शतात् केवलादतस्मिन् येकौ' (६।४।१३१) इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । शतिको मासोऽस्य = शतिकमासिकः । अनेन इकः समासान्तः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । कर्मकरः ।

**[ सुमासः ]** शोभनो मासोऽस्य = सुमासः ।

**[ वार्षिकमासकः ]** वर्षासु भवः = वार्षिकः । 'वर्षा-कालेभ्यः' (६।३।८०) इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । वार्षिको मासोऽस्य = वार्षिकमासकः । 'शेषाद् वा' (७।३।१७५) कच्समासान्तः → क ।

**[ भृतिमासकः ]** भृतिर्मासोऽस्य = भृतिमासिकः । 'शेषाद् वा' (७।३।१७५) कच्समासान्तः → क । 'इह भृतिशब्दो वर्त्तते न भृत्यर्थे प्रत्ययः ।

**[ पञ्चकदिवसकः ]** पञ्च भृतिरस्य = पञ्चकः । 'संख्या-डतेश्चाऽशत्-ति-ष्टेः कः' (६।४।१३०) कप्र० । पञ्चको दिवसोऽस्य = पञ्चकदिवसकः । 'शेषाद् वा' (७।३।१७५) कच्समासान्तः → क ॥छा।

### द्विपदाद् धर्मादन् ॥ ७।३।१४१ ॥

**[ द्विपदात् ]** द्वे पदे यस्य सः = द्विपदस्तस्मात् ।

**[ धर्मात् ]** धर्म पञ्चमी ङसि ।

**[ अन् ]** अन् प्रथमा सि ।

**[ साधुधर्मा ]** साधूनामिव धर्मोऽस्य = साधुधर्मा । अनेन अन्समासान्तः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ क्षत्रियधर्मा ]** क्षत्रियाणामिव धर्मोऽस्य = क्षत्रियधर्मा । अनेन अन्समासान्तः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ अनन्तधर्मा ]** अनन्तो धर्मोऽस्य = अनन्तधर्मा । अनेन अन्समासान्तः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ विनाशधर्मा ]** विनाशरूपो धर्मोऽस्य = विनाशधर्मा । अनेन अन्समासान्तः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ साक्षात्कृतधर्माणः ]** असाक्षात् साक्षात् कृतः = साक्षात्कृतः । 'साक्षादादिश्च्व्यर्थे' (३।१।१४) इति गतिसंज्ञा । 'गति-क्वन्यस्तत्पुरुषः' (३।१।४२) इत्यादिना तत्पुरुषः । साक्षात्कृतो धर्म एतैः(येषां ते) = साक्षात्कृतधर्माणः । अनेन अन्समासान्तः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । जस् । 'नि दीर्घः' (१।४।८५) दीर्घः । 'र-षृवर्णान्नो ण०' (२।३।६३) णत्वम् ।

**[ कल्याणधर्मा, कल्याणधर्मकः ]** कल्याणरूपो धर्मोऽस्य = कल्याणधर्मा, कल्याणधर्मकः । मतान्तरे अनेनैव विकल्पेन अन्समासान्तः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । पक्षे-'शेषाद् वा' (७।३।१७५) कच् ।

**[ तद्धर्मा, तद्धर्मकः ]** स विवक्षितो धर्मोऽस्य = तद्धर्मा, तद्धर्मकः । मतान्तरे अनेनैव विकल्पेन अन्समासान्तः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । पक्षे-'शेषाद् वा' (७।३।१७५) कच् ।

**[ विपरीतधर्मा, विपरीतधर्मकः ]** विपरीतो धर्मोऽस्य = विपरीतधर्मा, विपरीतधर्मकः । मतान्तरे अनेनैव विकल्पेन अन्समासान्तः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । पक्षे-'शेषाद् वा' (७।३।१७५) कच् ।

**[ परमस्वधर्मः ]** परमः स्वो धर्मोऽस्य = परमस्वधर्मः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ परमस्वधर्मः ]** स्वश्चासौ धर्मश्च = स्वधर्मः । परमः स्वधर्मोऽस्य = परमस्वधर्मः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

प्रत्यासत्तेर्द्विपदस्य बहुव्रीहेर्यदि धर्म एवोत्तरपदं भवति तदा अन् प्रत्ययः स्यात्, इतीह न भवति ॥छ॥

## सु-हरित-तृण-सोमाज्जम्भात् ॥ ७।३।१४२ ॥

**[ सुहरिततृणसोमात् ]** सुश्च हरितश्च तृणं च सोमश्च = सुहरिततृणसोमम्, तस्मात् ।

**[ जम्भात् ]** जम्भ पञ्चमी ङसि ।

जम्भशब्दोऽभ्यवहार्यवचनो दंष्ट्रावचनो वा । उभयत्र पुं-स्त्रीलिङ्गः ।

**[ सुजम्भा ]** शोभनो जम्भो जम्भा वा अस्य = सुजम्भा । अनेन अन्समासान्तः । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः ।

**[ हरितजम्भा ]** हरितं जम्भो जम्भा वा यस्य = हरितजम्भा । अनेन अन्समासान्तः । अभ्यवहार्ये दंष्ट्रा जम्भाशब्दो वैयाकरणमते पुं-स्त्रीलिङ्गः । हरितवत् जम्भो जम्भा वा यस्य ।

**[ तृणजम्भा ]** तृणं जम्भो जम्भा वा अस्य = तृणजम्भा । अनेन अन्समासान्तः । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः ।

**[ सोमजम्भा ]** सोमो जम्भोऽस्य = सोमजम्भा । अनेन अन्समासान्तः । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः ।

**दंष्ट्रापक्षे - [ तृणजम्भा ]** तृणमिव जम्भोऽस्य = तृणजम्भा । अनेन अन्समासान्तः । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः ।

**[ सोमजम्भा ]** सोम इव जम्भा अस्य = सोमजम्भा । अनेन अन्समासान्तः । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ चारुजम्भः ]** चारुश्चार्वी जम्भो जम्भा वा अस्य = चारुजम्भः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ पतितजम्भः ]** पतिता जम्भो अस्य = पतितजम्भः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छा॥

## दक्षिणेर्मा व्याधयोगे ॥ ७।३।१४३ ॥

**[ दक्षिणेर्मा ]** दक्षिणेर्मन् प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः ।

**[ व्याधयोगे ]** व्याधेन योगः = व्याधयोगस्तस्मिन् ।

**[ दक्षिणेर्मा मृगः ]** दक्षिणेर्म मण्ड्यते । दक्षिणमङ्गमीर्मं बहुव्रणं वा अस्य = दक्षिणेर्मा मृगः । अनेन दक्षिणेर्मन् निपात्यते । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः । व्यद्धुकामस्य व्याधस्य दक्षिणं भागं बहूकृत्य व्यधनानुकूलं स्थितो व्याधेन वा दक्षिणभागे कृतव्रण एवमुच्यते ।

**[ दक्षिणेर्मं शकटम् ]** दक्षिणमङ्ग(ङ्गं) ईर्म(र्मं) बहुव्रणं वा यस्य तत् = दक्षिणेर्मं शकटम् । सि-अम् ।

**[ दक्षिणेर्मः पशुः ]** दक्षिणमङ्गमीर्मं बहुव्रणं वा यस्य सः = दक्षिणेर्मः पशुः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छा॥

## सु-पूत्युत्-सुरभेर्गन्धादिद् गुणे ॥ ७।३।१४४ ॥

**[ सुपूत्युत्सुरभेः ]** सुश्च पूतिश्च उच्च सुरभिश्च = सुपूत्युत्सुरभि, तस्मात् ।

**[ गन्धात् ]** गन्ध पञ्चमी ङसि ।

**[ इत् ]** इत् प्रथमा सि ।

**[ गुणे ]** गुण सप्तमी ङि ।

**[ सुगन्धि चन्दनम् ]** शोभनो गन्धो गुणोऽस्य तत् = सुगन्धि चन्दनम् । अनेन इत्समासान्तः → इ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि । 'अनतो लुप्' (१।४।५९) लुप् ।

**[ पूतिगन्धि करञ्जम् ]** पूति(:) गन्धो गुणोऽस्य तत् = पूतिगन्धि करञ्जम् । अनेन इत्समासान्तः → इ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि । 'अनतो लुप्' (१।४।५९) लुप् ।

**[ उद्गन्धि कमलम् ]** उत्कटो गन्धो गुणोऽस्य तत् = उद्गन्धि कमलम् । अनेन इत्समासान्तः → इ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि । 'अनतो लुप्' (१।४।५९) लुप् ।

**[ सुरभिगन्धि केसरम् ]** सुरभि गन्धो गुणोऽस्य तत् = सुरभिगन्धि केसरम् । अनेन इत्समासान्तः → इ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि । 'अनतो लुप्' (१।४।५९) लुप् ।

उत्तरत्राऽऽगन्तोर्वावचनादिह स्वाभाविकाद्भवति ।

**[ तीव्रगन्धं हिङ्गु ]** तीव्रो गन्धो गुणोऽस्य तत् = तीव्रगन्धं हिङ्गु । सि-अम् ।

**[ उग्रगन्धा वचा ]** उग्रो गन्धो गुणोऽस्याः सा = उग्रगन्धा वचा । 'आत्' (२।४।१८) आप्प्र० → आ । सि । 'दीर्घङ्याब्-व्यञ्जनात् सेः' (१।४।४५) लुक् ।

**[ सुरसः ]** शोभनो रसो गुणोऽस्य = सुरसः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ सुगन्ध आपणिकः ]** शोभना गन्धाः कुष्ठादयोऽस्य । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । 'रोर्यः' (१।३।२६) र० → य० । 'स्वरे वा' (१।३।२४) यलुक् । आ 'पणि व्यवहार-स्तुत्योः' (७१०) पण् । आ एत्य पणाय्यतेऽस्मिन्निति आपणः । 'पुन्नाम्नि घः' (५।३।१३०) घप्र० → अ । आपणेन चरति = आपणिकः । 'चरति' (६।४।११) इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छ॥

## वाऽऽगन्तौ ॥ ७।३।१४५ ॥

**[ वा ]** वा प्रथमा सि ।

**[ आगन्तौ ]** आगन्तु सप्तमी ङि ।

आहार्ये उत्पाद्ये इत्येकार्थे गुणे वर्त्तते यो गन्धशब्दः...... ।

**[ सुगन्धि, सुगन्धं वा शरीरम् ]** शोभनो गन्धो गुणोऽस्य = सुगन्धि शरीरम् । अनेन विकल्पेन इत्समासान्तः → इ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । पक्षे न कश्चित् प्रत्ययः । सि ।

**[ पूतिगन्धि, पूतिगन्धं वा जलम् ]** पूतिर्गन्धो गुणोऽस्य = पूतिगन्धि जलम् । अनेन विकल्पेन इत्समासान्तः → इ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । पक्षे न कश्चित् प्रत्ययः । सि ।

**[ उद्गन्धिः, उद्गन्धो वा आपणः ]** उत्कटो गन्धो गुणोऽस्य = उद्गन्धिः आपणः । अनेन विकल्पेन इत्समासान्तः → इ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । पक्षे न कश्चित् प्रत्ययः । सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ सुरभिगन्धिः, सुरभिगन्धो वा पवनः ]** सुरभिः गन्धो गुणोऽस्य = सुरभिगन्धि(:) पवनः । अनेन विकल्पेन इत्समासान्तः → इ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । पक्षे न कश्चित् प्रत्ययः । सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

## वाऽल्पे ॥ ७।३।१४६ ॥

**[ वा ]** वा प्रथमा सि ।

**[ अल्पे ]** अल्प सप्तमी ङि ।

**[ सूपगन्धि, सूपगन्धं भोजनम् ]** सूपस्य गन्धो मात्राऽस्मिन् = सूपगन्धि भोजनम् । अनेन विकल्पेन इत्समासान्तः → इ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । पक्षे-सि । अल्पसूपमित्यर्थः ।

**[ माल्यगन्धिः, माल्यगन्धः उत्सवः ]** माल्यस्य गन्धो मात्राऽस्मिन् = माल्यगन्धिः उत्सवः । अनेन विकल्पेन इत्समासान्तः → इ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । पक्षे-सि ।

**[ दधिगन्धि, दधिगन्धं भोजनम् ]** दध्नो गन्धो मात्राऽस्मिन् तद् = दधिगन्धि भोजनम् । अनेन विकल्पेन इत्समासान्तः → इ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । पक्षे-सि ।

असमानाधिकरण्येऽपि उष्ट्रमुखादित्वाद् बहुव्रीहिः ॥छ॥

## वोपमानात् ॥ ७।३।१४७ ॥

**[ वा ]** वा प्रथमा सि ।

**[ उपमानात् ]** उपमान पञ्चमी ङसि ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ उत्पलगन्धि, उत्पलगन्धं वा मुखम् ]** उत्पलस्येव गन्धो यस्य तत् = उत्पलगन्धि मुखम् । अनेन विकल्पेन इत्समासान्तः → इ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । पक्षे-सि ।

**[ करीषगन्धि, करीषगन्धं वा शरीरम् ]** करीषस्येव गन्धोऽस्य तत् = करीषगन्धि शरीरम् । अनेन विकल्पेन इत्समासान्तः → इ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । पक्षे-सि ॥छ॥

## पात् पादस्याऽहस्त्यादेः ॥ ७।३।१४८ ॥

**[ पात् ]** पात् प्रथमा सि । 'दीर्घङ्याब्-व्यञ्जनात् सेः' (१।४।४५) सिलुक् ।

**[ पादस्य ]** पाद षष्ठी ङस् ।

**[ अहस्त्यादेः ]** हस्ती आदिर्यस्य सः = हस्त्यादिः । न हस्त्यादिः = अहस्त्यादिः, तस्मात् । 'नञत्' (३।२।१२५) न० → अ० ।

**[ व्याघ्रपात् ]** 'पदिंच् गतौ' (१२५७) पद् । पद्यते पत्स्यते अपादि पेदे वा = पादः । 'पद-रुज-विश-स्पृशो घञ्' (५।३।१६) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । व्याघ्रस्येव पादावस्य = व्याघ्रपात् । अनेन पादशब्दस्य "पात्"देशः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् ।

**[ सिंहपात् ]** सिंहस्येव पादावस्य = सिंहपाद्(त्) । अनेन पादशब्दस्य "पात्"देशः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् ।

**[ ऋक्षपात् ]** ऋक्षस्येव पादावस्य = ऋक्षपात् । अनेन पादशब्दस्य "पात्"देशः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् ।

**[ हस्तिपादः ]** हस्तिन इव पादावस्य = हस्तिपादः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ अश्वपादः ]** अश्वस्येव पादावस्य = अश्वपादः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

गणोऽत्र ॥छ॥

## कुम्भपद्यादिः ॥ ७।३।१४९ ॥

**[ कुम्भपद्यादिः ]** कुम्भपदी आदिर्यस्य सः = कुम्भपद्यादिः । प्रथमा सि । 'सो रुः' (२।१।७२). स० → र० ।

**[ कुम्भपदी ]** कुम्भाविव पादावस्याः = कुम्भपदी । अनेन पाद् । 'वा पादः' (२।४।६) ङी । 'य-स्वरे पादः पदणि-क्य-घुटि' (२।१।१०२) "पद्"देशः ।

**[ जालपदी ]** जालमिव पादावस्याः सा = जालपदी ।

**[ एकपदी ]** एक इव पादोऽस्याः सा = एकपदी ।

**[ शतपदी ]** शतं पादा यस्याः सा = शतपदी ।

**[ सूत्रपदी ]** सूत्रवत् पादौ यस्याः सा = सूत्रपदी ।

**[ मुनिपदी ]** मुनेरिव पादौ यस्याः सा = मुनिपदी ।

**[ शितिपदी ]** शितीव पादावस्याः सा = शितिपदी ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

[ **आर्द्रपदी** ] आर्द्रौ पादौ यस्याः सा = आर्द्रपदी ।

[ **गोधापदी** ] गोधावत् पादौ यस्याः सा = गोधापदी ।

[ **कलशीपदी** ] कलशीवत् पादावस्याः सा = कलशीपदी ।

[ **दासीपदी** ] दासीवत् पादावस्याः सा = दासीपदी ।

[ **विष्णुपदी** ] विष्णुवत् पादावस्याः सा = विष्णुपदी ।

[ **कृष्णपदी** ] कृष्णौ पादावस्याः सा = कृष्णपदी ।

[ **कुणिपदी** ] कुणी पादावस्याः सा = कुणिपदी ।

[ **गुणपदी** ] गुणवत् पादावस्याः सा = गुणपदी ।

[ **द्रोणीपदी** ] द्रोणीवत् पादावस्याः सा = द्रोणीपदी ।

[ **सकृत्पदी** ] सकृदेकः पादोऽस्याः सा = सकृत्पदी ।

[ **सूकरपदी** ] सूकरस्येव पादावस्याः सा = सूकरपदी ।

[ **शुचिपदी** ] शुची निर्मलौ पादावस्याः सा = शुचिपदी ।

[ **विपदी** ] वि-पक्षिवत् पादावस्याः सा = विपदी ।

[ **अपदी** ] न विद्येते पादावस्याः सा = अपदी ।

[ **निष्पदी** ] निर्गतौ पादावस्याः सा = निष्पदी । 'निर्दुर्बहिराविष्प्रादुश्चतुराम्' (२।३।९) र० → ष० ।

[ **अष्टापदी** ] अष्टौ पादावस्याः (पादा अस्याः) सा = अष्टापदी । संज्ञायां 'नाम्नि' (३।२।७५) इत्यसंज्ञायां तु निपातनाद् दीर्घः ।

[ **अशीतिपदी** ] अशीतिः पादा अस्याः सा = अशीतिपदी । अनेन पादशब्दस्य "पात्"देशः । 'वा पादः' (२।४।६) ङी ।

येऽत्रोपमानपूर्वास्तेषां पूर्वेण, संख्यादीनां चोत्तरेण सिद्धे, यदिह वचनं तेन 'वा पादः' (२।४।६) इति ङीविकल्पो न भवति ॥छा।

## सु-संख्यात् ॥ ७।३।१५० ॥

[ **सुसंख्यात्** ] सुश्च संख्या च = सुसंख्यम्, तस्मात् । 'क्लीबे' (२।४।९७) ह्रस्वः ।

[ **सुपाद्** ] शोभनौ पादावस्य = सुपात् ।

[ **द्विपाद्** ] द्वौ पादावस्य = द्विपात् ।

[ **त्रिपात्** ] त्रयः पादा अस्य = त्रिपात् ।

[ **चतुष्पात्** ] चत्वारः पादा अस्य = चतुष्पात् । अनेन सर्वत्र पादशब्दस्य पाद्देशः-एवं समासान्तः । 'निर्दुर्बहिराविष्प्रादुश्चतुराम्' (२।३।९) र० → ष० । पक्षे-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ सुपदी, सुपात् ]** शोभनौ पादावस्याः सा = सुपदी । अनेन पादशब्दस्य "पाद्"देशः । 'वा पादः' (२।४।६) इत्यनेन विकल्पेन ङी । 'य-स्वरे पादः पदणि-क्य-घुटि' (२।१।१०२) "पद्"देशः ।

**[ द्विपदी, द्विपात् ]** द्वौ पादावस्याः सा = द्विपदी । अनेन पादस्य "पाद्"देशः । 'वा पादः' (२।४।६) इत्यनेन विकल्पेन ङी । 'य-स्वरे पादः पदणि०' (२।१।१०२) "पद्"देशः ॥छ॥

## वयसि दन्तस्य दतृ ॥ ७।३।१५१ ॥

**[ वयसि ]** वयस् सप्तमी ङि ।

**[ दन्तस्य ]** दन्त षष्ठी ङस् ।

**[ दतृ ]** दतृ प्रथमा सि । सूत्रत्वात् (लोपः) ।

**[ सुदन् कुमारः ]** शोभनाः सुजाताः समस्ता वा दन्ता अस्य = सुदन् कुमारः । अनेन "दतृ"देशः समासान्तः-दत् । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'पदस्य' (२।१।८९) तलोपः ।

**[ सुदती कुमारी ]** शोभना दन्ता अस्याः सा = सुदती कुमारी । अनेन "दतृ"देशः-दत् । 'अधातूदृदितः' (२।४।२) ङी ।

**[ द्विदन् बालः ]** द्वौ दन्तावस्य = द्विदन् बालः । अनेन दन्तशब्दस्य "दतृ"देशः एवं समासान्तः-दत् । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'पदस्य' (२।१।८९) तलोपः ।

**[ त्रिदन् ]** त्रयो दन्ता अस्य = त्रिदन् । अनेन दन्तशब्दस्य "दतृ"देशः एवं समासान्तः-दत् । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'पदस्य' (२।१।८९) तलोपः ।

**[ चतुर्दन् ]** चत्वारो दन्ता अस्य स = चतुर्दन् । अनेन दन्तशब्दस्य "दतृ"देशः एवं समासान्तः-दत् । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'पदस्य' (२।१।८९) तलोपः ।

**[ षोडन् ]** षड् दन्ता अस्य = षोडन् । अनेन दन्तशब्दस्य "दतृ"देशः एवं समासान्तः-दत् । 'एकादश-षोडश-षोडन्-षोढा-षड्ढा' (३।२।९१) नोऽन्तः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'पदस्य' (२।१।८९) तलोपः ।

**[ सुदन्तो दाक्षिणात्यः ]** शोभना दन्ता अस्य = सुदन्तः । दक्षिणा मण्ड्यते । दक्षिणस्यां भवः = दाक्षिणात्यः । 'दक्षिणा-पश्चात्-पुरसस्त्यण्' (६।३।१३) त्यण्प्र० → त्य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'कौण्डिन्याऽगस्त्ययोः कुण्डिना-ऽगस्ती च' (६।१।१२७) इत्यादिना अगस्त्येति निर्देशात् पुंवद्भावाभावः ।

**[ द्विदन्तः कुञ्जरः ]** द्वौ दन्तौ अस्य = द्विदन्तः कुञ्जरः ॥छ॥

## स्त्रियां नाम्नि ॥ ७।३।१५२ ॥

**[ स्त्रियाम् ]** 'असूच् क्षेपणे' (१२२१) अस् । अस्यति पुरुषस्य विवेकमिति स्त्री । 'स्तृग्श् आच्छादने' (१५२१) स्तृ । स्तृणाति-आच्छादयति पुरुषस्य विवेकमिति । ष्ट्यैं (३९)-स्त्यैं सङ्घाते च' (४०) स्त्यै । स्त्यायति संवर्द्धति(ते) पुरुषेण सहेति स्त्री निपात्यते, तस्याम् = स्त्रियाम् ।

**[ नाम्नि ]** 'णमं प्रह्वत्वे' (३८८) णम् । 'पाठे धात्वादेर्णो नः' (२।३।९७) नम् । नमति-धावते = नामन् । 'सात्मन्नात्मन्-वेमन्-रोमन्-क्लोमन्-नामन्-पाप्मन्-पक्ष्मन्-यक्ष्मन्निति' (उणा० ९१६) नामन्निपातः, तस्मिन् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[अयोदती]** अय इव दन्ता अस्याः = अयोदती । अनेन दन्तशब्दस्य "दतृ"देशः-एवं समासान्तः । 'अधातूदृदितः' (२।४।२) ङी ।

**[फालदती]** फालवत् दन्ता अस्याः सा = फालदती । अनेन दन्तशब्दस्य "दतृ"देशः-एवं समासान्तः । 'अधातूदृदितः' (२।४।२) ङी ।

**[परशुदती]** परशुरिव दन्ता अस्याः सा = परशुदती । अनेन दन्तशब्दस्य "दतृ"देशः-एवं समासान्तः । 'अधातूदृदितः' (२।४।२) ङी ।

एवंनामा काचित् ।

**[वज्रदन्तः]** वज्रवद्दन्ता अस्य = वज्रदन्तः ।

**[नागदन्तः]** नागवद्दन्ता अस्य = नागदन्तः ।

**[समदन्ती]** समा दन्ता अस्याः सा । 'नासिकोदरौष्ठ-जङ्घा-दन्त-कर्ण-शृङ्गा-ऽङ्ग-गात्र-कण्ठात्' (२।४।३९) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

**[स्निग्धदन्ती]** स्निग्धा दन्ता अस्याः सा = स्निग्धदन्ती । 'नासिकोदरौष्ठजङ्घा०' (२।४।३९) ङी । अस्य ङ्यां लुक्' (२।४।८६) अलुक् ॥छ॥

## श्यावा-ऽरोकाद् वा ॥ ७।३।१५३ ॥

**[श्यावाऽरोकात्]** श्यावश्च अरोकश्च = श्यावाऽरोकम्, तस्मात् ।

**[वा]** वा प्रथमा सि ।

**[श्यावदन्, श्यावदन्तः]** श्यावाः-कपिशा दन्ता अस्य = श्यावदन् । अनेन विकल्पे "दतृ"देशः-एवं समासान्तः । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः ।

**[अरोकदन्, अरोकदन्तः]** अरोका-निर्दीप्तयो निश्छिद्रा वा दन्ता अस्य = अरोकदन् । अनेन विकल्पे "दतृ"देशः-एवं समासान्तः । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः ॥छ॥

## वाऽग्रान्त-शुद्ध-शुभ्र-वृष-वराहा-ऽहि-मूषिक-शिखरात् ॥ ७।३।१५४ ॥

**[वा]** वा प्रथमा सि ।

**[अग्रान्तशुद्धशुभ्रवृषवराहाऽहिमूषिकाशिखरात्]** अग्रान्तश्च शुद्धश्च शुभ्रश्च वृषश्च वराहश्च अहिश्च मूषिकश्च शिखरश्च = अग्रान्तशुद्धशुभ्रवृषवराहाऽहिमूषिकशिखरम्, तस्मात् ।

योगविभागात् नाम्नीति निवृत्तम् ।

**[कुड्मलाग्रदन्, कुड्मलाग्रदन्तः]** कुड्मलाग्रमिव दन्ता अस्य = कुड्मलाग्रदन् । अनेन दन्तशब्दस्य "दतृ"आदेश एवं समासान्तः । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः ।

**[शिखराग्रदन्, शिखराग्रदन्तः]** शिखरस्येवाग्रं येषां ते = शिखराग्राः । शिखराग्रा दन्ता अस्य = शिखराग्रदन् । अनेन दन्तशब्दस्य "दतृ"देश एवं समासान्तः । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः ।

**[शुद्धदन्, शुद्धदन्तः]** शुद्धा दन्ता अस्य = शुद्धदन् । अनेन दन्तशब्दस्य "दतृ"देश एवं समासान्तः । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ शुभ्रदन्, शुभ्रदन्तः ]** शुभ्रा दन्ता अस्य = शुभ्रदन् । अनेन दन्तशब्दस्य "दतृ"देश एवं समासान्तः । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः ।

**[ वृषदन्, वृषदन्तः ]** वृषस्येव दन्ता अस्य = वृषदन् । अनेन दन्तशब्दस्य "दतृ"देश एवं समासान्तः । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः ।

**[ वराहदन्, वराहदन्तः ]** वराहस्येव दन्ता अस्य = वराहदन् । अनेन दन्तशब्दस्य "दतृ"देश एवं समासान्तः । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः ।

**[ अहिदन्, अहिदन्तः ]** अहिरिव दन्ता अस्य = अहिदन् । अनेन दन्तशब्दस्य "दतृ"आदेश एवं समासान्तः । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः ।

**[ मूषिकदन्, मूषिकदन्तः ]** मूषिकस्येव दन्ता अस्य = मूषिकदन् । अनेन दन्तशब्दस्य "दतृ"आदेश एवं समासान्तः । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः ।

**[ शिखरदन्, शिखरदन्तः ]** शिखरमिव दन्ता अस्य = शिखरदन् । अनेन दन्तशब्दस्य "दतृ"आदेश एवं समासान्तः । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः ।

"पक्वदाडिमसंकाशं माणिक्यं शिखरं विदुः" इत्यजयदेवेनोक्तम् ॥छा।

## सं-प्राज्जानोर्ज्ञु-ज्ञौ ॥ ७।३।१५५ ॥

**[ संप्रात् ]** सम् च प्रश्च = संप्रम्, तस्मात् ।

**[ जानोः ]** जानु षष्ठी ङस् ।

**[ ज्ञुज्ञौ ]** ज्ञुश्च ज्ञश्च = ज्ञुज्ञौ ।

**[ संज्ञुः, संज्ञः ]** सङ्गते जानुनी अस्य = संज्ञुः, संज्ञः । अनेन जानुशब्दस्य ज्ञु-ज्ञ आदेश एवं समासान्तः ।

**[ प्रज्ञुः, प्रज्ञः ]** प्रगते प्रवृद्धे प्रणते प्रकृष्टे वा जानुनी अस्य = प्रज्ञुः, प्रज्ञः । अनेन जानुशब्दस्य ज्ञु-ज्ञ आदेश एवं समासान्तः ।

**[ विजानुः ]** विगते जानुनी अस्य = विजानुः ॥छा।

## वोर्ध्वात् ॥ ७।३।१५६ ॥

**[ वा ]** वा प्रथमा सि ।

**[ ऊर्ध्वात् ]** ऊर्ध्व पञ्चमी ङसि ।

**[ ऊर्ध्वज्ञुः, ऊर्ध्वज्ञः, ऊर्ध्वजानुः ]** ऊर्ध्वे जानुनी अस्य = ऊर्ध्वज्ञुः, ऊर्ध्वज्ञः, ऊर्ध्वजानुः । अनेन जानुशब्दस्य ज्ञु-ज्ञदेशमेवं समासान्तौ विकल्पेन ॥छा।

## सुहृद्-दुर्हृन्मित्रा-ऽमित्रे ॥ ७।३।१५७ ॥

**[ सुहृद्दुर्हृत् ]** सुहृच्च दुर्हृच्च = सुहृद्दुर्हृत् ।

**[ मित्रामित्रे ]** मित्रं च अमित्रश्च = मित्राऽमित्रम्, तस्मिन् ।

**[ सुहृन्मित्रम् ]** शोभनं हृदयं यस्य तत् = सुहृन्मित्रम् । अनेन हृदयस्य "हृद्"देश एवं समासान्तः । सि । 'तृतीयस्य पञ्चमे' (१।३।१) द० → न० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ दुर्हृदमित्रः ]** दुष्टं हृदयं यस्य सः = दुर्हृदमित्रः । अनेन हृदयस्य "हृद्"देश एवं समासान्तः ।

**[ सुहृदयो मुनिः ]** शोभनं हृदयं यस्य सः = सुहृदयो मुनिः ।

**[ दुर्हृदयो व्याधः ]** दुष्टं हृदयं यस्य सः = दुर्हृदयो व्याधः ॥छ॥

## धनुषो धन्वन् ॥ ७।३।१५८ ॥

**[ धनुषः ]** धनुस् षष्ठी ङस् । 'नाम्यन्तस्था-कवर्गात् पदान्तः कृतस्य सः शिड्-नान्तरेऽपि' (२।३।१५) षत्वम् ।

**[ धन्वन् ]** धन्वन् प्रथमा सि ।

**[ शार्ङ्गधन्वा ]** शार्ङ्गं धनुर्यस्य सः = शार्ङ्गधन्वा । अनेन धनुस्शब्दस्य "धन्वन्"आदेश एवं समासान्तः । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घत्वम् ।

**[ पिनाकधन्वा ]** 'पिष्लृंप् संचूर्णने' (१४९३) पिष् । पिनष्टीति । 'पिषेः पिन्-पिण्यौ च' (उणा० ३६) किद् आकप्र०-पिन् आदेशश्च । पिनाकं धनुरस्य = पिनाकधन्वा । अनेन धनुस्शब्दस्य "धन्वन्"आदेश एवं समासान्तः । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घत्वम् ।

**[ अजकावधन्वा ]** अजकोऽस्यास्ति = अजकावम् । 'मण्यादिभ्यः' (७।२।४४) वप्र० । 'घञ्युपसर्गस्य बहुलम्' (३।२।८६) बाहुलकाद्दीर्घत्वम् । अजकावं धनुर्यस्य सः = अजकावधन्वा । अनेन धनुस्शब्दस्य "धन्वन्" आदेश एवं समासान्तः । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घत्वम् ।

**[ गाण्डीवधन्वा ]** गाण्डीवं धनुर्यस्य सः = गाण्डीवधन्वा । अनेन धनुस्शब्दस्य "धन्वन्" आदेश एवं समासान्तः । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घत्वम् ।

**[ गाण्डीवधनुषः खेभ्यो निश्चचार हुताशनः ]** संज्ञात्वविवक्षायां "वा नाम्नि" (७।३।१५९) इत्यनेन विकल्पपक्षे न कश्चिदादेशः, तेन भविष्यति ॥छ॥

## वा नाम्नि ॥ ७।३।१५९ ॥

**[ वा ]** वा प्रथमा सि ।

**[ नाम्नि ]** नामन् सप्तमी ङि ।

**[ शतधन्वा, शतधनुः ]** शतं धनूंषि यस्य = शतधन्वा । अनेन धनुस्शब्दस्य "धन्वन्"देश एवं समासान्तः । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः । पक्षे-प्रथमा सि । 'दीर्घङ्याब्-व्यञ्जनात् सेः' (१।४।४५) सिलुक् ।

**[ पुष्पधन्वा, पुष्पधनुः ]** पुष्पाण्येव धनुरस्य = पुष्पधन्वा । अनेन धनुस्शब्दस्य "धन्वन्"देश एवं समासान्तः । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः । पक्षे-प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् ॥छ॥

## खर-खुरान्नासिकाया नस् ॥ ७।३।१६० ॥

**[ खरखुरात् ]** खरश्च खुरश्च = खरखुरम्, तस्मात् ।

**[ नासिकायाः ]** नासिका षष्ठी ङस् ।

**[ नस् ]** नस् प्रथमा सि ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ खरणाः, खरणसौ ]** खरा खरस्येव नासिका यस्य ययोर्वा = खरणाः, खरणसौ । अनेन नासिकाशब्दस्य "नस्"आदेश एवं समासान्तः । सि-औ । 'अभ्वादेरत्वसः सौ' (१।४।९०) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते विसर्गस्तयोः' (१।३।५३) विसर्गः । 'पूर्वपदस्थान्नाम्न्यगः' (२।३।६४) णत्वम् ।

**[ खुरणाः, खुरणसौ ]** खुर इव नासिका यस्य ययोर्वा = खुरणाः, खुरणसौ । अनेन नासिकाशब्दस्य "नस्"आदेश एवं समासान्तः । सि-औ । 'अभ्वादेरत्वसः सौ' (१।४।९०) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः । 'पूर्वपदस्थान्नाम्न्यगः' (२।३।६४) णत्वम् ॥छ॥

## अस्थूलाच्च नसः ॥ ७।३।१६१ ॥

**[ अस्थूलात् ]** न स्थूलोऽस्थूलस्तस्मात् ।

**[ च ]** च प्रथमा सि ।

**[ नसः ]** नस प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ द्रुणसः ]** द्रुरिव नासिका अस्य = द्रुणसः । अनेन नासिकाशब्दस्य "नस"आदेश एवं समासान्तः । 'पूर्वपदस्थान्नाम्न्यगः' (२।३।६४) इत्यादिना णत्वम् ।

**[ वार्ध्रीणसः ]** वर्ध्रस्येयं = वार्ध्री । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । वार्ध्रीव नासिका अस्य = वार्ध्रीणसः । अनेन नासिकाशब्दस्य "नस" आदेश एवं समासान्तः । 'पूर्वपदस्थान्नाम्न्यगः' (२।३।६४) णत्वम् । रज्जुविशेषणेन वार्ध्रीशब्दस्य 'परतः स्त्री पुम्वत् स्त्र्येकार्थेऽनूङ्' (३।२।४९) इत्यादिना पुंवद्भावप्राप्तिः तद्वन्निरस्थिर्नासा अस्य । 'तद्धितः स्वरवृद्धि०' (३।२।५५) इत्यादिना पुंवद्भावाभावः ।

**[ गोनसः ]** गोरिव नासिका अस्य = गोनसः । अनेन नासिकाशब्दस्य "नस"आदेश एवं समासान्तः ।

**[ कुम्भीनसः ]** कुम्भीव नासिका अस्य = कुम्भीनसः । अनेन नासिकाशब्दस्य "नस"आदेश एवं समासान्तः ।

**[ खरणसः ]** खरस्येव नासिका अस्य = खरणसः । अनेन नासिकाशब्दस्य "नस"आदेश एवं समासान्तः । 'पूर्वपदस्थान्नाम्न्यगः' (२।३।६४) णत्वम् ।

**[ खुरणसः ]** खुर इव नासिका अस्य = खुरणसः । अनेन नासिकाशब्दस्य "नस"आदेश एवं समासान्तः । 'पूर्वपदस्थान्नाम्न्यगः' (२।३।६४) णत्वम् ।

**[ स्थूलनासिकः ]** स्थूला नासिका अस्य = स्थूलनासिकः ।

**[ तुङ्गनासिकः ]** तुङ्गा नासिका अस्य = तुङ्गनासिकः ।

**[ गोनासः ]** गोरिव नासा अस्य = गोनासः । 'गोश्चान्ते ह्रस्वोऽनंशिसमासेयोबहुव्रीहौ' (२।४।९६) ह्रस्वः ।

**चकारः पूर्वेण सूत्रेण अस्य बाधानिवृत्त्यर्थः** ॥छ॥

## उपसर्गात् ॥ ७।३।१६२ ॥

**[ उपसर्गात् ]** उपसर्ग पञ्चमी ङसि ।

धातुयोगे यः प्रादिरुपसर्गसंज्ञो भवति तस्मात्.....।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[प्रणसं मुखम्]** प्रगता प्रवृद्धा वा नासिका अस्य = प्रणसं मुखम् । अनेन नासिकाशब्दस्य "नस"आदेश एवं समासान्तः । सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । 'नसस्य' (२।३।६५) णत्वम् ।

**[उन्नसं मुखम्]** उन्नता उद्गता वा नासिका अस्य = उन्नसं मुखम् । अनेन नासिकाशब्दस्य "नस"आदेश एवं समासान्तः । सि । 'अतः स्यमोऽम्' (१।४।५७) अम् ।

**असंज्ञार्थं वचनम्** ॥छ॥

### वेः खु-ख्र-ग्रम् ॥ ७।३।१६३ ॥

**[वेः]** वि पञ्चमी ङसि ।

**[खुख्रग्रम्]** खुश्च ख्रश्च ग्रश्च = खुख्रग्रम् ।

**[विखुः, विख्रः, विग्रः]** विगता नासिका अस्य = विखुः, विख्रः, विग्रः । अनेन नासिकाशब्दस्य "खु-ख्र-ग्र"देश एवं समासान्तः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[विनासिकः]** वेः-पक्षिण इव नासिका अस्य = विनासिकः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः ॥छ॥

### जायाया जानिः ॥ ७।३।१६४ ॥

**[जायायाः]** जाया षष्ठी ङस् ।

**[जानिः]** जानि प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[युवजानिः]** युवन् स्त्री चेत् युवतिः । 'यूनस्तिः' (२।४।७७) तिप्र० । युवतिर्जाया अस्य = युवजानिः । अनेन जायाशब्दस्य "जानि" देश एवं समासान्तः । 'परतः स्त्री०' (३।२।४९) "ति"याति । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[प्रियजानिः]** प्रिया जाया अस्य = प्रियजानिः । अनेन जायाशब्दस्य "जानि"देश एवं समासान्तः । 'परतः स्त्री०' (३।२।४९) पुंवद्भावः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[शोभनजानिः]** शोभना जाया अस्य = शोभनजानिः । अनेन जायाशब्दस्य "जानि"देश एवं समासान्तः । 'परतः स्त्री०' (३।२।४९) पुंवद्भावः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[वधूजानिः]** वधूर्जाया अस्य = वधूजानिः । अनेन जायाशब्दस्य "जानि"देश एवं समासान्तः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[अनन्यजानिः]** न अन्या जाया अस्य = अनन्यजानिः । अनेन जायाशब्दस्य "जानि"देश एवं समासान्तः । 'परतः स्त्री०' (३।२।४९) पुंवद्भावः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

### व्युदः काकुदस्य लुक् ॥ ७।३।१६५ ॥

**[व्युदः]** विश्च उच्च = व्युद्, तस्मात् ।

**[काकुदस्य]** काकुद षष्ठी ङस् ।

**[लुक्]** लुक् प्रथमा सि ।

**[विकाकुत्]** काकु-धू(ध्व)नि विशेषं ददातीति काकुदम् । 'आतो डोऽह्वा-वा-मः' (५।१।७६) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलुक् । विगतं काकुदं ताल्वस्य = विकाकुत् । अनेन काकुदशब्दस्य 'षष्ठ्याऽन्त्यस्य' (७।४।१०६) इत्यनया परिभाषया अन्त्याकारस्य लुगिति भावार्थः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ उत्काकुत् ]** उत्कृष्टं काकुदं ताल्वस्य = उत्काकुत् । अनेन काकुदशब्दस्य 'षष्ठ्याऽन्त्यस्य' (७।४।१०६) इत्यनया परिभाषया अन्त्याकारस्य लुगिति भावार्थः ॥छ॥

## पूर्णाद् वा ॥ ७।३।१६६ ॥

**[ पूर्णात् ]** पूर्ण पञ्चमी ङसि ।

**[ वा ]** वा प्रथमा सि ।

**[ पूर्णकाकुत्, पूर्णकाकुदः ]** पूर्णं काकुदमस्य = पूर्णकाकुत् । अनेन विकल्पे काकुदशब्दस्य अलुक् समासान्तः ।

**[ रक्तकाकुदः ]** रक्तं काकुदमस्य = रक्तकाकुदः ॥छ॥

## ककुदस्याऽवस्थायाम् ॥ ७।३।१६७ ॥

**[ ककुदस्य ]** ककुद षष्ठी ङस् ।

**[ अवस्थायाम् ]** अवस्था सप्तमी ङि ।

"वयांसि तु दशाः प्रायाः" (श्लोकाङ्कः ५६५) इति अभिधानचिन्तामणिपाठादत्र न कालकृता शरीरावस्था वयो बाल्यादिः । अत एव "कृता वयस्तु धर्मादयः अभृतयोऽवस्था" इति भोजः ।

**[ असञ्जातककुद् बालः ]** न सञ्जातमसञ्जातं ककुदं स्कन्धोऽस्य = असञ्जातककुद् बालः । अनेन ककुदशब्दस्य अलुक् ।

**[ पूर्णककुद् युवा ]** पूर्णं ककुदमस्य = पूर्णककुद् युवा । अनेन ककुदशब्दस्य अलुक् । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् ।

**[ स्थूलककुद् बलवान् ]** स्थूलं ककुदमस्य = स्थूलककुद् बलवान् । अनेन ककुदशब्दस्य अलुक् । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् ।

**[ यष्टिककुद् ]** यष्टिवत् ककुदमस्य = यष्टिककुद् । अनेन ककुदशब्दस्य अलुक् । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् ।

**[ सन्नककुद् कृशः ]** नातिस्थूलो नातिकृशः सन्नं कृशं ककुदमस्य = सन्नककुद् कृशः । अनेन ककुदशब्दस्य अलुक् । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् ।

**[ पन्नककुद् वृद्धः ]** पन्नं पतितं ककुदमस्य = पन्नककुद् वृद्धः । अनेन ककुदस्य अलुक् । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् ।

**[ श्वेतककुदः ]** श्वेतं ककुदमस्य = श्वेतककुदः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

ककुच्छब्देनैव सिद्धे ककुदशब्दस्याऽस्मिन् विषये प्रयोगनिवृत्त्यर्थं वचनम् ॥छ॥

## त्रिककुद् गिरौ ॥ ७।३।१६८ ॥

**[ त्रिककुत् ]** त्रिककुत् प्रथमा सि । 'दीर्घङ्याब्-व्यञ्जनात् सेः' (१।४।४५) सिलुक् ।

**[ गिरौ ]** गिरि सप्तमी ङि ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ त्रिककुत् पर्वतः ]** त्रीणि ककुदानि ककुदाकाराणि शिखराण्यस्य = त्रिककुत् पर्वतः । अनेन ककुदशब्दस्य अन्त्य अलुक् निपात्यते । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'विरामे वा' (१।३।५१) द० → त० ।

"त्रेर्गिरावि"ति सिद्धे निपातनं गिरिविशेषप्रतिपत्त्यर्थम्, तेन अन्यस्मिन् पर्वते न भवति ॥छ॥

## स्त्रियामूधसो न् ॥ ७।३।१६९ ॥

**[ स्त्रियाम् ]** स्त्री सप्तमी ङि ।

**[ ऊधसो न् ]** ऊधस् षष्ठी ङस् । न् प्रथमा सि ।

**[ कुण्डोध्नी ]** कुण्डमिव ऊधो यस्याः सा = कुण्डोध्नी । अनेन सस्य न्० । 'ऊध्नः' (२।४।७) ङी । 'अनोऽस्य' (२।१।१०८) अलुक् ।

**[ घटोध्नी ]** घटवदूधोऽस्याः सा = घटोध्नी । अनेन सस्य न्० । 'ऊध्नः' (२।४।७) ङी । अनोऽस्य' (२।१।१०८) अलुक् ।

**[ पीवरोध्नी ]** पीवरमूधोऽस्याः सा = पीवरोध्नी । अनेन सस्य न्० । 'ऊध्नः' (२।४।७) ङी । 'अनोऽस्य' (२।१।१०८) अलुक् ।

**[ महोध्नी गौः ]** महत् ऊधोऽस्याः = महोध्नी गौः । अनेन सस्य न्० । 'ऊध्नः' (२।४।७) ङी । 'अनोऽस्य' (२।१।१०८) अलुक् । 'जातीयैकार्थेऽच्वेः' (३।२।७०) डा० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अत्लुक् । 'अवर्णस्ये०' (१।२।६) ओ ।

**[ महोधाः पर्जन्यः ]** महत् ऊधोऽस्य = महोधाः पर्जन्यः । प्रथमा सि । 'अभ्वादेरत्वसः सौ' (१।४।९०) दीर्घः । 'दीर्घङ्याब्०' (१।४५) सिलुक् । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः ।

**[ प्राप्तोधा गौः ]** ऊधः प्राप्ता = प्राप्तोधा गौः । प्रथमा सि । 'अभ्वादेरत्वसः सौ' (१।४।९०) दीर्घः । 'सो रुः' (२।१।७२) स० → र० । 'प्राप्ताऽऽपन्नौ तयाऽच्च' (३।१।६३) इत्यादिना समासः ॥छ॥

## इनः कच् ॥ ७।३।१७० ॥

**[ इनः ]** इन् पञ्चमी ङसि ।

**[ कच् ]** कच् प्रथमा सि ।

**[ बहुदण्डिका ]** दण्डोऽस्यास्तीति दण्डी । 'अतोऽनेकस्वरात्' (७।२।६) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । बहवो दण्डिनोऽस्यां सा = बहुदण्डिका । अनेन कच्समासान्तः → क । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ बहुच्छत्रिका सेना ]** छत्रमस्त्येषां = छत्रिणः । 'अतोऽनेकस्वरात्' (७।२।६) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । बहवश्छत्रिणोऽस्यां सा = बहुच्छत्रिका सेना । अनेन कच्समासान्तः → क । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ बहुरासभराविका शाला ]** टुक्षु (१०८४) - 'रु शब्दे' (१०८५) रु । रुवन्ति इति राविणः । 'कर्तुर्णिन्' (५।१।१५३) णिन्प्र० → इन् । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । रासभस्य राविणः = रासभराविणः । बहवो रासभराविणोऽस्यां शालायां सा = बहुरासभराविका शाला । अनेन कच्समासान्तः → क । 'आत्' (२।४।१८) आप्प्र० → आ ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अनिनस्मन्ग्रहणान्यर्थवतानर्थकेन च तदन्तविधिं प्रयोजयन्ति ।

**[ बहुस्वामिका, बहुवाग्मिका पुरी ]** स्वमस्यास्तीति । 'स्वान्मिन्नीशे' (७।२।४९) मिन्प्र०-दीर्घश्च । वागस्यास्तीति वाग्मी । 'ग्मिन्' (७।२।२५) ग्मिन्प्र० । बहवः स्वामिनोऽस्यां सा = बहुस्वामिका । बहवो वाग्मिनोऽस्यां सा = बहुवाग्मिका पुरी । अनेन कच्समासान्तः → क । 'आत्' (२।४।१८) आप्प्र० → आ । पुर गौरादित्वात् ङी ।

**[ बहुदण्डी, बहुदण्डिको राजा ]** बहवो दण्डिनोऽस्य = बहुदण्डी । प्रथमा सि । 'इन्-हन्-पूषाऽर्यम्णः शिस्योः' (१।४।८७) दीर्घः । बहवो दण्डिनोऽस्य = बहुदण्डिको राजा ।

**चकारो 'न कचि' ( २।४।१०५ ) इत्यत्र विशेषणार्थः** ॥छा।

## ऋन्नित्यदितः ॥ ७।३।१७१ ॥

**[ ऋन्नित्यदितः ]** ऋच्च नित्यदितश्च = ऋन्नित्यदित्, तस्मात् । नित्यं दित् येभ्यस्ते = नित्यदितः । एतद्वाक्यं प्रथमं कार्यम् ।

**[ बहुकर्तृकः ]** बहवः कर्त्तारो यस्य सः = बहुकर्तृकः । अनेन कच्समासान्तः → क ।

**[ बहुहर्तृकः ]** बहवो हर्त्तारो यस्य सः = बहुहर्तृकः । अनेन कच्समासान्तः → क ।

**नित्यदित् - [ बहुकुमारीकः ]** कुमार 'वयस्यनन्त्ये' (२।४।२१) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । बह्व्यः कुमार्योऽस्मिन् सः = बहुकुमारीकः । अनेन कच्समासान्तः → क । 'गोश्चान्ते ह्रस्वोऽनंशि०' (२।४।९६) ह्रस्वः ।

**[ बहुब्रह्मबन्धूको ग्रामः ]** ब्रह्मा बन्धुरस्याः सा = ब्रह्मबन्धूः । 'उतोऽप्राणिनश्चाऽयु-रज्ज्वादिभ्य ऊङ्' (२।४।७३) ऊङ् । अथवा 'बाह्वन्त-कद्रु-कमण्डलोर्नाम्नि' (२।४।७४) ऊङ् । 'समानानां०' (१।२।१) दीर्घः । बह्व्यः ब्रह्मबन्ध्वोऽस्मिन् सः = बहुब्रह्मबन्धूको ग्रामः । अनेन कच्समासान्तः → क ।

**[ पृथुश्रीः, पृथुश्रीकः ]** पृथ्वी श्रीर्यस्य, यद्वा पृथुः श्रीर्यस्य = पृथुश्रीः, पृथुश्रीकः । 'शेषाद् वा' (७।३।१७५) विकल्पेन कच्समासान्तः → क ।

**[ लम्बभ्रूः, लम्बभ्रूकः ]** लम्बे भ्रुवौ अस्य = लम्बभ्रूः, लम्बभ्रूकः । 'शेषाद् वा' (७।३।१७५) विकल्पेन कच्समासान्तः → क । 'वेयुवोऽस्त्रियाः' (१।४।३०) इत्यत्र विकल्पे स्त्रीत्वं ज्ञेयमनयोः शब्दयोः ।

**[ बहुतन्त्रीः, बहुतन्त्रीकः ]** बह्व्यस्तन्त्र्योऽस्य = बहुतन्त्रीः, बहुतन्त्रीकः । मतान्तरे 'शेषाद् वा' (७।३।१७५) विकल्पेन कच्समासान्तः → क ॥छा।

## दध्युरः-सर्पिर्मधूपानच्छालेः ॥ ७।३।१७२ ॥

**[ दध्युरःसर्पिर्मधूपानच्छालेः ]** दधिश्च उरश्च सर्पिश्च मधुश्च उपानच्च शालिश्च = दध्युरःसर्पिर्मधूपानच्छालि, तस्मात् ।

वाक्यं विविधं-शब्दप्रधानं अर्थप्रधानं च, अस्मिन् पदे शब्दप्रधानं वाक्यं ज्ञेयम् ।

**[ प्रियदधिकः ]** प्रियं दधि यस्य = प्रियदधिकः । अनेन कच्समासान्तः → क ।

**[ प्रियोरस्कः ]** प्रियमुरो यस्य = प्रियोरस्कः । अनेन कच्समासान्तः → क । 'प्रत्यये' (२।३।६) रस्य सः ।

**[ प्रियसर्पिष्कः ]** प्रियं सर्पिरस्य = प्रियसर्पिष्कः । अनेन कच्समासान्तः → क । 'नामिनस्तयोः षः' (२।३।८) रस्य षः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ प्रियमधुकः ]** प्रियं मधु अस्य = प्रियमधुकः । अनेन कच्समासान्तः → क ।

**[ प्रियोपानत्कः ]** प्रिया उपानहो यस्य = प्रियोपानत्कः । अनेन कच्समासान्तः → क । 'नहाहोर्ध-तौ' (२।१।८५) हस्य धः । 'धुटस्तृतीयः' (२।१।७६) ध० → द० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) द० → त० ।

**[ प्रियशालिकः ]** प्रिया शालिरस्य = प्रियशालिकः । अनेन कच्समासान्तः → क ॥छ॥

## पुमनडुन्नौ-पयो-लक्ष्म्या एकत्वे ॥ ७।३।१७३ ॥

**[ पुमनडुन्नौपयोलक्ष्म्याः ]** पुमांश्च अनड्वांश्च नौश्च पयश्च लक्ष्मीश्च = पुमनडुन्नौपयोलक्ष्मीः, तस्याः = पुमनडुन्नौपयोलक्ष्म्याः । पञ्चमी ङसि । 'स्रंस्-ध्वंस्-क्वस्सनडुहो दः' (२।१।६८) इत्यादिना हस्य द० । 'तृतीयस्य पञ्चमे' (१।३।१) द० → न० ।

**[ एकत्वे ]** एकत्व सप्तमी ङि ।

**[ प्रियपुंस्कः ]** प्रियः पुमान् अस्य = प्रियपुंस्कः । अनेन कच्समासान्तः → क । 'पुंसः' (२।३।३) सः ।

**[ प्रियानडुत्कः ]** प्रियो अनड्वान यस्य = प्रियानडुत्कः । अनेन कच्समासान्तः → क । 'स्रंस्-ध्वंस्-क्वस्सनडुहो दः' (२।१।६८) हस्य द० । 'अघोषे०' (१।३।५०) द० → त० ।

**[ प्रियनौकः ]** प्रिया नौर्यस्य = प्रियनौकः । अनेन कच्समासान्तः → क ।

**[ प्रियपयस्कः ]** प्रियं पयोऽस्य = प्रियपयस्कः । अनेन कच्समासान्तः → क । 'प्रत्यये' (२।३।६) रस्य सः ।

**[ प्रियलक्ष्मीकः ]** प्रिया लक्ष्मीरस्य = प्रियलक्ष्मीकः । अनेन कच्समासान्तः → क ।

**[ द्विपुमान्, द्विपुंस्कः ]** द्वौ पुमांसावस्य = द्विपुमान्, द्विपुंस्कः । 'शेषाद् वा' (७।३।१७५) इत्यनेन विकल्पे कच्समासान्तः → क । पक्षे यथाप्राप्तम् ।

**[ बह्वनड्वान्, बह्वनडुत्कः ]** बहवोऽनड्वाहोऽस्य = बह्वनड्वान्, बह्वनडुत्कः । 'शेषाद् वा' (७।३।१७५) इत्यनेन विकल्पे कच्समासान्तः → क । पक्षे यथाप्राप्तम् ।

**[ बहुनौः, बहुनौकः ]** बह्व्यो नावोऽस्य = बहुनौः, बहुनौकः । 'शेषाद् वा' (७।३।१७५) इत्यनेन विकल्पे कच्समासान्तः → क । पक्षे यथाप्राप्तम् ।

**[ बहुपयाः, बहुपयस्कः ]** बहूनि पयांस्यस्य = बहुपयाः, बहुपयस्कः । 'शेषाद् वा' (७।३।१७५) इत्यनेन विकल्पे कच्समासान्तः → क । पक्षे यथाप्राप्तम् ।

**[ बहुलक्ष्मीः, बहुलक्ष्मीकः ]** बह्व्यो लक्ष्म्योऽस्य = बहुलक्ष्मीः, बहुलक्ष्मीकः । 'शेषाद् वा' (७।३।१७५) इत्यनेन विकल्पे कच्समासान्तः → क । पक्षे यथाप्राप्तम् ।

**[ सलक्ष्मीको विनाशितः ]** सह लक्ष्म्या वर्त्तत इति सलक्ष्मीको विनाशितः । मतान्तरे कच् । 'सहात् तुल्ययोगे' (७।३।१७८) निषेधं नाद्रियन्ते, स्वमते तु 'सहात् तुल्ययोगे' (७।३।१७८) इति निषेधात् कच् न भवति ॥छ॥

## नञोऽर्थात् ॥ ७।३।१७४ ॥

**[ नञोऽर्थात् ]** नञ् पञ्चमी ङसि । अर्थ पञ्चमी ङसि ।

**[ अनर्थकं वचः ]** न विद्यतेऽर्थोऽस्य = अनर्थकं वचः । अनेन कच्समासान्तः → क । सि-अम् । वचस् प्रथमा सि । 'अनतो लुप्' (१।४।५९) लुप् । 'सो रुः' (२।१।७२) स० → र० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ अपार्थम्, अपार्थकम् ]** अपगतोऽर्थोऽस्य = अपार्थम्, अपार्थकम् । 'शेषाद् वा' (७।३।१७५) कच्समासान्तः → क । सि-अम् ।

## शेषाद् वा ॥ ७।३।१७५ ॥

**[ शेषात् ]** शेष पञ्चमी ङसि ।

**[ वा ]** वा प्रथमा सि ।

**[ बहुखट्वकः, बहुखट्वः ]** बह्व्यः खट्वा अस्मिन् = बहुखट्वकः । अनेन कच्समासान्तः → क । 'नवाऽऽपः' (२।४।१०६) ह्रस्वत्वम् । एवम्-बहुखट्वः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः ।

**[ बहुमालकः, बहुमालः ]** बह्व्यो माला अस्य = बहुमालकः । अनेन कच्समासान्तः → क । 'नवाऽऽपः' (२।४।१०६) ह्रस्वत्वम् । द्वितीये सर्वत्र 'गोश्चान्ते०' (२।४।९६) ह्रस्वो ज्ञातव्यः ।

**[ बहुवीणकः, बहुवीणः ]** बह्व्य वीणा अस्य = बहुवीणकः । अनेन कच्समासान्तः → क । 'नवाऽऽपः' (२।४।१०६) ह्रस्वः ।

**[ प्रियपथः ]** प्रियः पन्था अस्य = प्रियपथः । 'ऋक्-पूः-पथ्यपोऽत्' (७।३।७६) अत्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् ।

**[ प्रियधुरः ]** प्रिया धूरस्य = प्रियधुरः । 'धुरोऽनक्षस्य' (७।३।७७) अत्समासान्तः → अ ।

**[ व्याघ्रपाद् ]** व्याघ्रस्येव पादावस्य = व्याघ्रपाद् । 'पात् पादस्याऽहस्त्यादेः' (७।३।१४८) पादस्य पाद्देशः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् ।

**[ सिंहपाद् ]** सिंहस्येव पादावस्य = सिंहपाद् । 'पात् पादस्याऽहस्त्यादेः' (७।३।१४८) पादस्य पाद्देशः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् ॥छ॥

## न नाम्नि ॥ ७।३।१७६ ॥

**[ न ]** न प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[ नाम्नि ]** नामन् सप्तमी ङि ।

**[ बहुदेवदत्तः ]** बहवो देवदत्ता यस्य = बहुदेवदत्तः । अनेन कच्निषेधः ।

**[ विश्वदेवदत्तः ]** विश्वे देवदत्ता यस्य = विश्वदेवदत्तः । अनेन कच्निषेधः ।

**[ बहुविष्णुमित्रः ]** बहवो विष्णुमित्रा यस्य = बहुविष्णुमित्रः । अनेन कच्निषेधः ।

**[ विश्वविष्णुमित्रः ]** विश्वे विष्णुमित्रा यस्य = विश्वविष्णुमित्रः । अनेन कच्निषेधः । एवंनामानो ग्रामाः ।

**[ विश्वदेवः ]** विश्वे देवः ।

**[ विश्वयशाः ]** विश्वस्मिन् यशोऽस्य = विश्वयशाः । प्रथमा सि । 'अभ्वादेरत्वसः सौ' (१।४।९०) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । एवंनामानौ पुरुषौ ।

**[ पद्मश्रीः ]** पद्मे श्रीर्यस्य = पद्मश्रीः । एवंनामा स्त्री ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ श्वेताश्वतरिः स्त्री पुरुषो वा ]** ह्रसितोऽश्वोऽश्वतरः । 'वत्सोक्षा-ऽश्वर्षभाद्ध्रासे पित्' (७।३।५१) तरट्प्र० → तर । 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङी । श्वेता अश्वतरी यस्य यस्याः वा = श्वेताश्वतरिः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः, स्त्री पुरुषो वा ॥छ॥

## ईयसोः ॥ ७।३।१७७ ॥

**[ ईयसोः ]** ईयसु पञ्चमी ङसि । 'ङित्यदिति' (१।४।२३) ओ । 'एदोद्भ्यां ङसि-ङसो रः' (१।४।३५) ङसिस्थाने र० ।

**[ बहुश्रेयान् ]** बहवः श्रेयांसो यस्य, अथवा बहूनि श्रेयांसि यस्य = बहुश्रेयान् । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'न्स्महतोः' (१।४।८६) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'पदस्य' (२।१।८९) सलुक् ।

**[ बहुप्रेयान् ]** बहूनि प्रेयांसि यस्य = बहुप्रेयान् । प्रथमा सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'न्स्महतोः' (१।४।८६) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'पदस्य' (२।१।८९) सलुक् ।

'नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्' (न्या०वक्ष०(१)/सूत्र(१६)) इति न्यायात्-

**[ बहुश्रेयसी ]** बह्व्यः श्रेयस्योऽस्याः = बहुश्रेयसी । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् ।

**[ बहुप्रेयसी ]** बह्व्यः प्रेयस्योऽस्याः = बहुप्रेयसी । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् ॥छ॥

## सहात् तुल्ययोगे ॥ ७।३।१७८ ॥

**[ सहात् ]** सह पञ्चमी ङसि ।

**[ तुल्ययोगे ]** तुल्यश्चासौ योगश्च = तुल्ययोगस्तस्मिन् ।

तुल्ययोगो वर्त्तिपदार्थस्य पुत्रादेर्वृत्त्यर्थेन पित्रादिना सह क्रियागुणजातिद्रव्यैः साधारणः सम्बन्धः ।

**[ सपुत्र आगतः ]** सह पुत्रेण आगतः = सपुत्र आगतः । 'सहस्य सोऽन्यार्थे' (३।२।१४३) सहस्य सभावः ।

**[ सपुत्रः स्थूलः ]** पुत्रेण सह वर्त्तते = सपुत्रः स्थूलः ।

**[ सपुत्रो ब्राह्मणः ]** सह पुत्रेण वर्त्तत इति सपुत्रो ब्राह्मणः ।

**[ सपुत्रो गोमान् ]** सह पुत्रेण वर्त्तत इति सपुत्रो गोमान् ।

**[ श्वेताश्वको देवदत्त आगतः ]** श्वेतोऽश्वोऽस्य = श्वेताश्वको देवदत्तः । प्रथमा सि । आगतः । कच्समासान्तः → क । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ सलोमकः ]** सह विद्यमानानि लोमान्यस्य = सलोमकः । 'शेषाद् वा' (७।३।१७५) कच्समासान्तः → क ।

**[ सपक्षकः ]** सह विद्यमानाः पक्षा अस्य = सपक्षकः । 'शेषाद् वा' (७।३।१७५) कच्समासान्तः → क ।

**[ सकर्मकः ]** सह विद्यमानानिं कर्माण्यस्य = सकर्मकः । 'शेषाद् वा' (७।३।१७५) कच्समासान्तः → क ॥छ॥

## भ्रातुः स्तुतौ ॥ ७।३।१७९ ॥

**[ भ्रातुः ]** भ्रातृ पञ्चमी ङसि ।

**[ स्तुतौ ]** स्तुति सप्तमी ङि ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ सुभ्राता ]** शोभनो भ्राता अस्य = सुभ्राता । प्रथमा सि । 'ऋदुशनस्-पुरुदंशोऽनेहसश्च सेर्डा:' (१।४।८४) सि० → डा० । 'डित्यन्त्यस्वरादेः' (२।१।११४) ऋलोपः ।

**[ कल्याणभ्राता ]** कल्याणो भ्राता अस्य = कल्याणभ्राता । प्रथमा सि । 'ऋदुशनस्०' (१।४।८४) सि० → डा० । 'डित्यन्त्यस्वरादेः' (२।१।११४) ऋलोपः ।

**[ प्रियभ्राता ]** प्रिया भ्रातरोऽस्य = प्रियभ्राता । प्रथमा सि । 'ऋदुशनस्-पुरुदंशोऽनेहसश्च सेर्डा:' (१।४।८४) सि० → डा० । 'डित्यन्त्यस्वरादेः' (२।१।११४) ऋलोपः ।

**[ बहुभ्राता ]** बहवो भ्रातरोऽस्य = बहुभ्राता । प्रथमा सि । 'ऋदुशनस्०' (१।४।८४) सि० → डा० । 'डित्यन्त्यस्वरादेः' (२।१।११४) ऋलोपः ।

**[ सुमातृकः ]** शोभना माता अस्य = सुमातृकः । 'ऋन्नित्यदितः' (७।३।१७१) कच्समासान्तः → क ।

**[ मूर्खभ्रातृकः ]** मूर्खो भ्राता अस्य = मूर्खभ्रातृकः । 'ऋन्नित्यदितः' (७।३।१७१) कच्समासान्तः → क ।।छा।

## नाडी-तन्त्रीभ्यां स्वाङ्गे ॥ ७।३।१८० ॥

**[ नाडीतन्त्रीभ्याम् ]** नाडी च तन्त्री च = नाडीतन्त्र्यौ, ताभ्याम् = नाडीतन्त्रीभ्याम् । पञ्चमी भ्याम् ।

**[ स्वाङ्गे ]** स्वाङ्ग सप्तमी ङि ।

**[ बहुनाडिः कायः ]** नाडि 'इतोऽक्त्यर्थात्' (२।४।३२) ङी । 'समानानां तेन दीर्घः' (१।२।१) दीर्घः । बह्व्यो नाड्योऽस्मिन् = बहुनाडिः कायः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः ।

**[ बहुतन्त्रीर्ग्रीवा ]** बह्व्यस्तन्त्र्योऽस्यामिति बहुतन्त्रीर्ग्रीवा । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । तन्त्रीर्धमनिः । ङ्याद्यन्ताभावात् ह्रस्वो न भवति ।

**[ बहुनाडीकः, स्तम्बः ]** बह्व्यो नाड्योऽस्य = बहुनाडीकः स्तम्बः । 'शेषाद् वा' (७।३।१७५) कच्समासान्तः → क ।

**[ बहुतन्त्रीका वीणा ]** बह्व्यस्तन्त्र्योऽस्य = बहुतन्त्रीका वीणा । 'शेषाद् वा' (७।३।१७५) कच्समासान्तः → क । 'आत्' (२।४।१८) आप्प्र० → आ ।।छा।

## निष्प्रवाणिः ।। ७।३।१८१ ॥

**[ निष्प्रवाणिः ]** निष्प्रवाणि प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ निष्प्रवाणिः कम्बलः, पटो वा ]** 'वेंग् तन्तुसन्ताने' (९९२) वे । 'आत् सन्ध्यक्षरस्य' (४।२।१) वा, प्रपूर्व० । प्रोयतेऽस्यामिति प्रवाणिः । 'का-वा-वी-क्री-श्रि-श्रु-क्षु-ज्वरि-तूरि-चूरि-पूरिभ्यो णिः' (उणा० ६३४) णिप्र० । 'इतोऽक्त्यर्थात्' (२।४।३२) ङी । निर्गता प्रवाणी तन्तुवायशलाका यस्मादिति निष्प्रवाणिः कम्बलः पटो वा । अनेन निपातः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । तन्त्रादचिरोद्धृत इत्यर्थः ।

**[ निष्प्रवाणिः सदश ]** 'वेंग् तन्तुसन्ताने' (९९२) वे । 'आत् सन्ध्यक्षरस्य' (४।२।१) वा । ऊयतेऽस्यामिति वानिः । 'वी-यु-सु-वह्यागिभ्यो निः' (उणा० ६७७) निप्र० । 'सदि-वृत्यमि-धम्यश्यटि-कट्यवेरनिः' (उणा० ६८०) अनिप्र० वा । प्रसृ(भृ)ता वानिः = प्रवाणिः । सा निर्गता तन्तुभ्योऽस्येति निष्प्रवाणिः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः ।।छा।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## सुभ्वादिभ्यः ॥ ७।३।१८२ ॥

**[ सुभ्वादिभ्यः ]** सुभ्रूरादिर्येषां ते = सुभ्वादयः, तेभ्यः = सुभ्वादिभ्यः । पञ्चमी भ्यस् ।

**[ सुभ्रूः ]** 'भ्रमूच् अनवस्थाने' (१२३४) भ्रम् । भ्रमणं = भ्रूः । 'भ्रमि-गमि-तनिभ्यो डित्' (उणा० ८४३) इति डित् ऊप्र० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । शोभनं भ्रू-भ्रमणं यस्याः । 'उतोऽप्राणिनश्चाऽयु-रज्ज्वादिभ्य ऊङ्' (२।४।७३) ऊङ्प्र० → ऊ ।

**[ लेखाभ्रूः ]** लेखावत् भ्रू - भ्रमणं यस्याः = लेखाभ्रूः । 'उतोऽप्राणिनश्चाऽयु०' (२।४।७३) ऊङ्प्र० → ऊ ।

भ्रूशब्दवत् भ्रुशब्दोऽप्यस्ति ।

**[ शलाकाभ्रूः ]** शलाकावत् भ्रू [भ्रुर्यस्याः] सा = शलाकाभ्रूः ।

**[ कोमलोरूः ]** कोमले कोमलौ ऊरू यस्याः सा = कोमलोरूः ।

**[ संहितोरूः ]** संहितावुरू यस्याः सा = संहितोरूः ।

**[ वरोरूः ]** वरे ऊरू यस्याः सा = वरोरूः ।

**[ पीवरोरूः ]** पीवरे ऊरू यस्याः सा = पीवरोरूः । 'उतोऽप्राणिनश्चाऽयु०' (२।४।७३) ऊङ्प्र० → ऊ । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ हे सुभ्रु! ]** [सुभ्रूः] तस्याः सम्बोधनं हे सुभ्रु ! । आमन्त्र्ये प्रथमैकवचनं सि । 'नित्यदिद्-द्विस्वराऽम्बार्थस्य ह्रस्वः' (१।४।४३) ह्रस्वः ।

**[ हे वरोरु! ]** [वरोरूः] तस्याः सम्बोधनं हे वरोरु ! । आमन्त्र्ये प्रथमैकवचनं सि । 'नित्यदिद्०' (१।४।४३) ह्रस्वः ।

**[ करभोरूः ]** करभवत् ऊरू यस्याः सा = करभोरूः । 'उपमान-सहित-संहित-सह-शफ-वाम-लक्ष्मणाद्यूरोः' (२।४।७५) ऊङ्प्र० → ऊ ।

**[ संहितोरूः ]** संहिते ऊरू यस्याः सा = संहितोरूः । 'उपमान-सहित-संहित०' (२।४।८५) ऊङ्प्र० → ऊ ॥छ॥

**इत्याचार्यश्रीहेमचन्द्रविरचितायां बृहद्वृत्तौ तद्धितस्य सप्तमः पादः** ॥छ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

॥ अर्हम् ॥

## ॥ अथ सप्तमाध्यायस्य चतुर्थः पादः ॥

### वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते ॥ ७।४।१ ॥

**[ वृद्धिः ]** 'वृधूङ् वृद्धौ' (९५७) वृध् । वर्धिषीष्टेत्याशास्यमाना = वृद्धिः । 'तिक्कृतौ नाम्नि' (५।१।७१) तिप्र० । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९) त० → ध० । 'धुटस्तृतीयः' (२।१।७६) ध० → द० ('तृतीयस्तृतीय०' (१।३।४९) ध० → द०) । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ स्वरेषु ]** स्वर सप्तमी सुप् ।

**[ आदेः ]** आदि षष्ठी ङस् ।

**[ ञ्णिति ]** ञ् च ण् च = ञ्णौ । ञ्णौ इतौ अनुबन्धौ यस्य सः = ञ्णित्, तस्मिन् ।

**[ तद्धिते ]** तस्मै हितं = तद्धितम्, तस्मिन् ।

**ञिति - [ दाक्षिः ]** दक्षस्यापत्यं = दाक्षिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ० । अनेन वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ प्लाक्षिः ]** प्लक्षस्यापत्यं = प्लाक्षिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ० । अनेन वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ कार्ष्णिः ]** कृष्णस्यापत्यं = कार्ष्णिः । 'ऋषि वृष्ण्यन्धक-कुरुभ्यः' (६।१।६१) इत्यस्य बाधको 'बाह्वादिभ्यो गोत्रे' (६।१।३२) इञ्प्र० → इ । अनेन वृद्धिः आर् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ नैचाकविः ]** निचाकोरपत्यं = नैचाकविः । 'ऋषि-वृष्ण्यन्धक०' (६।१।६१) इत्यस्य बाधको 'बाह्वादिभ्यो गोत्रे' (६।१।३२) इञ्प्र० → इ । अनेन वृद्धिः ऐ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

**[ चौलिः ]** चूलाया अपत्यं = चौलिः । 'बाह्वादि०' (६।१।३२) इञ्प्र० → इ० । अनेन वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् ।

**[ कापटवः ]** कपटोरपत्यं = कापटवः । 'ऋषि वृष्ण्यन्धक-कुरुभ्यः' (६।१।६१) अण्प्र० → अ० । अनेन वृद्धिः आ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

**[ भार्गवः ]** भृगोरपत्यं = भार्गवः । 'ऋषि वृष्ण्यन्धक-कुरुभ्यः' (६।१।६१) अण्प्र० → अ० । अनेन वृद्धिः आर् । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ शैवः ]** शिवस्यापत्यं = शैवः । 'शिवादेरण्' (६।१।६०) अण्प्र० → अ० । अनेन वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ औपगवः ]** गोः समीपम् = उपगुः । 'गोश्चान्ते ह्रस्वोऽनंशिसमासेयोबहुव्रीहौ' (२।४।९६) ह्रस्वः । उपगोरपत्यम् = औपगवः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । अनेन वृद्धिः औ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

**[ श्रायः स्थालीपाकः ]** श्रीर्देवता अस्य = श्रायः । 'देवता' (६।२।१०१) अण्प्र० → अ । अनेन वृद्धिः ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् ।

**[ ह्रायः ]** ह्रीर्देवता अस्य = ह्रायः । 'देवता' (६।२।१०१) अण्प्र० → अ । अनेन वृद्धिः ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् ।

यत आख्यातवृत्तौ प्रथमपादे 'वृद्धिराऽऽरैदौत्' (३।३।१) इत्यत्र वा(या) वृद्धिरुक्ता सा ज्ञेया, अत्रैव स्वरेष्विति व्यञ्जनापेक्षा व्युदासार्थं तेन व्यञ्जनादेरपि भवति ।

**[ शङ्कव्यं दारु ]** शङ्कवे हितं = शङ्कव्यं दारु । 'उवर्ण-युगादेर्यः' (७।१।३०) यप्र० । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

**[ चिकीर्षकः ]** 'डुकृंग् करणे' (८८८) कृ । कर्तुमिच्छति । 'तुमर्हादिच्छायां सन्नतत्सनः' (३।४।२१) सन्प्र० → स० । 'स्वर-हन-गमोः सनि धुटि' (४।१।१०४) दीर्घः । 'ॠतां क्ङितीर्' (४।४।११६) इर्०-किर्० । 'सन्-यङश्च' (४।१।३) "कि"द्विः । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । 'भ्वादेर्नामिनो०' (२।१।६३) दीर्घः । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । चिकीर्षतीति चिकीर्षकः । 'णक-तृचौ' (५।१।४८) णकप्र० → अक । 'अतः' (४।३।८२) अलुक् ॥छ॥

## केकय-मित्रयु-प्रलयस्य यादेरिय् च ॥ ७।४।२ ॥

**[ केकयमित्रयुप्रलयस्य ]** केकयश्च मित्रयुश्च प्रलयश्च = केकयमित्रयुप्रलयम्, तस्य ।

**[ यादेरिय् ]** य आदिर्यस्य सः = यादिस्तस्य । इय् प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् ।

**[ च ]** च प्रथमा सि ।

**[ कैकेयः ]** केकयस्यापत्यं = कैकेयः । 'राष्ट्र-क्षत्रियात् सरूपाद् राजाऽपत्ये द्रिरञ्' (६।१।११४) अञ्प्र० → अ० । अनेन वृद्धिः ऐ-यस्य "इय्"देशश्च । 'अवर्णस्ये०' (१।२।६) ए ।

**[ मैत्रेयिकया श्लाघते ]** मित्र 'यांक् प्रापणे' (१०६२) या । मित्रं यातीति मित्रयुः । 'पी-मृग-मित्र-देव-कुमार-लोक-धर्म-विश्व-सुम्नाश्मावेभ्यो युः' (उणा० ७४१) किद् उप्र० । 'इडेत्-पुसि०' (४।३।९४) आलुक् । मित्रयोर्भावः = मैत्रेयिका, तया । 'गोत्र-चरणाच्छ्लाघा-ऽत्याकार-प्राप्त्यवगमे' (७।१।७५) इत्यादिना अकञ्प्र० → अक । अनेन वृद्धिः ऐ-यस्य "इय्"देशश्च । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्०' (२।४।१११) इ ।

**[ प्रालेयं हिमम् ]** प्रलयादागतं = प्रालेयं हिमम् । 'तत आगते' (६।३।१४९) अण्प्र० → अ । अनेन वृद्धिः आ-यस्य "इय्"आदेशश्च । 'अवर्णस्ये०' (१।२।६) ए । सि-अम् ।

**[ केकयत्वम् ]** केकयस्य भावः = केकयत्वम् । 'भावे त्व-तल्' (७।१।५५) त्वप्र० । सि-अम् ॥छ॥

## देविका-शिंशपा-दीर्घसत्र-श्रेयसस्तत्प्राप्तावाः ॥ ७।४।३ ॥

**[ देविकाशिंशपादीर्घसत्रश्रेयसः ]** देविका च शिंशपा च दीर्घसत्रश्च श्रेयांश्च = देविकाशिंशपादीर्घसत्रश्रेयः, तस्य ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ तत्प्राप्तौ ]** तस्या-वृद्धेः प्राप्तिस्तत्प्राप्तिस्तस्याम् ।

**[ आः ]** आ प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ दाविकमुदकम् ]** 'दिवूच् क्रीडा-जयेच्छा-पणि-द्युति-स्तुति-गतिषु' (११४४) दिव् । दीव्यन्ति देवा अस्यामिति देविका । 'नाम्नि पुंसि च' (५।३।१२१) णकप्र० → अक । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्०' (२।४।१११) इ । देविकायां भवं = दाविकमुदकम् । 'भवे' (६।३।१२३) अण्प्र० → अ । वृद्धिप्राप्तौ अनेन एकारस्य आकारः । सि-अम् ।

**[ दाविकाकूलाः शालयः ]** देविकाकूले भवाः = दाविकाकूलाः शालयः । 'भवे' (६।३।१२३) अण्प्र० → अ । वृद्धिप्राप्तौ अनेन एकारस्य आकारः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । जस् ।

**[ पूर्वदाविकः ]** पूर्वदेविका नाम प्राच्यग्रामस्तत्र भवः = पूर्वदाविकः । 'भवे' (६।३।१२३) अण्प्र० → अ । 'प्राग्ग्रामाणाम्' (७।४।१७) इत्यनेनोत्तरपदवृद्धिप्राप्तौ अनेन एकारस्य आकारः । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ शांशपः स्तम्भः ]** शिंशपाया विकारः = शांशपः स्तम्भः । 'प्राण्यौषधि-वृक्षेभ्योऽवयवे च' (६।२।३१) अण्प्र० → अ । वृद्धिप्राप्तौ अनेन इकारस्य आकारः । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् ।

**[ शांशपास्थलाः शालयः ]** शिंशपायाः स्थलं = शिंशपास्थलम् । शिंशपास्थले भवाः = शांशपास्थलाः शालयः । 'भवे' (६।३।१२३) अण्प्र० → अ । वृद्धिप्राप्तौ अनेन इकारस्य आकारः । जस् ।

**[ पूर्वशांशपः ]** पूर्वशिंशपा नाम ग्रामस्तत्र भवः = पूर्वशांशपः । 'भवे' (६।३।१२३) अण्प्र० → अ । अनेन इकारस्य आकारः । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् ।

**[ दार्घसत्रम् ]** दीर्घसत्रे भवं = दार्घसत्रम् । 'भवे' (६।३।१२३) अण्प्र० → अ । वृद्धिप्राप्तौ अनेन ईकारस्य आ । सि-अम् ।

**[ श्रायसं द्वादशाङ्गम् ]** श्रेयोऽधिकृत्य कृतं = श्रायसम् । 'अमोऽधिकृत्य ग्रन्थे' (६।३।१९८) अण्प्र० → अ । वृद्धिप्राप्तौ अनेन एकारस्य आ । सि-अम् । द्वि-दशन् । द्वाभ्यामधिका दश = द्वादश । 'द्वि-त्र्यष्टानां द्वा-त्रयोऽष्टाः प्राक् शतादनशीति-बहुव्रीहौ' (३।२।९२) द्वि० → द्वा० क्रियते । द्वादशानां पूरणः = द्वादशम् । 'संख्यापूरणे डट्' (७।१।१५५) डट्प्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्लुक् । द्वादशं च तदङ्गं च = द्वादशाङ्गम् । सि-अम् ।

**[ सौदेविकः ]** सुदेविकायां भवः = सौदेविकः । 'भवे' (६।३।१२३) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् इत्यत्र निषेधार्थम्-पूर्वोत्तरपदानामपि यथास्यादित्येवमर्थं च । अन्यथा हि केवलानामेव स्यात् ॥छ॥

## वहीनरस्यैत् ॥ ७।४।४ ॥

**[ वहीनरस्य ]** वहीनर षष्ठी ङस् ।

**[ ऐत् ]** ऐत् प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् ।

**[ वैहीनरिः ]** वहीनरस्यापत्यं = वैहीनरिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । अनेन अकारस्य ऐत् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ वैहीनरम् ]** वहीनरस्येदं = वैहीनरम् । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । अनेन अकारस्य ऐत् । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

विहीनरस्य वृद्ध्या सिध्यति । वहीनरस्य वाहीनरिर्मा भूदिति वचनम् ॥छा।

**य्वः पदान्तात् प्रागैदौत् ॥ ७।४।५ ॥**

**[ य्वः ]** य् च व् च = य्व्, तस्मात् ।

**[ पदान्तात् ]** पदस्यान्तः = पदान्तस्तस्मात् ।

**[ प्राक् ]** प्राक् प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[ ऐदौत् ]** ऐच्च औच्च = ऐदौत् । प्रथमा सि ।

**[ वैयाकरणः ]** व्याकरणं वेत्त्यधीते वा = वैयाकरणः । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० → अ । अनेन यकारात् प्राक् ऐत्० → ऐ० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ नैयायिकः ]** न्यायं वेत्त्यधीते वा = नैयायिकः । 'न्यायादेरिकण्' (६।२।११८) इकण्प्र० → इक । अनेन यकारात् प्राक् ऐत्० → ऐ० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ नैयासिकः ]** नि 'असूच् क्षेपणे' (१२२१) अस् । नितरामस्यन्ते-क्षिप्यन्ते विविधप्रमेया अस्मिन्निति न्यासः । 'व्यञ्जनाद् घञ्' (५।३।१३२) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । 'इवर्णादेरस्वे०' (१।२।२१) यत्वम् । न्यासं वेत्त्यधीते वा = नैयासिकः । 'न्यायादेरिकण्' (६।२।११८) इकण्प्र० → इक । अनेन यात् प्राक् ऐत् आगमः → ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ वैयसनम् ]** वि 'असूच् क्षेपणे' (१२२१) अस् । व्यस्यते-क्षिप्यते स्वकार्यात् प्राणी अनेनेति व्यसनम् । 'करणाऽऽधारे' (५।३।१२९) अनट्प्र० → अन । 'इवर्णादेरस्वे०' (१।२।२१) यत्वम् । व्यसने भवं = वैयसनम् । 'भवे' (६।३।१२३) अण्प्र० → अ । अनेन यात् प्राक् ऐरागमः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ सौवागमिकः ]** स्वागमं वेत्त्यधीते वा = सौवागमिकः । 'न्यायादेरिकण्' (६।२।११८) इकण्प्र० → इक । अनेन वात् प्राक् "औ"आगमः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ सौवश्विः ]** स्वश्वस्यापत्यं = सौवश्विः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । अनेन वात् प्राक् "औ"आगमः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ सौवश्वः ]** स्वश्वस्यायं = सौवश्वः । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । अनेन वात् प्राक् "औ"आगमः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ पूर्वत्रैयलिन्दः ]** पूर्वत्र्यलिन्दो नाम प्राग्ग्रामः तत्र भवः = पूर्वत्रैयलिन्दः । 'भवे' (६।३।१२३) अण्प्र० → अ । अनेन यात् प्राक् ऐकारागमः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

परत्वान्नित्यत्वाच्च वृद्धेः प्रागेव सर्वत्र अनेनैदौतौ ।

**[ सौपर्णेयः ]** सुपर्ण्याः सुपर्णाया वा अपत्यं = सौपर्णेयः । 'ङ्याप्त्यूङः' (६।१।७०) एयण्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।१) अवर्णस्य-इवर्णस्य च लुक् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ याताश्छात्राः ]** 'इंण्क् गतौ' (१०७५) इ । एतीति यत् । 'शत्रानशावेष्यति तु सस्यौ' (५।२।२०) शतृप्र० → अत् । 'ह्रिणोरप्विति व्-यौ' (४।३।१५) यत्वम् । यत इमे = याताश्छात्राः । 'तस्येदम्' (६।३।१६०) अणप्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ।

**[ दाध्यश्विः ]** दधिप्रधानोऽश्वः = दध्यश्वः । दध्यश्वस्यापत्यं = दाध्यश्विः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ माध्वश्विः ]** मधुप्रधानोऽश्वः = मध्वश्वः । मध्वश्वस्यापत्यं = माध्वश्विः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ द्व्याशीतिकः, त्र्याशीतिकः ]** द्वाभ्यामशीतिभ्यां निर्वृत्तः, द्वाभ्यामशीतिभ्यामधीष्टो भृतो वा, द्वेऽशीती भूतो भावी वा = द्व्याशीतिकः । त्रिभिरशीतिभिर्निर्वृत्तः, त्रिभिरशीतिभिरधीष्टो भृतो वा, त्रयोऽशीतयो भूतो भावी वा = त्र्याशीतिकः । अत्राशीतिशब्दो दिवसार्द्धमासमासादेः कालस्य संख्या ब्रूते इति 'कालात् परिजय्य-लभ्य-कार्य-सुकरे' (६।४।१०४) इत्यादिना कालाधिकारविहितो 'निर्वृत्ते' (६।४।१०५) इत्यादिभिः सूत्रैः इकणप्र० → इक । वृद्धिः ।

**[ वैयाकरणभार्यः ]** अस्मिन् पदे निष्पन्नः वैयाकरण मण्ड्यते । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । वैयाकरणी भार्या अस्य = वैयाकरणभार्यः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः । 'परतः स्त्री०' (३।२।४९) पुंवत्-ङीगतेत्यर्थः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ सौवश्वभार्यः ]** अस्मिन् पदे निष्पन्नः सौवश्व मण्ड्यते । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । सौवश्वी भार्या यस्य = सौवश्वभार्यः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः । 'परतः स्त्री०' (३।२।४९) पुंवत्-ङीगतेत्यर्थः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।।छ।।

## द्वारादेः ।। ७।४।६ ।।

**[ द्वारादेः ]** द्वार आदिर्यस्य सः = द्वारादिः, तस्मात् ।

**[ द्वौवारिकः ]** द्वारे नियुक्तः = द्वौवारिकः । 'तत्र नियुक्ते' (६।४।७४) इकणप्र० → इक । वृद्धिप्राप्तौ अनेन वकारात् प्राक् "औ"आगमः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ सौवरः ]** स्वर मण्ड्यते । स्वरमधिकृत्य कृतो ग्रन्थः = सौवरः । 'अमोऽधिकृत्य ग्रन्थे' (६।३।१९८) अणप्र० → अ । वृद्धिप्राप्तौ अनेन वकारात् प्राक् "औ"आगमः ।

**[ सौवः ]** स्वर् मण्ड्यते । स्वर्भवः = सौवः । 'भवे' (६।३।१२३) अणप्र० → अ । वृद्धिप्राप्तौ अनेन वात् प्राक् "औ"रागमः । 'प्रायोऽव्ययस्य' (७।४।६५) अर्लुक् ।

**[ सौवस्तिकः ]** स्वस्तीत्याह = सौवस्तिकः । 'प्रभूतादिभ्यो ब्रुवति' (६।४।४३) इकणप्र० → इक । अनेन वात् प्राक् "औ"रागमः । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । अव्युत्पन्नोऽयं स्वस्तिशब्दः । सुपूर्वस्य तु पूर्वेण 'य्वः पदान्तात् प्रागैदौत्' (७।४।५) इत्यादिना सिद्धम् ।

**[ सौवादुमृदः ]** स्वादुमृदोऽपत्यं = सौवादुमृदः । 'ङसोऽपत्ये' (६।१।२८) अणप्र० → अ । वृद्धिप्राप्तौ अनेन वात् प्राक् "औ"रागमः ।

**[ वैयल्कसः ]** विगतोऽर्कः व्यर्कस्तं स्यतीति व्यल्कसः । 'आतो डोऽह्वा-वा-मः' (५।१।७६) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलुक् । 'ऋफिडादीनां डश्च लः' (२।३।१०४) र० → ल० । व्यल्कसे भवः =

Jain Education International For Personal & Private Use Only www.jainelibrary.org

वैयल्कसः । 'भवे' (६।३।१२३) अण्प्र० → अ । 'य्वः पदान्तात्०' (७।४।५) यकारात् प्राक् "ऐ"रागमः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ शौवस्तिकः ]** श्वो भवः = शौवस्तिकः । 'श्वसस्तादिः' (६।३।८४) तिकण्प्र० → तिक । अनेन वात् प्राक् "औ"गमः । श्वस्शब्दात् निष्पन्नमिदम् ।

**[ शौवनं मांसम् ]** शुन इदं = शौवनं मांसम् । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । अनेन वात् प्राक् "औ"गमः । सि-अम् ।

**[ स्फैयकृतः ]** स्फ्यकृतस्यापत्यं = स्फैयकृतः । 'ऋषि-वृष्ण्यन्धक-कुरुभ्यः' (६।१।६१) अण्प्र० → अ । अनेन यात् प्राक् "ऐ"गमः ।

**[ सौवम् ]** स्वस्येदं = सौवम् । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । अनेन वात् प्राक् "औ"गमः ।

**[ सौवाध्यायिकः ]** स्वाध्यायेन जयति = सौवाध्यायिकः । 'तेन जित-जयद्-दीव्यत्-खनत्सु' (६।४।२) इकण्प्र० → इक । अनेन वात् प्राक् "औ"गमः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ सौवग्रामिकः ]** स्वग्रामे भवः = सौवग्रामिकः । 'अध्यात्मादिभ्य इकण्' (६।३।७८) इकण्प्र० → इक । अनेन वात् प्राक् "औ"गमः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ दौवारपालिः ]** द्वारपालस्यापत्यं = दौवारपालिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । अनेन वात् प्राक् "औ"गमः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ दौवारपालिकः ]** द्वारपाल्या अपत्यं = दौवारपालिकः । 'रेवत्यादेरिकण्' (६।१।८६) इकण्प्र० → इक । अनेन वात् प्राक् औ ।

**[ सौवराध्यायः ]** स्वरस्य अध्यायः = स्वराध्यायः । स्वराध्याये भवः = सौवराध्यायः । 'भवे' (६।३।१२३) अण्प्र० → अ । अनेन वात् प्राक् औ ।

**[ सौवर्गमनिकः ]** स्वर्गमनमाह = सौवर्गमनिकः । 'प्रभूतादिभ्यो ब्रुवति' (६।४।४३) इकण्प्र० → इक । अनेन वात् प्राक् औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ शौवादंष्ट्रो मणिः ]** दृश्यते इति दंष्ट्रा । शुनो दंष्ट्रा = श्वदंष्ट्रा, तस्यां भवः = शौवादंष्ट्रो मणिः । 'भवे' (६।३।१२३) अण्प्र० → अ । अनेन "औ"वात् प्राक् । बाहुलकादणि सति 'शुनः' (३।२।९०) इति दीर्घः ।

**[ शौवभस्त्रः ]** श्वेव भस्त्रा यस्य । बाहुलकात् 'शुनः' (३।२।९०) इति न दीर्घः । श्वभस्त्रे भवः = शौवभस्त्रः । 'भवे' (६।३।१२३) अण्प्र० → अ । अनेन वात् प्राक् औ ।

**[ स्वापतेयम् ]** स्वपतौ साधुः = स्वापतेयम् । 'पथ्यतिथि-वसति-स्वपतेरेयण्' (७।१।१६) एयण्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ स्वाजन्यम् ]** स्वजनस्य भावः कर्म वा । 'पतिराजान्तगुणाङ्गराजादिभ्यः कर्मणि च' (७।१।६०) ट्यण्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

गणोऽत्र ॥छ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## न्यग्रोधस्य केवलस्य ॥ ७।४।७ ॥

**[ न्यग्रोधस्य ]** न्यग् रोहतीति न्यग्रोधः । 'नाम्युपान्त्य-प्री-कृ-गृ-ज्ञः कः' (५।१।५४) इत्यस्य बाधको 'लिहादिभ्यः' (५।१।५०) अच्प्र० → अ । 'वीरुन्-न्यग्रोधौ' (४।१।१२१) न्यग्रोधनिपातः, तस्य ।

**[ केवलस्य ]** केवल षष्ठी ङस् ।

**[ नैयग्रोधो दण्डः कषायो वा ]** न्यग्रोधस्य विकारः = नैयग्रोधो दण्डः । 'प्राण्यौषधि-वृक्षेभ्योऽवयवे च' (६।२।३१) अण्प्र० → अ । वृद्धिप्राप्तौ अनेन यात् प्राक् "ऐ"गमः → ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक्, कषायो वा ।

**[ न्याग्रोधमूलाः शालयः ]** न्यग्रोधस्य मूलं = न्यग्रोधमूलम् । न्यग्रोधमूले भवाः = न्याग्रोधमूलाः शालयः । 'भवे' (६।३।१२३) अण्प्र० → अ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । जस् ।

**[ न्याग्रोधकः ]** न्यग्रोधाः सन्त्यस्मिन् । न्यग्रोधानां निवासः अदूरभवो वा । न्यग्रोधैर्निवृत्तं = न्यग्रोधकः । 'निवासाऽदूरभव इति देशे नाम्नि' (६।२।६९) इत्यादिभिस्त्रिभिः सूत्रैः कप्र०, तत्र भवः = न्याग्रोधकः । 'भवे' (६।३।१२३) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

इदमपि सूत्रं द्वारादीनां तदादिविधिर्ज्ञापकम् । न्यग्रोहतीति न्यग्रोध इति व्युत्पत्तिपक्षे नियमार्थम्, केवलस्यैवेति । अव्युत्पत्तिपक्षे तु विध्यर्थं वचनम् ॥छ॥

## न्यङ्कोर्वा ॥ ७।४।८ ॥

**[ न्यङ्कोर्वा ]** न्यङ्कु षष्ठी ङस् । वा प्रथमा सि ।

**[ नैयङ्कवम्, न्याङ्कवम् ]** नि 'अञ्चूग् गतौ च' (८९०) अञ्च् । न्यञ्चतीति न्यङ्कुः । 'नेरञ्चेः' (उणा० ७२४) उप्र० । 'न्यङ्कूद्ग-मेघाऽऽदयः' (४।१।११२) इत्यनेन निपात्यते । न्यङ्कोरिदं = नैयङ्कवम्, न्याङ्कवम् । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । अनेन यात् प्राक् ऐ, द्वितीये वृद्धिः । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । सि-अम् ।

व्युत्पत्तिपक्षे पूर्वेण प्राप्ते विभाषा, अव्युत्पत्तिपक्षे त्वप्राप्ते ॥छ॥

## न ञ-स्वङ्गादेः ॥ ७।४।९ ॥

**[ न ]** न प्रथमा सि ।

**[ ञस्वङ्गादेः ]** ञश्च स्वा(व)ङ्गादिश्च = ञस्वा(व)ङ्गादि, तस्य ।

**[ व्यावक्रोशी ]** वि-अव 'क्रुशं आह्वान-रोदनयोः' (९८६) क्रुश् । व्यवक्रोशनं = व्यावक्रोशी । 'व्यतिहारेऽनीहादिभ्यो ञः' (५।३।११६) ञप्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । 'नित्यं ञ-ञिनोऽण्' (७।३।५८) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः । 'अणञेये०' (२।४।२०) ङी ।

**[ व्यावलेखी ]** वि-अव 'लिखत् अक्षरविन्यासे' (१३३६) लिख् । व्यवलेखनं = व्यावलेखी । 'व्यतिहारेऽनीहादिभ्यो ञः' (५।३।११६) ञप्र० → अ । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । 'नित्यं ञ-ञिनोऽण्' (७।३।५८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ व्यावचर्ची ]** वि-अव 'चर्चण् अध्ययने' (१७२९) चर्च् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० → इ । व्यवचर्चनं = व्यावचर्ची । 'व्यतिहारेऽनीहादिभ्यो ञः' (५।३।११६) ञप्र० → अ । 'णेरनिटि' (४।३।८३) णिच्लुक् ।

Jain Education International　　For Personal & Private Use Only　　www.jainelibrary.org

'नित्यं ञ-ञिनोऽण्' (७।३।५८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

**[ व्यावहासी ]** वि-अव 'हसे हसने' (५४५) हस् । व्यवहसनं = व्यावहासी । 'व्यतिहारेऽनीहादिभ्यो ञः' (५।३।११६) ञप्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । 'नित्यं ञ-ञिनोऽण्' (७।३।५८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

**[ व्यात्युक्षी ]** वि-अति 'उक्ष सेचने' (५६६) उक्ष् । व्यत्युक्षणं = व्यात्युक्षी । 'व्यतिहारेऽनीहादिभ्यो ञः' (५।३।११६) ञप्र० → अ । 'नित्यं ञ-ञिनोऽण्' (७।३।५८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

**[ स्वाङ्गिः ]** शोभनानि अङ्गानि यस्य । स्वङ्गस्यापत्यं = स्वाङ्गिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ व्याङ्गिः ]** विगतानि अङ्गानि यस्य सः = व्यङ्गः । व्यङ्गस्यापत्यं = व्याङ्गिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ व्याडिः ]** व्यडस्यापत्यं = व्याडिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ स्वागतिकः ]** स्वागतमित्याह = स्वागतिकः । 'प्रभूतादिभ्यो ब्रुवति' (६।४।४३) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ स्वाध्वरिकः ]** स्वध्वरेण चरति = स्वाध्वरिकः । 'चरति' (६।४।११) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ व्यावहारिकः ]** व्यवहारेण चरति = व्यावहारिकः । 'चरति' (६।४।११) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ व्यायामिकी विद्या ]** व्यायामः प्रयोजनमस्याः = व्यायामिकी विद्या । 'प्रयोजनम्' (६।४।११७) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्०' (२।४।२०) ङी ।

गणोऽत्र ॥छ॥

### श्वादेरिति ॥ ७।४।१० ॥

**[ श्वादेरिति ]** श्व आदिरवयवो यस्य सः = श्वादिः, तस्मात् । इत् सप्तमी ङि ।

**[ श्वाभस्त्रिः ]** श्ववत् भस्त्रा यस्य = श्वभस्त्रः । श्वभस्त्रस्यापत्यं = श्वाभस्त्रिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ श्वाशीर्षिः ]** श्वेव शिरोऽस्य = श्वशिराः । श्वशिरसोऽपत्यं = श्वाशीर्षिः । 'बाह्वादिभ्यो गोत्रे' (६।१।३२) इञ्प्र० → इ । 'शीर्षः स्वरे तद्धिते' (३।२।१०३) शिरस्स्थाने "शीर्ष"देशः । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ श्वादंष्ट्रिः ]** शुन इव दंष्ट्रा अस्य । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः । श्वदंष्ट्रस्यापत्यं = श्वादंष्ट्रिः । 'बाह्वादिभ्यो गोत्रे' (६।१।३२) इञ्प्र० → इ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ श्वागणिकः ]** श्वगणेन चरित = श्वागणिकः । 'चरति' (६।४।११) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ श्वायूथिकः ]** शुनो यूथं = श्वयूथम् । श्वयूथेन चरति = श्वायूथिकः । 'चरति' (६।४।११) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ शौविकः ]** श्वभिश्चरति = शौविकः । 'चरति' (६।४।११) इकण्प्र० → इक । 'द्वारादेः' (७।४।६) वात् प्राक् औ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् ।

**[ शौवहानम् ]** 'ओहांक् त्यागे' (११३१) हा । 'ओहांङ्क् गतौ' (११३६) हा । हीयते हायते वा = हानम् । 'अनट्' (५।३।१२४) अनट्प्र० → अन । शुनो हानं = श्वहानम् । श्वहानस्येदं = शौवहानम् । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । 'द्वारादेः' (७।४।६) वात् प्राक् औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ शौवभस्त्रम् ]** श्वभस्त्रस्यापत्यं = शौवभस्त्रम् । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'द्वारादेः' (७।४।६) वात् प्राक् औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ शौवादंष्ट्रो मणिः ]** शुनो दंष्ट्रा = श्वादंष्ट्रा । बाहुलकात् दीर्घः । श्वादंष्ट्रायाः विकारः = शौवादंष्ट्रो मणिः । 'दोरप्राणिनः' (६।२।४९) मयट् इत्यस्य बाधको 'हेमाऽऽदिभ्योऽञ्' (६।२।४५) अञ्प्र० → अ । 'द्वारादेः' (७।४।६) वात् प्राक् औ । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् ॥छ॥

## इञः ॥ ७।४।११ ॥

**[ इञः ]** इञ् षष्ठी ङस् ।

**[ श्वाभस्त्रम् ]** 'श्वादेरिति' (७।४।१०) औकारो वकारात् प्राग् निषेधात् श्वेव भस्त्राऽस्य = श्वभस्त्रः । श्वभस्त्रस्यापत्यं = श्वाभस्त्रिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । श्वाभस्त्रेरिदं = श्वाभस्त्रम् । 'वृद्धेञः' (६।३।२८) अञ्प्र० → अ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । सि-अम् ।

**[ श्वाकर्णम् ]** शुनः इव कर्णावस्य = श्वकर्णः । श्वकर्णस्यापत्यं = श्वाकर्णिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । श्वाकर्णेरिदं = श्वाकर्णम् । 'वृद्धेञः' (६।३।२८) अञ्प्र० → अ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् । सि-अम् ।

**इकारादौ निमित्ते उच्यमानः पूर्वेण प्रतिषेधः इञन्तस्य प्रत्ययान्तरे न प्राप्नोतीति वचनम्** ॥छ॥

## पदस्यानिति वा ॥ ७।४।१२ ॥

**[ पदस्य ]** पद षष्ठी ङस् ।

**[ अनिति ]** न इत् = अनित् । 'अन् स्वरे' (३।२।१२९) अन्, तस्मिन् ।

**[ वा ]** वा प्रथमा सि ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ श्वापदम्, शौवापदम् ]** शुन इव पदमस्य = श्वापदम् । बाहुलकात् पुन्नपुंसकः । 'शुनः' (३।२।९०) इति दीर्घः । श्वापदस्य विकारः = श्वापदम् । 'प्राण्यौषधि-वृक्षेभ्योऽवयवे च' (६।२।३१) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । एवम्-शौवापदम् । 'द्वारादेः' (७।४।६) वात् प्राक् औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ श्वापदिकः ]** शुन इव पदमस्य = श्वापदम् । 'शुनः' (३।२।९०) इति दीर्घः । श्वापदेन चरति = श्वापदिकः । 'चरति' (६।४।११) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।।छ।।

## प्रोष्ठ-भद्राज्जाते ॥ ७।४।१३ ॥

**[ प्रोष्ठभद्रात् ]** प्रोष्ठश्च भद्रश्च = प्रोष्ठभद्रम्, तस्मात् ।

**[ जाते ]** जात सप्तमी ङि ।

**वृद्धिरित्यनुवर्त्तते ।**

**[ प्रोष्ठपादः ]** प्रोष्ठपदाभिश्चन्द्रयुक्ताभिर्युक्तः कालोऽपि प्रोष्ठपदा(दः) । 'चन्द्रयुक्तात् काले०' (६।२।६) अण्प्र० । "लुप् त्वप्रयुक्ते" लुप् । 'ङ्यादेर्गौणस्याक्विपस्तद्धितलुक्यगोणी-सूच्योः' (२।४।९५) आप्निवृत्तिः । पुनराप् । प्रोष्ठपदासु जातः = प्रोष्ठपादः । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० → अ । अनेन उत्तरपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् ।

**[ भद्रपादो माणवकः ]** भद्रपदाभिश्चन्द्रयुक्ताभिर्युक्तः कालोऽपि भद्रपदः । 'चन्द्रयुक्तात् काले०' (६।२।६) अण्प्र० । "लुप् त्वप्रयुक्ते" अण् लुप्यते च । 'भद्रपदासु जातः = भद्रपादो माणवकः । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० → अ । अनेन उत्तरपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् ।

**[ प्रौष्ठपदो मेघः ]** प्रोष्ठपद पूर्ववत् साध्यः । प्रोष्ठपदासु भवः = प्रौष्ठपदो मेघः । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् ।

**[ ऊर्ध्वमौहूर्त्तिकः ]** ऊर्ध्वमुहूर्त्तेषु भवः = ऊर्ध्वमौहूर्त्तिकः । 'सप्तमी चोर्ध्वमौहूर्त्तिके' (५।४।३०) इति निपातनात् सिद्धम्, परं 'अध्यात्मादिभ्य इकण्' (६।३।७८) इकण्प्र० → इक ।

**[ गुरुलाघवम् ]** लघोर्भावः = लाघवम् । 'य्वृवर्णाल्लघ्वादेः' (७।१।६९) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । गुरोर्लाघवं, गुरुश्च गुरुत्वं लाघवं चेति वा ।

**[ संहतपारार्थ्यम् ]** परस्मै अर्था(ः) । परार्थस्य भावः = पारार्थ्यम् । 'पतिराजान्तगुणाङ्गराजादिभ्यः कर्मणि च' (७।१।६०) ट्यण्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । संहते पारार्थ्यं = संहतपारार्थ्यम् । सि-अम् ।।छ।।

## अंशादृतोः ॥ ७।४।१४ ॥

**[ अंशात् ]** अंश पञ्चमी ङसि ।

**[ ऋतोः ]** ऋतु षष्ठी ङस् ।

**[ पूर्ववार्षिकः ]** पूर्वासु वर्षासु भवः = पूर्ववार्षिकः । 'वर्षा-कालेभ्यः' (६।३।८०) इकण्प्र० → इक । अनेन उत्तरपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ अपरवार्षिकः ]** अपरासु वर्षासु भवः = अपरवार्षिकः । 'वर्षा-कलेभ्यः' (६।३।८०) इकण्प्र० → इक । अनेन उत्तरपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ पूर्वशारदः ]** पूर्वं भागान्तरं शरदः = पूर्वशारदः । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० → अ । अनेन उत्तरपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ अपरशारदः ]** अपरं भागान्तरं शरदः = अपरशारदः । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० → अ । अनेन उत्तरपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ पूर्वनैदाघः ]** पूर्वं निदाघस्य = पूर्वनैदाघः । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० → अ । अनेन उत्तरपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ अपरनैदाघः ]** अपरं निदाघस्य = अपरनैदाघः । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० → अ । अनेन उत्तरपदवृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'पूर्वा-ऽपरा-ऽधरोत्तरमभिन्नेनांशिना' (३।१।५२) समासः ।

**[ पूर्वहैमनः ]** पूर्वं भागान्तरं हेमन्तस्य = पूर्वहैमनः । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० → अ । 'हेमन्ताद् वा तलुक् च' (६।३।९१) तलुक् । अनेन उत्तरपदवृद्धिः ऐ ।

**[ अपरहैमनः ]** अपरं भागान्तरं हेमन्तस्य = अपरहैमनः । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अण्प्र० → अ । 'हेमन्ताद् वा तलुक् च' (६।३।९१) तलुक् । अनेन उत्तरपदवृद्धिः ऐ ।

**[ पौर्ववर्षिकः ]** पूर्वासु ऋत्वन्तरैर्व्यवहितासु वर्षासु भवः = पौर्ववा(व)र्षिकः । 'वर्षा-कालेभ्यः' (६।३।८०) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । अत्र पूर्वशब्दो न वर्षाणामेकदेशं ब्रूते किन्तु व्यवहितत्वमिति न पूर्वशब्दोंऽशवचनः ।

**[ सौवर्षिकः ]** सुवर्षासु भवः = सौवा(व)र्षिकः । 'वर्षा-कालेभ्यः' (६।३।८०) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ पौर्वपिप्पलम् ]** पूर्वं पिप्पल्याः = पूर्वपिप्पली । पूर्वपिप्पल्या इदं = पौर्वपिप्पलम् । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । सि-अम् ।

**[ आर्द्धपिप्पलम् ]** अर्द्धं पिप्पल्याः = अर्द्धपिप्पली । अर्द्धपिप्पल्या इदम् = आर्द्धपिप्पलम् । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् । सि-अम् ॥छ॥

## सु-सर्वाऽर्द्धाद् राष्ट्रस्य ॥ ७।४।१५ ॥

**[ सुसर्वाऽर्द्धात् ]** सुश्च सर्वश्च अर्द्धश्च = सुसर्वाऽर्द्धम्, तस्मात् ।

**[ राष्ट्रस्य ]** राष्ट्र षष्ठी ङस् ।

**[ सुपाञ्चालकः ]** पञ्चालस्यापत्यानि । 'राष्ट्र-क्षत्रियात् सरूपाद् राजाऽपत्ये द्रिरञ्' (६।१।११४) अञ्प्र० → अ । 'बहुष्वस्त्रियाम्' (६।१।१२४) लुप् । शोभनेषु पञ्चालेषु भवः = सुपाञ्चालकः । 'बहुविषयेभ्यः' (६।३।४४) अकञ्प्र० → अक । अनेन उत्तरपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ सर्वपाञ्चालकः ]** सर्वेषु पञ्चालेषु भवः = सर्वपाञ्चालकः । 'बहुविषयेभ्यः' (६।३।४४) अकञ्प्र० → अक । अनेन उत्तरपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ अर्द्धपाञ्चालकः ]** अर्द्धं पञ्चालानाम् = अर्द्धपञ्चालाः, तेषु भवः = अर्द्धपाञ्चालकः । 'बहुविषयेभ्यः' (६।३।४४) अकञ्प्र० → अक । अनेन उत्तरपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ सुमागधकः ]** मगधस्यापत्यानि । 'पुरु-मगध०' (६।१।११६) अण्प्र० → अ । 'बहुष्वस्त्रियाम्' (६।१।१२४) लुप् । शोभनेषु मगधेषु भवः = सुमागधकः । 'बहुविषयेभ्यः' (६।३।४४) अकञ्प्र० → अक । अनेन उत्तरपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ सर्वमागधकः ]** सर्वेषु मगधेषु भवः = सर्वमागधकः । 'बहुविषयेभ्यः' (६।३।४४) अकञ्प्र० → अक । अनेन उत्तरपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ अर्द्धमागधकः ]** अर्द्धं मगधानाम् = अर्द्धमगधाः । अर्द्धमगधेषु भवः = अर्द्धमागधकः । 'बहुविषयेभ्यः' (६।३।४४) अकञ्प्र० → अक । अनेन उत्तरपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ सौगन्धिकः ]** शोभनो गन्धो येषां ते = सुगन्धाः । सुगन्धाः पण्यमस्य = सौगन्धिकः । 'तदस्य पण्यम्' (६।४।५४) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ आर्द्धपिप्पलः ]** अर्द्धपिप्पल्यां भवः = आर्द्धपिप्पलः । 'भवे' (६।३।१२३) अण्प्र० → अ । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् ॥छ॥

## अमद्रस्य दिशः ॥ ७।४।१६ ॥

**[ अमद्रस्य ]** न मद्रः = अमद्रस्तस्य । 'नञत्' (३।२।१२५) न० → अ० ।

**[ दिशः ]** दिश् पञ्चमी ङसि ।

**[ पूर्वपाञ्चालकः ]** पूर्वेषु पञ्चालेषु भवः = पूर्वपाञ्चालकः । 'बहुविषयेभ्यः' (६।३।४४) अकञ्प्र० → अक । अनेन उत्तरपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ अपरपाञ्चालकः ]** अपरेषु पञ्चालेषु भवः = अपरपाञ्चालकः । 'बहुविषयेभ्यः' (६।३।४४) अकञ्प्र० → अक । अनेन उत्तरपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ दक्षिणपाञ्चालकः ]** दक्षिणेषु पञ्चालेषु भवः = दक्षिणपाञ्चालकः । 'बहुविषयेभ्यः' (६।३।४४) अकञ्प्र० → अक । अनेन उत्तरपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ उत्तरपाञ्चालकः ]** उत्तरेषु पञ्चालेषु भवः = उत्तरपाञ्चालकः । 'बहुविषयेभ्यः' (६।३।४४) अकञ्प्र० → अक । अनेन उत्तरपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ पौर्वमद्रः ]** पूर्वेषु मद्रेषु भवः = पौर्वमद्रः । 'मद्रादञ्' (६।३।२४) अञ्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ पौर्वपञ्चालकः ]** पूर्वं भागान्तरं पञ्चालानां = पूर्वपञ्चालाः । 'पूर्वा-ऽपरा-ऽधरोत्तरमभिन्नेनांशिना' (३।१।५२) इत्यादिना समासः, तेषु भवः = पौर्वपञ्चालकः । 'बहुविषयेभ्यः' (६।३।४४) अकञ्प्र० → अक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ पौर्वपञ्चालः ]** पूर्वपञ्चालेषु भवः = पौर्वपञ्चालः । 'भवे' (६।३।१२३) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## प्राग्ग्रामाणाम् ॥ ७।४।१७ ॥

**[ प्राग्ग्रामाणाम् ]** प्राञ्चश्च ते ग्रामाश्च = प्राग्ग्रामाः, तेषाम् ।

**[ पूर्वकार्ष्णमृत्तिकः ]** पूर्वकृष्णमृत्तिका नाम प्राक्षु ग्रामस्तत्र भवः = पूर्वकार्ष्णमृत्तिकः । 'कोपान्त्याच्चाऽण्' (६।३।५६) अण्प्र० → अ । अनेन उत्तरपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ अपरकार्ष्णमृत्तिकः ]** मृदेव = मृत्तिका । 'मृदस्तिकः' (७।२।१७१) तिकप्र० । अपरकृष्णमृत्तिका नाम प्राक्षु ग्रामस्तत्र भवः = अपरकार्ष्णमृत्तिकः । 'कोपान्त्याच्चाऽण्' (६।३।५६) अण्प्र० → अ । अनेन उत्तरपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् ।

**[ पूर्वैषुकामशमः ]** इषूणां कामः = इषुकामस्तस्य शमी । पूर्वा चासौ इषुकामशमी च = पूर्वेषुकामशमी । पूर्वेषुकामशमी नाम प्राग्ग्रामस्तत्र भवः = पूर्वैषुकामशमः । 'कोपान्त्याच्चाऽण्' (६।३।५६) अण्प्र० → अ । अनेन उत्तरपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) इवर्णस्य लुक् ।

**[ अपरैषुकामशमः ]** अपरेषुकामशमी नाम प्राग्ग्रामस्तत्र भवः = अपरैषुकामशमः । 'कोपान्त्याच्चाऽण्' (६।३।५६) अण्प्र० → अ । अनेन उत्तरपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) इवर्णस्य लुक् ।

बहुवचनाद् ग्रामग्रहणे इदं(नगरं) अपि गृह्यते ।

**[ पूर्वकान्यकुब्जः ]** पूर्वस्मिन् कन्यकुब्जे भवः = पूर्वकान्यकुब्जः । 'भवे' (६।३।१२३) अण्प्र० → अ । अनेन उत्तरपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ अपरकान्यकुब्जः ]** अपरेषु कन्यकुब्जेषु भवः = अपरकान्यकुब्जः । 'भवे' (६।३।१२३) अण्प्र० → अ । अनेन उत्तरपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ पूर्वपाटलिपुत्रकः ]** पूर्वेषु पाटलिपुत्रेषु भवः = पूर्वपाटलिपुत्रकः ।

**[ अपरपाटलिपुत्रकः ]** अपरेषु पाटलिपुत्रेषु भवः = अपरपाटलिपुत्रकः । दुः संज्ञाया अभावात् 'रोपान्त्यात्' (६।३।४२) इत्यकञ् तावेदिव ? (तावदेव) पूर्वेणेति स्वार्थे क 'संज्ञा दुर्वा' (६।१।६) इत्यनेन दुःसंज्ञायां 'रोपान्त्यात्' (६।३।४२) अकञ्प्र० → अक । अनेन उत्तरपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ पौर्वदेवदत्तः ]** देवदत्तं नाम वाहीकग्रामः । पूर्वस्मिन् देवदत्ते भवः = पौर्वदेवदत्तः । 'भवे' (६।३।१२३) अण्प्र० → अ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ आपरदेवदत्तः ]** अपरस्मिन् देवदत्ते भवः = आपरदेवदत्तः । 'भवे' (६।३।१२३) अण्प्र० → अ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छ॥

## संख्या-ऽधिकाभ्यां वर्षस्याऽभाविनि ॥ ७।४।१८ ॥

**[ संख्याऽधिकाभ्याम् ]** संख्या च अधिकश्च = संख्याऽधिकौ, ताभ्याम् = संख्याऽधिकाभ्याम् । पञ्चमी भ्याम् ।

**[ वर्षस्य ]** वर्ष षष्ठी ङस् ।

**[ अभाविनि ]** न भावोऽभावी, तस्मिन् ।

**[ द्विवार्षिकः ]** द्वाभ्यां वर्षाभ्यां निर्वृत्तः, द्वाभ्यां वर्षाभ्यां भृतोऽधीष्टो वा, द्वे वर्षे भूतो भावी वा = द्विवार्षिकः । निर्वृत्ते' (६।४।१०५) इत्यादिभिः सूत्रैः इकण्प्र० → इक । अनेन उत्तरपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ त्रिवार्षिकः ]** त्रिभिर्वर्षाभिर्निर्वृत्तः, त्रिभिर्वर्षैर्भृतोऽधीष्टो वा, त्रीन् वर्षान् भूतः = त्रिवार्षिकः । 'निर्वृत्ते' (६।४।१०५) इत्यादिभिः सूत्रैः इकण्प्र० → इक । अनेन उत्तरपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ अधिकवार्षिकः ]** अधिकेन वर्षेण निर्वृत्तः, अधिकाय वर्षाय भृतोऽधीष्टो वा, अधिकं वर्षं भूतः = अधिक-वार्षिकः । 'निर्वृत्ते' (६।४।१०५) इत्यादिभिः सूत्रैः इकण्प्र० → इक । अनेन उत्तरपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ द्वैवर्षिकं, त्रैवर्षिकं धान्यम् ]** द्वे वर्षे भावि = द्वैवा(व)र्षिकम् । त्रीणि वर्षाणि भावि = त्रैवा(व)र्षिकम् । 'तं भावि-भूते' (६।४।१०६) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक्, धान्यम् ।

**[ द्विवार्षिको मनुष्यः ]** द्वाभ्यां वर्षाभ्यां भृतोऽधीष्टो वा कर्म करिष्यति = द्विवार्षिकः । 'तस्मै भृता-ऽधीष्टे च' (६।४।१०७) इकण्प्र० → इक । अधीष्टभृतयोः प्रत्ययो न भाविनीति प्रतिषेधो न भवति । गम्यते ह्यत्र भविष्यत्ता, न तु प्रत्ययार्थः ।।छ।।

## मान-संवत्सरस्याशाण-कुलिजस्याऽनाम्नि ॥ ७।४।१९ ॥

**[ मानसंवत्सरस्य ]** 'मांङ्क् मान-शब्दयोः' (११३७) मा । मीयते परिच्छिद्यते येन तन्मानम् । 'करणा-ऽऽधारे' (५।३।१२९) अनट्प्र० → अन । मानश्च संवत्सरश्च = मानसंवत्सरम्, तस्य ।

**[ अशाणकुलिजस्य ]** शाणश्च कुलिजश्च = शाणकुलिजम्, न शाणकुलिजम् = अशाणकुलिजम्, तस्य ।

**[ अनाम्नि ]** न नाम = अनाम्, तस्मिन् ।

**[ द्विकौडविकः ]** द्वौ कुडवौ प्रयोजनमस्य = द्विकौडविकः । 'प्रयोजनम्' (६।४।११७) इकण्प्र० → इक । अनेन उत्तरपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ त्रिकौडविकः ]** त्रयः कुडवाः प्रयोजनमस्य = त्रिकौडविकः । 'प्रयोजनम्' (६।४।११७) इकण्प्र० → इक । अनेन उत्तरपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ अधिककौडविकः ]** अधिकः कुडवः प्रयोजनमस्य = अधिककौडविकः । 'प्रयोजनम्' (६।४।११७) इकण्प्र० → इक । अनेन उत्तरपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ द्विसौवर्णिकम् ]** द्वाभ्यां सुवर्णाभ्यां क्रीतं = द्विसौवर्णिकम् । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० → इक । 'सुवर्ण-कार्षापणात्' (६।४।१४३) इत्यनेन इकणो वा लुप् । अनेन उत्तरपदवृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ त्रिसौवर्णिकम् ]** त्रिभिः सुवर्णैः क्रीतं = त्रिसौवर्णिकम् । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० → इक । 'सुवर्ण-कार्षापणात्' (६।४।१४३) इत्यनेन इकणो वा लुप् । अनेन उत्तरपदवृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ अधिकसौवर्णिकम् ]** अधिकेन सुवर्णेन क्रीतम् = अधिकसौवर्णिकम् । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० → इक । 'सुवर्ण-कार्षापणात्' (६।४।१४३) इत्यनेन इकणो वा लुप् । अनेन उत्तरपदवृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ द्विषाष्टिकः ]** द्वाभ्यां षष्टिभ्यां निर्वृत्तः, द्वाभ्यां षष्टिभ्यां भृतोऽधीष्टो वा, द्वे षष्टी भूतो भावी वा = द्विषाष्टिकः । 'कालात् परिजय्य-लभ्य-कार्य-सुकरे' (६।४।१०४) इत्यधिकारे 'निर्वृत्ते' (६।४।१०५) इत्यादिभिः सूत्रैः इकण्प्र० → इक । अनेन उत्तरपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ त्रिषाष्टिकः ]** त्रिभिः षष्टिभिर्निर्वृत्तः, त्रिभ्यः षष्टिभ्यो भृतोऽधीष्टो वा, तिस्रः षष्ट्यः भूते भावी वा = त्रिषाष्टिकः । 'कालात् परिजय्य-लभ्य-कार्य-सुकरे' (६।४।१०४) इत्यधिकारे 'निर्वृत्ते' (६।४।१०५) इत्यादिभिः सूत्रैः इकण्प्र० → इक । अनेन उत्तरपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ अधिकषाष्टिकः ]** अधिकया षष्ट्या निर्वृत्तः, अधिकायै षष्ट्यै भृतोऽधीष्टो वा = अधिकषाष्टिकः । 'कालात् परिजय्य-लभ्य-कार्य-सुकरे' (६।४।१०४) इत्यधिकारे 'निर्वृत्ते' (६।४।१०५) इत्यादिभिः सूत्रैः इकण्प्र० → इक । अनेन उत्तरपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ द्विसाप्ततिकः ]** द्वाभ्यां सप्ततिभ्यां निर्वृत्तः, द्वाभ्यां सप्ततिभ्यां भृतोऽधीष्टो वा, द्वे सप्तती भूतो भावी वा = द्विसाप्ततिकः । 'कालात् परिजय्य-लभ्य-कार्य-सुकरे' (६।४।१०४) इत्यधिकारे 'निर्वृत्ते' (६।४।१०५) इत्यादिभिः सूत्रैः इकण्प्र० → इक । अनेन उत्तरपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ अधिकसाप्ततिकः ]** अधिकया सप्तत्या निर्वृत्तः, अधिकायै सप्तत्यै भृतोऽधीष्टो वा = अधिकसाप्ततिकः । 'कालात् परिजय्य-लभ्य०' (६।४।१०४) इत्यधिकारे 'निर्वृत्ते' (६।४।१०५) इत्यादिभिः सूत्रैः इकण्प्र० → इक । अनेन उत्तरपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) इवर्णस्य लुक् ।

**[ द्विनावतिकम् ]** द्वाभ्यां नवतिभ्यां क्रीतं = द्विनवति द्रव्यम् । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० → इक । 'अनाम्न्यद्विः प्लुप्' (६।४।१४१) लुप् । सि । 'अनतो लुप्' (१।४।५९) लुप् । द्वौ च नवतिश्च द्विनवतिस्तया वा क्रीतं = द्विनावतिकम् । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० → इक । अनेन उत्तरपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ त्रिनावतिकम् ]** त्रिभिर्नवतिभिः क्रीतं = त्रिनवति द्रव्यम् । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० → इक । 'अनाम्न्यद्विः प्लुप्' (६।४।१४१) लुप् । तेन । तिस्रश्च नवतिश्च = त्रिनवतिस्तया वा क्रीतं = त्रिनावतिकम् । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० → इक । अनेन उत्तरपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ द्विसांवत्सरिकः ]** द्वाभ्यां संवत्सराभ्यां निर्वृत्तः, द्वाभ्यां संवत्सराभ्यां भृतोऽधीष्टो वा, द्वौ संवत्सरौ भूतो भावी वा = द्विसांवत्सरिकः । 'निर्वृत्ते' (६।४।१०५) इत्यादिभिः सूत्रैः इकण्प्र० → इक । अनेन उत्तरपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ त्रिसांवत्सरिकः ]** त्रिभिः संवत्सरैर्निर्वृत्तः, त्रिभिः(भ्यः)संवत्सरैः(रेभ्यः) भृतोऽधीष्टो वा, त्रयः संवत्सरा भूतो भावी वा = त्रिसांवत्सरिकः । 'निर्वृत्ते' (६।४।१०५) इत्यादिभिः सूत्रैः इकण्प्र० → इक । अनेन उत्तरपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

संवत्सरग्रहणात् कालो मानग्रहणेन न गृह्यते तेन -

**[ द्वैसमिकः ]** द्वाभ्यां समाभ्यां निर्वृत्तः, द्वाभ्यां समाभ्यां भृतोऽधीष्टो वा, द्वे समे भूतो भावी वा = द्वैसमिकः । 'निर्वृत्ते' (६।४।१०५) इत्यादिभिः सूत्रैः इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ त्रैसमिकः ]** तिसृभिः समाभिर्निर्वृत्तः, तिसृभिः(भ्यः) समाभिः(भ्यः) भृतोऽधीष्टो वा, तिस्रः समाः भूतो भावी वा = त्रैसमिकः । 'निर्वृत्ते' (६।४।१०५) इत्यादिभिः सूत्रैः इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् ।

**[ द्वैरात्रिकः ]** द्वाभ्यां रात्रिभ्यां निर्वृत्तः, द्वाभ्यां रात्रिभ्यां भृतोऽधीष्टो वा, द्वौ रात्री भूतो भावी वा = द्वैरात्रिकः । 'निर्वृत्ते' (६।४।१०५) इत्यादिभिः सूत्रैः इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ त्रैरात्रिकः ]** त्रिभी रात्रिभिर्निर्वृत्तः, त्रिभिः(भ्यः) रात्रिभिः(भ्यः) भृतोऽधीष्टो वा, त्रयो रात्रयो भूतो भावी वा = त्रैरात्रिकः । 'संख्यातैक-पुण्य-वर्षा-दीर्घाच्च रात्रेरत्' (७।३।११९) अत्समासान्तः → अ । 'निर्वृत्ते' (६।४।१०५) इत्यादिभिः सूत्रैः इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ द्वैशाणम् ]** द्वाभ्यां शाणाभ्यां क्रीतं = द्वैशाणम् । 'द्वि-त्र्यादेर्याऽण् वा' (६।४।१४७) अण्प्र० । अस्य तु विधानसामर्थ्यात् 'अनाम्न्यद्विः प्लुप्' (६।४।१४१) इत्यादिना न लुप् । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् ।

**[ त्रैशाणम् ]** त्रिभिः शाणैः क्रीतं = त्रैशाणम् । 'द्वि-त्र्यादेर्याऽण् वा' (६।४।१४७) अण्प्र० । अस्य तु विधानसामर्थ्यात् 'अनाम्न्यद्विः प्लुप्' (६।४।१४१) इत्यादिना न लुप् । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ द्वैकुलिजिकः ]** द्वे कुलिजे पचति संभवत्यवहरति च = द्वैकुलिजिकः । 'सम्भवदवहरतोश्च' (६।४।१६२) इकण्प्र० । 'कुलिजाद् वा लुप् च' (६।४।१६५) इति वा लुप् । अत्र तु न लुप् । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ त्रैकुलिजिकः ]** त्रीणि कुलिजानि पचति संभवत्यवहरति च = त्रैकुलिजिकः । 'सम्भवदवहरतोश्च' (६।४।१६२) इकण्प्र० । 'कुलिजाद् वा लुप् च' (६।४।१६५) इति वा लुप् । अत्र तु न लुप् । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ पाञ्चलोहितिकम् ]** पञ्च लोहिन्यः परिमाणमस्य = पाञ्चलोहितिकम् । 'मानम्' (६।४।१६९) इति यथाविहितं इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) इवर्णस्य लुक् ।

**[ पाञ्चकलायिकम् ]** पञ्च कलायानां परिमाणमस्य = पाञ्चकलायिकम् । 'मानम्' (६।४।१६९) इति यथाविहितं इकण्प्र० → इक । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् । कलायो नाम मालवकप्रसिद्धो भेदः, तत् करणानां पञ्चानां यावत् परिमाणं भवति तन्मात्रस्य परिमाणविशेषणस्यैव 'अनाम्न्यद्विः प्लुप्' (६।४।१४१) इति न लुप् ॥छा॥

## अर्धात् परिमाणस्यानतो वा त्वादेः ॥ ७।४।२० ॥

**[ अर्धात् ]** अर्ध पञ्चमी ङसि ।

**[ परिमाणस्य ]** परिमाण षष्ठी ङस् ।

**[ अनतः ]** न अत् = अनत्, तस्य ।

**[ वा ]** वा प्रथमा सि ।

**[ तु ]** तु प्रथमा सि ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ आदेः ]** आदि षष्ठी ङस् ।

**[ अर्धकौडविकम्, आर्धकौडविकम् ]** अर्धं कुडवस्य = अर्धकुडवः, अर्धकुडवेन क्रीतम् = अर्धकौडविकम् । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० → इक । अनेन उत्तरपदवृद्धिः औ । एवम् = आर्धकौडविकम् । अनेन उभयत्र वृद्धिः ।

**[ अर्धमौष्टिकम्, आर्धमौष्टिकम् ]** अर्धमुष्टिना क्रीतम् = अर्धमौष्टिकम्, आर्धमौष्टिकम् । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० → इक । अनेन उभयत्र वृद्धिः औ । पूर्वस्वरस्य अनेन वा वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ अर्धद्रौणिकम्, आर्धद्रौणिकम् ]** अर्धद्रोणेन क्रीतम् = अर्धद्रौणिकम्, आर्धद्रौणिकम् । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० → इक । अनेन उभयत्र वृद्धिः औ । पूर्वस्वरस्य अनेन वा वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ आर्धक्रोशिकम् ]** क्रोशस्यार्धम् = अर्धक्रोशः । अर्धक्रोशः प्रयोजनमस्य = आर्धक्रोशिकम् । 'प्रयोजनम्' (६।४।११७) इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ अर्धप्रस्थिकम्, आर्धप्रस्थिकम् ]** अर्धप्रस्थेन क्रीतम् = अर्धप्रस्थिकम्, आर्धप्रस्थिकम् । 'मूल्यैः क्रीते' (६।४।१५०) इकण्प्र० → इक ।

**[ अर्धकंसिकम्, आर्धकंसिकम् ]** अर्धं कंसस्य = अर्धकंसः । अर्धकंसः प्रयोजनमस्य = अर्धकंसिकम्, आर्धकंसिकम् । 'प्रयोजनम्' (६।४।११७) इकण्प्र० → इक । क्रीतेऽर्थे इकण् न भवति । 'अर्धात् पल-कंस-कर्षात्' (६।४।१३४) इति इकटि सति वृद्ध्यप्राप्तेः अनेन वा वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सि-अम् ।

**[ अर्धचमसिकम्, आर्धचमसिकम् ]** चमसस्य पात्रविशेषस्य अर्धम् = अर्धचमसः । अर्धचमसः प्रयोजनमस्य = अर्धचमसिकम्, आर्धचमसिकम् । 'प्रयोजनम्' (६।४।११७) इकण्प्र० → इक । अनेन वा वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

अतः प्रतिषेधादाकारस्य वृद्धिर्भवत्येव ।

**[ अर्धखारी ]** अर्धखार्यां भवा = अर्धखारी । 'भवे' (६।३।१२३) अण्प्र० → अ । अनेन उत्तरपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) ईकारलुक् । 'अणञेयेकण्०' (२।४।२०) ङी ।

कः पुनरत्र विशेषः-सत्यामसत्यां वा वृद्धौ ? उच्यते -

**[ अर्धखारीभार्यः ]** अर्धखारी भार्या अस्य = अर्धखारीभार्यः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः । यद्यत्र वृद्धिप्रतिषेधः स्यात्, अयं तद्धितो न वृद्धिहेतुरिति पुंवद्भावप्रतिषेधो न स्यात्, यथा–

**[ अर्धप्रस्थभार्यः ]** अर्धप्रस्थे भवा = अर्धप्रस्थी । 'भवे' (६।३।१२३) अण्प्र० → अ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्-नञ्-स्नञ्-टिताम्' (२।४।२०) ङी । अर्धप्रस्थी भार्या यस्य सः = अर्धप्रस्थभार्यः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः । 'परतः स्त्री पुम्वत्०' (३।२।४९) पुंवद्भावः । अत्र अनत इति भणनात् नोत्तरपदवृद्धिः । पूर्वपदस्य "वा त्वादेः" इति वचनान्न भवति, ततस्तद्धितस्य स्वरवृद्धिहेतुत्वाभावान्न पुंवन्निषेधः ।।छ।।

### प्राद् वाहणस्यैये ॥ ७।४।२१ ॥

**[ प्रात् ]** प्र पञ्चमी ङसि ।

**[ वाहणस्य ]** वाहयतीति वाहनः । 'नन्द्यादिभ्योऽनः' (५।१।५२) अनप्र० । 'णेरनिटि' (४।३।८३) णिग्लुक्, तस्य ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ एये ]** एय सप्तमी ङि ।

वा त्वादेरिति वर्त्तते ।

**[ प्रवाहणेयः, प्रावाहणेयः ]** प्र 'वहीँ प्रापणे' (९९६) वह् । प्रवहन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः आ । प्रवाहयतीति प्रवाहणः । 'नन्द्यादिभ्योऽनः' (५।१।५२) अनप्र० । 'णेरनिटि' (४।३।८३) णिग्लुक् । 'णेर्वा' (२।३।८८) णत्वम् । प्रवाहणस्यापत्यं = प्रवाहणेयः, प्रावाहणेयः । 'शुभ्राऽऽदिभ्यः' (६।१।७३) एयण्प्र० → एय । अनेन वृद्धिः । आदेः प्रशब्दस्य वा वृद्धिः ।

अत्राप्युत्तरपदवृद्धेः पूर्वोक्तमेव प्रयोजनम्, तेन -

**[ प्रवाहणेयीभार्यः ]** प्रवाहणेय 'अणञेयेकण्०' (२।४।२०) ङी । प्रवाहणेयी भार्या यस्य सः = प्रवाहणेयीभार्यः । 'गोश्चान्ते०' (२।४।९६) ह्रस्वः । 'तद्धितः स्वरवृद्धिहेतुररक्त-विकारे' (३।२।५५) इत्यादिना पुंवद्भावनिषेधो भवति ॥छा॥

## एयस्य ॥ ७।४।२२ ॥

**[ एयस्य ]** एय षष्ठी ङस् ।

**[ प्रवाहणेयिः, प्रावाहणेयिः ]** प्रवाहणेयः पूर्वपदनिष्पन्नो मण्ड्यते । प्रवाहणेयस्यापत्यं = प्रवाहणेयिः, प्रावाहणेयिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । अनेन उत्तरपदवृद्धिः, प्रस्य तु विकल्पेन । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ प्रवाहणेयकम्, प्रावाहणेयकम् ]** प्रवाहणेयस्येदं सङ्घादि तस्य भावो वा = प्रवाहणेयकम्, प्रावाहणेयकम् । 'गोत्राददण्डमाणव-शिष्ये' (६।३।१६९) अकञ्प्र० । 'योपान्त्याद् गुरूपोत्तमादसुप्रख्यादकञ्' (७।१।७२) अकञ्प्र० → अक । अनेन उत्तरपदवृद्धिः, प्रस्य तु विकल्पेन ।

बाह्यस्तद्धित एयव्यतिरिक्तवन्निमित्ता वृद्धिः । 'वृद्धिः स्वरे०' (७।४।१) इति नित्यं विहिता एयाश्रय(ये)ण विकल्पेनाशक्या बाधितुमिति सूत्रारम्भः ॥छा॥

## नञः क्षेत्रज्ञेश्वर-कुशल-चपल-निपुण-शुचेः ॥ ७।४।२३ ॥

**[ नञः ]** नञ् पञ्चमी ङसि ।

**[ क्षेत्रज्ञेश्वरकुशलचपलनिपुणशुचेः ]** क्षेत्रज्ञश्च ईश्वरश्च कुशलश्च चपलश्च निपुणश्च शुचिश्च = क्षेत्रज्ञेश्वरकुशलचपलनिपुणशुचि, तस्य ।

**[ अक्षैत्रज्ञम्, आक्षैत्रज्ञम् ]** न क्षेत्रज्ञः = अक्षेत्रज्ञः । अक्षेत्रज्ञस्येदम् = अक्षैत्रज्ञम्, आक्षैत्रज्ञम् । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । अनेन वृद्धिः ऐ, आदेर्नञो विकल्पेन वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ अक्षैत्रज्ञ्यम्, आक्षैत्रज्ञ्यम् ]** अक्षेत्रज्ञस्य भावः कर्म वा = अक्षैत्रज्ञ्यम्, आक्षैत्रज्ञ्यम् । 'पतिराजान्तगुणाङ्गराजादिभ्यः कर्मणि च' (७।१।६०) ट्यण्प्र० → य । अनेन वृद्धिः ऐ, आदेर्नञो विकल्पेन वृद्धिः ।

**[ अनैश्वरम्, आनैश्वरम् ]** न ईश्वरोऽनीश्वरः । 'अन् स्वरे' (३।२।१२९) अन् । अनीश्वरस्येदम् = अनैश्वरम्, आनैश्वरम् । 'तस्येदम्' (६।३।१६०) अण्प्र० । अनेन वृद्धिः ऐ, आदेर्नञो विकल्पेन वृद्धिः ।

**[ अनैश्वर्यम्, आनैश्वर्यम् ]** अनीश्वरस्य भावः कर्म वा = अनैश्वर्यम्, आनैश्वर्यम् । क्षेत्रज्ञेश्वरशब्दौ बुधादौ तेन एतयोः 'नञ्तत्पुरुषादबुधादेः' (७।१।५७) अपि ट्यण्प्र० भवति । अनेन वृद्धिः ऐ, आदेर्नञो विकल्पेन वृद्धिः ।

**[ अकौशलम्, आकौशलम् ]** न कुशलोऽकुशलः, अकुशलस्येदम् = अकौशलम्, आकौशलम् । 'तस्येदम्' (६।३।१६०) अण्प्र० । शेषं पूर्ववत् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ अचापलम्, आचापलम् ]** न चपलोऽचपलः, अचपलस्येदम् = अचापलम्, आचापलम् । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । शेषं पूर्ववत् ।

**[ अनैपुणम्, आनैपुणम् ]** न निपुणोऽनिपुणः, अनिपुणस्येदम् = अनिपुणम्, आनैपुणम् । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । अनेन वृद्धिः ऐ, उत्तरपदे आदौ तु विकल्पेन ।

**[ अशौचम्, आशौचम् ]** न शुचिरशुचिः । 'नञत्' (३।२।१२५) न० → अ० । अशुचेरिदम् = अशौचम्, आशौचम् । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । अनेन वृद्धिः औ, उत्तरपदे आदौ तु विकल्पेन ।

**[ अशौचम्, आशौचम् ]** न विद्यते शुचिरस्येति वा अशुचिस्तस्य भावः कर्म वा = अशौचम्, आशौचम् । 'य्वृवर्णाल्लघ्वादेः' (७।१।६९) अण्प्र० → अ । अनेन वृद्धिः, उत्तरपदे आदौ तु विकल्पेन ।

**[ आयथातथ्यम् ]** न यथा = अयथा, अयथातथा इत्येतस्य भावः = आयथातथ्यम् । 'पतिराजान्तगुणाङ्गराजादिभ्यः कर्मणि च' (७।१।६०) ट्यण्प्र० → य । वृद्धिः ।

**[ अयाथातथ्यम् ]** यथातथा इत्येतस्य भावः = यथातथ्यम् । 'पतिराजान्तगुणाङ्ग०' (७।१।६०) ट्यण्प्र० → य । वृद्धिः । न याथातथ्यम् = अयाथातथ्यम् ।

**[ आयथापुर्यम् ]** अयथापुरेत्येतस्य भावः = आयथापुर्यम् । 'पतिराजान्तगुणाङ्ग०' (७।१।६०) ट्यण्प्र० → य ।

**[ अयाथापुर्यम् ]** यथापुरेत्येतस्य भावः = य(या)थापुर्यम् । 'पतिराजान्तगुणाङ्ग०' (७।१।६०) ट्यण्प्र० → य । वृद्धि । न य(या)थापुर्यम् = अय(या)थापुर्यम् ।

**[ यथा आचतुर्यम् ]** यथा न चतुर(:) = अचतुर(:), अचतुर इत्येतस्य भावः = आचतुर्यम् । 'पतिराजान्तगुणाङ्ग०' (७।१।६०) ट्यण्प्र० → य । वृद्धिः ।

**[ अचातुर्यम् ]** चतुर इत्येतस्य भावः = चातुर्यम् । 'पतिराजान्तगुणाङ्ग०' (७।१।६०) ट्यण्प्र० → य । वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । न चातुर्यम् = अचातुर्यम् । 'नञत्' (३।२।१२५) न० → अ० ।

यथातथा यथापुरा इत्यखण्डमव्ययं वा 'नाम नाम्नै०' (३।१।१८) इति समासो वा 'यथाऽथा' (३।१।४१) इत्यव्ययीभावो वा अकारान्तः अव्ययीभावस्य नपुंसकत्वे 'क्लीबे' (२।४।९७) इत्यनेन ह्रस्वः ॥छा॥

## जङ्गल-धेनु-वलजस्योत्तरपदस्य तु वा ॥ ७।४।२४ ॥

**[ जङ्गलधेनुवलजस्य ]** जङ्गलश्च धेनुश्च वलजश्च = जङ्गलधेनुवलजम्, तस्य ।

**[ उत्तरपदस्य ]** उत्तरपद षष्ठी ङस् ।

**[ तु ]** तु प्रथमा सि ।

**[ वा ]** वा प्रथमा सि ।

आदेरित्यनुवर्त्तते । **वेति तु निवृत्तम् । उत्तरपदस्य वेत्यकरणात् ।**

**[ कौरुजङ्गलः, कौरुजाङ्गलः ]** कुरुजङ्गलेषु भवः = कौरुजङ्गलः, कौरुजाङ्गलः । 'भवे' (६।३।१२३) अण्प्र० → अ । अनेन आदौ वृद्धिः, उत्तरपदे तु विकल्पेन ।

**[ वैश्वधेनवः, वैश्वधैनवः ]** विश्वस्य धेनुषु भवः । यद्वा विश्वधेनोरपत्यं = वैश्वधेनवः, वैश्वधैनवः । 'उत्सादेरञ्' (६।१।१९) अञ्प्र० → अ । अनेन आदौ वृद्धिः, उत्तरपदे तु विकल्पेन ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ सौवर्णवलजः, सौवर्णवालजः ]** सुवर्णस्य वलजं द्वारं क्षेत्रं वा तत्र भवः = सौवर्णवलजः, सौवर्णवालजः । 'भवे' (६।३।१२३) अण्प्र० → अ । अनेन आदौ वृद्धिः, उत्तरपदे तु विकल्पेन ॥छ॥

## हृद्-भग-सिन्धोः ॥ ७।४।२५ ॥

**[ हृद्भगसिन्धोः ]** हृच्च भगश्च सिन्धुश्च = हृद्भगसिन्धु, तस्य ।

**आदेरुत्तरपदस्येति च द्वयमनुवर्त्तते ।**

**[ सौहार्दम् ]** सुहृदः सुहृदयस्य वा इदं भावः कर्म वा = सौहार्दम् । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । 'युवादेरण्' (७।१।६७) अण्प्र० → अ । 'हृदयस्य हृल्लास-लेखा-ऽण्-ये' (३।२।९४) हृदयस्य "हृद्"आदेशः । अनेन पूर्वपदस्य वृद्धिः औ, उत्तरपदस्य तु वृद्धिः आर् ।

**[ दौहार्दम् ]** दुष्टं हृदयं यस्य सः = दुहृदयः । दुहृदः दुहृदयस्य वा इदं भावः कर्म वा = दौहार्दम् । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । 'युवादेरण्' (७।१।६७) अण्प्र० → अ । अनेन उभयपदवृद्धिः । 'र्हादर्ह-स्वरस्याऽनु नवा' (१।३।३१) द्वित्वम् ।

**[ सौहार्द्यम् ]** सुहृदो भावः कर्म वा = सौहार्द्यम् । 'पतिराजान्तगुणाङ्ग०' (७।१।६०) ट्यण्प्र० → य । अनेन उभयपदवृद्धिः ।

**[ दौहार्द्यम् ]** दुहृदो भावः कर्म वा = दौहार्द्यम् । 'पतिराजान्तगुणाङ्ग०' (७।१।६०) ट्यण्प्र० → य । अनेन उभयपदवृद्धिः ।

बहुलाधिकारात् मित्रामित्रार्थयोः सुहृद्-दुर्हृच्छब्दयोः ।

**[ सौहृदम् ]** सुहृदो भावः कर्म वा = सौहृदम् । 'युवादेरण्' (७।१।६७) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः औ ।

**[ दौर्हृदम् ]** दुर्हृदो भावः कर्म वा = दौर्हृदम् । 'युवादेरण्' (७।१।६७) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ ।

**[ सौभाग्यम् ]** सुभगस्य भावः = सौभाग्यम् । 'पतिराजान्तगुणाङ्ग०' (७।१।६०) ट्यण्प्र० → य । अनेन उभयपदवृद्धिः ।

**[ दौर्भाग्यम् ]** दुर्भगस्य भावः = दौर्भाग्यम् । 'पतिराजान्तगुणाङ्ग०' (७।१।६०) ट्यण्प्र० → य । अनेन उभयपदवृद्धिः ।

**[ सौभागिनेयः ]** सुभगाया अपत्यं = सौभागिनेयः । 'कल्याण्यादेरिन् चाऽन्तस्य' (६।१।७७) एयण्प्र० → एय - अन्तस्य "इन्"देशश्च । अनेन उभयपदवृद्धिः ।

**[ दौर्भागिणेयः ]** दुर्भगाया अपत्यं = दौर्भागिणेयः । 'कल्याण्यादेरिन्०' (६।१।७७) एयण्प्र० → एय - अन्तस्य "इन्"देशश्च । अनेन उभयपदवृद्धिः । 'र-षृवर्णान्नो ण०' (२।३।६३) णत्वम् ।

**[ साक्तुसैन्धवः ]** सक्तुप्रधानाः सिन्धवः = सक्तुसिन्धवः, तेषु भवः = साक्तुसैन्धवः । 'कच्छादेर्नृ-नृस्थे' (६।३।५५) अण्प्र० → अ । अनेन उभयपदवृद्धिः ।

**[ पानसैन्धवः ]** पानप्रधानाः सिन्धवः = पानसिन्धवः, तेषु भवः = पानसैन्धवः । 'कोपान्त्याच्चाण्' (६।३।५६) अण्प्र० → अ । अनेन उभयपदवृद्धिः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ लावणसैन्धवः ]** लवणप्रधानाः सिन्धवः = लवणसिन्धवः, तेषु भवः = लावणसैन्धवः । 'कोपान्त्याच्चाण्' (६।३।५६) अण्प्र० → अ । अनेन उभयपदवृद्धिः ।

**[ माहासैन्धवः ]** महान्तश्च ते सिन्धवश्च = महासिन्धवः । 'जातीयैकार्थेऽच्वेः' (३।२।७०) डा० । 'डित्यन्त्यस्वरादेः' (२।१।११४) अत्लुक् । महासिन्धुषु भवः = माहासैन्धवः । 'कोपान्त्याच्चाण्' (६।३।५६) अण्प्र० → अ । अनेन उभयपदवृद्धिः ।

**[ सौरसैन्धवः ]** सुराणां सिन्धवः = सुरसिन्धवः, तेषु भवः = सौरसैन्धवः । 'कोपान्त्याच्चाण्' (६।३।५६) अण्प्र० → अ । अनेन उभयपदवृद्धिः ॥छ॥

## प्राचां नगरस्य ॥ ७।४।२६ ॥

**[ प्राचाम् ]** ।

**[ नगरस्य ]** नगर षष्ठी ङस् ।

**[ सौह्मनागरः ]** सुह्मनगरे भवः = सौह्मनागरः । 'भवे' (६।३।१२३) अण्प्र० → अ । अनेन उभयपदवृद्धिः ।

**[ पौण्ड्रनागरः ]** पुण्डनगरे भवः = पौण्डनागरः । 'भवे' (६।३।१२३) अण्प्र० → अ । अनेन उभयपदवृद्धिः । पुण्डमडाश्च पुरुषविशेषाः ।

**[ वाजनागरः ]** वजनगरे भवः = वाजनागरः । 'भवे' (६।३।१२३) अण्प्र० → अ । अनेन उभयपदवृद्धिः ।

**[ वैराटनागरः ]** विराटनगरे भवः = वैराटनागरः । 'भवे' (६।३।१२३) अण्प्र० → अ । अनेन उभयपदवृद्धिः ।

**[ गैरिनागरः ]** गिरिनगरे भवः = गैरिनागरः । 'भवे' (६।३।१२३) अण्प्र० → अ । अनेन उभयपदवृद्धिः ।

**[ उदीचां माडनगरः ]** उदीचां मडनगरे भवः = माडनगरः । 'भवे' (६।३।१२३) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छ॥

## अनुशतिकादीनाम् ॥ ७।४।२७ ॥

**[ अनुशतिकादीनाम् ]** अनुशतिक आदिर्येषां ते = अनुशतिकादयः, तेषाम् ।

**[ आनुशातिकम् ]** शतेन क्रीतः = शतिकः । 'शतात्-केवलादतस्मिन् येकौ' (६।४।१३१) इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । शतमस्यास्तीति शतिकः । 'अतोऽनेकस्वरात्' (७।२।६) इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । शतिकमनुगतोऽनुशतिकः, अनुशतिकस्येदम् = आनुशातिकम् । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । अनेन उभयपदवृद्धिः ।

**[ आनुशातिकिः ]** अनुशतिकस्यापत्यम् = आनुशातिकिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । अनेन उभयपदवृद्धिः ।

**[ आनुहौडिकः ]** अनुहोडेन चरति = आनुहौडिकः । 'चरति' (६।४।११) इकण्प्र० → इक । अनेन उभयपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ आनुहारतः ]** अनुहरतोऽपत्यम् = आनुहारतः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । अनेन उभयपदवृद्धिः ।

**[ आस्यहात्यम् ]** अस्यहत्यशब्दोऽस्मिन् अध्यायेऽनुवाके वा अस्ति = आस्यहात्यम् । 'विमुक्तादेरण्' (७।२।७३) अण्प्र० → अ । अनेन उभयपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

[ **कौरुकात्यः** ] कुरुकतस्यापत्यं वृद्धं = कौरुकात्यः । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । अनेन उभयपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

[ **कौरुपाञ्चालः** ] कुरुषु पञ्चालेषु भवः = कौरुपाञ्चालः । 'भवे' (६।३।१२३) अण्प्र० → अ । अनेन उभयपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

[ **आधिदैविकम्** ] अधिदेवे भवम् = आधिदैविकम् । 'अध्यात्मादिभ्य इकण्' (६।३।७८) इकण्प्र० → इक । अनेन उभयपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

[ **आधिभौतिकम्** ] अधिभूते भवम् = आधिभौतिकम् । 'अध्यात्मादिभ्य इकण्' (६।३।७८) इकण्प्र० → इक । अनेन उभयपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

[ **ऐहलौकिकम्** ] इहलोके भवम् = ऐहलौकिकम् । 'अध्यात्मादिभ्य इकण्' (६।३।७८) इकण्प्र० → इक । अनेन उभयपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

[ **पारलौकिकम्** ] परलोके भवं = पारलौकिकम् । 'अध्यात्मादिभ्य इकण्' (६।३।७८) इकण्प्र० → इक । अनेन उभयपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

[ **सार्वलौकिकः** ] सर्वलोकस्य ज्ञातः = सार्वलौकिकः । 'लोकसर्वलोकाज्ज्ञाते' (६।४।१५७) इकण्प्र० → इक । अनेन उभयपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

[ **सार्वभौमः** ] सर्वभूमेरीशः = सार्वभौमः । 'पृथिवी-सर्वभूमेरीश-ज्ञातयोश्चाञ्' (६।४।१५६) अञ्प्र० → अ । अनेन उभयपदवृद्धिः ।

[ **बाध्यौगः** ] बध्योगस्याऽपत्यं वृद्धं = बाध्यौगः । 'विदादेर्वृद्धे' (६।१।४१) अञ्प्र० → अ । अनेन उभयपदवृद्धिः ।

[ **पौष्करसादः** ] पुष्करसदोऽपत्यं = पौष्करसादः । अनेन उभयपदवृद्धिः ।

[ **औदकशौद्धिः** ] उदकसु(शु)द्धस्यापत्यम् = औदकसौ(शौ)द्धिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । अनेन उभयपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

[ **सौत्रनाडिः** ] सूत्रनडस्यापत्यं = सौत्रनाडिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । अनेन उभयपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

[ **चातुर्वैद्यम्** ] चतुर्विद्यैव = चातुर्वैद्यम् । 'भेषजादिभ्यष्ट्यण्' (७।२।१६४) ट्यण्प्र० → य । अनेन उभयपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । 'तद्धितयस्वरेऽनाति' (२।४।९२) यलोपः ।

[ **राजपौरुष्यम्** ] राज्ञः पुरुषः = राजपुरुषः । राजपुरुषस्य भावः = राजपौरुष्यम् । 'पतिराजान्तगुणाङ्गराजादिभ्यः कर्मणि च' (७।१।६०) ट्यण्प्र० → य । अनेन उभयपदवृद्धिः ।

[ **पारिमाण्डल्यम्** ] परिमण्डलस्य भावः = पारिमाण्डल्यम् । 'पतिराजान्तगुणाङ्ग०' (७।१।६०) ट्यण्प्र० → य । अनेन उभयपदवृद्धिः ।

[ **प्रातिभाव्यम्** ] प्रतिभुवो भावः = प्रातिभाव्यम् । 'पतिराजान्तगुणाङ्ग०' (७।१।६०) ट्यण्प्र० → य । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । अनेन उभयपदवृद्धिः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ सार्ववैद्यम् ]** सर्वे वेदाः, सर्वा विद्या वा = सार्ववैद्यम् । 'भेषजादिभ्यष्ट्यण्' (७।२।१६४) ट्यण्प्र० → य । अनेन उभयपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् । यदा विद्या तदा 'व्यञ्जनात् पञ्चमाऽन्तस्थायाः सरूपे वा' (१।३।४७) इति यस्य लुक् ।

**[ राजपुरुषायणिः ]** राजपुरुषस्यापत्यं = राजपुरुषायणिः । 'अवृद्धाद् दोर्नवा' (६।१।११०) आयनिञ्प्र० → आयनि । 'वृद्धिः स्वरेष्वादेञ्णिति तद्धिते' (७।४।१) वृद्धिः ।।छा।

## देवतानामात्वादौ ॥ ७।४।२८ ॥

**[ देवतानाम् ]** देवता षष्ठी आम् ।

**[ आत्वादौ: ]** आत्व आदिर्यस्य सः = आत्वादिः, तस्मिन् ।

'वेदसहश्रुताऽवायुदेवतानाम्' (३।२।४१) इत्यादिसूत्रात् 'उषासोषसः' (३।२।४६) इत्यादियावत् यत्कार्यं तदात्वमुच्यते ।

**[ आग्नावैष्णवं सूक्तम् ]** अग्निश्च विष्णुश्च = अग्नाविष्णु(ष्णू) । 'वेदसहश्रुताऽवायुदेवतानाम्' (३।२।४१) इ० → आ० । अग्नाविष्णू देवतेऽस्य = आग्नावैष्णवं सूक्तम् । 'देवता' (६।२।१०१) अण्प्र० → अ । अनेन उभयपदवृद्धिः । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

**[ ऐन्द्रापौष्णं हविः ]** इन्द्रश्च पूषा च = इन्द्रापूषाणौ । 'वेदसहश्रुताऽवायुदेवतानाम्' (३।२।४१) आत्वम् । इन्द्रापूषाणौ देवतेऽस्य = ऐन्द्रापौष्णं हविः । 'देवता' (६।२।१०१) अण्प्र० → अ । अनेन उभयपदवृद्धिः । 'षादि-हन्-धृतराज्ञोऽणि' (२।१।११०) अलुक् । 'र-षृवर्णान्नो ण०' (२।३।६३) णत्वम् ।

**[ आग्निमारुतं कर्म ]** अग्निश्च मरुच्च = अग्निमरुतौ, अग्निमरुतौ देवतेऽस्य = आग्निमारुतं कर्म । 'देवता' (६।२।१०१) अण्प्र० → अ । अनेन उभयपदवृद्धिः ।

**[ आग्निवारुणीमनड्वाहीमालभेत ]** अग्निश्च वरुणश्च = अग्निवरुणौ । 'ईः षोम-वरुणेऽग्नेः' (३।२।४२) इत्यस्य बाधकः 'इर्वृद्धिमत्यविष्णौ' (३।२।४३) इ । अग्निवरुणौ देवतेऽस्याः सा = आग्निवारुणी, ताम् । 'देवता' (६।२।१०१) अण्प्र० → अ । अनेन उभयपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् । अनडुह् 'गौरादिभ्यो मुख्यान्ङीः' (२।४।१९) ङी । 'वा शेषे' (१।४।८२) वा । 'डुलभिष् प्राप्तौ' (७८६) लभ्, आङ्पूर्व० । सप्तमी ईत । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) ए ।

**[ स्कान्दविशाखम् ]** स्कन्दश्च विशाखश्च = स्कन्दविशाखौ, स्कन्दविशाखयोरिदं = स्कान्दविशाखम् । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ।

**[ ब्राह्मप्रजापत्यम् ]** ब्रह्मा च प्रजापतिश्च = ब्रह्मप्रजापती, तयोर्भावः = ब्राह्मप्रजापत्यम् । 'अनिदम्यणपवादे च दित्यदित्यादित्य-यम-पत्युत्तरपदाञ्ञ्यः' (६।१।१५) ञ्यप्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) इवर्णस्य लुक् ।

## आतो नेन्द्र-वरुणस्य ॥ ७।४।२९ ॥

**[ आतः ]** आत् पञ्चमी ङसि ।

**[ न ]** न प्रथमा सि ।

**[ इन्द्रवरुणस्य ]** इन्द्रश्च वरुणश्च = इन्द्रवरुणम्, तस्य ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[आग्नेन्द्रं सूक्तम्]** अग्निश्च इन्द्रश्च = अग्नेन्द्रौ । 'वेदसहश्रुताऽवायुदेवतानाम्' (३।२।४१) आ । अग्नेन्द्रौ देवता अस्य = आग्नेन्द्रं सूक्तम् । 'देवता' (६।२।१०१) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ।

**[सौमेन्द्रं हविः]** सोमश्च इन्द्रश्च = सोमेन्द्रौ । 'वेदसहश्रुता०' (३।२।४१) आ । सोमेन्द्रौ देवता अस्य तत् = सौमेन्द्रं हविः । 'देवता' (६।२।१०१) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ।

**[ऐन्द्रावरुणम्]** इन्द्रश्च वरुणश्च = इन्द्रावरुणौ । 'वेदसहश्रुताऽवा०' (३।२।४१) आ । इन्द्रावरुणौ देवता अस्य = ऐन्द्रावरुणम् । 'देवता' (६।२।१०१) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ।

**[मैत्रावरुणम्]** मित्रश्च वरुणश्च = मित्रावरुणौ । वेदसहश्रुताऽवायुदेव०' (३।२।४१) आ । मित्रावरुणौ देवता अस्य = मैत्रावरुणम् । 'देवता' (६।२।१०१) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः ऐ ।

**[आग्निवारुणम्]** अग्निश्च वरुणश्च = अग्निवरुणौ । 'इर्वृद्धिमत्यविष्णौ' (३।२।४३) इ । अग्निवरुणौ देवता अस्य = आग्निवारुणम् । 'देवता' (६।२।१०१) अण्प्र० → अ । 'देवतानामात्वादौ' (७।४।२८) उभयपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ऐन्द्राग्नं एकादशकपालं पुरोडाशं निर्वपेत्]** इन्द्रश्च अग्निश्च = इन्द्राग्नी । 'वेदसहश्रुताऽवायुदेवतानाम्' (३।२।४१) आ । इन्द्राग्नी देवता अस्य तत् = ऐन्द्राग्नम् । 'देवता' (६।२।१०१) अण्प्र० → अ । 'देवतानामात्वादौ' (७।४।२८) उभयपदवृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) इवर्णस्य लुक् । सि-अम् । एकादशसु कपालेषु संस्कृतम् = एकादशकपालम् । 'संस्कृते भक्ष्ये' (६।२।१४०) अण्प्र० । 'द्विगोरनपत्ये०' (६।१।२४) लुप् । पुरोडाश अम् । 'डुवपीं बीजसन्ताने' (९९५) वप् । सप्तमी यात् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'यः सप्तम्याः' (४।२।१२२) या० → इ० । 'अवर्णस्ये०' (१।२।६) ए ।

**[पूर्वेषुकामशमः]** एतस्य साधना 'प्राग्ग्रामाणाम्' (७।४।१७) इत्यत्र सूत्रे ज्ञेयः ॥छ॥

## सारवैक्ष्वाक-मैत्रेय-भ्रौणहत्य-धैवत्य-हिरण्मयम् ॥ ७।४।३० ॥

**[सारवैक्ष्वाकमैत्रेयभ्रौणहत्यधैवत्यहिरण्मयम्]** सारवश्च ऐक्ष्वाकश्च मैत्रेयश्च भ्रौणहत्यश्च धैवत्यश्च हिरण्मयश्च = सारवैक्ष्वाकमैत्रेयभ्रौणहत्यधैवत्यहिरण्मयम् ।

**[सारवमुदकम्]** सरय्वां भवं = सारवमुदकम् । 'भवे' (६।३।१२३) अण्प्र० → अ । अनेन अय् लुक् निपात्यते । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

**[ऐक्ष्वाकः]** इक्ष्वाकोरपत्यम् = ऐक्ष्वाकः । 'राष्ट्र-क्षत्रियात् सरूपाद् राजाऽपत्ये द्रिरञ्' (६।१।११४) अञ्प्र० → अ । अनेन उलुक् । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ ।

**[ऐक्ष्वाकम्]** इक्ष्वाकोरिदम् = ऐक्ष्वाकम् । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । अनेन उलोपः । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ ।

**[मैत्रेयः]** मित्रयोरपत्यं = मैत्रेयः । 'गृष्ट्यादेः' (६।१।८४) एयञ्प्र० → एय । अनेन मित्रयुशब्दस्य युलुक् निपात्यते ।

**[मैत्रेयकम्]** मित्रयूणां सङ्घः = मैत्रेयकम् । 'गोत्राददण्डमाणव-शिष्ये' (६।३।६९) अकञ्प्र० → अक । अनेन युलुक् निपात्यते । अकञ्बाधित्वा 'सङ्घ-घोषा-ऽङ्क-लक्षणेऽञ्-यञिञः' (६।३।१७२) इत्यादिना अण् स्यात् ।

मित्रयोरपत्यानि । 'गृष्ट्यादेः' (६।१।८४) इति विहितस्य एयः 'विदादेर्वृद्धे' (६।१।४१) इति विहितस्य अञ् 'यस्कादेर्गोत्रे' (६।१।१२५) इत्यनेन लुबर्थः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

[ **भ्रौणहत्यम्** ] भ्रूण-'हनंक् हिंसा-गत्योः' (११००) हन् । भ्रूणं हतवान् = भ्रूणहा । 'ब्रह्म-भ्रूण-वृत्रात् क्विप्' (५।१।१६१) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । भ्रूणघ्नो भावः कर्म वा = भ्रौणहत्यम् । 'पतिराजान्तगुणा०' (७।१।६०) ट्यण्प्र० → य । अनेन नस्य तनिपात्यते । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ ।

[ **धैवत्यम्** ] 'डुधांग्क् धारणे च' (११३९) धा । दधातीति धीवा । 'मन्-वन्-क्वनिप्-विच् क्वचित्' (५।१।१४७) क्वनिप्प्र० → वन् । 'ईर्व्यञ्जनेऽयपि' (४।३।९७) आ० → ई० । धीव्नो भावः कर्म वा = धैवत्यम् । 'पतिराजान्तगुणाङ्ग०' (७।१।६०) ट्यण्प्र० → य । अनेन नस्य तनिपात्यते । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ ।

[ **हिरण्मयम्** ] हिरण्यस्य विकारः = हिरण्मयम् । 'अभक्ष्या-ऽऽच्छादने वा मयट्' (६।२।४६) मयट्प्र० → मय । अनेन यलोपः ॥छ॥

## वाऽन्तमा-ऽन्तितमा-ऽन्तितो-ऽन्तिया-ऽन्तिषद् ॥ ७।४।३१ ॥

[ **वा** ] वा प्रथमा सि ।

[ **अन्तमाऽन्तितमाऽन्तितोऽन्तियाऽन्तिषद्** ] अन्तमश्च अन्तितमश्च अन्तितश्च अन्तियश्च अन्तिषद् च = अन्तमाऽन्तितमाऽन्तितोऽन्तियाऽन्तिषद् ।

[ **अन्तमः, अन्तिकतमः** ] अयमेषामतिशयेनान्तिकः = अन्तमः, पक्षे-अन्तिकतमः । 'प्रकृष्टे तमप्' (७।३।५) तमप्प्र० → तम । अनेन तिकलुप् । 'नोऽप्रशानोऽनुस्वाराऽनुनासिकौ च पूर्वस्याऽधुट्परे' (१।३।८) नकारस्य सकाराभावश्च निपात्यते ।

[ **अन्तितमः, अन्तिकतमः** ] अयमेषामतिशयेनान्तिकः = अन्तितमः । 'प्रकृष्टे तमप्' (७।३।५) तमप्प्र० → तम । अनेन कलोपो निपात्यते । एवम्-अन्तिकतमः ।

[ **अन्तित आगच्छति, अन्तिकत आगच्छति** ] अन्तिकादागच्छति = अन्तित आगच्छति । 'अहीय-रुहोऽपादाने' (७।२।८८) तसुप्र० → तस्-कलोपो निपात्यते । एवम्-अन्तिकत आगच्छति ।

[ **अन्तियः, अन्तिक्यः** ] अन्तिके साधुः = अन्तियः । 'तत्र साधौ' (७।१।१५) यप्र० । अनेन कलोपो निपात्यते इकारस्य च लोपाभावः । एवम्-अन्तिक्यः ।

[ **अन्तिषद्, अन्तिकसत्** ] अन्तोऽस्यास्तीति अन्तिकः । 'अतोऽनेकस्वरात्' (७।२।६) इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'षद्लृं विशरणगत्यवसादनेषु' (९६६) षद् । 'षः सोऽष्ट्यै०' (२।३।९८) सद् । अन्तिके सीदति = अन्तिषद् । क्विप्प्र० । अनेन कलोपः-सस्य षत्वं च निपात्यते । एवम्-अन्तिकसत् ॥छ॥

## विन्-मतोर्णीष्ठेयसौ लुप् ॥ ७।४।३२ ॥

[ **विन्मतोः** ] विन् च मतुश्च = विन्मतु, तस्य ।

[ **णीष्ठेयसौ** ] णिश्च इष्ठश्च ईयसुश्च = णीष्ठेयसु, तस्मिन् ।

[ **लुप्** ] लुप् प्रथमा सि ।

[ **स्रजयति** ] स्रग् विद्यते यस्य = स्रग्वी । अस् तपो-माया-मेधा-स्रजो विन्' (७।२।४७) विन्प्र० । स्रग्विणमाचष्टे । 'णिज्बहुलं नाम्नः कृगादिषु' (३।४।४२) णिच्प्र० । अनेन विन्लुप् । वर्त्त० तिव् । 'कर्त्तर्यन०' (३।४।७१) शव् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ स्रजिष्ठः ]** अयमेषां स्रग्विणां मध्येऽतिशयेन स्रग्वी = स्रजिष्ठः । 'गुणाङ्गाद् वेष्ठेयसू' (७।३।९) इष्ठप्र० । अनेन विन्लुप् ।

**[ स्रजीयान् ]** अयमनयोः स्रग्विणो मध्येऽतिशयेन स्रग्वी = स्रजीयान् । 'गुणाङ्गाद् वेष्ठेयसू' (७।३।९) ईयसुप्र० → ईयस् । अनेन विन्लुप् ।

**[ त्वचयति ]** त्वग् विद्यतेऽस्य = त्वग्वान् । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् । त्वग्वन्तमाचष्टे = त्वचयति । 'णिज्बहुलं०' (३।४।४२) णिच्प्र० । अनेन मतुलोपः । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[ त्वचिष्ठः ]** अयमेषां मध्ये प्रकृष्टस्त्वग्वान् = त्वचिष्ठः । 'गुणाङ्गाद् वेष्ठेयसू' (७।३।९) इष्ठप्र० । अनेन मतुलुप् ।

**[ त्वचीयान् ]** अयमनयोर्मध्येऽतिशयेन त्वग्वान् = त्वचीयान् । 'गुणाङ्गाद् वेष्ठेयसू' (७।३।९) ईयसुप्र० → ईयस् । अनेन मतुलुप् ।

**[ कुमुदयति ]** कुमुदान्यत्र सन्ति । 'नड-कुमुद-वेतस-महिषाड्डित्' (६।२।७४) डित् मतुप्र० → मत् । 'मावर्णान्तो०' (२।१।९४) म० → व० । कुमुद्वन्तमाचष्टे । 'णिज्बहुलं०' (३।४।४२) णिच्प्र० । अनेन मतुलुप् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[ कुमुदिष्ठः ]** अयमेषां मध्ये प्रकृष्टः कुमुद्वान् = कुमुदिष्ठः । 'गुणाङ्गाद् वेष्ठेयसू' (७।३।९) इष्ठप्र० । अनेन मतुलुप् ।

**[ कुमुदीयान् ]** अयमनयोर्मध्येऽतिशयेन कुमुद्वान् = कुमुदीयान् । 'गुणाङ्गाद् वेष्ठेयसू' (७।३।९) ईयसुप्र० → ईयस् । अनेन मतुलुप् । प्रथमैकवचनं सि । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'न्स्महतोः' (१।४।८६) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'पदस्य' (२।१।८९) सलोपः ।।छा।

## अल्प-यूनोः कन् वा ॥ ७।४।३३ ॥

**[ अल्पयूनोः ]** अल्पश्च युवा च = अल्पयुवानौ, तयोः = अल्पयूनोः । षष्ठी ओस् ।

**[ कन् ]** कन् प्रथमा सि ।

**[ वा ]** वा प्रथमा सि ।

**[ कनयति, कनिष्ठः, कनीयान्, अल्पयति, अल्पिष्ठः, अल्पीयान्, यवयति, यविष्ठः, यवीयान् ]** अल्पं युवानं च आचष्टे । 'णिज्बहुलं०' (३।४।४२) णिच्प्र० । अयमेषां अतिशयेन अल्पो युवा वा = कनिष्ठः, कनीयान् । 'गुणाङ्गाद् वेष्ठेयसू' (७।३।९) इष्ठ-ईयसुप्र० । अनेन अल्पस्य यूनो वा स्थाने "कन्"देशो विकल्पेन । एवम्-अल्पयतीत्यादि । अत्रापि अगुणाङ्गादपि इष्ठेयसू वचनसामर्थ्यात् भवतः । अन्यथा 'स्थूल-दूर०' (७।४।४२) इत्यनेन अन्तस्थादेरवयवस्य लुब्-गुणोऽपि न स्यात्, तयोरभावात् । एवमुत्तरेष्वपि दृश्यन्ते । युवानमाचष्टे । 'णिज् बहुलं०' (३।४।४२) णिच्प्र० । अयमेषां मध्ये प्रकृष्टो युवा = यविष्ठः । अयमनयोर्मध्ये प्रकृष्टो युवा = यवीयान् । 'गुणाङ्गाद् वेष्ठेयसू' (७।३।९) इष्ठ-ईयसुप्र० । 'स्थूल-दूर-युव-ह्रस्व-क्षिप्र-क्षुद्रस्यान्तस्थादेर्गुणश्च नामिनः' (७।४।४२) वन्लोपः-गुणश्च । 'ओदौतोऽवाव्' (१।२।२४) अव् ।।छा।

## प्रशस्यस्य श्रः ॥ ७।४।३४ ॥

**[ प्रशस्यस्य ]** प्रशस्य षष्ठी ङस् ।

**[ श्रः ]** श्र प्रथमा सि ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ श्रयति ]** प्रपूर्व० 'शंसू स्तुतौ च' (५५०) शंस् । प्रशस्यत इति प्रशस्यः । 'कृ-वृषि-मृजि-शंसि-गुहि-दुहि-जपो वा' (५।१।४२) क्यप्प्र० → य । 'नो व्यञ्जनस्याऽनुदितः' (४।२।४५) नलुक् । प्रशस्यमाचष्टे । 'णिज्बहुलं०' (३।४।४२) णिच्प्र० । अनेन प्रशस्यस्थाने "श्र"देशे अन्त्यस्वरादेः अलुक् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[ श्रेष्ठः ]** अयमेषां मध्ये प्रकृष्टः प्रशस्यः = श्रेष्ठः । 'गुणाङ्गाद् वेष्ठेयसू' (७।३।९) इष्ठप्र० । अनेन प्रशस्यस्य "श्र"देशः । अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) ए ।

**[ श्रेयान् ]** अयमनयोर्मध्ये प्रकृष्टः प्रशस्यः = श्रेयान् । 'गुणाङ्गाद् वेष्ठेयसू' (७।३।९) ईयसुप्र० → ईयस् । अनेन प्रशस्यस्य "श्र"देशः । 'अवर्णस्ये०' (१।२।६) ए ॥छ॥

## वृद्धस्य च ज्यः ॥ ७।४।३५ ॥

**[ वृद्धस्य ]** वृद्ध षष्ठी ङस् ।

**[ च ]** च प्रथमा सि ।

**[ ज्यः ]** ज्य प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ ज्ययति ]** वृद्धं-प्रशस्यं वा आचष्टे । 'णिज् बहुलं नाम्नः कृगादिषु' (३।४।४२) णिच्प्र० । अनेन वृद्ध-प्रशस्ययोः स्थाने "ज्य"देशः । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ ज्येष्ठः ]** अयमेषां मध्ये प्रकृष्टो वृद्धः प्रशस्यो वा = ज्येष्ठः । 'गुणाङ्गाद् वेष्ठेयसू' (७।३।९) इष्ठप्र० । अनेन वृद्ध-प्रशस्ययोः स्थाने "ज्य"देशः । 'अवर्णस्ये०' (१।२।६) ए ॥छ॥

## ज्यायान् ॥ ७।४।३६ ॥

**[ ज्यायान् ]** ज्यायान् प्रथमा सि ।

**[ ज्यायान् ]** अयमनयोर्मध्ये प्रकृष्टो वृद्धः प्रशस्यो वा = ज्यायान् । अत्राकारस्यापि निपातने ज्यायानिति सिध्यति । 'लुगस्यादेत्यपदे' (२।१।११३) इत्यस्याकारकरणादेवाप्रवृत्तेः प्रक्रियानिरासार्थं त्वाकारकरणम् । 'गुणाङ्गाद् वेष्ठेयसू' (७।३।९) ईयसुप्र० → ईयस् । अनेन वृद्ध-प्रशस्ययोः स्थाने "ज्य"देशः-ईयसोरीकारस्य आकारादेशो निपात्यते । 'समानानां०' (१।२।१) दीर्घः ।

**[ ज्यायसी ]** अयमनयोरतिशयेन प्रशस्यो वृद्धो वा = ज्यायसी । 'गुणाङ्गाद् वेष्ठेयसू' (७।३।९) ईयसुप्र० → ईयस् । अनेन ज्यायस् पूर्ववन्निपातः । 'अधातूदृदितः' (२।४।२) ङी । ईयसुप्र० उकारानुबन्धः अतो ङी ॥छ॥

## बाढा-ऽन्तिकयोः साध-नेदौ ॥ ७।४।३७ ॥

**[ बाढाऽन्तिकयोः ]** बाढश्च अन्तिकश्च = बाढाऽन्तिकौ, तयोः ।

**[ साधनेदौ ]** साधश्च नेदश्च = साधनेदौ ।

**[ साधयति ]** बाढमाचष्टे = साधयति । 'णिज्बहुलं नाम्नः कृगादिषु' (३।४।४२) णिच्प्र० । अनेन बाढस्य "साध"देशः । साध-नेदौ इति समानलोपित्वात् ङपरे णौ सन्वदादिकार्याभावः । 'त्र्यन्त्यस्वरादेः' (७।४।४३) अलुक् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ साधिष्ठः ]** अयमेषां मध्ये प्रकृष्टो बाढः = साधिष्ठः । 'गुणाङ्गाद् वेष्ठेयसू' (७।३।९) इष्ठप्र० । अनेन बाढस्य "साध"देशः । 'त्रन्त्यस्वरादेः' (७।४।४३) अलुक् ।

**[ साधीयान् ]** अयमनयोर्मध्ये प्रकृष्टो बाढः = साधीयान् । 'गुणाङ्गाद् वेष्ठेयसू' (७।३।९) ईयसुप्र० । अनेन बाढस्य "साध"देशः । 'त्रन्त्यस्वरादेः' (७।४।४३) अलुक् ।

**[ नेदयति ]** अन्तिकमाचष्टे । 'णिज्बहुलं०' (३।४।४२) णिच्प्र० । अनेन अन्तिकस्थाने "नेद"देशः । 'त्रन्त्यस्वरादेः' (७।४।४३) अलुक् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् ।

**[ नेदिष्ठः ]** अयमेषां मध्ये प्रकृष्टोऽन्तिकः = नेदिष्ठः । 'गुणाङ्गाद् वेष्ठेयसू' (७।३।९) इष्ठप्र० । अनेन अन्तिकस्थाने "नेद"देशः । 'त्रन्त्यस्वरादेः' (७।४।४३) अलुक् ।

**[ नेदीयान् ]** अयमनयोर्मध्ये प्रकृष्टोऽन्तिकः = नेदीयान् । 'गुणाङ्गाद्०' (७।३।९) ईयसुप्र० → ईयस् । अनेन अन्तिकस्थाने "नेद"देशः । 'त्रन्त्यस्वरादेः' (७।४।४३) अलुक् ॥छा।

## प्रिय-स्थिर-स्फिरोरु-गुरु-बहुल-तृप्र-दीर्घ-वृद्ध-वृन्दारक-स्येमनि च प्रा-स्था-स्फा-वर-गर-बंह-त्रप-द्राघ-वर्ष-वृन्दम् ॥ ७।४।३८ ॥

**[ प्रियस्थिरस्फिरोरुगुरुबहुलतृप्रदीर्घवृद्धवृन्दारकस्य ]** प्रियश्च स्थिरश्च स्फिरश्च उरुश्च गुरुश्च बहुलश्च तृप्रश्च दीर्घश्च वृद्धश्च वृन्दारकश्च = प्रियस्थिरस्फिरोरुगुरुबहुलतृप्रदीर्घवृद्धवृन्दारकम् तस्य ।

**[ इमनि ]** इमन् सप्तमी ङि ।

**[ च ]** च प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[ प्रास्थास्फावरगरबंहत्रपद्राघवर्षवृन्दम् ]** प्राश्च स्थाश्च स्फाश्च वरश्च गरश्च बंहश्च त्रपश्च द्राघश्च वर्षश्च वृन्दश्च = प्रास्थास्फावरगरबंहत्रपद्राघवर्षवृन्दम् ।

**[ प्रेमा ]** प्रियस्य भावः = प्रेमा । 'पृथ्वादेरिमन् वा' (७।१।५८) इमन्प्र० । अनेन प्रियस्य प्रा० । 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) ए । प्रथमा सि । 'नि दीर्घः' (१।४।४५) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ प्रापयति ]** प्रियमाचष्टे = प्रापयति । 'णिज्बहुलं०' (३।४।४२) णिच्प्र० । अनेन प्रियस्य प्रा० । 'अर्त्ति-री-व्ली-ह्री-क्नूयि-क्ष्माय्यातां पुः' (४।२।२१) इति सूत्रे बहुवचनात् नाम्नोऽपि पोऽन्तः । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ प्रेष्ठः ]** अयमेषां मध्ये प्रकृष्टः प्रियः = प्रेष्ठः । 'गुणाङ्गाद् वेष्ठेयसू' (७।३।९) इष्ठप्र० । अनेन प्रियस्य प्रा० । 'अवर्णस्ये०' (१।२।६) ए ।

**[ प्रेयान् ]** अयमनयोर्मध्ये प्रकृष्टः प्रियः = प्रेयान् । 'गुणाङ्गाद्०' (७।३।९) ईयसुप्र० → ईयस् । अनेन प्रियस्य प्रा० । 'अवर्णस्ये०' (१।२।६) ए ।

**[ स्थेमा ]** स्थिरस्य भावः = स्थेमा । 'वर्ण-दृढादिभ्यष्ट्यण् च वा' (७।१।५९) इमन्प्र० । अनेन स्थिरस्य स्था० । 'अवर्णस्ये०' (१।२।६) ए । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ स्थापयति ]** स्थिरमाचष्टे = स्थापयति । 'णिज्बहुलं०' (३।४।४२) णिच्प्र० । अनेन स्थिरस्य स्था० । 'अर्त्ति-री-व्ली-ह्री०' (४।२।२१) पोऽन्तः । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ स्थेष्ठः ]** अयमेषां मध्ये प्रकृष्टः स्थिरः = स्थेष्ठः । 'गुणाङ्गाद् वेष्ठेयसू' (७।३।९) इष्ठप्र० । अनेन स्थिरस्य स्था० । 'अवर्णस्येवर्णादि०' (१।२।६) ए ।

**[ स्थेयान् ]** अयमनयोर्मध्ये प्रकृष्टः स्थिरः = स्थेयान् । 'गुणाङ्गाद्०' (७।३।९) ईयसुप्र० → ईयस् । अनेन स्थिरस्य स्था० । 'अवर्णस्ये०' (१।२।६) ए ।

**[ स्फापयति ]** स्फिरमाचष्टे = स्फापयति । 'णिज्बहुलं नाम्नः०' (३।४।४२) णिच्प्र० । अनेन अर्त्ति-री-व्ली-ह्री-क्नूयि०' (४।२।२१) पोऽन्तः । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो०' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ स्फेष्ठः ]** अयमेषां मध्ये प्रकृष्टः स्फिरः = स्फेष्ठः । 'गुणाङ्गाद्०' (७।३।३९) इष्ठप्र० । अनेन स्फिरस्य स्फा० । 'अवर्णस्येवर्णा०' (१।२।६) ए ।

**[ स्फेयान् ]** अयमनयोर्मध्ये प्रकृष्टः स्फिरः = स्फेयान् । 'गुणाङ्गाद्०' (७।३।९) ईयसुप्र० → ईयस् । अनेन स्फिरस्य स्फा० । 'अवर्णस्येवर्णादि०' (१।२।६) ए ।

**[ वरिमा ]** उरोर्भावः = वरिमा । 'पृथ्वादेरिमन् वा' (७।१।५८) इमन्प्र० । अनेन ऊरोर्वर देशः । 'त्रन्त्यस्वरादेः' (७।४।४३) अलुक् । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ वरयति ]** ऊरुमाचष्टे = वरयति । 'णिज्बहुलं०' (३।४।४२) णिच्प्र० । अनेन उरोर्वरदेशः । 'त्रन्त्यस्वरादेः' (७।४।४३) अलुक् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ वरिष्ठः ]** अयमेषां मध्ये प्रकृष्टः ऊरुः = वरिष्ठः । 'गुणाङ्गाद्०' (७।३।९) इष्ठप्र० । अनेन उरोर्वरदेशः । 'त्रन्त्यस्वरादेः' (७।४।४३) अलुक् ।

**[ वरीयान् ]** अयमनयोर्मध्ये प्रकृष्टः ऊरुः = वरीयान् । 'गुणाङ्गाद्०' (७।३।९) ईयसुप्र० → ईयस् । अनेन उरोर्वरदेशः । 'त्रन्त्यस्वरादेः' (७।४।३) अलुक् ।

**[ गरिमा ]** गुरोर्भावः = गरिमा । 'पृथ्वादेरिमन् वा' (७।१।५८) इमन्प्र० । अनेन गुरोर्गरदेशः । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ गरयति ]** गुरुमाचष्टे = गरयति । 'णिज्बहुलं०' (३।४।४२) णिच्प्र० । अनेन गुरोर्गरदेशः । 'त्रन्त्यस्वरादेः' (७।४।४३) अलुक् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो०' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ गरिष्ठः ]** अयमेषां मध्ये प्रकृष्टः गुरुः = गरिष्ठः । 'गुणाङ्गाद्०' (७।३।९) इष्ठप्र० । अनेन गुरोर्गरदेशः । 'त्रन्त्यस्वरादेः' (७।४।४३) अलुक् ।

**[ गरीयान् ]** अयमनयोर्मध्ये प्रकृष्टः गुरुः = गरीयान् । 'गुणाङ्गाद्०' (७।३।९) ईयसुप्र० → ईयस् । अनेन गुरोर्गरदेशः । 'त्रन्त्यस्वरादेः' (७।४।४३) अलुक् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ बंहिमा ]** बहुलस्य भावः = बंहिमा । 'पृथ्वादेरिमन् वा' (७।१।५८) इमन्प्र० । अनेन बहुलस्य बंह० । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ बंहयति ]** बहुलमाचष्टे । 'णिज्बहुलं०' (३।४।४२) णिच्प्र० । अनेन बहुलस्य बंह० । 'त्रन्त्यस्वरादेः' (७।४।४३) अलुक् । वर्त्त० तिव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२४) अय् ।

**[ बंहिष्ठः ]** अयमेषां मध्ये प्रकृष्टो बहुलः = बंहिष्ठः । 'गुणाङ्गाद् वेष्ठेयसू' (७।३।९) इष्ठप्र० । अनेन बहुलस्य बंह० ।

**[ बंहीयान् ]** अयमनयोर्मध्ये प्रकृष्टो बहुलः = बंहीयान् । 'गुणाङ्गाद् वेष्ठेयसू' (७।३।९) ईयसुप्र० → ईयस् । अनेन बहुलस्य बंह० ।

**[ त्रपिमा ]** तृप्रस्य भावः = त्रपिमा । 'पृथ्वादेरिमन् वा' (७।१।५८) इमन्प्र० । अनेन तृप्रस्य त्रप० । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ त्रपयति ]** तृप्रमाचष्टे = त्रपयति । 'णिज्बहुलं०' (३।४।४२) णिच्प्र० । अनेन तृप्रस्य त्रप० । 'त्रन्त्यस्वरादेः' (७।४।४३) अलुक् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो०' (४।३।१) गु० ए० । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ त्रपिष्ठः ]** अयमेषां मध्ये प्रकृष्टः तृप्रः = त्रपिष्ठः । 'गुणाङ्गाद् वेष्ठेयसू' (७।३।९) इष्ठप्र० । अनेन तृप्रस्य त्रप० ।

**[ त्रपीयान् ]** अयमनयोर्मध्ये प्रकृष्टः तृप्रः = त्रपीयान् । 'गुणाङ्गाद् वेष्ठेयसू' (७।३।९) ईयसुप्र० → ईयस् । अनेन तृप्रस्य त्रप० ।

**[ द्राघिमा ]** दीर्घस्य भावः = द्राघिमा । 'पृथ्वादेरिमन् वा' (७।१।५८) इमन्प्र० । अनेन दीर्घस्य द्राघ० । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ द्राघयति ]** दीर्घमाचष्टे = द्राघयति । 'णिज्बहुलं०' (३।४।४२) णिच्प्र० । अनेन दीर्घस्य द्राघ० । 'त्रन्त्यस्वरादेः' (७।४।४३) अलुक् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्य शव्' (३।४।७१) शव् । 'नामिनो०' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ द्राघिष्ठः ]** अयमेषां मध्ये प्रकृष्टो दीर्घः = द्राघिष्ठः । 'गुणाङ्गाद् वेष्ठेयसू' (७।३।९) इष्ठप्र० । अनेन दीर्घस्य द्राघ० ।

**[ द्राघीयान् ]** अयमनयोर्मध्ये प्रकृष्टो दीर्घः = द्राघीयान् । 'गुणाङ्गाद् वेष्ठेयसू' (७।३।९) ईयसुप्र० → ईयस् । अनेन दीर्घस्य द्राघ० ।

**[ वर्षिमा ]** वृद्धस्य भावः = वर्षिमा । 'पृथ्वादेरिमन् वा' (७।१।५८) इमन्प्र० । अनेन वृद्धस्य वर्ष० । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ वर्षयति ]** वृद्धमाचष्टे = वर्षयति । 'णिज्बहुलं०' (३।४।४२) णिच्प्र० । अनेन वृद्धस्य वर्ष० । 'त्रन्त्यस्वरादेः' (७।४।४३) अलुक् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ वर्षिष्ठः ]** अमयेषां मध्ये प्रकृष्टो वृद्धः = वर्षिष्ठः । 'गुणाङ्गाद् वेष्ठेयसू' (७।३।९) इष्ठप्र० । अनेन वृद्धस्य वर्ष० ।

**[ वर्षीयान् ]** अयमनयोर्मध्ये प्रकृष्टो वृद्धः = वर्षीयान् । 'गुणाङ्गाद् वेष्ठेयसू' (७।३।९) ईयसुप्र० → ईयस् । अनेन वृद्धस्य वर्ष० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ वृन्दिमा ]** वृन्दमस्यास्ति = वृन्दारकः । 'वृन्दादारकः' (७।२।११) आरकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । वृन्दारकस्य भावः = वृन्दिमा । 'वर्ण-दृढादिभ्यष्ट्यण् च वा' (७।१।५९) इमन्प्र० । अनेन वृन्दारकस्य वृन्द० । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ वृन्दयति ]** वृन्दारकमाचष्टे । 'णिज्बहुलं०' (३।४।४२) णिच्प्र० । अनेन वृन्दारकस्य वृन्द० । 'त्रन्त्यस्वरादेः' (७।४।४३) अलुक् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो०' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ वृन्दिष्ठः ]** अयमेषां मध्ये प्रकृष्टो वृन्दारकः = वृन्दिष्ठः । 'गुणाङ्गाद् वेष्ठेयसू' (७।३।९) इष्ठप्र० । अनेन वृन्दारकस्य वृन्द० ।

**[ वृन्दीयान् ]** अयमनयोर्मध्ये प्रकृष्टो वृन्दारकः = वृन्दीयान् । 'गुणाङ्गाद्०' (७।३।९) ईयसुप्र० → ईयस् । अनेन वृन्दारकस्य वृन्द० ।

**वरादीनामकार उच्चारणार्थः** ॥छ॥

## पृथु-मृदु-भृश-कृश-दृढ-परिवृढस्य ऋतो रः ॥ ७।४।३९ ॥

**[ पृथुमृदुभृशकृशदृढपरिवृढस्य ]** पृथुश्च मृदुश्च भृशश्च कृशश्च दृढश्च परिवृढश्च = पृथुमृदुभृशकृशदृढपरिवृढम्, तस्य ।

**[ ऋतः ]** ऋत् षष्ठी ङस् ।

**[ रः ]** र प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ प्रथिमा ]** पृथोर्भावः = प्रथिमा । 'पृथ्वादेरिमन् वा' (७।१।५८) इमन्प्र० । 'त्रन्त्यस्वरादेः' (७।४।४३) उलुक् । अनेन ऋतः स्थाने र० । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ प्रथयति ]** पृथुमाचष्टे = प्रथयति । 'णिज्बहुलं०' (३।४।४२) णिच्प्र० । 'त्रन्त्यस्वरादेः' (७।४।४३) उलुक् । अनेन ऋतः स्थाने र० । वर्त्त० तिव् । 'कर्त्तर्यन०' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ प्रथिष्ठः ]** अयमेषां मध्ये प्रकृष्टः पृथुः = प्रथिष्ठः । 'गुणाङ्गाद्०' (७।३।९) इष्ठप्र० । 'त्रन्त्यस्वरादेः' (७।४।४३) उलुक् । अनेन ऋतः स्थाने र० ।

**[ प्रथीयान् ]** अयमनयोर्मध्ये प्रकृष्टः पृथुः = प्रथीयान् । 'गुणाङ्गाद् वेष्ठेयसू' (७।३।९) ईयसुप्र० → ईयस् । 'त्रन्त्यस्वरादेः' (७।४।४३) उलुक् । अनेन ऋतः स्थाने र० ।

**[ म्रदिमा ]** मृदोर्भावः = म्रदिमा । 'पृथ्वादेरिमन् वा' (७।१।५८) इमन्प्र० । 'त्रन्त्यस्वरादेः' (७।४।४३) उलुक् । अनेन ऋतः स्थाने र० । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ म्रदयति ]** मृदुमाचष्टे = म्रदयति । 'णिज्बहुलं०' (३।४।४२) णिच्प्र० । 'त्रन्त्यस्वरादेः' (७।४।४३) उलुक् । अनेन ऋतः स्थाने र० । वर्त्त० तिव् । 'कर्त्तर्यन०' (३।४।७१) शव् । 'नामिनो०' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ म्रदिष्ठः ]** अयमेषां मध्ये प्रकृष्टो मृदुः = म्रदिष्ठः । 'गुणाङ्गाद्०' (७।३।९) इष्ठप्र० । 'त्र्यन्त्यस्वरादेः' (७।४।४३) उलुक् । अनेन ऋतः स्थाने र० ।

**[ म्रदीयान् ]** अयमनयोर्मध्ये प्रकृष्टो मृदुः = म्रदीयान् । 'गुणाङ्गाद् वेष्ठेयसू' (७।३।९) ईयसुप्र० → ईयस् । 'त्र्यन्त्यस्वरादेः' (७।४।४३) उलुक् । अनेन ऋतः स्थाने र० ।

**[ भ्रशिमा ]** भृशस्य भावः = भ्रशिमा । 'वर्ण-दृढादिभ्यष्ट्यण् च वा' (७।१।५९) इमन्प्र० । 'त्र्यन्त्यस्वरादेः' (७।४।४३) अलुक् । अनेन ऋतः स्थाने र० । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ भ्रशयति ]** भृशमाचष्टे = भ्रशयति । 'णिज्बहुलं०' (३।४।४२) णिच्प्र० । 'त्र्यन्त्यस्वरादेः' (७।४।४३) अलुक् । अनेन ऋतः स्थाने र० । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो०' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ भ्रशिष्ठः ]** अयमेषां मध्ये प्रकृष्टः भृशः = भ्रशिष्ठः । 'गुणाङ्गाद् वेष्ठेयसू' (७।३।९) इष्ठप्र० । 'त्र्यन्त्यस्वरादेः' (७।४।४३) अलुक् । अनेन ऋतः स्थाने र० ।

**[ भ्रशीयान् ]** अयमनयोर्मध्ये प्रकृष्टः भृशः = भ्रशीयान् । 'गुणाङ्गाद्०' (७।३।९) ईयसुप्र० → ईयस् । 'त्र्यन्त्यस्वरादेः' (७।४।४३) अलुक् । अनेन ऋतः स्थाने र० ।

**[ क्रशिमा ]** कृशस्य भावः = क्रशिमा । 'वर्ण-दृढादिभ्यष्ट्यण् च वा' (७।१।५९) इमन्प्र० । 'त्र्यन्त्यस्वरादेः' (७।४।४३) अलुक् । अनेन ऋतः स्थाने र० । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ क्रशयति ]** कृशमाचष्टे । 'णिज्बहुलं०' (३।४।४२) णिच्प्र० । 'त्र्यन्त्यस्वरादेः' (७।४।४३) अलुक् । अनेन ऋतः स्थाने र० । 'वर्त्त० तिव् । 'कर्त्तर्यन०' (३।४।७१) शव् । 'नामिनो०' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ क्रशिष्ठः ]** अयमेषां मध्ये प्रकृष्टः कृशः = क्रशिष्ठः । 'गुणाङ्गाद्०' (७।३।९) इष्ठप्र० । 'त्र्यन्त्यस्वरादेः' (७।४।४३) अलुक् । अनेन ऋतः स्थाने र० ।

**[ क्रशीयान् ]** अयमनयोर्मध्ये प्रकृष्टः कृशः = क्रशीयान् । 'गुणाङ्गाद्०' (७।३।९) ईयसुप्र० → ईयस् । 'त्र्यन्त्यस्वरादेः' (७।४।४३) अलुक् । अनेन ऋतः स्थाने र० ।

**[ द्रढिमा ]** दृढस्य भावः = द्रढिमा । 'वर्ण-दृढादिभ्यष्ट्यण् च वा' (७।१।५९) इमन्प्र० । 'त्र्यन्त्यस्वरादेः' (७।४।४३) अलुक् । अनेन ऋतः स्थाने र० । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ द्रढयति ]** दृढमाचष्टे = द्रढयति । 'णिज्बहुलं०' (३।४।४२) णिच्प्र० । 'त्र्यन्त्यस्वरादेः' (७।४।४३) अलुक् । अनेन ऋतः स्थाने र० । 'वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो०' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ द्रढिष्ठः ]** अमयेषां मध्ये प्रकृष्टो दृढः = द्रढिष्ठः । 'गुणाङ्गाद् वेष्ठेयसू' (७।३।९) इष्ठप्र० । 'त्र्यन्त्यस्वरादेः' (७।४।४३) अलुक् । अनेन ऋतः स्थाने र० ।

**[ द्रढीयान् ]** अयमनयोर्मध्ये प्रकृष्टो दृढः = द्रढीयान् । 'गुणाङ्गाद्०' (७।३।९) ईयसुप्र० → ईयस् । 'त्र्यन्त्यस्वरादेः' (७।४।४३) अलुक् । अनेन ऋतः स्थाने र० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ परिव्रढिमा ]** परिवृढस्य भावः = परिव्रढिमा । 'वर्ण-दृढादिभ्यष्ट्यण् च वा' (७।१।५९) इमन्प्र० । 'त्र्यन्त्यस्वरादेः' (७।४।४३) अलुक् । अनेन ऋतः स्थाने र० । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ परिव्रढयति ]** परिवृढमाचष्टे = परिव्रढयति । 'णिज्बहुलं नाम्नः कृगादिषु' (३।४।४२) णिच्प्र० । 'त्र्यन्त्यस्वरादेः' (७।४।४३) अलुक् । अनेन ऋतः स्थाने र० । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ परिव्रढिष्ठः ]** अयमेषां मध्ये प्रकृष्टः परिवृढः = परिव्रढिष्ठः । 'गुणाङ्गाद् वेष्ठेयसू' (७।३।९) इष्ठप्र० । 'त्र्यन्त्यस्वरादेः' (७।४।४३) अलुक् । अनेन ऋतः स्थाने र० ।

**[ परिव्रढीयान् ]** अयमनयोर्मध्ये प्रकृष्टः परिवृढः = परिव्रढीयान् । 'गुणाङ्गाद्०' (७।३।९) ईयसुप्र० → ईयस् । 'त्र्यन्त्यस्वरादेः' (७।४।४३) अलुक् । अनेन ऋतः स्थाने र० ।

**[ ऋजिमा ]** ऋजु । ऋजोर्भावः = ऋजिमा । 'पृथ्वादेरिमन् वा' (७।१।५८) इमन्प्र० । 'त्र्यन्त्यस्वरादेः' (७।४।४३) उलुक् । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ ऋजयति ]** ऋजुमाचष्टे = ऋजयति । 'णिज्बहुलं०' (३।४।४२) णिच्प्र० । 'त्र्यन्त्यस्वरादेः' (७।४।४३) उलुक् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ ऋजिष्ठः ]** अयमेषां मध्ये प्रकृष्ट ऋजुः = ऋजिष्ठः । 'गुणाङ्गाद्०' (७।३।९) इष्ठप्र० । 'त्र्यन्त्यस्वरादेः' (७।४।४३) उलुक् ।

**[ ऋजीयान् ]** अयमनयोर्मध्ये प्रकृष्ट ऋजुः = ऋजीयान् । 'गुणाङ्गाद्०' (७।३।९) ईयसुप्र० → ईयस् । 'त्र्यन्त्यस्वरादेः' (७।४।८३) उलुक् ।

**[ कृष्णिमा ]** कृष्णस्य भावः = कृष्णिमा । 'वर्ण-दृढादिभ्यष्ट्यण् च वा' (७।१।५९) इमन्प्र० । 'त्र्यन्त्यस्वरादेः' (७।४।४३) अलुक् । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ कृष्णयति ]** कृष्णमाचष्टे = कृष्णयति । 'णिज्बहुलं०' (३।४।४२) णिच्प्र० । 'त्र्यन्त्यस्वरादेः' (७।४।४३) अलुक् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो०' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ कृष्णिष्ठः ]** अयमेषां मध्ये प्रकृष्टः कृष्णः = कृष्णिष्ठः । 'गुणाङ्गाद्०' (७।३।९) इष्ठप्र० । 'त्र्यन्त्यस्वरादेः' (७।४।४३) अलुक् ।

**[ कृष्णीयान् ]** अयमनयोर्मध्ये प्रकृष्टः कृष्णः = कृष्णीयान् । 'गुणाङ्गाद् वेष्ठेयसू' (७।३।९) ईयसुप्र० → ईयस् । 'त्र्यन्त्यस्वरादेः' (७।४।४३) अलुक् ।

**[ अनृचीयान्, स्वृचीयान् ]** न विद्यन्ते ऋचोऽस्य = अनृचः । 'नञ्-बहोर्ऋचो माणव-चरणे' (७।३।११५) अप्समासान्तः → अ । 'अन् स्वरे' (३।२।१२९) अन् । अनृचा माणवका अस्य सन्ति । 'तदस्यास्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् । अयमनयोर्मध्ये प्रकृष्टो•ऽनृचवान् = अनृचीयान् । 'गुणाङ्गाद्०' (७।३।९) ईयसुप्र० → ईयस् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'विन्-मतोर्णीष्ठेयसौ लुप्' (७।४।३२) मतुलुप् । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् । शोभना ऋच् = स्वृच् । अयमनयोर्मध्ये प्रकृष्टः स्वृच् = स्वृचीयान् । आभ्यामगुणाङ्गत्वेऽपि 'विन्-मतोः०' (७।४।३२) इति ज्ञापकस्य सर्वोदिष्टत्वादीयस् गुणाङ्गाः ईय ॥छ॥

## बहोर्णीष्ठे भूय् ॥ ७।४।४० ॥

**[ बहोः ]** बहु षष्ठी ङस् ।

**[ णीष्ठे ]** णिश्च इष्ठश्च = णीष्ठम्, तस्मिन् ।

**[ भूय् ]** भूय् प्रथमा सि । 'दीर्घङ्याब्-व्यञ्जनात् सेः' (१।४।४५) सिलुक् ।

**[ भूययति ]** बहुमाचष्टे = भूययति । 'णिज्बहुलं नाम्नः कृगादिषु' (३।४।४२) णिच्प्र० । अनेन बहुस्थाने भूय् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो०' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ भूयिष्ठः ]** अयमेषां मध्ये प्रकृष्टो बहुः = भूयिष्ठः । 'गुणाङ्गाद् वेष्ठेयसू' (७।३।९) इष्ठप्र० । अनेन बहुस्थाने भूय् ।

**[ भूयनम् ]** बहोराख्यानं = भूयनम् । णिच्प्र० । अनेन भूयदेशः । भूय्यते = भूयनम् । 'अनट्' (५।३।१२४) अनट्प्र० → अन । 'णेरनिटि' (४।३।८३) णिच्लुक् । एकमेवेदं वाक्यम् । यद्वा बहुमाचष्टे । णिच्प्र० । अनेन भूय् । भूय्यते । अनट्प्र० । एवं मतान्तरेऽपि ।

**[ भावयति ]** बहुमाचष्टे = भावयति । 'णिज्बहुलं०' (३।४।४२) णिच्प्र० । मतान्तरे "भू"देशः । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ॥छ॥

## भूर्लुक् चेवर्णस्य ॥ ७।४।४१ ॥

**[ भूः ]** भू प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ लुक् ]** लुक् प्रथमा सि ।

**[ च ]** च प्रथमा सि ।

**[ इवर्णस्य ]** इवर्ण षष्ठी ङस् ।

**[ भूयान्, भूयांसौ, भूयांसः ]** अतिशयेन बहुः = भूयान्, भूयांसौ, भूयांसः । 'गुणाङ्गाद् वेष्ठेयसू' (७।३।९) ईयसुप्र० → ईयस् । अनेन बहुशब्दस्य भूदेशः-ईकारलोपश्च । सि-औ-जस् । 'ऋदुदितः' (१।४।७०) नोऽन्तः । 'न्स्महतोः' (१।४।८६) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् ।

**[ भूमा ]** बहोर्भावः = भूमा । 'पृथ्वादेरिमन् वा' (७।१।५८) इमन्प्र० । अनेन बहुशब्दस्य भूदेशः । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

भू ऊ इति ऊकारप्रश्लेषादवादेशो न भवति ॥छ॥

## स्थूल-दूर-युव-ह्रस्व-क्षिप्र-क्षुद्रस्यान्तस्थादेर्गुणश्च नामिनः ॥ ७।४।४२ ॥

**[ स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्रस्य ]** स्थूलश्च दूरश्च युवा च ह्रस्वश्च क्षिप्रश्च क्षुद्रश्च = स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्रम्, तस्य ।

**[ अन्तस्थादेः ]** अन्तस्था आदिरवयवो यस्य सः = अन्तस्थादिः, तस्य ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ गुणः ]** गुण प्रथमा सि ।

**[ च ]** च प्रथमा सि ।

**[ नामिनः ]** नामिन् षष्ठी ङस् ।

**[ स्थवयति ]** स्थूलमाचष्टे = स्थवयति । 'णिज्बहुलं नाम्नः कृगादिषु' (३।४।४२) णिच्प्र० । अनेन ललुक्-गुणश्च ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ स्थविष्ठः ]** अयमेषां मध्ये प्रकृष्टः स्थूलः = स्थविष्ठः । 'गुणाङ्गाद् वेष्ठेयसू' (७।३।९) इष्ठप्र० । अनेन ललुक्-गुणश्च ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

**[ स्थवीयान् ]** अयमनयोर्मध्ये प्रकृष्टः स्थूलः = स्थवीयान् । 'गुणाङ्गाद्०' (७।३।९) ईयसुप्र० → ईयस् । अनेन ललुक्-गुणश्च ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

**[ दवयति ]** दूरमाचष्टे = दवयति । 'णिज्बहुलं०' (३।४।४२) णिच्प्र० । अनेन रलुक्-गुणश्च ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । वर्त्त० तिव् । 'कर्त्तर्यन०' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ दविष्ठः ]** अयमेषां मध्ये प्रकृष्टो दूरः = दविष्ठः । 'गुणाङ्गाद्०' (७।३।९) इष्ठप्र० । अनेन रलुक्-गुणश्च ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

**[ दवीयान् ]** अयमनयोर्मध्ये प्रकृष्टो दूरः = दवीयान् । 'गुणाङ्गाद्०' (७।३।९) ईयसुप्र० → ईयस् । अनेन रलुक्-गुणश्च ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

**[ यवयति ]** युवानमाचष्टे = यवयति । 'णिज्बहुलं०' (३।४।४२) णिच्प्र० । अनेन वन् लुक्-नामिनो गुणश्च ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । वर्त्त० तिव् । 'कर्त्तर्यन०' (३।४।७१) शव् । 'नामिनो०' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ यविष्ठः ]** अयमेषां मध्ये प्रकृष्टो युवा = यविष्ठः । 'गुणाङ्गाद्०' (७।३।९) इष्ठप्र० । अनेन वन् लुक्-गुणश्च ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

**[ यवीयान् ]** अयमनयोर्मध्ये प्रकृष्टो युवा = यवीयान् । 'गुणाङ्गाद्०' (७।३।९) ईयसुप्र० → ईयस् । अनेन वन् लुक्-गुणश्च ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

**[ ह्रसिमा ]** ह्रस्वस्य भावः = ह्रसिमा । ह्रस्ववतो भावः इति भावार्थः पुरुषस्य । 'पृथ्वादेरिमन् वा' (७।१।५८) इमन्प्र० । अनेन वलुक् । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ ह्रसयति ]** ह्रस्वमाचष्टे । 'णिज्बहुलं०' (३।४।४२) णिच्प्र० । अनेन वलुक् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो०' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ ह्रसिष्ठः, ह्रसीयान् ]** अयमेषां अयमनयोर्वा मध्ये प्रकृष्टो ह्रस्वः = ह्रसिष्ठः, ह्रसीयान् । अयं ह्रस्ववान् पुरुषः, अयमनयोर्मध्येऽतिशयेन प्रकृष्टो ह्रस्ववान् = ह्रसिष्ठः, ह्रसीयान् इति भावार्थः । 'गुणाङ्गाद्०' (७।३।९) इष्ठ-ईयसुप्र० । अनेन वलुक् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ क्षेपिमा ]** क्षिप्रस्य भावः = क्षेपिमा । 'पृथ्वादेरिमन् वा' (७।१।५८) इमन्प्र० । अनेन रलुक्-गुणश्च ए । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ क्षेपयति ]** क्षिप्रमाचष्टे = क्षेपयति । 'णिज्बहुलं०' (३।४।४२) णिच्प्र० । अनेन रलुक्-गुणश्च ए । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो०' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ क्षेपिष्ठः, क्षेपीयान् ]** अयमेषां-अयमनयोर्वा मध्ये प्रकृष्टः क्षिप्रः = क्षेपिष्ठः, क्षेपीयान् । क्षिप्रवतो भावः पुरुषस्य इति । क्षिप्रवन्तमाचष्टे इति अयं क्षिप्रवान् पुरुषः, अयमेषां-अयमनयोर्वा मध्ये प्रकृष्टः क्षिप्रवान् = क्षेपिष्ठः, क्षेपीयान् इति भावार्थः । 'गुणाङ्गाद्०' (७।३।९) इष्ठ-ईयसुप्र० । अनेन रलुक्-गुणश्च ए ।

**[ क्षोदिमा ]** क्षुद्रस्य भावः = क्षोदिमा । 'पृथ्वादेरिमन् वा' (७।१।५८) इमन्प्र० । अनेन रलुक्-गुणश्च ओ । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ क्षोदयति ]** क्षुद्रमाचष्टे = क्षोदयति । 'णिज्बहुलं०' (३।४।४२) णिच्प्र० । अनेन रलुक्-गुणश्च ओ । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो०' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ क्षोदिष्ठः, क्षोदीयान् ]** अयमेषां-अयमनयोर्वा मध्ये प्रकृष्टः क्षुद्रः = क्षोदिष्ठः, क्षोदीयान् । क्षुद्रवतः पुरुषस्य भाव इति भावार्थः । अयं क्षुद्रवान् पुरुषः । अयमेषां-अयमनयोर्वा मध्ये प्रकृष्टः क्षुद्रवान् = क्षोदिष्ठः, क्षोदीयान् । 'गुणाङ्गाद्०' (७।३।९) इष्ठ-ईयसुप्र० । अनेन रलुक्-गुणश्च ओ ।

उत्तरेणान्त्यस्वरस्यानेनार्थादन्तस्थाया लोपे सिद्धे अन्तस्थादेरिति किमर्थम् ? 'येन नाप्राप्ते यो विधिरारभ्यते स तस्यैव बाधकः' (न्या० वक्ष०(१)/सूत्र(४०)इति) न्यायेनान्त्यस्वरादिलोपं बाधित्वानेनान्तस्थाया एव लोपो मा भूदित्येवमर्थम् ॥छ॥

### त्रन्त्यस्वरादेः ॥ ७।४।४३ ॥

**[ त्रन्त्यस्वरादेः ]** ता च अन्त्यस्वरादिश्च = त्रन्त्यस्वरादि, तस्य ।

**[ करयति ]** कर्तृ । कर्त्ता विद्यते यस्य = कर्तृमान् । 'तदस्याऽस्त्यस्मिन्निति मतुः' (७।२।१) मतुप्र० → मत् । कर्तृमन्तमाचष्टे । 'णिज्बहुलं०' (३।४।४२) णिच्प्र० । 'विन्-मतोर्णीष्ठेयसौ लुप्' (७।४।३२) मत्लुप् । अनेन तृलुक् । 'नामिनो०' (४।३।१) गु० अर् ।

**[ करिष्ठः, करीयान् ]** अयमेषां-अयमनयोर्वा मध्ये अतिशयेन कर्तृमान् = करिष्ठः, करीयान् । 'गुणाङ्गाद्०' (७।३।९) इष्ठ-ईयसुप्र० । अनेन तृलुक् ।

**[ करयति ]** कर्त्तारमाचष्टे । 'णिज्बहुलं०' (३।४।४२) णिच्प्र० । अनेन तृलुक् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो०' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ पटिमा ]** पटोर्भावः = पटिमा । 'पृथ्वादेरिमन् वा' (७।१।५८) इमन्प्र० । अनेन उलुक् । प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ पटयति ]** पटुमाचष्टे = पटयति । 'णिज्बहुलं०' (३।४।४२) णिच्प्र० । अनेन उलुक् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो०' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ पटिष्ठः, पटीयान् ]** अयमेषां-अयमनयोर्वा मध्ये प्रकृष्टः पटुः = पटिष्ठः, पटीयान् । 'गुणाङ्गाद्०' (७।३।९) इष्ठ-ईयसुप्र० । अनेन उलुक् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ लघिमा ]** लघोर्भाव: = लघिमा । 'पृथ्वादेरिमन् वा' (७।१।५८) इमन्प्र० । अनेन उलुक् । प्रथमा सि । 'नि दीर्घ:' (१।४।८५) दीर्घ: । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्न:' (२।१।९१) नलुक् ।

**[ लघयति ]** लघुमाचष्टे = लघयति । 'णिज्बहुलं०' (३।४।४२) णिच्प्र० । अनेन उलुक् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्य: शव्' (३।४।७१) शव् । 'नामिनो०' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ लघिष्ठ:, लघीयान् ]** अयमेषां-अयमनयोर्वा मध्ये प्रकृष्ट: लघु: = लघिष्ठ:, लघीयान् । 'गुणाङ्गाद्०' (७।३।९) इष्ठ-ईयसुप्र० । अनेन उलुक् ।

**[ विमनिमा ]** विमनसो भाव: = विमनिमा । 'वर्ण-दृढादिभ्यष्ट्यण् च वा' (७।१।५९) इमन्प्र० । अनेन अस्लुक् । प्रथमा सि । 'नि दीर्घ:' (१।४।८५) दीर्घ: । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्न:' (२।१।९१) नलुक् ।

**[ सन्मनिमा ]** सन्मनसो भाव: = सन्मनिमा । 'वर्ण-दृढादि०' (७।१।५९) इमन्प्र० । अनेन अस्लुक् । प्रथमा सि । 'नि दीर्घ:' (१।४।८५) दीर्घ: । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्न:' (२।१।९१) नलुक् ।

**[ पययति, पयसयति ]** पयो विद्यतेऽस्य = पयस्वी । 'अस्-तपो-माया-मेधा-स्रजो विन्' (७।२।४७) विन्प्र० । पयस्विनमाचष्टे = पययति, पयसयति । 'णिज्बहुलं० (३।४।४२) णिच्प्र० । 'विन्-मतोर्णीष्ठेयसौ लुप्' (७।४।३२) विन्लुप् । मतान्तरे अनेनैव अस्लुक् विकल्पेन । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्य: शव्' (३।४।७१) शव् । 'नामिनो०' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ पयिष्ठ:, पयसिष्ठ:, पयीयान्, पयसीयान् ]** अयमेषां-अयमनयोर्वा मध्ये अतिशयेन पयस्वी = पयिष्ठ:, पयसिष्ठ:, पयीयान्, पयसीयान् । 'गुणाङ्गाद् वेष्ठेयसू' (७।३।९) इष्ठ-ईयसुप्र० । 'विन्-मतोर्णीष्ठेयसौ लुप्' (७।४।३२) विन्लुप् । मतान्तरे अनेनैव अस्लुक् विकल्पेन ।

**[ वसयति, वसवयति ]** वसूनि विद्यन्तेऽस्य । 'तदस्याऽस्त्यस्मिन्निति मतु:' (७।२।१) मतुप्र० → मत् । वसुमन्तमाचष्टे = वसयति, वसवयति । 'णिज्बहुलं०' (३।४।४२) णिच्प्र० । 'विन्-मतोर्णीष्ठेयसौ लुप्' (७।४।३२) मत्लुप् । मतान्तरे अनेनैव उलुक् । द्वितीये गुणश्च ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । वर्त्त० तिव् । कर्त्तर्यनद्भ्य: शव्' (३।४।७१) शव् । 'नामिनो०' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ वसिष्ठ:, वसविष्ठ:, वसीयान्, वसवीयान् ]** अयमेषां-अयमनयोर्वा मध्ये अतिशयेन वसुमान् = वसिष्ठ:, वसविष्ठ:, वसीयान्, वसवीयान् । 'गुणाङ्गाद् वेष्ठेयसू' (७।३।९) इष्ठ-ईयसुप्र० । मतान्तरे अनेनैव उलुक्-गुणश्च ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ॥छ॥

### नैकस्वरस्य ॥ ७।४।४४ ॥

**[ न ]** न प्रथमा सि ।

**[ एकस्वरस्य ]** एक: स्वरो यस्य स: = एकस्वर:, तस्य ।

**[ स्रजयति ]** स्रग्विणमाचष्टे = स्रजयति । 'णिज्बहुलं०' (३।४।४२) णिच्प्र० । 'विन्-मतोर्णीष्ठेयसौ लुप्' (७।४।३२) विन्लुप् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्य: शव्' (३।४।७१) शव् । 'नामिनो०' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ स्रजिष्ठ:, स्रजीयान् ]** अयमेषामतिशयेन स्रग्वी = स्रजिष्ठ:, स्रजीयान् । 'गुणाङ्गाद्०' (७।३।९) इष्ठ-ईयसुप्र० । 'विन्-मतोर्णीष्ठेयसौ लुप्' (७।४।३२) विन्लुप् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ स्रुचयति ]** स्रुच् विद्यते यस्य = स्रुग्वान् । 'तदस्याऽस्त्य०' (७।२।१) मतुप्र० → मत् । 'मावर्णान्तोपा०' (२।१।९४) म० → व० । स्रुग्वन्तमाचष्टे = स्रुचयति । 'णिज्बहुलं०' (३।४।४२) णिच्प्र० । 'विन्-मतोर्णीष्ठेयसौ लुप्' (७।४।३२) मत्लुप् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो०' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ स्रुचिष्ठः, स्रुचीयान् ]** अयमेषामतिशयेन स्रुग्वान् = स्रुचिष्ठः, स्रुचीयान् । 'गुणाङ्गाद्०' (७।३।९) इष्ठ-ईयसुप्र० । 'विन्-मतोर्णीष्ठेयसौ लुप्' (७।४।३२) मत्लुप् ।

**[ वसयति ]** वसुमन्तमाचष्टे = वसयति । 'णिज्बहुलं०' (३।४।४२) णिच्प्र० । 'विन्-मतोर्णीष्ठेयसौ लुप्' (७।४।३२) मत्लुप् । 'त्रन्त्यस्वरादेः' (७।४।४३) उलुक् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो०' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ वसिष्ठः, वसीयान् ]** अयमेषामतिशयेन वसुमान् = वसिष्ठः, वसीयान् । 'गुणाङ्गाद्०' (७।३।९) इष्ठ-ईयसुप्र० । 'विन्-मतोर्णीष्ठेयसौ लुप्' (७।४।३२) मत्लुप् । 'त्रन्त्यस्वरादेः' (७।४।४३) उलुक् ।

**[ इः ]** अस्य विष्णोरपत्यम् = इ । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । **अकारेण भवेद्विष्णुः** इत्युक्तं श्रीसिद्धसेनदिवाकरस्य द्वात्रिंशतिका मध्ये ।

**[ ज्ञः ]** ज्ञो देवताऽस्य = ज्ञः । 'देवता' (६।२।१०१) अण्प्र० → अ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ श्रीयः ]** श्रिये हितः = श्रीयः । 'तस्मै हिते' (७।१।३५) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) ईलुक् ।

योगविभागात् 'अवर्णेवर्णस्य' (७।४।६८) इति लोपस्यापि प्रतिषेधः, यथा श्रेष्ठः, श्रेयान् इत्यत्र ॥छ॥

### दण्डि-हस्तिनोरायने ॥ ७।४।४५ ॥

**[ दण्डिहस्तिनोः ]** दण्डी च हस्ती च = दण्डिहस्तिनौ, तयोः = दण्डिहस्तिनोः । षष्ठी ओस् । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः ।

**[ आयने ]** आयन सप्तमी ङि ।

'नोऽपदस्य तद्धिते' (७।४।६१) इति प्राप्तौ प्रतिषेधोऽयम् ।

**[ दाण्डिनायनः ]** दण्डिनोऽपत्यं = दाण्डिनायनः । 'नडादिभ्य आयनण्' (६।१।५३) आयनण्प्र० → आयन । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः ।

**[ हास्तिनायनः ]** हस्तिनोऽपत्यं = हास्तिनायनः । 'नडादिभ्य आयनण्' (६।१।५३) आयनण्प्र० → आयन । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ।

**[ दाण्डम् ]** दण्डिनां समूहः = दाण्डम् । 'श्वादिभ्योऽञ्' (६।२।२६) अञ्प्र० → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) इन्लुक् ।

**[ हास्तिकम् ]** हस्तिनां समूहः = हास्तिकम् । 'कवचि-हस्त्यचित्ताच्चेकण्' (६।२।१४) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'नोऽपदस्य तद्धिते' (७।४।६१) इन्लुक् ॥छ॥

### वाशिन आयनौ ॥ ७।४।४६ ॥

**[ वाशिनः ]** वाशिन् षष्ठी ङस् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ आयनौ ]** आयनि सप्तमी ङि ।

**[ वाशिनायनिः ]** 'वशक् कान्तौ' (११०१) वश् । वष्टीत्येवंशीलः = वाशी । 'णिन् चाऽऽवश्यकाऽधमर्ण्ये' (५।४।३६) णिन्प्र० → इन् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । वाशिनोऽपत्यं = वाशिनायनिः । 'अवृद्धाद् दोर्नवा' (६।१।११०) आयनिञ्प्र० → आयनि । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ।।छा।

## एये जिह्माशिनः ।। ७।४।४७ ।।

**[ एये ]** एय सप्तमी ङि ।

**[ जिह्माशिनः ]** जिह्माशिन् षष्ठी ङस् ।

**[ जैह्माशिनेयः ]** जिह्माशिनोऽपत्यं = जैह्माशिनेयः । 'शुभ्राऽऽदिभ्यः' (६।१।७२) एयण्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ ।।छा।

## ईनेऽध्वा-ऽऽत्मनोः ।। ७।४।४८ ।।

**[ ईने ]** ईन सप्तमी ङि ।

**[ अध्वाऽऽत्मनोः ]** अध्वा च आत्मा च = अध्वाऽऽत्मानौ, तयोः = अध्वाऽऽत्मनोः । षष्ठी ओस् ।

**[ अध्वनीनः ]** अध्वन् । अध्वानमलङ्गामी = अध्वनीनः । 'अध्वानं येनौ' (७।१।१०३) ईनप्र० ।

**[ आत्मनीनः ]** आत्मने हितः = आत्मनीनः । 'भोगोत्तरपदा-ऽऽत्मभ्यामीनः' (७।१।४०) ईनप्र० ।

**[ प्राध्वम् ]** प्रगतमध्वानं = प्राध्वम् । 'उपसर्गादध्वनः' (७।३।७९) अत्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् । सि-अम् ।

**[ अध्यात्मम् ]** आत्मन्यधि = अध्यात्मम् । 'अनः' (७।३।८८) अत्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् । सि-अम् ।।छा।

## इकण्यथर्वणः ।। ७।४।४९ ।।

**[ इकणि ]** इकण् सप्तमी ङि ।

**[ अथर्वणः ]** अथर्वन् षष्ठी ङस् । 'र-षृवर्णान्नो ण०' (२।३।६३) णत्वम् ।

**[ आथर्वणिकः ]** अथर्वाणं वेत्त्यधीते वा = आथर्वणिकः । 'न्यायादेरिकण्' (६।२।११८) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'र-षृवर्णान्नो ण०' (२।३।६३) णत्वम् ।।छा।

## यूनोऽके ।। ७।४।५० ।।

**[ यूनोऽके ]** युवन् षष्ठी ङस् । 'श्वन्-युवन्-मघोनो ङी-स्याद्यघुट्स्वरे व उः' (२।१।१०६) व० → उ० । 'समानानां०' (१।२।१) दीर्घः । अक सप्तमी ङि ।

**[ यौवनिका ]** यूनो भावः = यौवनिका । 'चौ(चो)रादेः' (७।१।७३) अकञ्प्र० → अक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्०' (२।४।१११) इ ।

**[ यौविकम् ]** युवा प्रयोजनमस्य = यौविकम् । 'प्रयोजनम्' (६।४।११७) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् ।।छा।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## अनोऽट्ये-ये ॥ ७।४।५१ ॥

**[ अनोऽट्येये ]** अन् षष्ठी ङस् । न ट्योऽट्यस्तस्मिन् । य सप्तमी ङि ।

**[ सामन्यः ]** सामनि साधुः = सामन्यः । 'तत्र साधौ' (७।१।१५) यप्र० ।

**[ वेमन्यः ]** वेमनि साधुः = वेमन्यः । 'तत्र साधौ' (७।१।१५) यप्र० ।

**[ मूर्धन्यः ]** मूर्धनि भवः = मूर्धन्यः । 'दिगादि-देहांशाद् यः' (६।३।१२४) यप्र० ।

**[ ताक्षण्यः ]** तक्ष्णोऽपत्यं = ताक्षण्यः । 'कुर्वादिर्ञ्यः' (६।१।१००) ञ्यप्र० → य । 'र-षृवर्णान्नो ण एकपदेऽनन्त्यस्या-ऽल-च-ट-तवर्ग-श-सान्तरे' (२।३।६३) णत्वम् ।

**अट्य इति वचनात् सानुबन्धेऽपि प्रतिषेधः ।**

**[ छत्र्यः ]** छत्रिन् । छत्रिषु साधुः = छत्र्यः । 'तत्र साधौ' (७।१।१५) यप्र० । 'नोऽपदस्य तद्धिते' (७।४।६१) इन्लुक् ।

**[ राज्यम् ]** राज्ञो भावः कर्म वा = राज्यम् । 'पतिराजान्तगुणाङ्गराजादिभ्यः कर्मणि च' (७।१।६०) ट्यणप्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'नोपदस्य तद्धिते' (७।४।६१) अन्लुक् ।

**[ दौरात्म्यम् ]** दुरात्मनो भावः = दौरात्म्यम् । 'पतिराजा०' (७।१।६०) ट्यणप्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् ।

**[ परमराजः ]** परमश्चासौ राजा च = परमराजः । 'राजन्-सखेः' (७।३।१०६) अट्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् ।

**[ द्विमूर्धः ]** द्वौ मूर्धानौ यस्य = द्विमूर्धः । 'द्वि-त्रेर्मूर्ध्नो वा' (७।३।१२७) टः समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् ।।छा।

## अणि ॥ ७।४।५२ ॥

**[ अणि ]** अण् सप्तमी ङि ।

**[ सौत्वनः ]** षुंगट् अभिषवे (१२८६) षु । 'षः सोऽष्ट्यै०' (२।३।९८) सु । सुतवान् = सुत्वा । 'सु-यजोर्ङ्वनिप्' (५।१।१७२) ङ्वनिप्प्र० → वन् । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः । सुत्वनोऽपत्यं = सौत्वनः । 'ङसोऽपत्ये' (६।१।२८) अणप्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ ।

**[ याज्वनः ]** 'यजीं देवपूजा-सङ्गतिकरण-दानेषु' (९९१) यज् । इष्टवान् = यज्वा । 'सु-यजोर्ङ्वनिप्' (५।१।१७२) ङ्वनिप्प्र० → वन् । यज्वनोऽपत्यं = याज्वनः । 'ङसोऽपत्ये' (६।१।२८) अणप्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ।

**[ सामनः ]** साम देवताऽस्य = सामनः । 'देवता' (६।२।१०१) अणप्र० → अ ।

**[ वैमनः ]** वेमा देवताऽस्य = वैमनः । 'देवता' (६।२।१०१) अणप्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ ।

**[ कार्मणम् ]** सन्दिष्टं कर्म = कार्मणम् । 'कर्मणः सन्दिष्टे' (७।२।१६७) अणप्र० → अ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः । 'र-षृवर्णान्नो ण०' (२।३।६३) णत्वम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

[ पार्वणः ] पर्वणि भवः = पार्वणः । 'भवे' (६।३।१२३) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः । 'र-षृवर्णान्नो ण०' (२।३।६३) णत्वम् ।

[ कार्मः ] कर्म शीलमस्य = कार्मः । 'अङ्गस्थाच्छत्राऽऽदेरञ्' (६।४।६०) अञ्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् ।

[ कार्मुकम् ] कर्मणे शक्तं = कार्मुकम् । 'योग-कर्मभ्यां योकञौ' (६।४।९५) उकञ्प्र० → उक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक ।।छ।।

## संयोगादिनः ।। ७।४।५३ ।।

[ संयोगात् ] संयोग पञ्चमी ङसि ।

[ इनः ] इन् षष्ठी ङस् ।

[ शाङ्खिनः ] शङ्खोऽस्यास्ति = शङ्खी । 'अतोऽनेकस्वरात्' (७।२।६) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । शङ्खिनोऽपत्यं = शाङ्खिनः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः ।

[ चाक्रिणः ] चक्रमस्यास्ति = चक्री । 'अतोऽनेकस्वरात्' (७।२।६) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । चक्रिणोऽपत्यं = चाक्रिणः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'र-षृवर्णान्नो ण०' (२।३।६३) णत्वम् ।

[ वाज्रिणः ] वज्रमस्यास्ति = वज्री । 'अतोऽनेकस्वरात्' (७।२।६) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । वज्रिणोऽपत्यं = वाज्रिणः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'र-षृवर्णान्नो ण०' (२।३।६३) णत्वम् ।

[ स्राग्विणः ] स्रग् विद्यते यस्य = स्रग्वी । 'अस् तपो-माया-मेधा-स्रजो विन्' (७।२।४७) विन्प्र० । 'स्रग्विणोऽपत्यं = स्राग्विणः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'र-षृवर्णान्नो ण०' (२।३।६३) णत्वम् ।

[ माद्रिणः ] मद्रमस्यास्ति = मद्री । 'अतोऽनेकस्वरात्' (७।२।६) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । मद्रिणोऽपत्यं = माद्रिणः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः । 'र-षृवर्णान्नो ण०' (२।३।६३) णत्वम् ।

[ भाद्रिणः ] भद्रमस्यास्ति = भद्री । 'अतोऽनेकस्वरात्' (७।२।६) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । भद्रिणोऽपत्यं = भाद्रिणः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'र-षृवर्णान्नो ण०' (२।३।६३) णत्वम् ।

[ मैधावः ] मेधा अस्यास्ति = मेधावी । 'अस् तपो-माया-मेधा-स्रजो विन्' (७।२।४७) विन्प्र० । मेधाविनोऽपत्यं = मैधावः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'नोऽपदस्य तद्धिते' (७।४।६१) इन्लुक् ।

[ मायावः ] माया अस्यास्ति = मायावी । 'अस्-तपो-माया-मेधा-स्रजो विन्' (७।२।४७) विन्प्र० । मायाविनोऽपत्यं = मायावः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) इन्लुक् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ प्राकारमर्दिः ]** प्राकारमर्दिनोऽपत्यं = प्राकारमर्दिः । 'बाह्वादिभ्यो गोत्रे' (६।१।३२) इञ्प्र० → इ । 'नोऽपदस्य तद्धिते' (७।४।६१) इन्लुक् ।

अनपत्ये उत्तरेण सिद्धत्वादपत्यार्थोऽयमारम्भः ॥छ॥

### गाथि-विदथि-केशि-पणि-गणिनः ॥ ७।४।५४ ॥

**[ गाथिविदथिकेशिपणिगणिनः ]** गाथी च विदथी च केशी च पणी च गणी च = तत्, तस्य ।

**[ गाथिनः ]** गाथा अस्यास्ति = गाथी । 'शिखादिभ्य इन्' (७।२।४) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् । गाथिनोऽपत्यं = गाथिनः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ।

**[ वैदथिनः ]** विदथा अस्यास्ति = विदथी । 'शिखादिभ्य इन्' (७।२।४) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् । विदथिनोऽपत्यं = वैदथिनः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । गाथ-विदथौ छन्दविशेषौ ।

**[ कैशिनः ]** केशा अस्य सन्ति = केशी । 'अतोऽनेकस्वरात्' (७।२।६) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अवर्णस्य लुक् । केशिनोऽपत्यं = कैशिनः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ ।

**[ पाणिनः ]** पणोऽस्यास्ति = पणी । 'अतोऽनेकस्वरात्' (७।२।६) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । पणिनोऽपत्यं = पाणिनः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ।

**[ गाणिनः ]** गणोऽस्यास्ति = गणी । 'अतोऽनेकस्वरात्' (७।२।६) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । गणिनोऽपत्यं = गाणिनः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ॥छ॥

### अनपत्ये ॥ ७।४।५५ ॥

**[ अनपत्ये ]** न अपत्यम् = अनपत्यम्, तस्मिन् ।

**[ सांकूटिनं वर्त्तते ]** सम् 'कूटण् दाहे' (१८५९) कूट् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । समन्तात् कूटनं = सांकूटिनम् । 'अभिव्याप्तौ भावेऽन-ञिन्' (५।३।९०) ञिन्प्र० → इन् । 'नित्यं ञ-ञिनोऽण्' (७।३।५८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ।

**[ सांराविणम् ]** टुक्षु (१०८४) - 'रु शब्दे' (१०८५) रु, सम्पूर्व० । समन्तात् रावः = सांराविणम् । 'अभिव्याप्तौ भावेऽन-ञिन्' (५।३।९०) ञिन्प्र० → इन् । 'नित्यं ञ-ञिनोऽण्' (७।३।५८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ।

**[ साम्मार्जिनम् ]** सम् 'मृजौक् शुद्धौ' (१०९७) मृज् । समन्तात् मार्जनं = साम्मार्जिनम् । 'अभिव्याप्तौ भावेऽन-ञिन्' (५।३।९०) ञिन्प्र० → इन् । 'नित्यं ञ-ञिनोऽण्' (७।३।५८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ।

**[ गार्भिणम् ]** गर्भोऽस्त्यासां = गर्भिण्यः । 'अतोऽनेकस्वरात्' (७।२।६) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'स्त्रियां नृतोऽस्वस्रादेर्ङीः' (२।४।१) ङी । गर्भिणीनां समूहः = गार्भिणम् । 'भिक्षाऽऽदेः' (६।२।१०) अण्प्र० → अ । 'जातिश्च णि-तद्धितय-स्वरे' (३।२।५१) पुंवत्-ङीगतेत्यर्थः । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ गौणिनम् ]** गुणिन इदं = गौणिनम् । 'तस्येदम्' (६।३।१६०) अणप्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ ।

**[ स्राग्विणम् ]** स्रग्विण इदं = स्राग्विणम् । 'तस्येदम्' (६।३।१६०) अणप्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः । 'र-षृवर्णान्नो ण०' (२।३।६३) णत्वम् ।

**[ मैधावः ]** मेधा अस्यास्ति = मेधावी । 'अस्-तपो-माया-मेधा-स्रजो विन्' (७।२।४७) विन्प्र० । मेधाविनोऽपत्यं = मैधावः । 'ङसोऽपत्ये' (६।१।२८) अणप्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'नोऽपदस्य तद्धिते' (७।४।६१) इन्लुक् ।

**[ गार्भम् ]** गर्भिणां समूहः = गार्भम् । 'श्वादिभ्योऽञ्' (६।२।२६) अञ्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'नोऽपदस्य तद्धिते' (७।४।६१) इन्लुक् ।

**[ दाण्डम् ]** दण्डिनां समूहः = दाण्डम् । 'श्वादिभ्योऽञ्' (६।२।२६) अञ्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'नोऽपदस्य तद्धिते' (७।४।६१) इन्लुक् ।

**[ चाक्रम् ]** चक्रिणां समूहः = चाक्रम् । 'श्वादिभ्योऽञ्' (६।२।२६) अञ्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'नोऽपदस्य तद्धिते' (७।४।६१) इन्लुक् ।।छ।।

### उक्ष्णो लुक् ॥ ७।४।५६ ॥

**[ उक्ष्णः ]** उक्षन् षष्ठी ङस् । 'अनोऽस्य' (२।१।१०८) अलुक् । 'र-षृवर्णान्नो ण०' (२।३।६३) णत्वम् ।

**[ लुक् ]** लुक् प्रथमा सि ।

**[ औक्षं पदम् ]** उक्ष्ण इदम् = औक्षं पदम् । 'तस्येदम्' (६।३।१६०) अणप्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । अनेन अन्लुक् । सि-अम् ।

**[ औक्ष्णः ]** उक्ष्णोऽपत्यमौक्ष्णः । 'ङसोऽपत्ये' (६।१।२८) अणप्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः औ । 'षादि-हन्-धृतराज्ञोऽणि' (२।१।११०) अलुक् ।।छ।।

### ब्रह्मणः ॥ ७।४।५७ ॥

**[ ब्रह्मणः ]** ब्रह्मन् षष्ठी ङस् ।

**[ ब्राह्ममस्त्रम् ]** ब्रह्मण इदं = ब्राह्ममस्त्रम् । 'तस्येदम्' (६।३।१६०) अणप्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । अनेन अन्लुक् ।

**[ ब्राह्मो मन्त्रः ]** ब्रह्मणोऽयं = ब्राह्मो मन्त्रः । 'तस्येदम्' (६।३।१६०) अणप्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः । अनेन अन्लुक् ।

**योगविभाग उत्तरार्थः** ।।छ।।

### जातौ ॥ ७।४।५८ ॥

**[ जातौ ]** जाति सप्तमी ङि ।

**[ ब्राह्मी ओषधिः ]** ब्रह्मण इयं = ब्राह्मी ओषधिः । 'तस्येदम्' (६।३।१६०) अणप्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः । अनेन अन्लुक् । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पूर्वेण सिद्धे जातावनपत्ये एवेति नियमार्थं वचनम्, तेनोत्तरसूत्रेणापत्ये लुग् न भवति ।

**[ ब्राह्मणः ]** ब्रह्मणोऽपत्यं = ब्राह्मणः । 'ङसोऽपत्ये' (६।१।२८) अणप्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'र-षृवर्णान्नो ण०' (२।३।६३) णत्वम् ।

**[ ब्राह्मो नारदः ]** ब्रह्मणोऽपत्यं = ब्राह्मो नारदः । 'ङसोऽपत्ये' (६।१।२८) अणप्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः । 'अवर्मणो मनोऽपत्ये' (७।४।५९) अन्लुक् ॥छा॥

### अवर्मणो मनोऽपत्ये ॥ ७।४।५९ ॥

**[ अवर्मणः ]** न वर्मा = अवर्मा, तस्य = अवर्मणः । 'नञत्' (३।२।१२५) न० → अ० । 'र-षृवर्णान्नो ण एकपदेऽनन्त्यस्या०' (२।३।६३) णत्वम् ।

**[ मनः ]** मन् षष्ठी ङस् ।

**[ अपत्ये ]** अपत्य सप्तमी ङि ।

**[ सौषामः ]** शोभनं साम = सुषाम । 'निर्दुस्सोः सेध-सन्धि-साम्नाम्' (२।३।३१) षत्वम् । सुषाम्नोऽपत्यं = सौषामः । 'ङसोऽपत्ये' (६।१।२८) अणप्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । अनेन अन्लुक् ।

**[ माद्रसामः ]** मद्रं साम यस्य = मद्रसाम । मद्रसाम्नोऽपत्यं = माद्रसामः । 'ङसोऽपत्ये' (६।१।२८) अणप्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । अनेन अन्लुक् ।

**[ भाद्रसामः ]** भद्रं साम यस्य = भद्रसाम । भद्रसाम्नोऽपत्यं = भाद्रसामः । 'ङसोऽपत्ये' (६।१।२८) अणप्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । अनेन अन्लुक् ।

**[ चाक्रवर्मणः ]** चक्रं वर्म यस्य = चक्रवर्म । चक्रवर्मणोऽपत्यं = चाक्रवर्मणः । 'ङसोऽपत्ये' (६।१।२८) अणप्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'र-षृवर्णान्नो ण०' (२।३।६३) णत्वम् ।

**[ सौत्वनः ]** पूर्ववत् ।

**[ याज्वनः ]** पूर्ववत् ।

**[ चार्मणो रथः ]** चर्मणा छन्नश्चार्मणो रथः । 'तेन च्छन्ने रथे' (६।२।१३१) अणप्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'र-षृवर्णान्नो ण०' (२।३।६३) णत्वम् ॥छा॥

### हितनाम्नो वा ॥ ७।४।६० ॥

**[ हितनाम्नः ]** हितनामन् षष्ठी ङस् । 'अनोऽस्य' (२।१।१०८) अलुक् ।

**[ वा ]** वा प्रथमा सि ।

**[ हैतनामनः, हैतनामः ]** हितनाम्नोऽपत्यं = हैतनामनः । 'ङसोऽपत्ये' (६।१।२८) अणप्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः ऐ । अनेन वा अन्लुक् । एवम्-हैतनामः ।

**[ हैतनामनः ]** हितनाम्नोऽयं = हैतनामनः । 'तस्येदम्' (६।३।१६०) अणप्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः ऐ ॥छा॥

### नोऽपदस्य तद्धिते ॥ ७।४।६१ ॥

**[ नोऽपदस्य ]** न् षष्ठी ङस् । न पदम् = अपदम्, तस्य = अपदस्य । 'नञत्' (३।२।१२५) न० → अ० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ तद्धिते ]** तस्मै हितं = तद्धितम्, तस्मिन् ।

**[ मैधावः ]** मेधाविनोऽपत्यं = मैधावः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । अनेन इन्लुक् ।

**[ मायावः ]** मायाविनोऽपत्यं = मायावः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । अनेन इन्लुक् ।

**[ औडुलोमिः ]** उडुलोम्नोऽपत्यं = औडुलोमिः । 'बाह्वादिभ्यो गोत्रे' (६।१।३२) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । अनेन अन्लुक् ।

**[ शारलोमिः ]** शरलोम्नोऽपत्यं = शारलोमिः । 'बाह्वादिभ्यो गोत्रे' (६।१।३२) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । अनेन अन्लुक् ।

**[ आग्निशर्मिः ]** अग्निशर्मणोऽपत्यम् = आग्निशर्मिः । 'बाह्वादिभ्यो गोत्रे' (६।१।३२) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । अनेन अन्लुक् ।

**[ द्व्यहः ]** द्वयोरह्नोः समाहारः = द्व्यहः । 'द्विगोर०' (७।३।९९) अट्समासान्तः → अ । अनेन अन्लुक् ।

**[ त्र्यहः ]** त्रयाणामह्नां समाहारः = त्र्यहः । 'द्विगोर०' (७।३।९९) अट्समासान्तः → अ । अनेन अन्लुक् ।

**[ हास्तिकम् ]** हस्तिनां समूहः = हास्तिकम् । 'कवचि-हस्त्यचित्ताच्चेकण्' (६।२।१४) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । अनेन इन्लुक् ।

**[ वैद्युतं तेजः ]** विद्युत इदं = वैद्युतम् । तेजस् प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलुप् । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । सि-अम् ।

**[ मेधाविरूप्यम्, मेधाविमयम् ]** मेधाविन आगतं = मेधाविरूप्यम्, मेधाविमयम् । 'नृ-हेतुभ्यो रूप्य-मयटौ वा' (६।३।१५६) रूप्यप्र०-मयट्प्र० → मय । सि-अम् ।

**[ हस्तिना ]** हस्तिन् तृतीया टा ।

**[ हस्तिने ]** हस्तिन् चतुर्थी ङे ।

## कलापि-कुथुमि-तैतलि-जाजलि-लाङ्गलि-शिखण्डि-शिलालि-सब्रह्मचारि-पीठसर्पि-सूकरसद्म-सुपर्वणः ॥ ७।४।६२ ॥

**[ कलापिकुथुमितैतलिजाजलिलाङ्गलिशिखण्डिशिलालिसब्रह्मचारिपीठसर्पिसूकरसद्मसुपर्वणः ]** कलापी च कुथुमी च तैतली च जाजली च लाङ्गली च शिखण्डी च शिलाली च सब्रह्मचारी च पीठसर्पी च सूकरसद्मा च सुपर्वा च = कलापिकुथुमितैतलिजाजलिलाङ्गलिशिखण्डिशिलालिसब्रह्मचारिपीठसर्पिसूकरसद्मसुपर्व, तस्य = कलापिकुथुमितैतलिजाजलिलाङ्गलिशिखण्डिशिलालिसब्रह्मचारिपीठसर्पिसूकरसद्मसुपर्वणः । 'र-षृवर्णान्नो ण०' (२।३।६३) णत्वम् ।

अत्र ये इन्नन्तास्तेषां 'अनपत्ये' (७।४।५५) इति, शिखण्डि-पीठसर्पिणोरपत्येऽपि 'संयोगादिनः' (७।४।५३) इति, सूकरसद्म-सुपर्वणोस्तु 'अणि' (७।४।५२) इति निषेधे प्राप्ते लुग्वचनम् ।

**[ कालापाः ]** कलापिन् । कलापिना प्रोक्तं वेदं विदन्त्यधीयते वा = कालापाः । 'तेन प्रोक्ते' (६।३।१८१) अण्प्र० → अ । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० → अ । 'प्रोक्तात्' (६।२।१२९) इति द्वितीयअणो लुप् । अनेन इन्लुक् । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः । जस् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ कौथुमाः ]** कुथुमं-मृगाजिनमस्यास्ति = कुथुमी । 'अतोऽनेकस्वरात्' (७।२।६) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । कुथुमिना प्रोक्तं वेदं विदन्त्यधीयते वा = कौथुमाः । 'तेन प्रोक्ते' (६।३।१८१) अण्प्र० । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० → अ । 'प्रोक्तात्' (६।२।१२९) द्वितीयअणो लुप् । अनेन इन्लुक् । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । जस् ।

**[ तैतलाः ]** तितलस्यापत्यं = तैतलः । 'ऋषि-वृष्ण्यन्धक-कुरुभ्यः' (६।१।६१) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । अथवा तितलेन प्रोक्तम् । 'तेन प्रोक्ते' (६।३।१८१) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । तैतलोऽस्यास्ति = तैतली । 'अतोऽनेकस्वरात्' (७।२।६) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । तैतलिं विदन्त्यधीयते वा । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० → अ । वृद्धिः । अनेन इन्लुक् । जस् ।

**[ जाजलाः ]** जजलस्यापत्यं = जाजलः । 'ऋषि-वृष्ण्यन्धक-कुरुभ्यः' (६।१।६१) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । अथवा जजलेन प्रोक्तम् । 'तेन प्रोक्ते' (६।३।१८१) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः । जाजलोऽस्यास्ति = जाजली । 'अतोऽनेकस्वरात्' (७।२।६) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । जाजलिं विदन्त्यधीयते वा । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० → अ । वृद्धिः । अनेन इन्लुक् । जस् ।

**[ लाङ्गलाः ]** लाङ्गलमस्यास्ति = लाङ्गली । 'अतोऽनेकस्वरात्' (७।२।६) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । लाङ्गलिं विदन्त्यधीयते वा । 'तद् वेत्त्यधीते' (६।२।११७) अण्प्र० → अ । वृद्धिः । अनेन इन्लुक् । जस् ।

तैतली-जाजली-लाङ्गली चाचार्याः तैः कृतो ग्रन्थोऽप्युपचारात् तच्छब्देनोच्यते ।

**[ शैखण्डाः ]** शिखण्डिन इमेऽपत्यानि वा = शैखण्डाः । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः ऐ । अनेन इन्लुक् । जस् ।

**[ शैलालाः ]** शिलालिन इमेऽपत्यानि वा = शैलालाः । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः ऐ । अनेन इन्लुक् । जस् ।

**[ साब्रह्मचाराः ]** समाने ब्रह्मणि चरतीति सब्रह्मचारी । 'सब्रह्मचारी' (३।२।१५०) इन्प्र०-समानस्य सभावः । सब्रह्मचारिण इमेऽपत्यानि वा = साब्रह्मचाराः । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । अनेन इन्लुक् । जस् ।

**[ पैठसर्पाः ]** पीठ 'सृप्लृं गतौ' (३४१) सृप् । पीठेन सर्पतीत्येवंशीलः = पीठसर्पी । 'अजातेः शीले' (५।१।१५४) णिन्प्र० → इन् । 'लघोरुपान्त्यस्य' (४।३।४) गु० → अर् । 'र्हादर्ह-स्वरस्यानु नवा' (१।३।३१) द्वित्वम् । पीठसर्प्पिण इमेऽपत्यानि वा = पैठसर्प्पाः । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । अनेन इन्लुक् । जस् ।

**[ सौकरसद्माः ]** सूकरसद्मन इमेऽपत्यानि वा = सौकरसद्माः । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । अनेन अन्लुक् । जस् ।

**[ सौपर्वाः ]** सुपर्वण इमेऽपत्यानि वा = सौपर्वाः । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । अनेन अन्लुक् । जस् ॥छा।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## वाऽश्मनो विकारे ॥ ७।४।६३ ॥

**[ वा ]** वा प्रथमा सि ।

**[ अश्मनः ]** अश्मन् षष्ठी ङस् ।

**[ विकारे ]** विकार सप्तमी ङिं ।

**[ आश्मः, आश्मनो वा ]** अश्मनो विकारः = आश्मः आश्मनो वा । 'विकारे' (६।२।३०) अण्प्र० → अ । अनेन विकल्पेन अन्लुक् । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः ।

**[ आश्मनो मन्त्रः ]** अश्मा देवताऽस्य = आश्मनो मन्त्रः । 'देवता' (६।२।१०१) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।।छा।

## चर्म-शुनः कोश-सङ्कोचे ॥ ७।४।६४ ॥

**[ चर्मशुनः ]** चर्म च श्वा च = चर्मश्व, तस्य ।

**[ कोशसङ्कोचे ]** कोशश्च सङ्कोचश्च = कोशसङ्कोचम्, तस्मिन् ।

**[ चार्मः, चार्मणः ]** चर्मणो विकारः कोशः = चार्मः । 'विकारे' (६।२।३०) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । अनेन अन्लुक् । कोशादन्यत्र-चार्मणः ।

**[ शौवः सङ्कोचः, शौवनः ]** श्वन् । शुनोऽयं = शौवः सङ्कोचः । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । 'द्वारादेः' (७।४।६) वात् प्राक् औ । अनेन अन्लुक् । अन्यत्र-शौवनः ।

**[ शौवं मांसम्, शौवं पुच्छम् ]** शुनो विकारोऽवयवो वा = शौवं मांसं-पुच्छं वा । 'हेमाऽऽदिभ्योऽञ्' (६।२।४५) अञ्प्र० → अ । 'द्वारादेः' (७।४।६) वात् प्राक् औ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् । सि-अम् ।।छा।

## प्रायोऽव्ययस्य ॥ ७।४।६५ ॥

**[ प्रायस् ]** प्रायस् 'क्रियाविशेषणात्' (२।२।४१) अम् । 'अव्ययस्य' (३।२।७) लुप् ।

**[ अव्ययस्य ]** अव्यय षष्ठी ङस् ।

**[ सौवः ]** स्वर् । स्वर्भवः = सौवः । 'भवे' (६।३।१२३) अण्प्र० → अ । 'द्वारादेः' (७।४।६) वात् प्राक् औ । अनेन अर्लुक् ।

**[ बाह्यः, बाहीकः ]** बहिस् । बहिर्भवः = बाह्यः, बाहीकः । 'बहिषष्टीकण् च' (६।१।१६) ञ्यप्र० → य-टीकण्प्र० → ईक । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः । अनेन इस्लुक् ।

**[ सायंप्रातिकः ]** सायंप्रातर् मण्ड्यते । सायंप्रातर्भवः = सायंप्रतिकः । 'वर्षा-कालेभ्यः' (६।३।८०) इकण्प्र० → इक । अनेन अर्लुक् ।

**[ पौनःपुनिकः ]** पुनःपुनर्भवः = पौनःपुनिकः । 'वर्षा-कालेभ्यः' (६।३।८०) इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः औ । अनेन अर्लुक् ।

अनभिधानादव्ययलक्षणस्तनट् 'सायं-चिरं-प्राह्णे-प्रगे-ऽव्ययात्' (६।३।८८) इत्यनेन प्राप्तः तनट्प्र० न भवति ।

**[ पौनःपुन्यम् ]** पुनःपुनरित्येतस्य भावः = पौनःपुन्यम् । 'पतिराजान्तगुणा०' (७।१।६०) ट्यण्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । अनेन अर्लुक् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ औपरिष्टः ]** उपरिष्टात् मांडणीयइ । उपरिष्टादागतः = औपरिष्टः । 'तत आगते' (६।३।१४९) अणप्र० । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः औ । अनेन आत्लुक् ।

**[ पारतः ]** परतः मांडणीयइ । परत आगतः = पारतः । 'तत आगते' (६।३।१४९) अणप्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । अनेन अस्लुक् ।

**[ ऐकैकश्यम् ]** एकमेकं ददाति = एकैकशः । एकशब्दस्य अमन्तस्य 'वीप्सायाम्' (७।४।८०) इत्यनेन द्वित्वम् । 'प्लुप् चादावेकस्य स्यादेः' (७।४।८१) इत्यनेन अमो लुप् । 'बह्वल्पार्थात् कारकादिष्टाऽनिष्टे प्शस्' (७।२।१५०) प्शस्प्र० → शस् । एकैकशो भावः = ऐकैकश्यम् । 'पतिराजान्तगुणाङ्ग०' (७।१।६०) ट्यणप्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । अनेन अस्लुक् ।

**प्रायोग्रहणं प्रयोगानुसरणार्थम्**, तेनेह न भवति-

**[ आरातीयः ]** आरात् भवः = आरातीयः । 'दोरीयः' (६।३।३२) ईयप्र० ।

**[ शाश्वतिकः, शाश्वतः ]** शश्वत् भवः = शाश्वतिकः । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) इत्यनेन अणप्राप्नोति, 'ऋवर्णोवर्ण-दोसिसुसशश्वदकस्मात्त इकस्येतो लुक्' (७।४।७१) इत्यत्र शश्वत् वचनात् 'वर्षा-कालेभ्यः' (६।३।८०) इकणप्र० → इकं । एवम्-शाश्वतः । 'भर्तु-सन्ध्यादेरण्' (६।३।८९) अणप्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ।

**[ पार्थक्यम् ]** पृथक् भावः = पार्थक्यम् । 'पतिराजान्तगुणाङ्ग०' (७।१।६०) ट्यणप्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आर् । सि-अम् ।

**[ कंयुः ]** कम् मण्ड्यते । कमस्यास्तीति कंयुः । 'कं-शंभ्यां युस्-ति-यस्-तु-त-व-भम्' (७।२।१८) युस्प्र० ।

**[ शंयुः ]** शम् मण्ड्यते । शमस्यास्तीति शंयुः । 'कं-शंभ्यां युस्-ति-यस्-तु-त-व-भम्' (७।२।१८) युस्प्र० ।

**[ अहंयुः ]** अहम् मण्ड्यते । अहमस्यास्तीति अहंयुः । 'ऊर्णा-ऽहं-शुभमो युस्' (७।२।१७) युस्प्र० → यु । सर्वत्र सकारोऽनुबन्धार्थः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ॥छ॥

### अनीनादट्यह्नोऽतः ॥ ७।४।६६ ॥

**[ अनीनादटि ]** ईनश्च अच्च अट् च = ईनादट् । न ईनादट् = अनीनादट् । 'अन् स्वरे' (३।२।१२९) अन्, तस्मिन् ।

**[ अह्नः ]** अहन् षष्ठी ङस् । 'अनोऽस्य' (२।१।१०८) अलुक् ।

**[ अतः ]** अत् षष्ठी ङस् ।

**[ आह्नम् ]** अहन् मण्ड्यते । अह्नां समूहः = आह्नम् । 'श्वादिभ्योऽञ्' (६।२।२६) अञ्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । अनेन अनः पूर्वं अकारस्य लुक् ।

**[ आह्निकम् ]** अह्ना निर्वृत्तम्-आह्निकम् । 'निर्वृत्ते' (६।४।१०५) इकणप्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । अनेन अनः पूर्वं अकारस्य लुक् ।

**[ द्व्यहीनः ]** द्वाभ्यामहोभ्यां निर्वृत्तः, द्वाभ्यामहोभ्यां भृतोऽधीष्टो वा, द्वे अहनी भूतो भावी वा = द्व्यहीनः । 'रात्र्यहः-संवत्सराच्च द्विगोर्वा' (६।४।११०) ईनप्र० । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् ।

**[ त्र्यहीणः ]** त्रिभिरहोभिर्निर्वृत्तः, त्रिभिरहोभिर्भृतोऽधीष्टो वा, त्रीण्यहानि भूतो भावी वा = त्र्यहीणः । 'रात्र्यहः-संवत्सराच्च द्विगोर्वा' (६।४।११०) ईनप्र० । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ अन्वहम् ]** अहरहरनु = अन्वहम् । 'नपुंसकाद् वा' (७।३।८९) अत्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् ।

**[ प्रत्यहम् ]** अहरहः प्रति = प्रत्यहम् । 'नपुंसकाद् वा' (७।३।८९) अत्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् ।

**[ द्व्यहः ]** द्वयोरह्नोः समाहारः = द्व्यहः । 'द्विगोर०' (७।३।९९) अट्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् ।

**[ त्र्यहः ]** त्रयाणामह्नां समाहारः = त्र्यहः । 'द्विगोर०' (७।३।९९) अट्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् ।

**[ उत्तमाहः ]** उत्तमं च तद् अहश्च = उत्तमाहः । 'अह्नः' (७।३।११६) अट्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् ।

**[ परमाहः ]** परमं च तद् अहश्च = परमाहः । 'अह्नः' (७।३।११६) अट्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् ।

**[ पुण्याहम् ]** पुण्यं च तद् अहश्च = पुण्याहम् । 'अह्नः' (७।३।११६) अट्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् ।

**[ सुदिनाहम् ]** सुदिनं च तद् अहश्च = सुदिनाहम् । 'अह्नः' (७।३।११६) अट्समासान्तः → अ । 'नोऽपदस्य तद्धिते' (७।४।६१) अन्लुक् ।

### विंशतेस्तेर्डिति ॥ ७।४।६७ ॥

**[ विंशतेस्तेः ] विंशति षष्ठी ङस् । ति षष्ठी ङस् ।**

**[ डिति ]** ड् इदनुबन्धो यस्य सः = डित्, तस्मिन् ।

**[ विंशकः ]** विंशत्या क्रीतः = विंशकः । 'त्रिंशद्-विंशतेर्डकोऽसंज्ञायामाऽर्हदर्थे' (६।४।१२९) डकप्र० → अक । अनेन तिलुक् । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् ।

**[ विंशं शतम् ]** विंशतिरधिका अस्मिन् शते तत् = विंशं शतम् । 'अधिकं तत्संख्यमस्मिन् शत-सहस्रे शति-शद्-दशान्ताया डः' (७।१।१५४) डप्र० → अ । अनेन तिलुक् । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् । सि-अम् ।

**[ एकविंशम् ]** एकविंशतिरधिका अस्मिन् तत् = एकविंशम् । 'अधिकं तत्संख्यमस्मिन्०' (७।१।१५४) डप्र० → अ । अनेन तिलुक् । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् । सि-अम् ।

**[ विंशः ]** विंशतेः पूरणः = विंशः । 'संख्यापूरणे डट्' (७।१।१५५) डट्प्र० → अ । अनेन तिलुक् । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ एकविंशः ]** एकविंशतेः पूरणः = एकविंशः । 'संख्यापूरणे डट्' (७।१।१५५) डट्प्र० → अ । अनेन तिलुक् । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ आसन्नविंशाः ]** आसन्ना विंशतिरेषां ते = आसन्नविंशाः । 'प्रमाणी-संख्याड्डः' (७।३।१२८) डप्र० → अ । अनेन तिलुक् । 'डित्यन्त्यस्वरादेः' (२।१।११४) अलुक् जस् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ एकसप्ततः ]** एकसप्ततेः पूरणः = एकसप्ततः । 'संख्यापूरणे डट्' (७।१।१५५) डट्प्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) इलुक् ।

**[ एकाशीतः ]** एकाशीतेः पूरणः = एकाशीतः । 'संख्यापूरणे डट्' (७।१।१५५) डट्प्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) इलुक् ।

**[ विंशतौ ]** विंशति सप्तम्येकवचनं ङि । 'ङिडौँ' (१।४।२५) ङि० → डौ० → औ० । 'डित्यन्त्यस्वरादेः' (२।१।११४) इलुक् ॥छ॥

## अवर्णेवर्णस्य ॥ ७।४।६८ ॥

**[ अवर्णेवर्णस्य ]** अवर्णश्च इवर्णश्च = अवर्णेवर्णम्, तस्य ।

अवर्णान्तस्येत्युक्ते सकलस्यापि प्राप्नोतीत्याह-निर्दिश्यमानत्वादवर्णेवर्णयोरेव लुग् भवतीत्यर्थः ।

**[ दाक्षिः ]** दक्षस्यापत्यं = दाक्षिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः । अनेन अलुक् ।

**[ प्लाक्षिः ]** प्लक्षस्यापत्यं = प्लाक्षिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । अनेन अलुक् ।

**[ चौडिः ]** चूडाया अपत्यं = चौडिः । 'बाह्वादिभ्यो गोत्रे' (६।१।३२) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । अनेन आलुक् ।

**[ बालाकिः ]** बलाकाया अपत्यं = बालाकिः । 'बाह्वादिभ्यो गोत्रे' (६।१।३२) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । अनेन आलुक् ।

**[ नाभेयः ]** नाभेरपत्यं = नाभेयः । प्रथमतीर्थकरनाम । 'इतोऽनिञः' (६।१।७२) एयण्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । अनेन इलुक् ।

**[ सांकृत्यः ]** संकृतेरपत्यं = सांकृत्यः । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । अनेन इलुक् ।

**[ दौलेयः ]** दुल्या अपत्यं = दौलेयः । 'द्विस्वरादनद्याः' (६।१।७१) एयण्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । अनेन ईलुक् ।

**[ रौहिणेयः ]** रोहिण्या अपत्यं = रौहिणेयः । 'ङ्याप्त्यूङः' (६।१।७०) एयण्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । अनेन ईलुक् ।

**[ वात्सप्रेयः ]** वत्स 'प्रींगृश् तृप्ति-कान्त्योः' (१५१०) प्री । वत्सं प्रीणातीति वत्सप्री । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लुक् । तस्या अपत्यं = वात्सप्रेयः । अन्यथा स्त्रीविहितप्रत्ययो न स्यात् । 'चतुष्पाद्भ्य एयञ्' (६।१।८३) एयञ्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । अनेन ईलुक् । अत्र प्रथमं 'इवर्णादेरस्वे स्वरे य-व-र-लम्' (१।२।२१) इति यत्वं प्राप्नोति, तद् बाधकं 'धातोरिवर्णोवर्णस्येयुव्०' (२।१।५०) इत्यादि, तस्यापि बाधकं 'क्विब्वृत्तेरसुधियस्तौ' (२।१।५८) इत्यादि, तस्यापि बाधकं 'संयोगात्' (२।१।५२) इति, ततः परत्वात् 'अवर्णेवर्णस्य' (७।४।६८) इति प्रवर्त्तते ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ श्रायं हविः ]** श्रीर्देवताऽस्य तत् = श्रायं हविः । 'देवता' (६।२।१०१) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'एदैतोऽयाय्' (१।२।२३) आय् ।

**[ शुक्लतमः ]** बहूनां मध्ये प्रकृष्टः शुक्लः = शुक्लतमः । 'प्रकृष्टे तमप्' (७।३।५) तमप्प्र० → तम ।

**[ ऊर्णायुः ]** ऊर्णा अस्यास्ति = ऊर्णायुः । 'ऊर्णा-ऽहं-शुभमो युस्' (७।२।१७) युस्प्र० → यु । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ शुचितरः ]** द्वयोर्मध्ये प्रकृष्टः शुचिः = शुचितरः । 'द्वयोर्विभज्ये च तरप्' (७।३।६) तरप्प्र० → तर ।

**[ वृक्षे ]** वृक्ष सप्तमी ङि ।

**[ अग्न्योः ]** अग्नि सप्तमी ओस् ।।छ।।

## अकद्रू-पाण्ड्वोरुवर्णस्यैये ।। ७।४।६९ ।।

**[ अकद्रूपाण्ड्वोः ]** कद्रूश्च पाण्डुश्च = कद्रूपाण्डू, न कद्रूपाण्डू = अकद्रूपाण्डू, तयोः = अकद्रूपाण्ड्वोः । षष्ठी ओस् ।

**[ उवर्णस्य ]** उवर्ण षष्ठी ङस् ।

**[ एये ]** एय सप्तमी ङि ।

**[ कामण्डलेयः ]** कमण्डल्वा अपत्यं = कामण्डलेयः । 'चतुष्पाद्भ्य एयञ्' (६।१।८३) एयञ्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । अनेन ऊलुक् ।

**[ माद्रबाहेयः ]** मद्रबाहोरपत्यं = माद्रबाहेयः । देवी विवक्षायां 'ङ्याप्त्यूङः' (६।१।७०) एयण्प्र० → एय । गोत्वा 'चतुष्पाद्भ्य एयञ्' (६।१।८३) एयञ्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । अनेन ऊलुक् ।

**[ शैतिबाहेयः ]** शितिबाह्वा अपत्यं = शैतिबाहेयः । 'चतुष्पाद्भ्य एयञ्' (६।१।८३) एयञ्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । अनेन ऊलुक् ।

**[ जाम्बेयः ]** जम्ब्वा अपत्यं = जाम्बेयः । 'द्विस्वरादनद्याः' (६।१।७१) एयञ्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । अनेन ऊलुक् । "अलाबु जम्बू०" इत्यादि इत्युक्तं लिङ्गानुशासने । [स्त्री-क्लीबलिङ्गप्रकरणे]

**[ लैखाभ्रेयः ]** लेखाभ्रुवोऽपत्यं = लैखाभ्रेयः । 'शुभ्राऽऽदिभ्यः' (६।१।७३) एयण्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । *'भ्रू-श्नोः' (२।१।५३) इत्यनेन प्राप्तं उवादेशं बाध्य परत्वात् अनेन ऊलुक् ।*

**[ काद्रवेयः ]** कद्र्वा अपत्यं = काद्रवेयः । 'चतुष्पाद्भ्य एयञ्' (६।१।८३) एयञ्प्र० → एय बाधकः 'शुभ्राऽऽदिभ्यः' (६।१।७३) एयण्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

**[ पाण्डवेयः ]** प(पा)ण्डोरपत्यं = पाण्डवेयः । 'शुभ्राऽऽदिभ्यः' (६।१।७३) एयण्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् ।

**[ वैमात्रेयः ]** विमात्रोरपत्यं = वैमात्रेयः । 'शुभ्राऽऽदिभ्यः' (६।१।७३) एयण्प्र० → एय । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'इवर्णादेरस्वे०' (१।२।२१) रत्वम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ माण्डव्यः ]** मण्डोरपत्यं वृद्धं = माण्डव्यः। 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अस्वयम्भुवोऽव्' (१।२।२१) अव् ॥छ॥

## अस्वयम्भुवोऽव् ॥ ७।४।७० ॥

**[ अस्वयम्भुवः ]** न स्वयम्भू(:) = अस्वयम्भू(:), तस्य ।

**[ अव् ]** अव् प्रथमा सि ।

**[ औपगवः ]** उपगोरपत्यम् = औपगवः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । अनेन अव् ।

**[ कापटवः ]** कपटोरपत्यं = कापटवः । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । अनेन अव् ।

**[ बाभ्रव्यः ]** बभ्रोरपत्यं वृद्धं = बाभ्रव्यः । 'मधु-बभ्रोर्ब्राह्मण-कौशिके' (६।१।४३) यञ्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । अनेन अव् ।

**[ माण्डव्यः ]** मण्डोरपत्यं वृद्धं = माण्डव्यः । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । अनेन अव् ।

**[ शङ्कव्यं दारु ]** शङ्कवे इदं = शङ्कव्यम् । 'उवर्ण-युगादेर्यः' (७।१।३०) यप्र० । अनेन अव् । दारु ।

**[ पिचव्यः कर्पासः ]** पिचुभ्यो हितः = पिचव्यः कर्पासः । 'उवर्ण-युगादेर्यः' (७।१।३०) यप्र० । अनेन अव् ।

**[ बाहविः ]** बाहोरपत्यं = बाहविः । 'बाह्वादिभ्यो गोत्रे' (६।१।३२) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । अनेन अव् ।

**[ औपबिन्दविः ]** उपबिन्दोरपत्यम् = औपबिन्दविः । 'बाह्वादिभ्यो गोत्रे' (६।१।३२) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । अनेन अव् ।

**[ स्वायम्भुवः ]** स्वयं भवतीति स्वयम्भूः । शीलार्थे 'दिद्युद्-ददृद्-जगज्जुहू-वाक्-प्राट्-धी-श्री-द्रू-स्रू-ज्वायतस्तू-कटप्रू-परिव्राट्-भ्राजादयः क्विप्' (५।२।८३) क्विप्प्र० । अन्यथा शं-सं-स्वयं-वि-प्राद्-भुवो डुः (५।२।८४) स्यात् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । *स्वयम्भुवोऽपत्यं = स्वायम्भुवः* । 'ङसोऽपत्ये' (६।१।२८) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'धातोरिवर्णो०' (२।१।५०) उव् ॥छ॥

## ऋवर्णोवर्ण-दोसिसुसशश्वदकस्मात्त इकस्येतो लुक् ॥ ७।४।७१ ॥

**[ ऋवर्णोवर्णदोसिसुसशश्वदकस्मात्त ]** शश्वच्च अकस्माच्च = शश्वदकस्मात्, न शश्वदकस्मात् = अशश्वदकस्मात्, अशश्वदकस्माच्च तत् त च = अशश्वदकस्मात्त, ऋवर्णश्च उवर्णश्च दोश्च इस् च उस् च अशश्वदकस्मात्तश्च = ऋवर्णोवर्णदोसिसुसशश्वदकस्मात्त ।

**[ इकस्य ]** इक षष्ठी ङस् ।

**[ इतः ]** इत् षष्ठी ङस् ।

**[ लुक् ]** लुक् प्रथमा सि ।

**[ मातृकम् ]** मातुरागतं = मातृकम् । 'ऋत इकण्' (६।३।१५२) इकण्प्र० → इक । अनेन इकस्य इलुक् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ पैतृकम् ]** पितुरागतं = पैतृकम् । 'ऋत इकण्' (६।३।१५२) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । अनेन इकस्य इलुक् ।

**[ नैषादकर्षुकः ]** निषादकर्ष्वां भवः = नैषादकर्षुकः । 'उवर्णादिकण्' (६।३।३९) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । अनेन इकस्य इलुक् । 'ङ्यादीदूतः के' (२।४।१०४) ह्रस्वः ।

**[ शावरजम्बुकः ]** शवरजम्ब्वां भवः = शावरजम्बुकः । 'उवर्णादिकण्' (६।३।३९) इकण्प्र० → इक । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः । अनेन इकस्य इलुक् । 'ङ्यादीदूतः के' (२।४।१०४) ह्रस्वः ।

**[ दौष्कः ]** दोस् । दोर्भ्यां तरति = दौष्कः । 'तरति' (६।४।९) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । अनेन इकस्य इलुक् । 'नामिनस्तयोः षः' (२।३।८) रस्य षत्वम् ।

**[ सार्पिष्कः ]** सर्पिः पण्यमस्य = सार्पिष्कः । 'तदस्य पण्यम्' (६।४।५४) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । अनेन इकस्य इलुक् । 'नामिनस्तयोः षः' (२।३।८) रस्य षत्वम् ।

**[ बाहिष्कः ]** बहिस् । बहिः प्रयोजनमस्य = बाहिष्कः । 'प्रयोजनम्' (६।४।११७) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । अनेन इकस्य इलुक् । 'नामिनस्तयोः षः' (२।३।८) रस्य षत्वम् ।

**[ धानुष्कः ]** धनुस् । धनुः प्रहरणमस्य = धानुष्कः । 'प्रहरणम्' (६।४।६२) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । अनेन इकस्य इलुक् । 'नामिनस्तयोः षः' (२।३।८) रस्य षत्वम् ।

**[ याजुष्कः ]** यजुस् । यजुः प्रयोजनमस्य = याजुष्कः । 'प्रयोजनम्' (६।४।११७) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । अनेन इकस्य इलुक् । 'नामिनस्तयोः षः' (२।३।८) रस्य षत्वम् ।

**[ औदश्वित्कः ]** उदश्विता संस्कृत ओदनः = औदश्वित्कः । 'संस्कृते' (६।४।३) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । अनेन इकस्य इलुक् ।

**[ शाकृत्कः ]** शकृता संसृष्टः = शाकृत्कः । 'संसृष्टे' (६।४।५) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । अनेन इकस्य इलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ याकृत्कः ]** यकृता संसृष्टः = याकृत्कः । 'संसृष्टे' (६।४।५) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । अनेन इकस्य इलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ शाश्वतिकम् ]** शश्वद्भवं = शाश्वतिकम् । 'वर्षा-कालेभ्यः' (६।३।८०) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ ।

**[ आकस्मिकम् ]** अकस्माद्भवम् = आकस्मिकम् । 'अध्यात्मादिभ्य इकण्' (६।३।७८) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'प्रायोऽव्ययस्य' (७।४।६५) अन्त्यस्वरादिलोपः ।

प्रत्यययोरिसुसोर्ग्रहणादिह न भवति -

**[ आशिषिकः ]** आङ्पूर्वकः 'शासूक्(कि) इच्छायाम्' (१११८) शास् । आशासनमाशीः । 'क्रुत्संपदादि०' (५।३।११४) क्विप्प्र० । 'आङः' (४।४।१२०) आ० → इ० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । आशिषा चरति = आशिषिकः । 'चरति' (६।४।११) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ औषिकः ]** 'वसं निवासे' (९९९) वस् । वसतीति उष् । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'यजादि-वचेः किति' (४।१।७९) य्वृत् व० → उ० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । 'नाम्यन्तस्था०' (२।३।१५) ('घस्-वसः') (२।३।३६) षत्वम् । उषा चरति = औषिकः । 'चरति' (६।४।११) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ ।

**[ माथितिकः ]** मथितं पण्यमस्य = माथितिकः । 'तदस्य पण्यम्' (६।४।५४) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ॥छ॥

## असकृत् सम्भ्रमे ॥ ७।४।७२ ॥

**[ असकृत् ]** असकृत् 'क्रियाविशेषणात्' (२।२।४१) अम् । 'अव्ययस्य' (३।२।७) लुप् ।

**[ सम्भ्रमे ]** सम्भ्रम सप्तमी ङि ।

**भयादिभिश्चित्तव्याक्षेपात् प्रयोक्तुस्त्वरणम्-औत्सुक्यं = सम्भ्रमः ।**

***[ अहिरहिः ]*** *अहि प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । अनेन अहिर् द्विर्वचनम् ।*

**[ बुध्यस्व बुध्यस्व ]** 'बुधिं ज्ञाने' (१२६२) बुध् । पञ्चमी स्व । 'दिवादेः श्यः' (३।४।७२) श्यप्र० → य । अनेन बुध्यस्व २ द्विर्वचनम् ।

**[ हस्त्यागच्छति हस्त्यागच्छति ]** हस्तिन् प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् । अग्रे आगच्छति । अनेन द्विवर्चनम् ।

**[ लघु पलायध्वं लघु पलायध्वम् ]** लघु 'क्रियाविशेषणात्' (२।२।४१) अम् । 'अनतो लुप्' (३।२।६) लुप् । परापूर्व० 'अयि गतौ' (७९०) अय् । पञ्चमी ध्वम् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'उपसर्गस्या-ऽयौ' (२।३।१००) लत्वम् । अनेन द्विर्वचनम् ।

***[ द्रोग्धा द्रोग्धा, द्रोढा द्रोढा ]*** *'द्रुहौच् जिघांसायाम्' (१२३९) द्रुह् । श्वस्तनी ता । 'लघोरुपान्त्यस्य' (४।३।४)* गु० ओ । 'भ्वादेर्दादेर्घः' (२।१।८३) ('मुह-द्रुह०') (२।१।८४) ह० → घ० । 'हो धुट्-पदान्ते' (२।१।८२) ह० → ढ० । 'अधश्चतुर्थात् तथोर्धः' (२।१।७९) त० → ध० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) ध० → ढ० । 'तृतीयस्तृतीय-चतुर्थे' (१।३।४९) घ० → ग० । 'ढस्तड्ढे' (१।३।४२) ढलुक् । अनेन द्रोग्धाद्वि०-द्रोढाद्वि० ।

**[ माषवापाणि माषवापाणि ]** माषाणां वापाणि = माषवापाणि । जस् । 'नपुंसकस्य शिः' (१।४।५५) जस्० → शि० → इ० । 'स्वराच्छौ' (१।४।६५) नोऽन्तः । 'नि दीर्घः' (१।४।८५) दीर्घः । 'वोत्तरपदान्तन-स्यादेरयुव-पक्वा-ऽह्नः' (२।३।७५) नस्य णत्वम् । अनेन द्वि० ।

**[ ह्रीणो ह्रीणः ]** 'ह्रींक् लज्जायाम्' (११३३) ह्री । जिह्रेति स्म = ह्रीणः । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० → त । 'ऋ-ह्री-घ्रा-ध्रा-त्रोन्द नुद-विन्तेर्वा' (४।२।७६) तस्य नत्वम् । 'र-षृवर्णान्नो ण०' (२।३।६३) णत्वम् । अनेन द्वि० ।

**[ कौतस्कुतः ]** किम् । कस्मात् = कुतः । 'इतोऽतः-कुतः' (७।२।९०) तस्प्र०-किमः ''कु''आदेशश्च । अनेन द्वि० । कुतस्कुतो भवः = कौतस्कुतः । 'भवे' (६।३।१२३) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'प्रायोऽव्ययस्य' (७।४।६५) अस्लुक् ।

**[ पौनःपुन्यम् ]** पुनर् अनेन द्वि० । पुनःपुनरित्येतस्य भावः = पौनःपुन्यम् । 'पतिराजान्तगुणाङ्ग०' (७।१।६०) ट्यण्प्र० → य । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः औ ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ पौनःपुनिकः ]** पुनःपुनर्भवः = पौनःपुनिकः । 'वर्षा-कालेभ्यः' (६।३।८०) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'प्रायोऽव्ययस्य' (७।४।६५) अर्लुक् ।।छ।।

**भृशा-ऽऽभीक्ष्ण्या-ऽविच्छेदे द्विः प्राक् तमबादेः ॥ ७।४।७३ ॥**

**[ भृशाऽऽभीक्ष्ण्याऽविच्छेदे ]** भृशं च आभीक्ष्ण्यं च अविच्छेदश्च = भृशाऽऽभीक्ष्ण्याऽविच्छेदम्, तस्मिन् ।

**[ द्विः ]** द्वौ वारावस्य = द्विः । 'द्वि-त्रि-चतुरः सुच्' (७।२।११०) सुच्प्र० ।

**[ प्राक् ]** प्राक् प्रथमा सि ।

**[ तमबादेः ]** तमप् आदिर्यस्य सः = तमबादिः, तस्मात् ।

**क्रियायाः साकल्यमवयवक्रियाणां कात्स्न्यं भृशार्थः, पौनःपुन्यमाभीक्ष्ण्यम्, सातत्यं क्रियान्तरैरव्यवधानमविच्छेदः ।**

**[ लुनीहि लुनीहीत्येवायं लुनाति ]** 'लूग्श् छेदने' (१५१९) लू । पञ्चमी हि । 'क्र्यादेः' (३।४।७९) श्नाप्र० → ना । 'एषामी व्यञ्जनेऽदः' (४।२।९७) ई । 'प्वादेर्ह्रस्वः' (४।२।१०५) ह्रस्वः । अनेन द्विर्वचनम् ।

**[ अधीष्वाधीष्वेत्येवायमधीते ]** 'इंङ्क् अध्ययने' (११०४) इ, अधिपूर्व० । पञ्चमी स्व । 'नाम्यन्तस्था-कवर्गात्०' (२।३।१५) षत्वम् । 'समानानां०' (१।२।१) दीर्घः । अनेन द्विर्वचनम् ।

**[ भोजं भोजं व्रजति ]** 'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । अभीक्ष्णं भोजनं पूर्वं = भोजम् । 'ख्णम् चाऽऽभीक्ष्ण्ये' (५।४।४८) ख्णम्प्र० → अम् । 'लघोरुपान्त्यस्य' (४।३।४) गु० ओ । अनेन द्विर्वचनम् ।

**[ भुक्त्वा भुक्त्वा व्रजति ]** 'भुजंप् पालना-ऽभ्यवहारयोः' (१४८७) भुज् । अभीक्ष्णं भोजनं पूर्वं = भुक्त्वा । 'ख्णम् चाऽऽभीक्ष्ण्ये' (५।४।४८) क्त्वाप्र० → त्वा । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) ग० → क० । अनेन द्विर्वचनम् ।

**[ पचति पचति ]** 'डुपचींष् पाके' (८९२) पच् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । अनेन द्विर्वचनम् ।

**[ अधीते अधीते ]** 'इंङ्क् अध्ययने' (११०४) इ, अधिपूर्व० । वर्त्त० ते । 'समानानां०' (१।२।१) दीर्घः । अनेन द्विर्वचनम् ।

**[ ब्रह्मचर्यं चरति चरति ]** ब्रह्मन् 'चर भक्षणे च' (४१०) चर् । ब्रह्मणश्चरणं = ब्रह्मचर्यम् । 'चरेराङस्त्वगुरौ' (५।१।३१) यप्र० । अम् । चरति अनेन द्विर्वचनम् ।

भृशादयः क्रियाधर्मा इति क्रियापदमेवात्र सम्बध्यते । क्रियाविशेषणस्यापि क्रियात्वेनाध्यवसायात् भृशादियोगे द्विर्वचनं भवति । यथा-

**[ पुनः पुनः पचति ]** पुनः 'क्रियाविशेषणात्' (२।२।४१) अम् । पचति । एवमग्रेऽपि ।

यदा तु सतोऽपि क्रियाविशेषणत्वस्य क्रियाविवक्षता न विवक्षते तदा 'नवा गुणः सदृशे रित्' (७।४।८६) इति सादृश्ये द्विर्वचनं भवति । यथा-

**[ मन्दं मन्दं卐 नुदति ]** मन्दं मन्दं 'णुदंत् प्रेरणे' (१३७०) णुद् । 'पाठे धात्वादेर्णो नः' (२।३।९७) नुद् । वर्त्त० तिव् । 'तुदादेः शः' (३।४।८१) शप्र० ।

卐 मध्यमवृत्तौ-बृहद्वृत्तौ-तुदति ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ स्तोकं स्तोकं अस्तमयति ]** स्तोक 'नवा गुणः सदृशे रित्' (७।४।८६) द्विर्वचनम् । सि-अम् । अस्तम् 'इंण्क् गतौ' (१०७५) इ । अयनम् = अयः । अच्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । अस्तमयोऽस्तमयः । अस्तमय इवाचरति = अस्तमयति । 'कर्तुः क्विप्, गल्भ-क्लीब-होडात्तु ङित्' (३।४।२५) क्विप्प्र० । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । वर्त्त० तिव् । 'कर्त्तर्यन०' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् ।

भृशाभीक्ष्ण्ययोर्यङिति यङन्तमुक्तार्थत्वान्न द्विरुच्यते । यदा तु भृशार्थे यङ् तदाभीक्ष्ण्यार्थाभिव्यक्तये द्विर्वचनम्-

**[ पापच्यते पापच्यत इति ]** 'डुपचींष् पाके' (८९२) पच् । भृशं पुनः पुनर्वा = पचति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० → य । 'सन्-यङश्च' (४।१।३) द्विः । 'व्यञ्जनस्याऽनादेलुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'आ-गुणावन्यादेः' (४।१।४८) आ । वर्त्त० ते । 'कर्त्तर्यन०' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । अनेन द्विर्वचनम् ।

यदा तु भृशार्थयङन्तस्य अभीक्ष्ण्यस्य च प्रतिपादनाय पञ्चमी विधीयते तदा तस्या द्विर्वचनसहायाया एवाभीक्ष्ण्यप्रतिपादने सामर्थ्यं क्त्वाणमोरिवेति द्विर्वचनमपि भवति ।

**[ पचतिपचतितमाम् ]** अतिशयेन पचति = पचति २ तमाम् । अनेन द्विर्वचनम् । 'प्रकृष्टे तमप्' (७।३।५) तमप्प्र० । 'किं-त्याद्येऽव्ययादसत्त्वे तयोरन्तस्याऽऽम्' (७।३।८) आम् ।

**[ पचतिपचतितराम् ]** द्वयोर्मध्ये प्रकृष्टं पचति = पचति २ तराम् । 'द्वयोर्विभज्ये च तरप्' (७।३।६) तरप्प्र० → तर । 'किं-त्याद्येऽव्यया०' (७।३।८) आम् ॥छ॥

## नानावधारणे ॥ ७।४।७४ ॥

**[ नानावधारणे ]** नानाशब्दे नानाभूते माषादावर्थे वर्त्तते तस्यावधारणमेकत्वादि नानावधारणम्, तस्मिन् ।

**नानाभूतानां भेदेनेयत्तापरिच्छेदो नानावधारणम् ।**

**[ अस्मात् कार्षापणात् इह भवद्भ्यां माषं माषं देहि ]** इदम्-भवत् मण्ड्यते । इमौ भवन्तौ, इह भव । 'त्रप् च' (७।२।९२) त्रप्प्र० → त्र । 'क्व-कुत्रा-ऽत्रेह' (७।२।९३) इह । भवत् निपात्यते, ताभ्याम् । माष अम् । अनेन द्विर्वचनम् । प्रत्येकं माषमात्रं देहि नाधिक्यमित्यर्थः ॥छ॥

'डुदांग्क् दाने' (११३८) दा । दातुमिष्टा(ः) । 'तुमर्हादिच्छायां सन्नतत्सनः' (३।४।२१) सन्प्र० । 'मि-मी-मा-दामित् स्वरस्य' (४।१।२०) इत् । 'दित्स्यते स्म । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'अतः' (४।३।८२) अलुक्(?) ।

## आधिक्या-ऽऽनुपूर्व्ये ॥ ७।४।७५ ॥

**[ आधिक्याऽऽनुपूर्व्ये ]** अधिकस्य भावः = आधिक्यम् । पूर्वस्यानतिक्रमेण = अनुपूर्वः । अनुपूर्वस्य भावः = आनुपूर्व्यम् । 'पतिराजान्तगुणाङ्गराजादिभ्यः०' (७।१।६०) ट्यणप्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । आधिक्यं च आनुपूर्व्यं च = आधिक्याऽऽनुपूर्व्यम्, तस्मिन् ।

**आधिक्यं प्रकर्षः । आनुपूर्व्यं क्रमानुल्लङ्घनम् ।**

**[ मह्यं रोचते मह्यं रोचते ]** अस्मद् । चतुर्थी ङे । 'तुभ्यं मह्यं ङया' (२।१।१४) "मह्यं"देशः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ मह्यं रोचतेतराम् मह्यं रोचतेतराम् ]** अस्मद् । चतुर्थी ङे । 'तुभ्यं मह्यं ङया' (२।१।१४) "मह्यं"देशः । अतिशयेन रोचते = रोचतेतराम् । 'द्वयोर्विभज्ये च तरप्' (७।३।६) तरप्प्र० → तर । 'किं-त्याद्येऽव्ययादसत्त्वे०' (७।३।८) आम् । अनेन द्विर्वचनम् ।

**[ अग्रे अग्रे सूक्ष्माः ]** अग्रे अग्रे इति विरामविवक्षया(णा)त् 'न सन्धिः' (१।३।५२) इति सन्धिनिषेधः ॥छ॥

## डतर-डतमौ समानां स्त्रीभावप्रश्ने ॥ ७।४।७६ ॥

**[ डतरडतमौ ]** डतरश्च डतमश्च = डतरडतमौ ।

**[ समानाम् ]** सम षष्ठी आम् ।

**[ स्त्रीभावप्रश्ने ]** स्त्री चासौ भावश्च = स्त्रीभावः, स्त्रीभावस्य प्रश्नः = स्त्रीभावप्रश्नः, तस्मिन् ।

**[ उभाविमावाढ्यौ, कतरा कतरा अनयोराढ्यता ? ]** किम् । इयमनयोर्मध्ये प्रकृष्टा का = कतरा । 'यत्-तत्-किमन्यात्' (७।३।५३) डतरप्र० → अतर । 'डित्यन्त्यस्वरादेः' (२।१।११४) इम्लुक् । 'आत्' (२।४।१८) आप्प्र० → आ । अनेन द्विर्वचनम् ।

**[ उभाविमावाढ्यौ, कतमा कतमा अनयोराढ्यता ? ]** बहूनां मध्ये का = कतमा । 'बहूनां प्रश्ने डतमश्च वा' (७।३।५४) डतमप्र० → अतम । 'डित्यन्त्यस्वरादेः' (२।१।११४) इम्लुक् । अनेन द्विः । आढ्यता इति स्त्रीलिङ्गभावः प्रत्ययः । किं साधन-गजाश्वादिसम्बन्धकृता उतान्यसम्बन्धकृता आहोस्विदुभयसम्बन्धकृतेत्यर्थः ।

**[ सर्व इमे आढ्याः, कतरा कतरा एषामाढ्यता ? ]** किम् । इयमनयोर्मध्ये प्रकृष्टा का = कतरा । 'यत्-तत्-किमन्यात्' (७।३।५३) डतरप्र० → अतर । 'डित्यन्त्यस्वरादेः' (२।१।११४) इम्लुक् । 'आत्' (२।४।१८) आप्प्र० → आ । अनेन द्विर्वचनम् ।

**[ सर्व इमे आढ्या, कतमा कतमा एषामाढ्यता ? ]** बहूनां मध्ये का = कतमा । बहूनां प्रश्ने डतमश्च वा' (७।३।५४) डतमप्र० → अतम । 'डित्यन्त्यस्वरादेः' (२।१।११४) इम्लुक् । अनेन द्विः । आढ्यता ।

**[ सर्व इमे आढ्याः, यतरा यतरा एषां विभूतिः, ततरा ततरा कथ्यताम् ]** इयमनयोर्मध्ये प्रकृष्टा या = यतरा । इयमनयोर्मध्ये प्रकृष्टा सा = ततरा । 'यत्-तत्-किमन्यात्' (७।३।५३) डतरप्र० → अतर । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ सर्व इमे आढ्याः, यतमा यतमा एषां सम्पत्, ततमा ततमा कथ्यताम् ]** बहूनां मध्ये प्रकृष्टा या = यतमा । बहूनां मध्ये प्रकृष्टा सा = ततमा । 'बहूनां प्रश्ने डतमश्च वा' (७।३।५४) डतमप्र० → अतम । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः ।

**[ उभाविमौ लक्ष्मीवन्तौ, कतरानयोर्लक्ष्मीः ? ]** किम् । इयमनयोर्मध्ये प्रकृष्टा का = कतरा । 'यत्-तत्-किमन्यात्' (७।३।५३) डतरप्र० → अतर । 'डित्यन्त्यस्वरादेः' (२।१।११४) इम्लुक् । 'आत्' (२।४।१८) आप्प्र० → आ ।

**[ उभाविमौ लक्ष्मीवन्तौ, कतमानयोर्लक्ष्मीः ? ]** किम् । बहूनां मध्ये का = कतमा । 'बहूनां प्रश्ने डतमश्च वा' (७।३।५४) डतमप्र० → अतम । 'डित्यन्त्यस्वरादेः' (२।१।११४) इम्लुक् ।

लक्ष्यतेऽनया पुण्यकर्मेति लक्ष्मीः, इयं स्त्री भवति, न भाव इति ॥छ॥

## पूर्व-प्रथमावन्यतोऽतिशये ॥ ७।४।७७ ॥

**[ पूर्वप्रथमौ ]** पूर्वश्च प्रथमश्च = पूर्वप्रथमौ ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ अन्यतः ]** अन्यस्मात् = अन्यतः ।

**[ अतिशये ]** अतिशय सप्तमी ङि ।

**[ पूर्वं पूर्वं पुष्यन्ति ]** पूर्व 'क्रियाविशेषणात्' (२।२।४१) अम् । अनेन द्विः । आम्रादयः जम्बीरादेः सकाशात् पूर्वं पूर्वं 'पुषंच् पुष्टौ' (११७५) पुष् । वर्त्त० अन्ति । 'दिवादेः श्यः' (३।४।७२) श्यप्र० → य । अन्येभ्यः पूर्वतरं पुष्यन्ति इत्यर्थः ।

**[ प्रथमं प्रथमं पच्यन्ते ]** प्रथम 'क्रियाविशेषणात्' (२।२।४१) अम् । 'डुपचींष् पाके' (८९२) पच् । वर्त्त० अन्ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य । 'लुगस्यादेत्यपदे' (२।१।११४) अलुक् । प्रथमं(मतरं) पच्यन्त इत्यर्थः ॥छ॥

## प्रोपोत्-सम् पादपूरणे ॥ ७।४।७८ ॥

**[ प्रोपोत्सम् ]** प्रश्च उपश्च उच्च सम् च = प्रोपोत्सम् ।

**[ पादपूरणे ]** पादस्य पूरणं = पादपूरणम्, तस्मिन् ।

प्रप्रशान्तकषायाग्नेरुपोपप्लववर्जितम् ।

उदुज्ज्वलं तपो यस्य, संसंश्रयत तं जिनम् ॥१॥

'शमू उपशमे' (१२३०) शम्, प्रपूर्व० । प्रशाम्यति स्म । 'गत्यर्था०' (५।१।११) क्तप्र० → त । 'अहन्-पञ्चमस्य०' (४।१।१०७) दीर्घः । कषाय एव अग्निः = कषायाग्निरित्यादि ।

'श्रिग् सेवायाम्' (८८३) श्रि । पञ्चमी त । 'कर्त्तर्यन०' (३।४।७१) शव् । 'नामिनो०' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ॥छ॥

## सामीप्येऽधोऽध्युपरि ॥ ७।४।७९ ॥

**[ सामीप्ये ]** सम्-अप् । सङ्गता आपो यत्र । 'ऋक्-पूः-पथ्यपोऽत्' (७।३।७६) अत्समासान्तः → अ । 'द्व्यन्तरनवर्णोपसर्गादप ईप्' (३।२।१०९) अप्० → ईप्० । समीपस्य भावः = सामीप्यम् । 'पतिराजान्तगुणाङ्ग०' (७।१।६०) ट्यणप्र० → य । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सप्तमी ङि ।

**[ अधोऽध्युपरि ]** अधस् च अधिश्च उपरिश्च = अधोऽध्युपरि । प्रथमा सि ।

**देशकृता कालकृता वा प्रत्यासत्तिः = सामीप्यम् ।**

**[ अधोऽधो ग्रामम् ]** अधस् प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । अनेन द्विर्वचनम् । ग्रामम् ।

**[ अध्यधि ग्रामम् ]** अधि प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । अनेन द्विर्वचनम् । ग्रामम् ।

**[ उपर्युपरि ग्रामम् ]** उपरि प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । अनेन द्विर्वचनम् । ग्रामम् ।

## वीप्सायाम् ॥ ७।४।८० ॥

**[ वीप्सायाम् ]** वीप्सा सप्तमी ङि । 'आपो ङितां०' (१।४।१७) ङि० → याम्० । पृथक्संख्यायुक्तानां बहूनां सजातीयानामर्थानां साकल्येन प्रत्येकं क्रियया गुणेन द्रव्येण जात्या वा युगपत् प्रयोक्तुर्व्याप्तुमिच्छा वीप्सा । वीप्सा च स्याद्यन्तेष्वेव भवतीति तेषामेव द्विर्वचनम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ वृक्षं वृक्षं सिञ्चति ]** वृक्ष द्वितीया अम् । अनेन द्वित्वम् । 'षिचींत् क्षरणे' (१३२१) षिच् । 'षः सोऽष्ट्यै०' (२।३।९८) सिच् । वर्त्त० तिव् । 'तुदादेः शः' (३।४।८१) श० → अ० । 'मुचादि०' (४।४।९९) नोऽन्तः ।

**[ ग्रामो ग्रामो रमणीयः ]** 'रमिं क्रीडायाम्' (९८९) रम् । रम्यते = रमणीयः । अनीयप्र० ।

**[ द्विपदिकां ददाति ]** द्वौ द्वौ पादौ ददाति = द्विपदिकां ददाति । 'संख्याऽऽदेः पादादिभ्यो दान-दण्डे चाऽकल् लुक् च' (७।२।१५२) अकलप्र० → अक०-पादस्य अकारलुक् । 'य-स्वरे पादः पदणि-क्य-घुटि' (२।१।१०२) पाद० → पद० । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्०' (२।४।१११) अ० → इ० । अम् ।

**[ एकशो ददाति ]** एकैकं ददाति = एकशो ददाति । 'संख्यैकार्थाद् वीप्सायां शस्' (७।२।१५१) शस्प्र० ।

**[ एकैकशो ददाति ]** एक वीप्सायां द्विः । एकैकं ददाति = एकैकशो ददाति । 'बह्वल्पार्थात् कारकादिष्टा-ऽनिष्टे प्शस्' (७।२।१५०) प्शस्प्र० → शस् ।

समासेनापि वीप्सा -

**[ प्रत्यर्थम् ]** अर्थमर्थं प्रति = प्रत्यर्थम् ।

**[ गेहानुप्रवेशमास्ते ]** गेहं गेहमनुप्रविश्य-गेहं गेहमनुप्रवेशम् । 'विश-पत-पद-स्कन्दो वीप्सा-ऽऽभीक्ष्ण्ये' (५।४।८१) णम्प्र० → अम् । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । गेहंगेहमनुप्रवेशमास्ते = गेहानुप्रवेशम् । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । आस्ते ।

**क्वचित् तु वीप्स्यमानमपि समासेनाभिधीयते-**

**[ सप्तपर्णः ]** पर्वणि पर्वणि सप्त पर्णान्यस्य = सप्तपर्णः ।

**[ अष्टापदः ]** पङ्क्तौ पङ्क्तौ अष्टौ पदान्यस्य = अष्टापदः । 'नाम्नि' (३।२।७५) इत्यनेन दीर्घः । 'समानानां०' (१।२।१) दीर्घः ॥छा॥

### प्लुप् चादावेकस्य स्यादेः ॥ ७।४।८१ ॥

**[ प्लुप् ]** प्लुप् प्रथमा सि ।

**[ च ]** च प्रथमा सि ।

**[ आदौ ]** आदि सप्तमी ङि ।

**[ एकस्य ]** एक षष्ठी ङस् ।

**[ स्यादेः ]** स्यादि षष्ठी ङस् ।

**पित्करणं पुंवद्भावार्थम् ।**

**[ एकैकः ]** एक प्रथमा सि । अनेन द्विः-सिलुप् च ।

**[ एकैका ]** एक 'आत्' (२।४।१८) आप्प्र० → आ । प्रथमा सि । अनेन द्विः-सिलुप् च । 'क्यङ्-मानि-पित्तद्धिते' (३।२।५०) पुंवत् । ऐदौत्सन्ध्यक्षरैः (१।२।१२) ऐ ।

**[ एकैकस्याः ]** एका षष्ठी ङस् । 'आपो ङितां यै-यास्-यास्-याम्' (१।४।१७) ङस्० → यास्० । 'सर्वादेर्डस्पूर्वाः' (१।४।१८) डस्पूर्व० यास् । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । अनेन द्विः-स्यादिलुप् च । 'क्यङ्-मानि-पित्तद्धिते' (३।२।५०) पुंवत् । 'ऐदौत्सन्ध्यक्षरैः' (१।२।१२) ऐ ।

**[ एकएका ]** एका प्रथमा सि । अनेन द्विः-सिलुप् च ।

**[ एकएकस्याः ]** एकस्याः षष्ठी ङस् । अनेन एकस्या द्विः-स्यादिलुप् च । अत्र विरामस्य विवक्षितत्वात् पुंवद्भावे सति सन्धिकार्यं न भवति ॥छ॥

## द्वन्द्वं वा ॥ ७।४।८२ ॥

**[ द्वन्द्वम् ]** द्वन्द्वं प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् ।

**[ वा ]** वा प्रथमा सि ।

**[ द्वन्द्वं तिष्ठतः, द्वौ द्वौ तिष्ठतः ]** द्वि । द्वौ द्वौ तिष्ठतः = द्वन्द्वम् । प्रथमा औ । अनेन द्विर्वचनं-स्यादेः "औ"रूपस्य लुप्-इकारस्य अम्भावः-अग्रेतन इकारस्य अत्वं-स्यादेः "औ"रूपस्य अम्देशाश्च निपात्यते ।

**[ नरकपटलान्यधोऽधो द्वन्द्वं हीनानि, द्वाभ्यां द्वाभ्यां हीनानि ]** द्वि तृतीयाद्वि० भ्याम् । 'वीप्सायाम्' (७।४।८०) द्विः । द्वाभ्यां द्वाभ्यां हीनानि = द्वन्द्वम् । अनेन द्वन्द्वं निपात्यते । भ्याम् रूपस्य लुप्-इकारस्य अम्-उत्तरत्र इकारस्य अत्वं-स्यादेः भ्याम् रूपस्य अम् निपात्यते ।

एवमग्रेऽपि ज्ञेयम् ।

**[ द्वन्द्वं कृतम्, द्वाभ्यां द्वाभ्यां कृतम् ]** द्वाभ्यां द्वाभ्यां कृतं = द्वन्द्वम् । शेषं पूर्ववत् । 'कर्त्तरि' (२।२।८६) तृतीया ॥छ॥

## रहस्य-मर्यादोक्ति-व्युत्क्रान्ति-यज्ञपात्रप्रयोगे ॥ ७।४।८३ ॥

**[ रहस्यमर्यादोक्तिव्युत्क्रान्तियज्ञपात्रप्रयोगे ]** 'मृत् प्राणत्यागे' (१३३३) मृ । म्रियते = मरः । 'अच्' (५।१।४९) अच्प्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० अर् । मरे साधवः = मर्याः । 'तत्र साधौ' (७।१।१५) यप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । आङ्पूर्व० 'डुदांग्क् दाने' (११३८) दा । तैरादीयत इति मर्यादा । 'आतो डोऽह्वा-वा-मः' (५।१।७६) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) आलुक् । 'आत्' (२।४।१८) आप्प्र० → आ । मर्यादाया उक्तिः = मर्यादोक्तिः । रहस्यं च मर्यादोक्तिश्च व्युत्क्रान्तिश्च यज्ञपात्रप्रयोगश्च = रहस्यमर्यादोक्ति-व्युत्क्रान्तियज्ञपात्रप्रयोगम्, तस्मिन् ।

**वीप्सायामिति निवृत्तम् ।**

**[ द्वन्द्वं मन्त्रयन्ते ]** द्वौ द्वौ = द्वन्द्वम् । अत्र द्वन्द्वशब्दो रहस्यार्थः, न तु द्विशब्दार्थः संख्या काचिदस्ति । यदुक्तमनेकार्थे-'द्वन्दः साहवे रहस्ये मिथुने युग्मे' । द्वि द्वितीया औ । अनेन द्विः । शेषं पूर्ववत् । द्वौ भूत्वा रहस्यं मन्त्रयन्त इत्यर्थः ।

**[ आचतुरं हीमे पशवो द्वन्द्वं मिथुनायन्ते ]** आ चतुर्भ्यः = आचतुरम् । 'पर्यपा-ऽऽङ्-बहिरच् पञ्चम्या' (३।१।३२) इत्यनेन समासः । 'शरदादेः' (७।३।९२) अत्समासान्तः → अ । अम् । द्वौ द्वौ = द्वन्द्वम् । औ । शेषं पूर्ववत् । मिथुनमिवाचरन्ति = मिथुनायन्ते । 'क्यङ्' (३।४।२६) क्यङ्प्र० → य । 'दीर्घश्च्वि-यङ्-यक्-क्येषु च' (४।३।१०८) दीर्घः । वर्त्त० अन्ते । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः । माता पुत्रेण पौत्रेण प्रपौत्रेण तत्पुत्रेण च मैथुनं यातीत्यर्थः । इयं मर्यादोक्तिः ।

**[ द्वन्द्वं व्युत्क्रान्ताः ]** द्वौ द्वौ भूत्वा = द्वन्द्वम् । द्वि औ । शेषं पूर्ववत् । व्युत्क्रान्तिर्भेदः । द्वौ राशी येषां ते = द्विराशयः, तेषां भावः = द्वैराश्यः । 'पतिराजान्तगुणाङ्ग०' (७।१।६०) ट्यण्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) इवर्णस्य लुक् । तेन = द्वैराश्येन भिन्ना इत्यर्थः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ द्वन्द्वं यज्ञपात्राणि प्रयुनक्ति ]** द्वे द्वे इति वाक्यं द्वन्द्वम् । द्वि द्वितीया औ । शेषं पूर्ववत् । यज्ञे पात्राणि = यज्ञपात्राणि । शस् । द्वे द्वे प्रयुनक्तीत्यर्थः ।

प्र-'युजूंपी योगे' (१४७६) युज् । 'रुधां स्वरा०' (३।४।८२) श्नप्र० → न । 'च-जः क-गम्' (२।१।८६) ज० → ग० । 'अघोषे०' (१।३।५०) ग० → क० ।

उक्तिग्रहणं शब्दोपात्तायां मर्यादायां यथा स्यात्, प्रकरणादिगम्यायां मा भूदित्येवमर्थम् ।

द्वन्द्वः समासः इत्यादिषूदाहरणेषु द्वन्द्व इति शब्दान्तरम् ॥छ॥

## लोकज्ञातेऽत्यन्तसाहचर्ये ॥ ७।४।८४ ॥

**[ लोकज्ञाते ]** 'लोकृङ् दर्शने' (६१२) लोक् । लोकतेऽवलोकते अनन्तज्ञानादिभावानस्मिन्निति लोकः । 'व्यञ्जनाद् घञ्' (५।३।१३२) घञ्प्र० → अ । लोकस्य ज्ञातः = लोकज्ञातस्तस्मिन् ।

**[ अत्यन्तसाहचर्ये ]** अत्यन्तं साहचर्यम् = अत्यन्तसाहचर्यम्, तस्मिन् । 'नाम नाम्नैकार्थ्ये समासो बहुलम्' (३।१।१८) इत्यादिना समासः ।

**[ द्वन्द्वं नारदपर्वतौ ]** द्वि । प्रथमा औ । शेषं पूर्ववत् । अग्रेऽपि एवं ज्ञेयम् ।

द्वन्द्वमिति सूत्रद्व(त्र)येऽपि नपुंसक्तं वेदितव्यमनुप्रयोगस्य नपुंसकत्वार्थम् । द्वन्द्वं नारदपर्वतौ रमणीयौ इत्यादिकस्य नपुंसकार्थमिति कोऽर्थः ? निपातनात् प्रयोगो यथा द्वन्द्वं शोभते इत्यर्थः ॥छ॥

## आबाधे ॥ ७।४।८५ ॥

**[ आबाधे ]** 'बाधृङ् बाधने' (७४४) बाध् । बाधनं = बाधः । 'भावा-ऽकर्त्रोः' (५।३।१८) घञ्प्र० → अ । आ-सामस्त्येन बाधः = आबाधस्तस्मिन् ।

**आबाधो मनःपीडा प्रयोक्तृधर्मः ।**

**[ ऋक् ऋक् ]** ऋक् प्रथमा सि । अनेन द्विः-पूर्वपदे स्यादेः प्लुप् । 'दीर्घङ्याब्-व्यञ्जनात् सेः' (१।४।४५) सिलुक् ।

**[ पूः पूः ]** पूर् अम् । अनेन द्विः-पूर्वपदे अम् प्लुप् । दाहतस्करोपद्रवादिभिः पूः पूरिति शब्दं करोतीत्यर्थः ।

**[ गतगतः ]** गत प्रथमा सि । अनेन द्विः-पूर्वपदे स्यादेः प्लुप् च । 'सो रुः' (२।१।७२) स० → र० ।

**[ गतगता ]** गता प्रथमा सि । अनेन द्विः-पूर्वपदे सि प्लुप् च । 'क्यङ्-मानि-पित्तद्धिते' (३।२।५०) पुंवत् । यथा हा प्रिया मे गतगता इति ब्रूते वियोगी कश्चित् ।

एवमग्रेऽपि ।

**[ नन करोमि ]** न प्रथमा सि । अनेन द्वि-पूर्वपदे सि प्लुप् च । 'अव्ययस्य' (३।२।७) सिलुप् । करोमि । न करोमीत्यर्थः ।

ऋगादेर्दुरुच्चारणादिना पीड्यमानः प्रयोक्ता एवं प्रयुङ्क्ते-

**[ अष्टमी अष्टमी कालिका कालिका ]** अष्टन्-अष्टन् । अष्टानां पूरणी = अष्टमी । 'नो मट्' (७।१।१५९) मट्प्र० → म । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । प्रथमा सि । अनेन द्विः-पूर्वपदे सि प्लुप् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

काल-गौरादित्वात् ङी । काल्येव = कालिका । 'यावादिभ्यः कः' (७।३।१५) कप्र० । 'ङ्यादीदूतः के' (२।४।१०४) ह्रस्वः । प्रथमा सि । अनेन द्विः-पूर्वपदे सिलुप् च, इत्यत्र पूरणप्रत्ययान्तत्वात् कोपान्त्याच्च 'तद्धिताऽककोपान्त्य-पूरण्याख्याः' (३।२।५४) इत्यादिना पुंवद्भावो न भवति ॥छ॥

## नवा गुणः सदृशे रित् ॥ ७।४।८६ ॥

**[ नवा ]** नवा प्रथमा सि ।

**[ गुणः ]** गुण प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ सदृशे ]** सदृश सप्तमी ङि ।

**[ रित् ]** रित् प्रथमा सि ।

आदौ प्लुप् च स्यात्, सा च रित् । **रित्करणं प्रतिषिद्धस्यापि पुंवद्भावस्य 'रिति' ( ३।२।५८ ) इत्यनेन सूत्रेण विधानार्थम् ।**

**[ शुक्लशुक्लं रूपम् ]** शुक्ल सि-अम् । अनेन द्विः-आदौ स्यादेः प्लुप् च । रूप सि-अम् । एवमग्रेऽपि ।

**[ कालककालिका ]** काल 'भाज-गोण-नाग-स्थल-कुण्ड-काल०' (२।४।३०) ङी । काल्येव = कालिका । 'कालात्' (७।३।१९) कप्र० । 'ङ्यादीदूतः के' (२।४।१०४) ह्रस्वः । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्०' (२।४।१११) इ । प्रथमा सि । अनेन द्विः-आदौ सि प्लुप् च । 'रिति' (३।२।५८) पुंवत् । शुक्लादिसदृशमपरिपूर्णगुणमेवमुच्यते । विकल्पपक्षे जातीयरपि स्यात् ।

**[ शुक्लजातीयः ]** शुक्लः प्रकारोऽस्य = शुक्लजातीयः । 'प्रकारे जातीयर्' (७।२।७५) जातीयर्प्र० → जातीय ।

**[ पटुजातीयः ]** पटुः प्रकारोऽस्य = पटुजातीयः । 'प्रकारे जातीयर्' (७।२।७५) जातीयर्प्र० → जातीय ।

**[ अग्निर्माणवकः ]** अग्निर्माणवकः । सदा गुणवाची यः स इह गुणशब्दो गृह्यते, अयं तूपमानात् प्राग्द्रव्यवाची, पश्चात्तु तैक्ष्ण्यजाड्यादिगुणवाचीति न भवति ॥छ॥

## प्रिय-सुखं चाकृच्छ्रे ॥ ७।४।८७ ॥

**[ प्रियसुखम् ]** प्रियश्च सुखश्च(खं च) = प्रियसुखम् ।

**[ च ]** च प्रथमा सि ।

**[ अकृच्छ्रे ]** न कृच्छ्रम् = अकृच्छ्रम्, तस्मिन् ।

**[ प्रियप्रियेण ददाति, प्रियेण ददाति ]** प्रिय तृतीया टा । 'टा-ङसोरिन-स्यौ' (१।४।५) इन । 'अवर्णस्येवर्णादिनैदोदरल्' (१।२।६) ए । अनेन वा द्विः । आदौ टा प्लुप् च । प्रियेण ददाति ।

**[ सुखसुखेन अधीते, सुखेन अधीते ]** सुख तृतीया टा । 'टा-ङसोरिन-स्यौ' (१।४।५) इन । 'अवर्णस्ये०' (१।२।६) ए । अनेन वा द्विः । आदौ टा प्लुप् च, पक्षे सुखेन अधीते । अक्लेशेन अधीते इत्यर्थः ।

चकारः चानुकृष्टत्वादुत्तरत्र नानुवर्त्तते । 'प्लुप् चादावेकस्य स्यादेः' (७।४।८१) इत्यस्यानुकर्षणार्थः ॥छ॥

## वाक्यस्य परिर्वर्जने ॥ ७।४।८८ ॥

**[ वाक्यस्य ]** वाक्य षष्ठी ङस् ।

**[ परिर्वर्जने ]** परि प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । वर्जन सप्तमी ङि ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ परिपरि त्रिगर्त्तेभ्यो वृष्टो मेघः, परि त्रिगर्त्तेभ्यो वृष्टो मेघः ]** परि प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । अनेन द्विः विकल्पेन । परि त्रिगर्त्तेभ्यः ।

**[ परित्रिगर्त्तं वृष्टो मेघः ]** परित्रिगर्त्त प्रथमा सि । 'अमव्ययीभावस्याऽतोऽपञ्चम्याः' (३।२।२) अम् । 'समानादमोऽतः' (१।४।४६) अलुक् ॥छा।

**सम्मत्यसूया-कोप-कुत्सनेष्वाद्यामन्त्र्यमादौ स्वरेष्वन्त्यश्च प्लुतः ॥ ७।४।८९ ॥**

**[ सम्मत्यसूयाकोपकुत्सनेषु ]** सम्मतिश्च असूया च कोपश्च कुत्सनं च = सम्मत्यसूयाकोपकुत्सनानि, तेषु ।

**[ आद्यामन्त्र्यम् ]** आदि च तद् आमन्त्र्यं च = आद्यामन्त्र्यम् । सि-अम् ।

**[ आदौ ]** आदि सप्तमी ङि ।

**[ स्वरेषु ]** स्वर सप्तमी सुप् ।

**[ अन्त्यश्च ]** अन्त्य प्रथमा सि । च प्रथमा सि ।

**[ प्लुतः ]** प्लुत प्रथमा सि ।

कार्येष्वाभिमत्यं सम्मतिः पूजनं वा । परगुणासहनमसूया । कोपः क्रोधः । निन्दा कुत्सा । एते प्रयोक्तृधर्मा नाभिधेयधर्माः । सम्मत्यसूयाकोपकुत्सनेषु इति बहुवचनात् द्विर्वचने विकल्पो न सम्बध्यते, किन्तु प्लुते विकल्पो ज्ञेय इति भावार्थः ।

**[ माणवक ३ माणवक ! माणवक माणवक ! अभिरूपक ३ अभिरूपक ! अभिरूपक अभिरूपक ! शोभनः स्वल्वसि ]** माणवक आमन्त्र्ये सि । 'अदेतः स्यमोर्लुक्' (१।४।४४) सिलुक् । अनेन द्विर्वचनं प्लुतश्च विकल्पेन ।

एकमात्रो भवेद् ह्रस्वो, द्विमात्रो दीर्घ उच्यते ।
त्रिमात्रस्तु प्लुतो ज्ञेयो, व्यञ्जनं चार्द्धमात्रिकम् ॥१॥

शोभनः खल्वसि ।

**असूयायाम् - [ माणवक ३ माणवक ! माणवक माणवक ! अभिरूपक ३ अभिरूपक ! अभिरूपक अभिरूपक ! रिक्तं ते आभिरूप्यम् ]** माणवक आमन्त्र्ये सि । 'अदेतः स्यमोर्लुक्' (१।४।४४) सिलुक् । अनेन द्विर्वचनं प्लुतश्च विकल्पेन । रिक्तं प्रसारं-मूल्यं, ते-तव, आभिरूप्यं-पाण्डित्यम् ।

**कोपे - [ माणवक ३ माणवक ! माणवक माणवक ! अविनीतक ३ अविनीतक ! अविनीतक अविनीतक ! इदानीं ज्ञास्यसि जाल्म ! ]** माणवक आमन्त्र्ये सि । 'अदेतः स्यमोर्लुक्' (१।४।४४) सिलुक् । अनेन द्विर्वचनं प्लुतश्च विकल्पेन । इदानीं ज्ञास्यसि जाल्म ! निकृष्टः ।

**कुत्सने - [ शक्तिके ३ शक्तिके ! शक्तिके शक्तिके ! यष्टिके ३ यष्टिके ! यष्टिके यष्टिके ! रिक्ता ते शक्तिः ]** 'शक्लृंट् शक्तौ' (१३००) शक् । शक्नोति स्म । 'गत्यर्था-ऽकर्मक-पिब-भुजेः' (५।१।११) क्तप्र० → त । 'आत्' (२।४।१८) आप्प्र० → आ । कुत्सिता शक्ता = शक्तिका । 'कुत्सिता-ऽल्पा-ऽज्ञाते' (७।३।३३) कप्प्र० → क । 'अस्याऽयत्-तत्०' (२।४।१११) इ । आमन्त्र्ये सि । 'एदापः' (१।४।४२) ए । अनेन द्विः प्लुतश्च विकल्पेन । यष्टेस्तुल्या = यष्टिका । 'तस्य तुल्ये कः संज्ञा-प्रतिकृत्योः' (७।१।१०८) कप्र० । 'आत्' (२।४।१८) आप्प्र० → आ । आमन्त्र्ये सि । 'एदापः' (१।४।४२) ए । अनेन द्विः प्लुतश्च विकल्पेन । रिक्ता-असारा, ते-तव शक्तिः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ देवदत्त ! गामभ्याज शुक्लां दण्डेन ]** देवदत्त आमन्त्र्ये सि । 'अदेतः स्यमोर्लुक्' (१।४।४४) लुक् । गो द्वितीया अम् । 'आ अम्-शसोऽता' (१।४।७५) आ । अभि-आङ्पूर्व० 'अञ्जू(ञ्जौ)प् व्यक्ति-म्रक्षण-गतिषु' (१४८८) अञ्ज् । पञ्चमी हि । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'अतः प्रत्ययाल्लुक्' (४।२।८५) हिलुक् । 'नो व्यञ्जनस्याऽनुदितः' (४।२।४५) नलुक् ।

व्यञ्जनान्तस्यापि यथा स्यात् । व्यञ्जनान्तस्यापि शब्दस्य स्वरेष्वन्त्यः प्लुतो भवतीत्यर्थः ॥छ॥

## भर्त्सने पर्यायेण ॥ ७।४।९० ॥

**[ भर्त्सने ]** 'भर्त्सिण् तर्जने' (१८४५) भर्त्स् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । भर्त्स्यते = भर्त्सनम् । 'अनट्' (५।३।१२४) अनट्प्र० → अन । 'णेरनिटि' (४।३।८३) णिच्लुक्, तस्मिन् ।

**[ पर्यायेण ]** परि 'अयि गतौ' (७९०) अय् (इंण्क् गतौ' (१०७४) इ) । पर्ययणं = पर्यायः । 'परेः क्रमे' (५।३।७६) घञ्प्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः (नामिनोऽकलि०' (४।३।५१) वृद्धिः) । तेन = पर्यायेण ।

**भर्त्सनं कोपेन दण्डाविष्करणम्, तत्र 'सम्मत्यसूया०' ( ७।४।८९ ) इत्यादिना द्विर्वचनं सिद्धमेव, प्लुतार्थ आरम्भः ।**

**[ चौर ३ चौर ! चौर चौर ३ ! चौर चौर ! दस्यो ३ दस्यो ! दस्यो दस्यो ३ ! दस्यो दस्यो ! घातयिष्यामि त्वाम्, बन्धयिष्यामि त्वाम् ]** दस्यु आमन्त्र्ये सि । 'ह्रस्वस्य गुणः' (१।४।४१) गुणः-सिसओ ओ । 'सम्मत्यसूया०' (७।४।८९) इत्यनेन द्विः । अनेन प्रथमपदे प्लुतः, द्वितीये तृतीये तु न क्वापि । 'हनंक् हिंसा-गत्योः' (११००) हन् । घ्नन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग् । 'ञ्णिति घात्' (४।३।१००) "घात्"देशः । भविष्यन्ती स्यामि । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'बन्धंश् बन्धने' (१५५२) बन्ध् । बध्नन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग् । भविष्यन्ती स्यामि । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'नामिनो०' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ॥छ॥

## त्यादेः साकाङ्क्षस्याङ्गेन ॥ ७।४।९१ ॥

**[ त्यादेः ]** तिरादिर्यस्य सः = त्यादिः, तस्य ।

**[ साकाङ्क्षस्य ]** आङ्पूर्व० 'काक्षु काङ्क्षायाम्' (५८०) काक्ष् । 'उदितः स्वरान्नोऽन्तः' (४।४।९८) नोऽन्तः । आकाङ्क्षणम् = आकाङ्क्षा । 'क्तेटो गुरोर्व्यञ्जनात्' (५।३।१०६) अप्र० । 'आत्' (२।४।१८) आप्प्र० → आ । सह आकाङ्क्षया वर्त्तते = साकाङ्क्षस्तस्य ।

**[ अङ्गेन ]** अङ्ग तृतीया टा ।

अतो द्विर्वचनं निर्वृ(वृ)त्तम्, वाक्यस्य स्वरेष्वन्त्यः प्लुतो वेत्यनुवर्त्तते, भर्त्सन इति च ।

**[ अङ्ग ! कूज ३, अङ्ग ! कूज, इदानीं ज्ञास्यसि जाल्म ! ]** अङ्ग इति कोमलामन्त्रणे । क्षीज (१५०) - 'कूज अव्यक्ते शब्दे' (१५१) कूज् । पञ्चमी हि । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'अतः प्रत्ययाल्लुक्' (४।२।८५) हिलुक् । अनेन प्लुतः । भर्त्सने इदानीं ज्ञास्यसि जाल्म ! ।

**[ अङ्ग ! व्याहर ३, अङ्ग ! व्याहर, इदानीं ज्ञास्यसि जाल्म ! ]** अङ्ग प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । वि-आङ्पूर्व० 'हृंग् हरणे' (८८५) हृ । पञ्चमी हि । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो०' (४।३।१) गु० अर् । 'अतः प्रत्ययाल्लुक्' (४।२।८५) हिलुक् । अनेन प्लुतः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ अङ्गाधीष्व मोदकं ते दास्यामि ]** अङ्ग 'अधि इंङ्क् अध्ययने' (११०४) इ । पञ्चमी स्व । 'समानानां०' (१।२।१) दीर्घः । नाम्यन्तस्था-कवर्गात्०' (२।३।१५) षत्वम् । मोदक द्वितीया अम् । ते-तव दास्यामि ॥छा॥

## क्षिया-ऽऽशीः-प्रैषे ॥ ७।४।९२ ॥

**[ क्षियाऽऽशीःप्रैषे ]** 'क्षि क्षये' (१०) क्षि । क्षयणं = क्षिया । 'भिदादयः' (५।३।१०८) अङ्प्र० → अ । 'संयोगात्' (२।१।५२) इय् । 'आत्' (२।४।१८) आप्प्र० → आ । क्षिया च आशीश्च प्रैषश्च = क्षियाऽऽशीःप्रैषम्, तस्मिन् ।

**क्षिया आचारभ्रेषः । आशीः प्रार्थनाविशेषः । प्रैषोऽसत्कारपूर्विका व्यापारणा ।**

**क्षियायाम् - [ स्वयं ह रथेन याति ३ उपाध्यायं पदातिं गमयति, स्वयं ह रथेन याति उपाध्यायं पदातिं गमयति ]** स्वयं-आत्मना । ह इति निन्द्यो(द्ये) । रथेन याति ३ अनेन प्लुतो विकल्पेन । पाद 'अत सातत्यगमने' (२७९) अत् । पादाभ्यामतति-गच्छति = पदातिः, तम् । 'पादाच्चात्यजिभ्याम्' (उणा० ६२०) इति णिद् इप्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । 'पदः पादस्या-ऽऽज्याति-गोपहते' (३।२।९५) पद० ।

**[ स्वयं ह ओदनं भुङ्क्ते ३ उपाध्यायं सक्तून् पाययति, स्वयं ह ओदनं भुङ्क्ते उपाध्यायं सक्तून् पाययति ]** सक्तु द्वितीया शस् । 'पां पाने' (२) पा । पिबन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'आत ऐः कृञ्चौ' (४।३।५३) आ० → ऐ० । ('पा-शा०-छा०' (४।२।२०) योऽन्तः) । 'एदैतोऽयाय्' (१।२।२३) आय् । वर्त्त० तिव् । 'कर्त्तर्यन०' (३।४।७१) शव् । 'नामिनो०' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**आशिषि - [ सिद्धान्तमध्येषीष्ठाः ३ व्याकरणं च तात ! सिद्धान्तमध्येषीष्ठाः व्याकरणं च तात ! ]** सिद्धान्त द्वितीया अम् । अधि 'इंङ्क् अध्ययने' (११०४) इ । आशीः सीष्ठाः । 'नामिनो०' (४।३।१) गु० ए । 'नाम्यन्तस्था-कवर्गात्०' (२।३।१५) षत्वम् । अनेन प्लुतः । तात ! कोमलामन्त्रणे पुत्र इत्यर्थः ।

**[ पुत्रांश्च लप्सीष्ठाः ३ धनं च तात ! पुत्रांश्च लप्सीष्ठाः धनं च तात ! ]** पुत्र द्वितीया शस् । 'डुलभिंष् प्राप्तौ' (७८६) लभ् । आशीः सीष्ठाः । 'अघोषे प्रथमोऽशिट्ः' (१।३।५०) भ० → प० ।

**पैषे - [ कटं च कुरु ३ ग्रामं च गच्छ ३, कटं च कुरु ग्रामं च गच्छ ]** कटं च कुरु ३ अनेन प्लुतः ॥छा॥

## चितीवार्थे ॥ ७।४।९३ ॥

**[ चिति ]** चित् सप्तमी ङि ।

**[ इवार्थे ]** इव इत्येतस्यार्थः = इवार्थस्तस्मिन् ।

**[ अग्निश्चिद्भाया ३ त् अग्निश्चिद्भायात् ]** अग्नि प्रथमा सि । चित् प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । अग्निरिव भायात् । 'भांक् दीप्तौ' (१०६१) भा । सप्तमी यात् । अनेन त्यादिस्वरात्परप्लुतः विकल्पेन ।

**[ राजा चिद्ब्रूया ३ त् राजा चिद्ब्रूयात् ]** राजा चित् 'ब्रूंग्क् व्यक्तायां वाचि' (११२५) ब्रू । सप्तमी यात् । अनेन त्यादिस्वरात्परप्लुतो विकल्पेन । अग्निरिव राजेवेत्यर्थः ।

चितीति रूपसत्ताश्रयणादप्रयोगे न भवति ।

**[ अग्निर्माणवको भायात् ]** अग्निर्माणवको भायात् । अग्निरिव इत्यर्थः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ कर्णवेष्टकांश्चित्कारय ]** कर्णवेष्टक द्वितीया अम्(शस्) । चित् 'डुकृंग् करणे' (८८८) कृ । कुर्वन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो०' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । कर्णविष्टकानेवेत्यर्थः ॥छा।

## प्रतिश्रवण-निगृह्यानुयोगे ॥ ७।४।९४ ॥

**[ प्रतिश्रवणनिगृह्यानुयोगे ]** प्रतिश्रवणं च निगृह्यानुयोगश्च = प्रतिश्रवणनिगृह्यानुयोगम्, तस्मिन् ।

**प्रतिश्रवणं परोक्तस्याभ्युपगमः, स्वयं प्रतिज्ञानं, श्रवणाभिमुख्यं च । निगृह्य स्वमतात्प्रच्याव्यानुयोगो निग्रहपदस्याविष्करणं निगृह्यानुयोगः, उपालम्भ इति यावत् ।**

**अभ्युपगमे - [ गां मे देहि भोः, हन्त ते ददामि ३, हन्त ते ददामि ]** गां मे देहि भोः, हन्त ते ददामि । अनेन त्यादिपरः प्लुतः ।

**स्वयं प्रतिज्ञाने - [ नित्यः शब्दो भवितुमर्हति ३, नित्यः शब्दो भवितुमर्हति ]** नित्यः शब्दः, भू । भवनं = भवितुम् । 'शक-धृष-ज्ञा-रभ-लभ-सहा-ऽर्ह-ग्ला-घटाऽस्ति समर्थाऽर्थे च तुम्' (५।४।९०) तुम् । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'नामिनो०' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । अर्हति ३ । अनेन त्यादिपरः प्लुतः ।

**श्रवणाभिमुख्ये - [ भो देवदत्त ! किं मार्ष ३, किं मार्ष ]** भो देवदत्त ! किं मार्ष ३ । अनेन प्लुतः । मार्ष इति श्रवणाभिमुख्यद्योतको निपातः ।

**निगृह्यानुयोगे - [ अद्य श्राद्धमित्यात्थ ३, अद्य श्राद्धमित्यात्थ ]** अद्य श्रद्धा प्रयोजनमस्य = श्राद्धः । 'चूडादिभ्योऽण्' (६।४।११९) अणप्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६) आलुक् । अम् । 'ब्रूंग्क् व्यक्तायां वाचि' (११२५) ब्रू । वर्त्त० सिव्-तिव् । 'ब्रूगः पञ्चानां पञ्चाऽऽहश्च' (४।२।११८) सिव्स्थाने थव्देशः, ब्रूस्थाने आह च । 'नहाहोर्ध-तौ' (२।१।८५) ह० → त० । अनेन प्लुतः । अद्य श्राद्धेति वादीत्युक्ता स्वमतात् प्रच्याव्य एवमुपालभ्यते ॥छा।

## विचारे पूर्वस्य ॥ ७।४।९५ ॥

**[ विचारे ]** विचार सप्तमी ङि ।

**[ पूर्वस्य ]** पूर्व षष्ठी ङस् ।

**किमिदं स्यात्, किमिदमिति निरूपणं विचारः, संशय इति यावत् ।**

**[ अहिर्नु ३ रज्जुर्नु, अहिर्नु रज्जुर्नु ]** अहि प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० । नु प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । अनेन प्लुतः ।

एवमग्रेऽपि ॥छा।

## ओमः प्रारम्भे ॥ ७।४।९६ ॥

**[ ओमः ]** ओम् षष्ठी ङस् ।

**[ प्रारम्भे ]** प्रारम्भ सप्तमी ङि ।

प्रमाणा(णामा)दिनादे(:) आदिपदात् स्तुतिर्गृह्यते । अभ्याय(दा)नं अङ्गीकारः ।

**[ ओ ३ म् ऋषभं पवित्रम्, ओमृषभं पवित्रम् ]** ओम् प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । ऋषभं पवित्रं । अनेन प्लुतः । प्रणम इत्यर्थे ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ओ ३ म्, अग्निमीले पुरोहितम्]** ओम् अग्नि द्वितीया अम् । 'ईडिक् स्तुतौ' (१११४) ईड् । वर्त्त० ए । स्तौमि इत्यर्थः, किम्भूतं अग्निं पुरो धीयते । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'धागः' (४।४।१५) ''हि''देशः, यद्वा पुरोहितं किम्भूतं अग्निं तत्प्रायत्वात् ॥छ॥

## हेः प्रश्नाख्याने ॥ ७।४।९७ ॥

**[हेः]** हि षष्ठी ङस् ।

**[प्रश्नाख्याने]** प्रश्नस्याख्यानं = प्रश्नाख्यानम्, तस्मिन् ।

**पृष्टस्य प्रतिवचनं प्रश्नाख्यानम् ।**

**[अकार्षीः कटं देवदत्त !? अकार्षं हि ३, अकार्षं हि]** 'डुकृंग् करणे' (८८८) कृ । अद्यतनी सि । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'सिचः(चि) परस्मै समानस्याऽङिति' (४।३।४४) वृद्धिः आर् । 'सः सिजस्तेर्दि-स्योः' (४।३।६५) ईत् । 'अड् धातोरा०' (४।४।२९) अट् । देवदत्त आमन्त्र्ये सि । अकार्ष-अद्यतनी अम् । हि प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । अनेन हि स्वरात् परः प्लुतः ।

**[अलावीः केदारं देवदत्त !? अलाविषं हि ३, अलाविषं हि]** 'लूग्श् छेदने' (१५१९) लू । अद्यतनी सि । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'सः सिजस्तेर्दि-स्योः' (४।३।६५) ईत् । 'सिचः(चि) परस्मै०' (४।३।४४) वृद्धिः औ । 'ओदौतोऽवाव्' (१।२।२४) आव् । 'अड् धातो०' (४।४।२९) अट् । अलाविष-अद्यतनी अम् । हि प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । अनेन हि स्वरात् परः प्लुतः ।

**[अकार्षीः कटं देवदत्त !? करोमि ननु]** अकार्षीः कटं देवदत्त !? करोमि ननु । 'ननौ पृष्टोक्तौ सद्वत्' (५।२।१७) उत्तरेण सिद्धे नियमार्थं वचनं हेः प्रश्नाख्याने एव 'हेः प्रश्नाख्याने' (७।४।९७) वाक्यस्य स्वरेष्वन्त्य एव प्लुत इति च ॥छ॥

## प्रश्ने च प्रतिपदम् ॥ ७।४।९८ ॥

**[प्रश्ने]** प्रश्न सप्तमी ङि ।

**[च]** च प्रथमा सि ।

**[प्रतिपदम्]** पदं प्रतिपत्तिः (प्रति प्रति) । ङस्-ङिर्वा । यद्वा 'क्रियाविशेषणात्' (२।२।४१) अम् ।

**प्रश्ने - [अगमः ३ पूर्वा ३ न् ग्रामा ३ न् देवदत्त ३ !? अगमः पूर्वान् ग्रामान् देवदत्त !?]** अम (३९२)-द्रम (३९३) - हम्म (३९४) - मीमृ (३९५)-'गम्लृं गतौ' (३९६) गम् । अद्यतनी सि । 'लृदिद्-द्युतादि-पुष्यादेः परस्मै' (३।४।६४) अङ्प्र० → अ । 'अड् धातोरादि०' (४।४।२९) अट् । अनेन स्वरात् परः प्लुतः सर्वत्र पदे २ पूर्वा ३ न् ग्रामा ३ न् देवदत्त ३ ? आमन्त्र्ये सि । 'अदेतः स्यमोर्लुक्' (१।४।४४) सिलुक् । पक्षे न प्लुतः ।

**प्रश्नाख्याने - [अगम ३ म् पूर्वा ३ न् ग्रामा ३ न् जिनदत्त ३ !? अगमं पूर्वान् ग्रामान् जिनदत्त !?]** अम (३९२) - द्रम (३९३) - हम्म (३९४) - मीमृ (३९५) - 'गम्लृं गतौ' (३९६) गम् । अद्यतनी अम् । 'लृदिद्-द्युतादि-पुष्यादेः परस्मै' (३।४।६४) अङ्प्र० → अ । 'अड् धातोरादि०' (४।४।२९) अट् । अगम ३ म् पूर्वा ३ न् ग्रामा ३ न् जिनदत्त ३ ? आमन्त्र्ये सि । 'अदेतः स्यमोर्लुक्' (१।४।४४) सिलुक् ।

## दूरादामन्त्र्यस्य गुरुर्वैकोऽनन्त्योऽपि लनृत् ॥ ७।४।९९ ॥

**[दूरात्]** दूर पञ्चमी ङसि ।

**[आमन्त्र्यस्य]** आमन्त्र्य षष्ठी ङस् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ गुरुः ]** गुरु प्रथमा सि ।

**[ वा ]** वा प्रथमा सि ।

**[ एकः ]** एक प्रथमा सि ।

**[ अनन्त्यः ]** न अन्त्योऽनन्त्यः । प्रथमा सि ।

**[ अपि ]** अपि प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[ लनृत् ]** न ऋत् = अनृत् । लृश्चासौ अनृच्च = लनृत् । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् ।

यत्र प्राकृतत्वात् प्रयत्नात् प्रयत्नविशेषे आश्रीयमाणे संदेहो भवति किमयं श्रोष्यति नवेति तद् दूरम्, गुरोरनृत इति विशेषत्वेन ।

**[ आगच्छ भो इ ३ न्द्रभूते ! आगच्छ भो इन्द्रभू ३ ते ! ]** आगच्छ भो इ ३ न्द्रभूते !, आगच्छ भो इन्द्रभू ३ ते !॥

**[ आगच्छ भो नृ ३ षभ !, आगच्छ भो नृषभ ! ]** आगच्छ भो नृ ३ षभ ! द्वितीये न प्लुतः । एवमग्रेऽपि ।

महाविभाषयैव प्लुतविकल्पे सिद्धे वाग्रहणं न विकल्पार्थं किन्त्वनय(न्त्य)प्लुतेन सह गुरोः असमावेशार्थम् । तेन यदा अन्त्यस्य प्लुतस्तदान्त्यस्यैव न तु गुरोः, यदा तु गुरोस्तदा गुरोरेव न त्वन्त्यस्येत्यर्थः, तेन क्लृ ३ प्तशिख ३ इति न भवति ।

**[ शृणु देवदत्त ! ]** 'श्रुंट् श्रवणे' (१२९६) श्रु । पञ्चमी हि । 'स्वादेः श्नुः' (३।४।७५) श्नुप्र० → नु । 'श्रौति-कृवु-धिवु-पा-घ्रा-ध्मा-स्था-म्ना-दाम्-दृश्यर्त्ति-शद-सदः शृ०' (४।२।१०८) "शृ"देशः । 'असंयोगादोः' (४।२।८६) हिलुक् । देवदत्त आमन्त्र्ये सि । 'अदेतः स्यमोर्लुक्' (१।४।४४) सिलुक् ।

गुरोरिति किम् ? अनन्त्यस्य लघोर्मा भूत् । एक इति किम् ? अनेकस्य गुरोर्यौगपद्येन मा भूत् । अनन्त्योऽपीति किम् ?. अन्त्यस्यैव मा भूत् । लृकारग्रहणमनृदिति प्रतिषेधनिवृत्त्यर्थम् । अथ ऋतः प्रतिषेधे लृकारस्य कः प्रसङ्गः ? उच्यते – इदमेव ज्ञापकमृवर्णग्रहणे लृवर्णस्यापि ग्रहणं भवतीति तेन –

**[ अचीक्लृपत् ]** 'कृपू(पौ)ङ् सामर्थ्ये' (९५९) कृप् । कल्पमानं कल्पन्तं वा प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग्प्र० । 'ऋदृवर्णस्य' (४।२।३७) इत्यनेन ऋकारस्यापि मध्ये लृकारः क्रियते गुणबाधनार्थम् । अद्यतनी दि० → त्० । 'णि-श्रि-द्रु-स्रु-कमः कर्त्तरि ङः' (३।४।५८) ङप्र० → अ । 'द्विर्धातुः परोक्षा-ङे प्राक् तु०' (४।१।१) "कृप्"द्विर्वचनम् । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'क-ङश्च-ञ्' (४।१।४६) क० → च० । 'असमानलोपे०' (४।१।६३) इ । 'लघोर्दीर्घोऽस्वरादेः' (४।१।६४) दीर्घः । 'णेरनिटि' (४।३।८३) णिग्लुक् । 'अड् धातोरादि०' (४।४।२९) अट् इत्यादौ ऋवर्णकार्यं लृवर्णस्यापि सिद्धं भवति ।

**[ आगच्छ भोः कर्तृ ३ !, आगच्छ भोः कर्तृ ! ]** आगच्छ भोः कर्तृ आमन्त्र्ये सि । 'अनतो लुप्' (१।४।५९) लुप् । अनेन प्लुतो विकल्पेन ।

**[ देवदत्त ! अहो आगच्छ ]** देवदत्त आमन्त्र्ये सि । 'अदेतः स्यमोर्लुक्' (१।४।४४) सिलुक् । अहो आगच्छ अत्र आमन्त्र्यस्यान्तेऽभावात् न प्लुतः ।

**[ शोभनः खल्वसि माणवक ३ ! शोभनः खल्वसि माणवक ! ]** शोभनः खल्वसि माणवक आमन्त्र्ये सि । 'अदेतः स्यमोर्लुक्' (१।४।४४) सिलुक् ।

अभिपूजितेऽर्थेऽनेनैव विकल्पेन प्लुतः ॥छ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## हे-हैष्वेषामेव ॥ ७।४।१०० ॥

**[ हेहैषु ]** हेश्च हैश्च = हेहायस्तेषु ।

**[ एषाम् ]** इदम् षष्ठी आम् ।

**[ एव ]** एव प्रथमा सि ।

दूरार्थद्योतकौ यौ हेहैशब्दौ कौ च तौ यौ तदामन्त्रणे वर्त्तते, यत्र २ हे-है अस्ति तत्र २ अनेनैव प्लुतः, पक्षे न, हे-हैष्वित्यवधारणस्य विषयार्थम् । एषामिति स्थानिनिर्देशार्थं बहुवचनं ह इ = हे, ह ए = है इति लाक्षणिकयोरपि परिग्रहार्थम् । एवकारोऽन्यस्य प्लुतस्य व्युदासार्थः ॥छ॥

## अस्त्री-शूद्रे प्रत्यभिवादे भो-गोत्र-नाम्नो वा ॥ ७।४।१०१ ॥

**[ अस्त्रीशूद्रे ]** स्त्री च शूद्रश्च = स्त्रीशूद्रम्, न स्त्रीशूद्रम् = अस्त्रीशूद्रम्, तस्मिन् ।

**[ प्रत्यभिवादे ]** प्रति अभिवादनं = प्रत्यभिवादः, तस्मिन् ।

**[ भोगोत्रनाम्नः ]** भोस् च गोत्रं च नाम च = भोगोत्रनाम, तस्य ।

'अवर्ण-भो-भगो-ऽघोर्लुगसन्धिः' (१।३।२२) रलुक् ।

**[ वा ]** वा प्रथमा सि ।

**यदभिवाद्यमानो गुरुः कुशलानुयोगेनाशिषा वा यद् युक्तं वाक्यं प्रयुङ्क्ते स प्रत्यभिवादः ।**

**[ अभिवादये देवदत्तोऽहं भोः ३, अभिवादये देवदत्तोऽहं भोः ]** अभि 'वदिण् परिभाषणे' (१९६३) वद् । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । वर्त्त० ए । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । 'लुगस्यादेत्यपदे' (२।१।११३) अलोपः ।

**[ आयुष्मानेधि भोः ३, आयुष्मानेधि भोः ]** असक् भवे (भुवि) (११०२) अस् । पञ्चमी हि । 'शासस्-हनः शाध्येधि-जहि' (४।२।८४) एधि । भोस् अनेन प्लुतो विकल्पेन ।

**[ अभिवादये गार्ग्योऽहं भोः !, कुशल्यसि गार्ग्य ३ !, कुशल्यसि गार्ग्य ! ]** अभिवादये गार्ग्योऽहं भोः कुशल्यसि गार्ग्य आमन्त्र्ये सि । 'अदेतः स्यमोर्लुक्' (१।४।४४) सिलुक् । अनेन विकल्पेन प्लुतः ।

राजन्यविशोरपि गोत्रत्वमेव ।

**[ अभिवादयेऽहमिन्द्रवर्मा भोः, आयुष्मानेधीन्द्रवर्म ३ न् !, इन्द्रवर्मन् ! ]** अभिवादयेऽहमिन्द्रध(व)र्मा भोः, आयुष्मानेधीन्द्रध(व)र्म ३ न् ! । अनेन प्लुतो विकल्पेन ।

**[ अभिवादये इन्द्रपालितोऽहं भोः, आयुष्मानेधीन्द्रपालित ३ ! इन्द्रपालित ! ]** अभिवादये इन्द्रपाति(लि)तोऽहं भोः, आयुष्मानेधीन्द्रपालित ३ ! । आमन्त्र्ये सि । 'अदेतः स्यमोर्लुक्' (१।४।४४) सिलुक् । अनेन प्लुतो विकल्पेन ।

नाम - **[ अभिवादये देवदत्तोऽहं भोः, आयुष्मानेधि देवदत्त ३ !, देवदत्त ! ]** अभिवादये देवदत्तोऽहं भोः, आयुष्मानेधि देवदत्त ३ ! । आमन्त्र्ये सि । 'अदेतः स्यमोर्लुक्' (१।४।४४) सिलुक् । अनेन विकल्पेन प्लुतः ।

**[ अभिवादये गार्ग्यहं भोः, आयुष्मती भव गार्गि ! ]** गर्गस्यापत्यं वृद्धं स्त्री = गार्गी । 'गर्गादेर्यञ्' (६।१।४२) यञ्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणजेयेकण्०' (२।४।२०)

Jain Education International For Personal & Private Use Only www.jainelibrary.org

('यञो डायन्०') (२।४।५७) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । 'व्यञ्जनात् तद्धितस्य' (२।४।८८) यलुक् । आमन्त्र्ये सि । 'नित्यदिद्-द्विस्वराऽम्बार्थस्य ह्रस्वः' (१।४।४३) सिसउं ह्रस्वः ।

**[अभिवादये तुषजकोऽहं भोः, आयुष्मानेधि कुशल्यसि तुषजक !]** तुष 'जनैचि प्रादुर्भावे' (१२६५) जन् । तुषाज्जातः = तुषजः । 'क्वचित्' (५।१।१७१) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्लुक् । कुत्सितोऽल्पोऽज्ञातो वा तुषजः = तुषजकः । 'कुत्सिता-ऽल्पा-ऽज्ञाते' (७।३।३३) कप्प्र० → क । आमन्त्र्ये सि । 'अदेतः स्यमोर्लुक्' (१।४।४४) सिलुक् ।

**[अभिवादये स्थाल्यहं भोः, आयुष्मानेधि स्थालि ३]** स्थलतीति स्थाली । 'वा ज्वलादि-दु-नी-भू-ग्रहा-ऽऽस्रोर्णः' (५।१।६२) णप्र० → अ । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । 'अणञेयेकण्०' (२।४।२०) ङी । आमन्त्र्ये सि । 'नित्यदिद्०' (१।४।४३) सिसउं ह्रस्वः ।।छ।।

### प्रश्ना-ऽर्चा-विचारे च सन्धेयसन्ध्यक्षरस्याऽऽदिदुत्परः ॥ ७।४।१०२ ॥

**[प्रश्नाऽर्चाविचारे]** प्रश्नश्च अर्चा च विचारश्च = प्रश्नाऽर्चाविचारम्, तस्मिन् ।

**[च]** च प्रथमा सि ।

**[सन्धेयसन्ध्यक्षरस्य]** सन्धेयं च तत् सन्ध्यक्षरं च = सन्धेयसन्ध्यक्षरम्, तस्य ।

**[आत्]** आत् प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् ।

**[इदुत्परः]** इच्च उच्च = इदुतौ, इदुतौ परौ यस्मात् सः = इदुत्परः । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

सन्धेयः सन्धियोग्यः यः क्वचित् स्वरे परे विकारमापद्यते स च प्लुतः, प्रत्यासत्त्या एकारैकारयोरिकारपरः ओकारौकारयोरुकारपरो भवति ।

**प्रश्ने - [*अगमः ३ पूर्वान् ३ ग्रामा ३ न् अग्निभूता ३ इ, पटा ३ उ ?*]** अग्निभूता ३ इ । अग्निभूति इति प्रकृतिः । आमन्त्र्ये सि । 'ह्रस्वस्य गुणः' (१।४।४१) एकारात् । 'प्रश्ने च प्रतिपदम्' (७।४।९८) इत्यनेन कृते प्लुते एकारस्य अनेन आ प्लुतात् इश्च । पटा ३ उ ? । पटु आमन्त्र्ये सि । 'ह्रस्वस्य गुणः' (१।४।४१) ओ । 'प्रश्ने च प्रतिपदम्' (७।४।९८) प्लुते कृतेऽनेन ओकारस्य आ प्लुतात् उश्च ।

**[अदा ३ स्तस्मा ३ इ, अपचा ३ इ पटा ३ उ, अहौषी ३ रग्ना ३ उ ?]** तस्मै 'प्रश्ने च प्रतिपदम्' (७।४।९८) प्लुतः । अनेन ए(ऐ)कारस्य आ प्लुतात् इश्च । 'हुंक् दाना-ऽदनयोः' (११३०) हु । अद्यतनी सि । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'सः सिजस्तेर्दि-स्योः' (४।३।६५) ईत् । 'अड् धातोरादि०' (४।४।२९) अट् । 'सिचः(चि) परस्मै समानस्याऽङिति' (४।३।४४) वृद्धिः औ । 'सो रुः' (२।१।७२) स० → र० । 'प्रश्ने च प्रतिपदम्' (७।४।९८) इत्यनेन सर्वत्र प्लुतः । अग्नि सप्तमी ङि । 'ङिर्डौ' (१।४।२५) ङि० → डौ० → औ० । 'डित्यन्त्यस्वरादेः' (२।१।११४) इलुक् । 'प्रश्ने च प्रतिपदम्' (७।४।९८) प्लुतः ३ । अनेन औकारस्य आ प्लुतात् उश्च ।

**अर्चा = पूजा तस्याम् - [शोभनः खल्वसि अग्निभूता ३ इ, पटा ३ उ]** अग्निभूति आमन्त्र्ये सि । 'ह्रस्वस्य गुणः' (१।४।४१) गु० ए । पटु आमन्त्र्ये सि । 'ह्रस्वस्य गुणः' (१।४।४१) गु० ओ । एकारस्य ओकारस्य च अनेन आ प्लुतात् इश्च उश्च ।

**विचारे - [वस्तव्यं किं निर्ग्रन्थस्य सागारिका ३ इ उतानागारिके]** अगारं-गृहं विद्यतेऽस्य = अगारिकः । 'अतोऽनेकस्वरात्' (७।२।६) इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । सह अगारिकेण वर्त्तते इति सागारिकम्,

तस्मिन् । सागारिका ३ इ । सागारिक प्रकृतिः । सप्तमी ङि । 'अवर्णस्ये०' (१।२।६) ए । 'विचारे पूर्वस्य' (७।४।९५) इत्यनेन प्लुतः ३ । एकारस्य अनेन आ प्लुतात् इश्च । अगारेण चरति = आगारिकः । 'चरति' (६।४।११) इकण्प्र० → इक । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । न आगारिकम् = अनागारिकम्, तस्मिन् । 'कृत्यस्य वा' (२।२।८८) इति कर्त्तरि षष्ठी । निर्ग्रन्थेनेत्यर्थः ।

**प्रत्यभिवादे - [आयुष्मानेधि अग्निभूता ३ इ पटा ३ उ]** अग्निभूति - पटु । आमन्त्र्ये सि । 'ह्रस्वस्य गुणः' (१।४।४१) ए - ओ । 'अस्त्री-शूद्रे प्रत्यभिवादे०' (७।४।१०१) प्लुतः ३ । एकारस्य ओकारस्य च अनेन आ प्लुतात् इः - उश्च ।

**[आयुष्मन्तौ भूयास्तां देवदत्तजिनदत्ता ३ उ]** देवदत्त-जिनदत्त । प्रथमा औ । 'ऐदौत्सन्ध्यक्षरैः' (१।२।१२) औ । 'अस्त्री-शूद्रे प्रत्यभिवादे०' (७।४।१०१) प्लुतः ३ । अनेन औकारस्य आ प्लुतात् उश्च ।

**[आगच्छ भो अग्नि(इन्द्र)भूते ३]** इन्द्रभूते ३ । 'दूरादामन्त्र्यस्य गुरुर्वैकोऽनन्त्योऽपि लनृत्' (७।४।९९) प्लुतः ३ ।

**[कच्चि ३ त् कुशल ३ म् भवत्योः ३ कन्ये ३?]** कच्चि ३ त् कुशल ३ म् भवत्योः ३ कन्ये ३ ? । 'प्रश्ने च प्रतिपदम्' (७।४।९८) इत्यनेन प्लुतः । कन्या औ । 'औता' (१।४।२०) ए । प्रश्नद्योतकोऽव्ययः कच्चित् शब्दः अग्रेतनेषु 'प्रश्ने च प्रतिपदम्' (७।४।९८) प्लुतः ३ ।

**[अगमः ३ पूर्वा ३ न् ग्रामा ३ नहो भद्रकाऽसि गौः ३]** गौ ३ भावात् सन्ध्यभावः । 'दूरादामन्त्र्यस्य०' (७।४।९९) प्लुतः ३ ।

**[आयुष्मानेधि भो ३]** आयुष्मानेधि भो ३ । अत्र 'अस्त्री-शूद्रे प्रत्यभिवादे भो-गोत्र-नाम्नो वा' (७।४।१०१) प्लुतः ।

**[भद्रिकासि कुमारि ३]** कुमारी आमन्त्र्ये सि । 'नित्यदिद् द्विस्वराऽम्बार्थस्य ह्रस्वः' (१।४।४३) सिसउं ह्रस्वः । 'दूरादामन्त्र्यस्य०' (७।४।९९) प्लुतः ३ ।

**[अगमः ३ पूर्वौ ३ ग्रामौ ३ देवदत्त ३]** अत्र 'प्रश्ने च प्रतिपदम्' (७।४।९८) इत्यनेन प्लुतः ॥छ॥

## तयोर्य्वौ स्वरे संहितायाम् ॥ ७।४।१०३ ॥

**[तयोः]** तद् षष्ठी ओस् ।

**[य्वौ]** य् च व् च = य्वौ । औ ।

**[स्वरे]** स्वर सप्तमी ङि ।

**[संहितायाम्]** संहिता सप्तमी ङि । अविरामेत्यर्थः ।

**[अगमः ३ अग्निभूता ३ यत्रागच्छ]** अम (३९२)-द्रम (३९३)-हम्म (३९४) मीमृ (३९५)-'गम्लृं गतौ' (३९६) गम् । अद्यतनी सि । 'लृदिद्-द्युतादि-पुष्यादेः परस्मै' (३।४।६४) अङ्प्र० → अ । 'अड् धातोरादि०' (४।४।२९) अट् । 'प्रश्ने च प्रतिपदम्' (७।४।९८) प्लुतः । 'प्रश्ना-ऽर्चा-विचारे च सन्धेयसन्ध्यक्षरस्यादिदुत्परः' (७।४।१०२) इत्यादिना एकारस्य आ प्लुतात् इश्च इति कृते अनेन इकारस्य यत्वम् ।

**[अगमः ३ अग्निभूता ३ यिहागच्छ]** अम (३९२)-द्रम (३९३)-हम्म (३९४) मीमृ (३९५)-'गम्लृं गतौ' (३९६) गम् । अद्यतनी सि । 'लृदिद्-द्युतादि०' (३।४।६४) अङ्प्र० → अ । 'अड् धातोरादि०' (४।४।२९) अट् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'प्रश्ने च प्रतिपदम्' (७।४।९८) इत्यनेन प्लुतः । 'प्रश्ना-ऽर्चा-विचारे०' (७।४।१०२) इत्यादिना एकारस्य आ प्लुतात् इश्च इति कृते अनेन इकारस्य यत्वम् ।

**[अगमः ३ पटा ३ वत्रागच्छ]** अम (३९२)-द्रम (३९३)-हम्म (३९४) मीमृ (३९५)-'गम्लृं गतौ' (३९६) गम् । अद्यतनी सि । 'लृदिद्-द्युतादि०' (३।४।६४) अङ्प्र० → अ । 'अड् धातोरादि०' (४।४।२९) अट् । 'प्रश्ने च प्रतिपदम्' (७।४।९८) इत्यनेन प्लुतः । 'प्रश्ना-ऽर्चा-विचारे०' (७।४।१०२) इत्यादिना ओकारस्य आ प्लुतात् उश्च इति कृते अनेन उकारस्य वत्वम् ।

**[अगमः ३ पटा ३ वुदकमानय]** अम (३९२)-द्रम (३९३)-हम्म (३९४) मीमृ (३९५)-'गम्लृं गतौ' (३९६) गम् । अद्यतनी सि । 'लृदिद्-द्युतादि०' (३।४।६४) अङ्प्र० → अ । 'अड् धातोरादि०' (४।४।२९) अट् । 'प्रश्ने च प्रतिपदम्' (७।४।९८) इत्यनेन प्लुतः । 'प्रश्ना-ऽर्चा-विचारे०' (७।४।१०२) इत्यादिना ओकारस्य आ प्लुतात् उश्च इति कृते अनेन उकारस्य वत्वम् ।

स्वे दीर्घत्वस्य अस्वे स्वरे 'ह्रस्वोऽपदे वा' (१।२।२२) इत्यनेन प्राप्तह्रस्वत्वस्य च बाधनार्थं वचनम् ।

**[अग्ना ३ इ]** अग्नि आमन्त्र्ये सि । 'ह्रस्वस्य गुणः' (१।४।४१) गु० ए । 'दूरादामन्त्र्यस्य०' (७।४।९९) प्लुतः ३ । 'प्रश्ना-ऽर्चा-विचारे च०' (७।४।१०२) एकारस्य आ प्लुतात् इश्च ।

**[पटा ३ उ]** पटु आमन्त्र्ये सि । 'ह्रस्वस्य गुणः' (१।४।४१) गु० ओ । 'दूरादामन्त्र्यस्य०' (७।४।९९) प्लुतः ३ । 'प्रश्ना-ऽर्चा-विचारे च०' (७।४।१०२) ओकारस्य आत् प्लुतात् उश्च ।

**[अग्ना ३ इ इन्द्रम्]** अग्ना ३ इ इन्द्रम् । अत्र 'प्रश्ने च प्रतिपदम्' (७।४।९८) प्लुतः ३ । 'प्रश्ना-ऽर्चा-विचारे च०' (७।४।१०२) इत्यादिना एकारस्य आ प्लुतात् इश्च ।

**[पटा ३ उ उदकम्]** पटा ३ उ उदकम् । अत्र 'प्रश्ने च प्रतिपदम्' (७।४।९८) प्लुतः ३ । 'प्रश्ना-ऽर्चा-विचारे च०' (७।४।१०२) इत्यादिना ओकारस्य आ प्लुतात् उश्च ।

**[अग्ना ३ इ अत्र]** अग्ना ३ इ अत्र । अत्र 'प्रश्ने च प्रतिपदम्' (७।४।९८) प्लुतः ३ । 'प्रश्ना-ऽर्चा-विचारे च०' (७।४।१०२) इत्यादिना एकारस्य आ प्लुतात् इश्च ।

**[पटा ३ उ अत्र]** पटा ३ उ अत्र । अत्र 'प्रश्ने च प्रतिपदम्' (७।४।९८) इत्यनेन प्लुतः ३ । 'प्रश्ना-ऽर्चा-विचारे च०' (७।४।१०२) इत्यादिना ओकारस्य आ प्लुतात् उश्च ।

विरामविवक्षायां 'न सन्धिः' (१।३।५२) इति सन्ध्यभावः ।

**[ऐ ४ तिकायन]** इ तिकस्यापत्यम् = ऐ ४ तिकायनः । 'नडादिभ्य आयनण्' (६।१।५३) आयनण्प्र० → आयन । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । मतान्तरे अनेनैव चतुर्मात्रः प्लुत(ः) नीयते ४ ।

**[औ ४ पगव]** औ पूर्ववत् । मतान्तरे अनेनैव चतुर्मात्रः प्लुत(ः) नीयते ४ ॥छ॥

## पञ्चम्या निर्दिष्टे परस्य ॥ ७।४।१०४ ॥

**[पञ्चम्या]** पञ्चमी तृतीया टा ।

**[निर्दिष्टे]** निर्दिष्ट सप्तमी ङि ।

**[परस्य]** पर षष्ठी ङस् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

[ **वृक्षैः** ] वृक्ष तृतीया भिस् । 'भिस ऐस्' (१।४।२) भिस्० → ऐस्० । 'ऐदौत्सन्ध्यक्षरैः' (१।२।१२) ऐ । एवमग्रेऽपि ।

अव्य(व्या)बाध अव्यवहितस्येत्यर्थः ॥छ॥

**सप्तम्या पूर्वस्य ॥ ७।४।१०५ ॥**

[ **सप्तम्या** ] सप्तमी तृतीया टा ।

[ **पूर्वस्य** ] पूर्व षष्ठी ङस् ।

अव्यवहितस्य स्थाने तत्कार्यं भवति ।

[ **समिदत्र** ] सम् 'जिइन्धैपि दीप्तौ' (१४९८) इन्ध् । समिन्द्धे ज्वलनो अनया इति समित् । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'नो व्यञ्जनस्याऽनुदितः' (४।२।४५) नलुक् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'धुटस्तृतीयः' (२।१।७६) ध० → द० । अत्र प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

[ **त्रिष्टुबत्र** ] त्रि स्तम्भू (१९८५)-'स्तुम्भू रोधनार्थः' (१९८६) स्तम्भ् इति सौत्रो धातुः । 'ष्टुंग्क् स्तुतौ' (११२४) ष्टु । 'षः सोऽष्ट्यै०' (२।३।९८) स्तु । 'निमित्ताभावे नैमित्तिकस्याप्यभावः' (न्या० वक्ष०(१)/सूत्र(२९)) स्तु । त्रीन् स्तुभ्नाति स्तौति वा । 'ककुप्-त्रिष्टुबनुष्टुभः' (उणा० ९३२) त्रिष्टुप् निपातः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'धुटस्तृतीयः' (२।१।७६) प० → ब० । अत्र प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् । 'इवर्णादि०' (१।२।२१) इत्यादौ स्वरे इत्याद्यौपश्लेषिकमधिकरणं पूर्वं परं च सम्भवति, तत्र परमेव ग्राह्यमिति नियमार्थं वचनम् ॥छ॥

**षष्ठ्याऽन्त्यस्य ॥ ७।४।१०६ ॥**

[ **षष्ठ्या** ] षष्ठी तृतीया टा ।

[ **अन्त्यस्य** ] अन्त्य षष्ठी ङस् ।

[ **अष्टाभिः** ] अष्टन् तृतीया भिस् । 'वाष्टन आः स्यादौ' (१।४।५२) न० → आ । 'समानानां०' (१।२।१) दीर्घः ।

[ **अष्टासु** ] अष्टन् सप्तमी सुप् । 'वाष्टन आः स्यादौ' (१।४।५२) न० → आ० । 'समानानां०' (१।२।१) दीर्घः ॥छ॥

**अनेकवर्णः सर्वस्य ॥ ७।४।१०७ ॥**

[ **अनेकवर्णः** ] न विद्यते एको वर्णो यस्य सः = अनेकवर्णः ।

[ **सर्वस्य** ] सर्व षष्ठी ङस् ।

[ **तिसृभिः** ] त्रि तृतीया भिस् । 'त्रि-चतुरस्तिसृ-चतसृ स्यादौ' (२।१।१) त्रि० → "तिसृ"देशः ।

[ **चतसृभिः** ] चतुर् तृतीया भिस् । 'त्रि-चतुरस्तिसृ-चतसृ स्यादौ' (२।१।१) चतुर्० → "चतसृ"देशः ।

[ **व्याघ्रपात्** ] व्याघ्रस्येव पादावस्य स = व्याघ्रपाद् । 'पात् पादस्याऽहस्त्यादेः' (७।३।१४८) पादस्य "पाद्"देशः, न समुदायस्य ।

[ **किरति** ] 'कृत् विक्षेपे' (१३३४) कृ । वर्त्त० तिव् । 'तुदादेः शः' (३।४।८१) शप्र० → अ । 'ॠतां क्ङितीर्' (४।४।११६) किर् इत्यर्थः ।

पूर्वस्यापवादोऽयम्, एवमुत्तरोऽपि ॥छ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## प्रत्ययस्य ॥ ७।४।१०८ ॥

**[ प्रत्ययस्य ]** प्रति 'इंण्क् गतौ' (१०७५) इ । यतः सर्वे 'गत्यर्थो(र्थाः) ज्ञानार्थाः' (न्या०वक्ष०(२)/सूत्र(४४)) इत्युक्तं प्रतीयते ज्ञायते येनार्थः सः = प्रत्ययः । 'पुन्नाम्नि घः' (५।३।१३०) घप्र० → अ । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् । तस्य-प्रत्ययस्य ।

**[ सर्वे ]** सर्व प्रथमा जस् । 'जस इः' (१।४।९) जस्० → इ० । 'अवर्णस्ये०' (१।२।६) ए ।

**[ अष्टौ ]** अष्टन् जस् । 'अष्ट और्जस्-शसोः' (१।४।५३) जस्० → औ । 'वाष्टन आः स्यादौ' (१।४।५२) न० → आ । 'ऐदौत् सन्ध्यक्षरैः' (१।२।१२) औ ।

**[ कति ]** कति प्रथमा जस् । डति-ष्णः संख्याया लुप्' (१।४।५४) जस्लुप् ।

## स्थानीवाऽवर्णविधौ ॥ ७।४।१०९ ॥

**[ स्थानी ]** 'ष्ठां गतिनिवृत्तौ' (५) ष्ठा । 'षः सोऽष्ट्यै०' (२।३।९८) स्था । 'निमित्ताभावे०' (न्या०वक्ष०(१)/सूत्र(२९)) स्था । स्थीयतेऽस्मिन्निति स्थानम् । 'करणा-ऽऽधारे' (५।३।१२९) अनट्प्र० → अन । स्थानं-प्रसङ्गः सोऽस्यास्तीति स्थानी-देशी । 'अतोऽनेकस्वरात्' (७।२।६) इन्प्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'इन्-हन्-पूषाऽर्यम्णः शिस्योः' (१।४।८७) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ इव ]** इव प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[ अवर्णविधौ ]** वर्णाश्रितो विधिः = वर्णविधिः । न वर्णविधिः = अवर्णविधिः, तस्मिन् ।

तत्र धातुप्रकृतिविभक्तिकृदव्ययपदादेशा उदाहरणानि । धात्वादेशो धातुवद्भवति ।

**[ भविता ]** 'असक् भवे(भुवि)' (११०२) अस् । 'अस्ति-ब्रुवोर्भू-वचावशिति' (४।४।१) अस्० → भूदेशः । भवतीति भविता । 'णक-तृचौ' (५।१।४८) तृच्प्र० → तृ । प्रथमा सि । 'ऋदुशनस्०' (१।४।८४) सि० → डा० । 'डित्यन्त्यस्वरादेः' (२।१।११४) ऋलोपः । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'नामिनो०' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

**[ भवितुम् ]** भवनाय = भवितुम् । 'क्रियायां क्रियार्थायां०' (५।३।१३) तुम्प्र० । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

**[ भवितव्यम् ]** भूयते = भवितव्यम् । 'तव्या-ऽनीयौ' (५।१।२७) तव्यप्र० । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'नामिनो०' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् ।

**[ वक्ता ]** 'ब्रूंगक् व्यक्तायां वाचि' (११२५) ब्रू । 'अस्ति-ब्रुवोर्भू-वचावशिति' (४।४।१) ब्रू० → "वच्"देशः । वक्तीति वक्ता । 'णक-तृचौ' (५।१।४८) तृच्प्र० → तृ । शेषं स्पष्टम् ।

**[ वक्तुम् ]** वचनाय = वक्तुम् । 'क्रियायां क्रियार्थायां तुम्०' (५।३।१३) तुम्प्र० । 'च-जः क-गम्' (२।१।८६) च० → क० ।

**[ वक्तव्यम् ]** उच्यते = वक्तव्यम् । 'तव्या-ऽनीयौ' (५।१।२७) तव्यप्र० । 'च-जः क-गम्' (२।१।८६) च० → क० ।

प्रकृत्यादेशः प्रकृतिवत् । किमः कादेशे कृते सर्वादित्वात् स्मायादयो भवन्ति ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ कस्मै ]** किम् चतुर्थी ङे । 'किमः कस्तसादौ च' (२।१।४०) किम्० "का"देशः । 'सर्वादेः स्मै-स्मातौ' (१।४।७) स्मै ।

**[ के ]** किम् प्रथमा जस् । 'किमः कस्तसादौ च' (२।१।४०) किम्० → "कादेशः" । 'जस इः' (१।४।९) इ० । 'अवर्णस्ये०' (१।२।६) ए ।

**[ केषाम् ]** किम् षष्ठी आम् । 'किमः कस्तसादौ च' (२।१।४०) किम्० → "का"देशः । 'अवर्णस्याऽऽमः साम्' (१।४।१५) आम्० → साम्० । 'एद् बहुस्भोसि' (१।४।४) ए । 'नाम्यन्तस्था-कवर्गात्०' (२।३।१५) षत्वम् ।

विभक्त्यादेशो विभक्तिवत् -

**[ वृक्षाय ]** वृक्ष चतुर्थी ङे । 'ङे-ङस्योर्याऽऽतौ' (१।४।६) ङे० → य० । 'अत आः स्यादौ०' (१।४।१) दीर्घः ।

**[ प्लक्षाय ]** प्लक्ष चतुर्थी ङे । 'ङे-ङस्योर्याऽऽतौ' (१।४।६) ङे० → य० । 'अत आः स्यादौ०' (१।४।१) दीर्घः ।

**[ राजा ]** राजन् प्रथमा सि । 'नि दीर्घः' (१।४।८५) दीर्घः । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'नाम्नो नोऽनह्नः' (२।१।९१) नलुक् ।

**[ पचेयम् ]** 'डुपचींष् पाके' (८९२) पच् । सप्तमी याम् । 'याम्-युसोरियमियुसौ' (४।२।१२३) "इयम्"देशः । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'अवर्णस्ये०' (१।२।६) ए ।

**[ पचेयुः ]** 'डुपचींष् पाके' (८९२) पच् । सप्तमी युस् । 'याम्-युसोरियमियुसौ' (४।२।१२३) "युस्"देशः । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'अवर्णस्ये०' (१।२।६) ए ।

कृदादेशः कृद्वत् -

**[ प्रकृत्य ]** 'डुकृंग् करणे' (८८८) कृ, प्रपूर्व० । प्रकरणं पूर्वं = प्रकृत्य । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । 'अनञः क्त्वो यप्' (३।२।१५४) यप् । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[ प्रहृत्य ]** 'हृंग् हरणे' (८८५) हृ, प्रपूर्व० । प्रहरणं पूर्वं = प्रहृत्य । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । 'अनञः क्त्वो यप्' (३।२।१५४) यप् । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

अव्ययादेशोऽव्ययवत्-

**[ प्रस्तुत्य, उपस्तुत्य ]** 'ष्टुंग्क् स्तुतौ' (११२४) ष्टु । 'षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) स्तु । 'निमित्ताभावे०' (न्या०वक्ष०(१)/सूत्र(२९)) स्तु । प्र-उपपूर्व० । प्रस्तवनं पूर्वम् । उपस्तवनं पूर्वम् । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । शेषं पूर्ववत् । 'क्त्वा-तुमम्' (१।१।३५) इत्यव्ययसंज्ञा । तत्फलं प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

पदादेशः पदवत् -

**[ धर्मो वो रक्षतु ]** अत्र पदत्वात् 'सो रुः' (२।१।७२) रेफत्वम् ।

**[ धर्मो नो रक्षतु ]** अत्र पदत्वात् 'सो रुः' (२।१।७२) रेफत्वम् ।

इवग्रहणं स्वाश्रयार्थम्, अन्यथा स्थानीत्यादेशस्य संज्ञा विज्ञायेत, तेन - **[ आहत, आवधिष्ट ]** आङ्पूर्व० 'हनंक् हिंसा-गत्योः' (११००) हन् । अद्यतनी त । 'सिजद्यतन्याम्' (३।४।५३) सिच् । प्रथमे 'हनः सिच्' (४।३।३८) इत्यनेन

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सिच् कित्त्वात् 'यमि-रमि-नमि-गमि-हनि-मनि-वनति-तनादेर्धुटि क्ङिति' (४।२।५५) इत्यादिना नलुक्। 'धुड्-ह्रस्वाल्लुग-निटस्त-थोः' (४।३।७०) सिच्लुक् । द्वितीये 'अद्यतन्यां वा त्वात्मने' (४।४।२२) "वध"देशः । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'नाम्यन्तस्था-कवर्गात्०' (२।३।१५) षत्वम् । 'तवर्गस्य श्चवर्ग०' (१।३।६०) त० → टत्वम्, इत्यादौ 'आङो यम-हनः स्वेऽङ्गे च' (३।३।८६) इत्यनेन उभयत्राप्यात्मनेपदं भवति, अन्यथा वधिरेव स्यात् ।

वर्णाश्रयो विधिर्वर्णविधिरिति समासस्याश्रयणाद्वर्णात् परस्य विधिः १, वर्णे परतो विधिः २, वर्णस्य स्थाने विधिः ३, वर्णेन विधिः ४, अप्रधानवर्णाश्रयो वा विधि ५, रिति सर्वत्रावर्णविधाविति प्रतिषेधो भवति ।

तत्र वर्णात् परस्य विधिः —

**[ द्यौः ]** द्यो प्रथमा सि । 'ओत औ' (१।४।७४) औ । 'सो रुः' (२।१।७२) स० → र० ।

**[ पन्थाः ]** पथिन् प्रथमा सि । 'थो न्थ्' (१।४।७८) थ्० → न्थ्० । 'पथिन्-मथिनृभुक्षः सौ' (१।४।७६) न० → आ० । 'एः' (१।४।७७) इ० → आ० । 'समानानां०' (१।२।१) दीर्घः । 'सो रुः' (२।१।७२) स० → र० ।

**[ सः ]** तद् प्रथमा सि । 'आद्वेरः' (२।१।४१) द्० → अ । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् । 'तः सौ सः' (२।१।४२) त० → स० । 'सो रुः' (२।१।७२) स० → र० । 'रः पदान्ते०' (१।३।५३) विसर्गः सर्वत्र ।

अत्र औत्व-आत्व-त्यदाद्यत्वेषु कृतेषु स्थानिवद्भावात् व्यञ्जनात् परस्य सेर्लोपः 'दीर्घङ्याब्-व्यञ्जनात् सेः' (१।४।४५) इत्यादिना प्राप्नोति स न भवति ।

वर्णे परतो विधिः–

**[ क इष्टः ]** किम् प्रथमा सि । 'किमः कस्तसादौ च' (२।१।४०) "क"देशः । 'सो रुः' (२।१।७२) स० → र० । 'रोर्यः' (१।३।२६) य । अग्रे इष्टः । 'स्वरे वा' (१।३।२४) यलुक् ।

**[ स उप्तः ]** तद् प्रथमा सि । शेषं पूर्ववत् । 'डुवपीं बीजसन्ताने' (९९५) वप् । उप्यते स्म = उप्तः । 'क्त-क्तवतू' (५।१।१७४) क्तप्र० → त । 'यजादि-वचेः किति' (४।१।७९) य्वृत् व० → उ० । अत्र य्वृति कृते 'घोषवति' (१।३।२१) इति रोरुत्वम् । 'एतदश्च व्यञ्जनेऽनग्-नञ्समासे' (१।३।४६) इत्यादिना सेर्लोपश्च न भवति ।

वर्णस्य स्थाने विधिः–

**[ श्रायं हविः ]** श्रीर्देवताऽस्य = श्रायं हविः । 'देवता' (६।२।१०१) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः ऐ । 'एदैतोऽयाय्' (१।२।३) आय् । प्रथमा सि । 'अतः स्यमोऽम्' (१।४।५७) अम् । हविस् प्रथमा सि । 'अनतो लुप्' (१।४।५९) सिलुप् । 'सो रुः' (२।१।७२) स० → र० । अत्रेकारस्य वृद्धौ कृतायां स्थानिवद्भावात् 'अवर्णेवर्णस्य' (७।४।६८) इति लोपः प्राप्तो न भवति ।

वर्णेन विधिः-

**[ उरःकेण, उरःपेण, उर ≍●केण, उर)(पेण ]** उरस् 'कैं शब्दे' (३६) कै । 'आत् सन्ध्यक्षरस्य' (४।२।१) आ । 'पैं शोषणे' (४७) पै । 'आत् सन्ध्यक्षरस्य' (४।२।१) पा । उरः कायतीति उरःकः, तेन । उरः पायतीति उरःपः, तेन । 'आतो डोऽह्वा-वा-मः' (५।१।७६) डप्र० → अ । 'डित्यन्त्यस्वरादेः' (२।१।११४) अन्त्यस्वरादिलोपः । तृतीया टा । 'टा-ङसोरिन-स्यौ' (१।४।५) "इन"देशः । 'अवर्णस्ये०' (१।२।६) ए । 'कवर्गैकस्वरवति' (२।३।७६) णत्वम् । अग्रेतने सर्वत्र 'सो रुः' (२।१।७२) स० → र० । 'रः कख-पफयोः ≍●क-)(पौ' (१।३।५) ≍ - )( देशः । अत्र सकारादेशानां विसर्जनीयजिह्वामूलीयोपध्मानीयानां स्थानिवद्भावप्रतिषेधा"दलचटतवर्गशसान्ते" इति णत्वप्रतिषेधो न भवति ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ व्यूढोरस्केन, महोरस्केन ]** व्यूढं उरो यस्य सः, तेन । महदुरो यस्य सः, तेन । दध्युरः-सर्पिर्मधूपानच्छालेः' (७।३।१७२) इत्यादिना कच्समासान्तः → क । 'सो रुः' (२।१।७२) स० → र० । 'प्रत्यये' (२।३।६) रस्य सः, इत्यत्र तु सकारे कृते स्वाश्रयः प्रतिषेधः प्रवर्त्तते ।

अप्रधानवर्णाश्रयो विधिः-

**[ प्रदीव्य ]** 'दिवूच् क्रीडा-जयेच्छा-पणि-द्युति-स्तुति-गतिषु' (११४४) दिव्, प्रपूर्व० । प्रदेवनं पूर्वं = प्रदीव्य । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । 'अनञः क्त्वो यप्' (३।२।१५४) यप् । 'भ्वादेर्नामिनो दीर्घो र्वोर्व्यञ्जने' (२।१।६३) दीर्घः ई ।

**[ प्रसीव्य ]** 'षिवूच् उतौ' (११६४) षिव्, प्रपूर्व० । षः सोऽष्ट्यै-ष्ठिव-ष्वष्कः' (२।३।९८) सिव् । प्रसेवनं पूर्वं = प्रसीव्य । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । 'अनञः क्त्वो यप्' (३।२।१५४) यप् । 'भ्वादेर्नामिनो०' (२।१।६३) दीर्घः ई ।

अत्र स्तादीत्यन्यपदार्थस्याशितः प्राधान्यात् स्तोरप्राधान्यमिति स्थानिवद्भावप्रतिषेधो भवति । स्थानिवर्णाश्रयकार्य-प्रतिषेधाच्चादेशवर्णाश्रयाणि स्थान्यनुबन्धाश्रयाणि च कार्याणि भवन्त्येव । आदेशवर्णाश्रयाणि-

**[ सर्वेषाम् ]** सर्व षष्ठी आम् । 'अवर्णस्याऽऽमः साम्' (१।४।१५) आम्० → साम्० । 'एद् बहुस्भोसि' (१।४।४) ए । 'नाम्यन्तस्था०' (२।३।१५) षत्वम् । अत्र सामादेशे कृते सकाराश्रयमेत्वं भवति । स्थान्यनुबन्धाश्रयाणि-

**[ प्रभिद्य ]** 'भिदृंपी विदारणे' (१४७७) भिद्, प्रपूर्व० । प्रभेदनं पूर्वं = प्रभिद्य । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । 'अनञः क्त्वो यप्' (३।२।१५४) यप् ।

**[ निरुध्य ]** 'रुधृंपी आवरणे' (१४७३) रुध्, निपूर्व० । निरोधनं पूर्वं = निरुध्य । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । 'अनञः क्त्वो यप्' (३।२।१५४) यप् ।

**[ प्रणीय ]** 'णींग् प्रापणे' (८८४) णी । 'पाठे धात्वादेर्णो नः' (२।३।९७)नी, प्रपूर्व० । प्रणयनं पूर्वं = प्रणीय । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । 'अनञः क्त्वो यप्' (३।२।१५४) यप् । 'अदुरुपसर्गान्तरो ण-हिनु-मीना-ऽऽनेः' (२।३।७७) णत्वम् ।

**[ प्रलूय ]** 'लूग्श् छेदने' (१५१९) लू, प्रपूर्व० । प्रलवनं पूर्वं = प्रलूय । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । 'अनञः क्त्वो यप्' (३।२।१५४) यप् ।

अत्र क्त्वो यबादेशे कृते स्थानिवद्भावेन क्ङितीति गुणप्रतिषेधो भवति ।

अनुबन्धा ह्यसन्त एव गुणाभावादिकं कार्यं कुर्वन्ति ।

**[ अग्रहीत् ]** 'ग्रहीश् उपादाने' (१५१७) ग्रह् । अद्यतनी दि० → त् । 'सिजद्यतन्याम्' (३।४।५३) सिच् । 'सः सिजस्तेर्दि-स्योः' (४।३।६५) ईत् । 'स्ताद्यशितोऽत्रोणादेरिट्' (४।४।३२) इट् । 'गृह्णोऽपरोक्षायां दीर्घः' (४।४।३४) दीर्घः । 'इट ईति' (४।३।७१) सिच्लुक्, इत्यत्रेटो दीर्घत्वे स्थानिवद्भावात् 'इट ईति' (४।३।७१) इति सिचो लोपो भवति । वर्णात् परतो विधिरिति समासात् वर्णविधिह्येषः ? उच्यते-नायं वर्णविधिः, विशिष्टं ह्येष समुदायवर्णमाश्रयते इटं नाम ॥छा॥

## स्वरस्य परे प्राग्विधौ ॥ ७।४।११० ॥

**[ स्वरस्य ]** स्वर षष्ठी ङस् ।

**[ परे ]** पर सप्तमी ङि ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ प्राग्विधौ ]** प्राचो विधिः = प्राग्विधिः, तस्मिन् ।

**[ कथयति ]** 'कथण् वाक्यप्रतिबन्धे' (१८८०) कथ । 'चुरादिभ्यो णिच्' (३।४।१७) णिच् । 'अतः' (४।३।८२) अलुक् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ अवधीत् ]** अवधीत् इत्यत्र 'अद्यतन्यां वा त्वात्मने' (४।४।२२) इत्यनेन "वध"देशः ।

अत्राल्लुकः स्थानिवद्भावादुपान्त्यलक्षणा वृद्धिः 'ञ्णिति' (४।३।५०)-'व्यञ्जनादेर्वोपान्त्यस्याऽतः' (४।३।४७) इत्याभ्यां न भवति ।

**[ स्पृहयति ]** 'स्पृहण् ईप्सायाम्' (१९२८) स्पृह । 'चुरादिभ्यो णिच्' (३।४।१७) णिच् । 'अतः' (४।३।८२) अलुक् । वर्त्त० तिव् । 'कर्त्तर्यनद्भ्यः शव्' (३।४।७१) शव् । 'नामिनो०' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ मृगयते ]** 'मृगण्(णि) अन्वेषणे' (१९३०) मृग । 'चुरादिभ्यो णिच्' (३।४।१७) णिच् । 'अतः' (४।३।८२) अलुक् । वर्त्त० ते । 'कर्त्तर्यन०' (३।४।७१) शव् । 'नामिनो०' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

अत्र लघूपान्त्यलक्षणो गुणो न भवति ।

**[ पादिकः ]** पादाभ्यां तरति = पादिकः । 'नौ-द्विस्वरादिकः' (६।४।१०) इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । अत्र 'य-स्वरे पादः पदणि-क्य-घुटि' (२।१।१०२) इत्यादिना पद्भावो न भवति ।

**[ शातनी ]** 'शद्लृं शातने' (९६७) शद् । सीदन्तं (शीयमानं) प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे णिग्' (३।४।२०) णिग् । 'शदे शात्' ('शदिरगतौ शात्') (४।२।२३) "शात्"देशः । [द्वितीये?] शात्यतेऽनया = शातनी । 'करणा-ऽऽधारे' (५।३।१२९) अनट्प्र० → अन । 'णेरनिटि' (४।३।८३) णिग्लुक् । 'अणञेयेकण्०' (२।४।२०) ङी ।

**[ पातनी ]** 'पत्लृ गतौ' (९६२) पत् । पतन्तं प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे०' (३।४।२०) णिग् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । [द्वितीये?] पात्यतेऽनया = पातनी । 'करणा-ऽऽधारे' (५।३।१२९) अनट्प्र० → अन । 'णेरनिटि' (४।३।८३) णिग्लुक् । 'अणञेयेकण्०' (२।४।२०) ङी ।

अत्र 'अनोऽस्य' (२।१।१०८) लुग् न भवति ।

**[ धारणिः ]** धरणस्यापत्यं = धारणिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ रावणिः ]** टुक्षु (१०८४)-'रु शब्दे' (१०८५) रु । रौतीति रवणः । 'नन्द्यादिभ्योऽनः' (५।१।५२) अनप्र० । 'नामिनो०' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव् । रवणस्यापत्यं = रावणिः । 'अत इञ्' (६।१।३१) इञ्प्र० → इ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

अत्र 'नोऽपदस्य तद्धिते' (७।४।६१) इत्यन्त्यस्वरादिलोपो न भवति ।

**[ स्रंस्यते ]** 'स्रंसूङ् स्रंसने' (९५३) स्रंस् । स्रंसमानं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य । 'णेरनिटि' (४।३।८३) णिग्लुक् ।

**[ ध्वंस्यते ]** 'ध्वंसूङ् गतौ च' (९५४) ध्वंस् । ध्वंसमानं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य । 'णेरनिटि' (४।३।८३) णिग्लुक् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अत्र णिलुकः स्थानिवद्भावादुपान्त्यनकारलोपो न भवति ।

**[ याज्यते ]** 'यजीं देवपूजा-सङ्गतिकरण-दानेषु' (९९१) यज् । यजन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग् । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य । 'णेरनिटि' (४।३।८३) णिग्लुक् ।

**[ वाप्यते ]** 'डुवपीं बीजसन्ताने' (९९५) वप् । वपन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य । 'णेरनिटि' (४।३।८३) णिग्लुक् ।

अत्र य्वृन्न भवति ।

**[ निराद्य, समाद्य ]** निर्-सम् 'अदं भक्षणे' (१०९५) अद् । निरदन्तं समदन्तं च प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । निरादनं पूर्वम् । समादनं पूर्वम् । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । 'अनञः क्त्वो यप्' (३।२।१५४) यप् । 'णेरनिटि' (४।३।८३) णिग्लुक् । अत्र 'यपि चाऽदो जग्ध्' (४।४।१६) इत्यनेन जग्धादेशो न भवति ।

**[ घात्यात् ]** 'हनंक् हिंसा-गत्योः' (११००) हन् । घ्नन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'ञ्णिति घात्' (४।३।१००) "घात्"देशः । आशीः क्यात् । 'णेरनिटि' (४।३।८३) णिग्लुक् । अत्र वधादेशो न भवति ।

**[ निगार्यते, निगाल्यते ]** नि 'गृत् निगरणे' (१३३५) गृ । निगिरन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'नामिनोऽकलि-हलेः' (४।३।५१) वृद्धिः आर् । वर्त्त० ते । 'क्यः शिति' (३।४।७०) क्यप्र० → य । 'णेरनिटि' (४।३।८३) णिग्लुक् । अत्राव्यवहितो णिलोपस्य स्थानित्वेन 'नवा स्वरे' (२।३।१०२) इति पक्षे लत्वम् ।

**[ चातुरौ ]** चतुर्णामिमौ = चातुरौ । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादेर्ञ्णिति तद्धिते' (७।४।१) वृद्धिः आ ।

**[ आनडुहौ ]** अनडुह इमौ = आनडुहौ । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ ।

अत्र औत्वादेशस्य स्थानिवद्भावात् 'वाः शेषे' (१।४।८२) इति वा न भवति ।

**[ पादे ]** पाद सप्तमी ङि । अत्र एत्वादेशस्य स्थानिवद्भावात् पद्भावो 'य-स्वरे पादः पदणि-क्य-घुटि' (२।१।१०२) इत्यादिना पद् न भवति ।

**[ अवीवदद्वीणां परिवादकेन ]** वदति वीणा-तां परिवादकः प्रयुङ्क्ते । णिग्प्र० । परिवादकं वीणां वादयन्तं देवदत्तः प्रयुङ्क्ते । णिग्प्र० । 'ञ्णिति०' (४।३।५०) उपान्त्यवृद्धिः । अद्यतनी दि → त् । 'णि-श्रि-द्रु-स्रु-कमः कर्त्तरि ङः' (३।४।५८) ङप्र० → अ । 'द्विर्धातुः परोक्षा-ङे प्राक्०' (४।१।१) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । असमानलोपे सन्वल्लघुनि ङे' (४।१।६३) इ । 'उपान्त्यस्याऽसमानलोपि०' (४।२।३५) ह्रस्वः । 'लघोर्दीर्घोऽस्वरादेः' (४।१।६४) दीर्घः । 'णेरनिटि' (४।३।८३) णिग्लुक् । 'अड् धातोरादि०' (४।४।२९) अट् । अत्र णिजात्याश्रयणादुपान्त्यस्य ह्रस्वो भवति ।

**[ अक्राष्टम् ]** 'कृषींत् विलेखने' (१३१९) कृष् । अद्यतनी ताम् । 'स्पृश-मृश-कृष-तृप-दृपो वा' (३।४।५४) सिच् । 'स्पृशादि-सृपो वा' (४।४।११२) अ । 'व्यञ्जनानामनिटि' (४।३।४५) वृद्धिः । 'धुड्-ह्रस्वाल्लुगनिटस्त-थोः' (४।३।७०) सिच्लुक् । 'तवर्गस्य श्चवर्ग०' (१।३।६०) त० → ट० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ अद्राष्टाम् ]** 'दृशृं प्रेक्षणे' (४९५) दृश् । अद्यतनी ताम् । सिच् । 'अः सृजि-दृशोऽकिति' (४।४।१११) अ । 'व्यञ्जनानामनिटि' (४।३।४५) वृद्धिः । 'धुड्-ह्रस्वाल्लु०' (४।३।७०) सिच्लुक् । 'यज-सृज-मृज-राज०' (२।१।८७) श० → ष० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) त० → ट० ।

अत्र सिज्लोपो न स्वरादेश इति 'ष-ढोः कस्सि' (२।१।६२) इति कत्वे स्थानी न भवति ।

**[ आगत्य ]** आगमनं पूर्वम् = आगत्य । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । 'अनञः क्त्वो यप्' (३।२।१५४) यप् । 'यमि-रमि-नमि-गमि०' (४।२।५५) मलुक् । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः ।

**[ अभिमत्य ]** अभिमननं पूर्वम् = अभिमत्य । 'प्राक्काले' (५।४।४७) क्त्वाप्र० → त्वा । 'अनञः क्त्वो यप्' (३।२।१५४) यप् । 'ह्रस्वस्य तः पित्कृति' (४।४।११३) तोऽन्तः । 'यमि-रमि-नमि-गमि-हनि-मनि०' (४।२।५५) नलुक् । अत्र पञ्चमे(मो) लोपो ह्रस्वलक्षणो तकारे स्थानी न भवति ।

**[ द्विपदिकां ददाति ]** द्वौ पादौ ददाति = द्विपदिकां ददाति । संख्याऽऽदेः पादादिभ्यो दान-दण्डे चाऽकल् लुक् च' (७।२।१५२) अकल्प्र० → अक - अन्त्योऽकारस्य लुक् । 'य-स्वरे पादः पदणि-क्य-घुटि' (२।१।१०२) "पद्"देशः । 'आत्' (२।४।१८) आप्प्र० → आ । 'अस्याऽयत्-तत्०' (२।४।१११) इ । अम् । अत्राल्लुचः परनिमित्तत्वाभावात् स्थानित्वाभावे पदादेशो भवति ।

**[ बाभ्रवीयाः ]** बभ्रोरपत्यं = बाभ्रव्यः । 'मधु-बभ्रोर्ब्राह्मण-कौशिके' (६।१।४३) यञ्प्र० → य । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः । 'अस्वयम्भुवोऽव्' (७।४।७०) अव् । 'बाभ्रव्यस्य इमे छात्राः = बाभ्रवीयाः । 'दोरीयः' (६।३।३२) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'तद्धितयस्वरेऽनाति' (२।४।९२) यलुक् । अत्र 'तद्धितयस्वरेऽनाति' (२।४।९२) इति यलोपे परविधौ कर्तव्येऽवादेशः स्थानी न भवति, अन्यथा व्यञ्जनाभावात् यलोपो न स्यात् ।

**[ नैधेयः ]** नि 'डुधांग्क् धारणे च' (११३९) धा । निधानं = निधिः । 'उपसर्गाद् दः किः' (५।३।८७) किप्र० → इ । 'इडेत्-पुसि०' (४।३।९४) आलुक् । निधेरपत्यं = नैधेयः । 'इतोऽनिञः' (६।१।७२) एयण्प्र० → एय । 'वृद्धिः स्वरेष्वादेर्ञ्णिति०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

**[ निधिकः ]** निधिना तरति = निधिकः । 'नौ-द्विस्वरादिकः' (६।४।१०) इकप्र० । 'अवर्णेवर्णस्य' (७।४।६८) इलुक् ।

अत्र 'इडेत्-पुसि०' (४।३।९४) इत्याकारे(र)लोपो द्विस्वरलक्षणे एयणिकं प्रत्ययविधौ परस्मिन् स्थानी न भवति, अन्यथा त्रिस्वरत्वात् प्रत्ययो न स्यात् ।

**[ ऐलुकीयः ]** इलुकाया अदूरभवं नगरमैलुकम् । 'निवासा-ऽदूरभव इति देशे नाम्नि' (६।२।६९) अण्प्र० → अ । 'वृद्धिः स्वरेष्वादे०' (७।४।१) वृद्धिः ऐ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । ऐलुके भवः = ऐलुकीयः । 'क-खोपान्त्य-कन्था-पलद-नगर-ग्राम-ह्रदोत्तरपदाद् दोः' (६।३।५९) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

**[ पारिखीयः ]** परिखाया अदूरभवं नगरं = पारिखम् । 'निवासा-ऽदूरभव इति देशे नाम्नि' (६।२।६९) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः आ । 'अवर्णेवर्णस्य' (७।४।६८) आलुक् । पारिखे भवः = पारिखीयः । 'क-खोपान्त्य-कन्था-पलद-नगर-ग्राम-ह्रदोत्तरपदाद् दोः' (६।३।५९) ईयप्र० । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् ।

अत्राण्याकारलोपः परविधौ कखोपान्त्यलक्षणो(णे) ईये स्थानी न भवति । पूर्वस्माद्विधिः प्राग्विधिरित्यप्याश्रीयते, तेन-

**[ अधुक्षन्त ]** 'दुहींक् क्षरणे' (११२७) दुह् । अद्यतनी अन्त । 'ह-शिटो नाम्युपान्त्याददृशोऽनिटः सक्' (३।४।५५) सक्० → स । तस्य 'दुह-दिह-लिह-गुहो दन्त्यात्मने वा सकः' (४।३।७४) इत्यादिना विकल्पत्वात्र लुक् । 'भ्वादेर्दादेर्घः'

Jain Education International For Personal & Private Use Only www.jainelibrary.org

(२।१।८३) ह० → घ० । 'ग-ड-द-बादे०' (२।१।७७) द० → ध० । 'अघोषे प्रथमोऽशिटः' (१।३।५०) घ० → क० । 'नाम्यन्तस्था-कवर्गात्०' (२।३।१५) षत्वम् । क-षयोगे क्ष । 'स्वरेऽतः' (४।३।७५) अलुक् । 'स्वरेऽतः' (४।३।७५) सकोऽकारलोपस्य परमप्यदादेशं प्रति स्थानिवद्भावः स्वरादेशात् प्राग्भूतात् यो विधिः इति स न भवति ।

पूर्वत्रावर्णविधाविति प्रतिषेधात् वर्णविध्यर्थं वचनम् ।।छ।।

**न सन्धि-ङी-य-क्वि-द्वि-दीर्घा-ऽसद्विधावस्कृलुकि ।। ७।४।१११ ।।**

**[ न ]** न प्रथमा सि ।

**[ सन्धिङीयक्विद्विदीर्घाऽसद्विधौ ]** सन्धिश्च ङीश्च यश्च क्विश्च द्विश्च दीर्घश्च असद्विधिश्च = सन्धिङीयक्विद्विदीर्घाऽसद्विधि, तस्मिन् ।

**[ अस्कृलुकि ]** स् च क् च = स्कौ, तयोर्लुक् = स्कृलुक्, न स्कृलुक् = अस्कृलुक्, तस्मिन् ।

'लि लौ' (१।३।६५) इति यावत्सन्धिविधिः, तत्र-

**[ वियन्ति अपयन्ति ]** 'इंण्क् गतौ' (१०७५) इ, वि-अपपूर्व० । वर्त्त० अन्ति । 'ह्विणोरप्विति व्-यौ' (४।३।१५) यत्वम् । अत्रेणो यत्वं स्वरादेशः परनिमित्तकः पूर्वविधौ दीर्घत्वे एत्वे च कर्त्तव्ये स्थानीव न भवति ।

**[ तानि सन्ति ]** तद् प्रथमा जस् । 'आ द्वेरः' (२।१।४१) द्० → अ० । 'लुगस्यादेत्यपदे' (२।१।११३) अलुक् । प्रथमा जस् । 'नपुंसकस्य शिः' (१।४।५५) जस्० → शि० → इ० । 'स्वराच्छौ' (१।४।६५) नोऽन्तः । 'नि दीर्घः' (१।४।८५) दीर्घः । 'असक् भवे (भुवि)' (११०२) अस् । वर्त्त० अन्ति । 'श्ना-ऽस्त्योर्लुक्' (४।२।९०) अलुक् ।

**[ तौ स्तः ]** तद् औ । अस् । वर्त्त० तस् । 'श्ना-ऽस्त्योर्लुक्' (४।२।९०) अलुक् ।

अत्रास्तेरल्लोपो यत्वे आवादेशे च कर्त्तव्ये स्थानी न भवति ।

**[ वैयाकरणः ]** पूर्ववत् ।

**[ सौवश्वः ]** शोभनोऽश्वो यस्य = स्वश्वः, स्वश्वस्येदं = सौवश्वः । 'तस्येदम्' (६।३।१६०) अण्प्र० → अ । 'य्वः पदान्तात् प्रागैदौत्' (७।४।५) वात् प्राग् औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

अत्र यत्ववत्वयोः स्थानिवद्भावादैदौतोरायावादेशौ न भवतः ।

**[ शिण्ढि ]** 'शिष्लृंप् विशेषणे' (१४९२) शिष् । पञ्चमी हि । 'रुधां स्वराच्श्नो नलुक् च' (३।४।८२) श्नप्र० → न । 'श्ना-ऽस्त्योर्लुक्' (४।२।९०) अलुक् । 'हु-धुटो हेर्धिः' (४।२।८३) हि० → धि० । 'धुटस्तृतीयः' (२।१।७६) ष० → ड० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) ध० → ढ० । 'म्नां धुड्वर्गेऽन्त्योऽपदान्ते' (१।३।३९) अनुस्वारः-ण० ।

**[ पिण्ढि ]** 'पिष्लृंप् संचूर्णने' (१४९३) पिष् । पञ्चमी हि । 'रुधां स्वरा०' (३।४।८२) श्नप्र० → न । 'श्ना-ऽस्त्योर्लुक्' (४।२।९०) अलुक् । 'हु-धुटो हेर्धिः' (४।२।८३) हि० → धि० । 'धुटस्तृतीयः' (२।१।७६) ष० → ड० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) ध० → ढ० । 'म्नां धुड्वर्गेऽन्त्योऽपदान्ते' (१।३।३९) अनुस्वारः-ण० ।

अत्र श्नस्याकारलोपो 'म्नां धुड्वर्गेऽन्त्योऽपदान्ते' (१।३।३९) इति वर्गान्ते कर्त्तव्ये स्थानी न भवति ।

**[ जक्षतुः, जक्षुः ]** 'घस्लृं अदने' (५४४) घस् । परोक्षा अतुस्-उस् । 'द्विर्धातुः परोक्षा०' (४।१।१) "घस्"द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) घ० → ग० । 'ग-होर्जः' (४।१।४०) ग० → ज० । 'गम-हन-जन-खन-घसः स्वरेऽनङि क्ङिति लुक्' (४।२।४४) अलुक् । 'अघोषे प्रथमोऽशिटः' (१।३।५०) घ० → क० । 'नाम्यन्तस्था-कवर्गात्०' (२।३।१५) षत्वम् । क-षयोगे क्ष । अत्र प्रथमत्वे घसेरुपान्त्यलोपः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

निमित्तापेक्षयापि प्राग्विधिरिष्यते तेन-

**[ नयनम् ]** नीयते = नयनम् । अनट्प्र० → अन । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ए । 'एदैतोऽयाय्' (१।२।२३) अय् ।

**[ लवनम् ]** लूयते = लवनम् । अनट्प्र० → अन । 'नामिनो गुणोऽक्ङिति' (४।३।१) गु० ओ । 'ओदौतोऽवाव्' (१।२।२४) अव्, इत्यत्र गुणस्य स्थानिवद्भावप्रतिषेधादयवादेशौ सिद्धौ । स्थानिवद्भावे त्वियुवादेशौ स्याताम् ।

**ङीविधौ - [ बिम्बम् ]** बिम्ब 'गौरादिभ्यो मुख्यान्ङीः' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । बिम्ब्याः फलं = बिम्बम् । 'हेमाऽऽदिभ्योऽञ्' (६।२।४५) अञ् । 'फले' (६।२।५८) लुप् । 'ङ्यादेर्गौणस्याक्विपस्तद्धित-लुक्यगोणी-सूच्योः' (२।४।९५) ङीनिवृत्तिः, तस्य परनिमित्तत्वेऽपि स्थानिवद्भावनिषेधात् 'अस्य ङ्यां लुक्' (२।४।८६) इत्यकारस्य लुग् न भवति ।

**[ आमलकम् ]** आमलक्याः फलमामलकम् । 'दोरप्राणिनः' (६।२।४९) मयट्प्र० । 'द्विगोरनपत्ये य-स्वराऽऽदेर्लुबद्विः' (६।१।२४) मयट्लुप् ।

**[ पञ्चखारः ]** पञ्चभिः खारीभिः कृतः = पञ्चखारः । 'कृते' (६।३।१९२) अण्प्र० । 'द्विगोरनपत्ये०' (६।१।२४) अण्लुप् ।

**[ पञ्चेन्द्रः पञ्चाग्निः ]** अग्नेर्भार्या = अग्नायी । 'पूतक्रतु-वृषाकप्यग्नि-कुसित-कुसीदादै च' (२।४।६०) ङीप्र०-ऐरन्तस्य च । इन्द्रस्य भार्या = इन्द्राणी । 'वरुणेन्द्र-रुद्र-भव-शर्व-मृडादान् चान्तः' (२।४।६२) ङीप्र०-आन् च अन्ते । पञ्चेन्द्राण्योऽग्नाय्यो वा देवताऽस्य = पञ्चेन्द्रः, पञ्चाग्निः । 'देवता' (६।२।१०१) अण्प्र० । 'द्विगोरनपत्ये०' (६।१।२४) अण्लुप् । 'ङ्यादेर्गौणस्याक्विप०' (२।४।९५) ङीनिवृत्तिः, तस्य स्थानिवद्भावप्रतिषेधात् तत्सन्नियुक्त आनागम ऐकारादेशश्च न भवति ।

**यविधौ - [ कण्डूतिः ]** 'कण्डूग् गात्रविघर्षणे' (१९९१) कण्डू इति सौत्रो धातुः । 'धातोः कण्ड्वादेर्यक्' (३।४।८) यक्प्र० → य । कण्डूयनं = कण्डूतिः । 'श्वादिभ्यः' (५।३।९२) क्तिप्र० → ति । 'अतः' (४।३।८२) इत्यनेन अकारस्य लोपः, परनिमित्तको 'य्वोः प्वय्व्यञ्जने लुक्' (४।४।१२१) इति यलोपे कर्त्तव्ये न स्थानिवद्भवति ।

**[ सौरी बलाका ]** सूर्य । 'सूर्येणैकदिक् = सौरी । 'टस्तुल्यदिशि' (६।३।२१०) अण्प्र० → अ । 'वृद्धिः स्वरे०' (७।४।१) वृद्धिः औ । 'अवर्णेवर्णस्य' (७।४।६८) अलुक् । 'अणञेयेकण्०' (२।४।२०) ङी । 'अस्य ङ्यां लुक्' (२।४।८६) अलुक् । 'सूर्या-ऽऽगस्त्ययोरीये च' (२।४।८९) यलुक्, अत्रैकोऽण्यकारलोपो द्वितीयो ङ्यो(यां) तयोः स्थानिवत्त्वाद्यकारस्यानन्तरो ङीर्न भवतीति यलोपो न स्यात्, स्थानिवद्भावः(व)प्रतिषेधात्तु भवति ।

**क्विविधौ - [ दयूः ]** 'देवृङ् देवने' (८१७) देव् । 'दिवूच् क्रीडा-जयेच्छा-पणि-द्युति-स्तुति-गतिषु' (११४४) दिव् । देवमानं दीव्यन्तं वा प्रयुङ्क्ते । 'प्रयोक्तृव्यापारे०' (३।४।२०) णिगप्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । देवयतीति दयूः । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'णेरनिटि' (४।३।८३) णिग्लुक् । 'अनुनासिके च च्छ्-वः शूट्' (४।१।१०८) व० → ऊट्० → ऊ । 'एदैतोऽयाय्' (१।२।२३) अय् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ लौः ]** लव । लवमाचष्टे । 'णिज्बहुलं०' (३।४।४२) णिच्प्र० । 'त्र्यन्त्यस्वरादेः' (७।४।४३) अलुक् । लवयतीति लौः । 'क्विप्' (५।१।१४८) क्विप्प्र० । 'णेरनिटि' (४।३।८३) णिज्लुक् । 'अनुनासिके०' (४।१।१०८) व० → ऊट्० → ऊ । 'ऊटा' (१।२।१३) औ । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

अत्र णिलुक्-अल्लुचौ क्विविधावूटि कर्त्तव्ये न स्थानिवद्भवतः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**द्वित्वविधौ** - **[ दद्ध्यत्र ]** दधि अत्र । 'इवर्णादेरस्वे स्वरे य-व-र-लम्' (१।२।२१) यत्वम् । 'अदीर्घाद् विरामैकव्यञ्जने' (१।३।३२) धकारस्य द्विः । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) ध० → द० ।

**[ मद्ध्वत्र ]** मधु अत्र । 'इवर्णादेरस्वे०' (१।२।२१) वत्वम् । 'अदीर्घाद्०' (१।३।३२) धकारस्य द्विः । 'द्वितीय-तुर्ययोः पूर्वौ' (४।१।४२) ध० → द० ।

अत्र यत्व-वत्वयोः स्थानिवद्भावाभावादेकव्यञ्जनलक्षणं धस्य द्वित्वं भवति ।

**दीर्घविधौ** - **[ शामंशामम् ]** 'शमू उपशमे' (१२३०) शम् । शाम्यन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । 'शमोऽदर्शने' (४।२।२८) ह्रस्वः । शमयन्तं प्रयुङ्क्ते । पुनः णिग् । अभीक्ष्णं शमनं पूर्वम् । 'ख्णम् चाभीक्ष्ण्ये' (५।४।४८) ख्णम्प्र० → अम् । 'णेरनिटि' (४।३।८३) णिलुक् । "दीर्घस्तु वा ञि-णम्परे" दीर्घः । 'भृशा-ऽऽभीक्ष्ण्या-ऽविच्छेदे द्विः प्राक् तमबादेः' (७।४।७३) द्विर्वचनम् । प्रथमा सि । 'अव्ययस्य' (३।२।७) सिलुप् ।

**[ अशामि ]** णिगु युक्त शमि मण्ड्यते । अद्यतनी त । 'भाव-कर्मणोः' (३।४।६८) ञिच्-तलोपश्च । "दीर्घस्तु वा ञि-णम्परे" दीर्घः । 'णेरनिटि' (४।३।८३) णिलुक् प्रथमं ततो दीर्घः । 'अड् धातो०' (४।४।२९) अट् ।

**[ शंशामंशंशामम्, अशंशामि ]** भृशं पुनः पुनर्वा शाम्यति । 'व्यञ्जनादेरेकस्वराद् भृशाऽऽभीक्ष्ण्ये यङ् वा' (३।४।९) । यङ्प्र० → य । 'सन्-यङश्च' (४।१।३) द्विः । 'व्यञ्जनस्याऽनादेर्लुक्' (४।१।४४) अनादिव्यञ्जनलोपः । 'मुरतोऽनुनासिकस्य' (४।१।५१) मोऽन्तः । शंशम्यमानं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग् । 'अतः' (४।३।८२) अलुक् । 'योऽशिति' (४।३।८०) यलुक् । अभीक्ष्णं शंशमनं पूर्वम् । 'ख्णम् चाभीक्ष्ण्ये' (५।४।४८) ख्णम्प्र० → अम् । द्वितीये अद्यतनी त । 'भाव-कर्मणोः' (३।४।६८) ञिच्-तलुक् च । "दीर्घस्तु वा ञिणम्परे" दीर्घः । 'अड् धातो०' (४।४।२९) अट् । 'णेरनिटि' (४।३।८३) णिलुक् । प्रथमोदाहरणे 'भृशा-ऽऽभीक्ष्ण्या०' (७।४।७३) द्विर्वचनम् । अत्र णिगन्ताद्यङन्ताच्च णिगि ख्णम्ञिचोः परयोर्णिग् ।

असदधिकारे विहितो विधिरसद्विधिः, तत्र-

**[ यायष्टिः ]** 'यजीं देवपूजा-सङ्गतिकरण-दानेषु' (९९१) यज् । भृशं पुनः पुनर्वा यजति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० → य । 'सन्-यङश्च' (४।१।३) द्विः । 'आ-गुणावन्यादेः' (४।१।४८) आ । यायजिषीष्टेत्याशास्यमानः = यायष्टिः । 'तिक्कृतौ नाम्नि' (५।१।७१) तिप्र० । 'अतः' (४।३।८२) अलुक् । 'य्वोः प्वय्व्यञ्जने लुक्' (४।४।१२१) यलुक् । 'यज-सृज-मृज०' (२।१।८७) ज० → ष० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) त० → ट० ।

**[ पापक्तिः ]** 'डुपचींष् पाके' (८९२) पच् । भृशं पुनः पुनर्वा पचति । 'व्यञ्जनादेरेकस्वराद्०' (३।४।९) यङ्प्र० → य । 'सन्-यङश्च' (४।१।३) द्विः । 'आ-गुणावन्यादेः' (४।१।४८) आ । पापच्यते इत्याशास्यमानः = पापक्तिः । 'तिक्कृतौ नाम्नि' (५।१।७१) तिप्र० । 'अतः' (४।३।८२) अलुक् । 'य्वोः प्वय्व्यञ्जने लुक्' (४।४।१२१) यलुक् । 'च-जः क-गम्' (२।१।८६) च० → क० । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ याष्टिः ]** 'यजीं देवपूजा-सङ्गतिकरण-दानेषु' (९९१) यज् । यजन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । याज्यादित्याशास्यमानः = याष्टिः । 'तिक्कृतौ नाम्नि' (५।१।७१) तिप्र० । 'णेरनिटि' (४।३।८३) णिग्लुक् । 'यज-सृज-मृज०' (२।१।८७) ज० → ष० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) त० → ट० ।

**[ पाक्तिः ]** 'डुपचींष् पाके' (८९२) पच् । पचन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'ञ्णिति' (४।३।५०) उपान्त्यवृद्धिः । पाच्यादित्याशास्यमानः = पाक्तिः । 'तिक्कृतौ नाम्नि' (५।१।७१) तिप्र० । 'च-जः क-गम्' (२।१।८६) च० → क० ।

अत्राल्लोप-णिलोपयोः स्थानिवद्भावप्रतिषेधात् षत्व-कत्वे भवतः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**[ देग्धिः ]** 'दिहींक् लेपे' (११२८) दिह् । दिहन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । देह्यादित्याशास्यमानः = देग्धिः । 'तिक्कृतौ नाम्नि' (५।१।७१) तिप्र० । 'णेरनिटि' (४।३।८३) णिग्लुक् । 'भ्वादेर्दादेर्घः' (२।१।८३) ह० → घ० । अधश्चतुर्थात् तथोर्धः' (२।१।७९) त० → ध० । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

**[ लेढिः ]** 'लिहींक् आस्वादने' (११२९) लिह् । लिहन्तं प्रयुङ्क्ते । 'प्रयोक्तृ०' (३।४।२०) णिग्प्र० । 'लघोरुपान्त्यस्य' (४।३।४) गु० ए । लेह्यादित्याशास्यमानः = लेढिः । 'तिक्कृतौ नाम्नि' (५।१।७१) तिप्र० । 'हो धुट्-पदान्ते' (२।१।८२) ह० → ढ० । 'अधश्चतुर्थात्०' (२।१।७९) त० → ध० । 'तवर्गस्य श्चवर्ग०' (१।३।६०) ध० → ढ० । 'ढस्तड्ढे' (१।३।४२) ढलुक् । प्रथमा सि । 'सो रुः' (२।१।७२) स० → र० ।

अत्र णिलोपस्य स्थानिवद्भावप्रतिषेधात् धुड्निमित्ते धत्व-ढत्वे भवतः ।

**[ प्रतिदीव्ना, प्रतिदीव्ने ]** प्रति 'दीवूच् क्रीडा-ज्येच्छा-पणि-द्युति-स्तुति-गतिषु' (११४४) दिव् । प्रतिदीव्यतीति प्रतिदीवा, तेन-तस्मै । 'लू-पू-यु-वृषि-दंशि-द्यु-दिवि-प्रतिदिविभ्यः कित्' (उणा० ९०१) कित् अन्प्र० । 'भ्वादेर्नामिनो०' (२।१।६३) दीर्घः । 'अनोऽस्य' (२।१।१०८) अलुक् । अत्र 'अनोऽस्य' (२।१।१०८) इति अलोपो 'भ्वादेर्नामिनो०' (२।१।६३) इत्यादिना दीर्घत्वे स्थानी न भवति ।

**[ सुकूः ]** सु 'कुस्मिण् कुस्मयने' (१८३७) कुस्म । 'चुरादिभ्यो णिच्' (३।४।१७) णिच्० → इ० । 'अतः' (४।३।८२) अलुक् । सुकुस्मयते = सुकूः । क्विपप्र० । 'णेरनिटि' (४।३।८३) णिलुक् । 'अप्रयोगीत्' (१।१।३७) क्विप्लोपः । प्रथमा सि । 'दीर्घङ्याब्०' (१।४।४५) सिलुक् । 'पदस्य' (२।१।८९) मलोपः । 'सो रुः' (२।१।७२) स० → र० । 'पदान्ते' (२।१।६४) दीर्घत्वम् ।

